Acc. No. 445
Subject प्रयोग
Name परशुसूत्र (बोधायन) सुबोधिनीव्याख्या
Author (व्या) महादेववाजपेयिन्
Age 1763 शक
Extent 92 pages
Language संस्कृत
Script नागरि

31"1x10"1

॥अथपशुसूत्रसुबोधिनिप्रारंभः॥

CENTRAL LIBRARY DEPARTMENT BARODA
SANSKRIT DIVISION.

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajigunj Tower,
BARODA-390 002.

ORIENTAL INSTITUTE
Tilak Road, Opp. Sayajigunj Tower,
BARODA-390 002.

श्रीगणेशायनमः ॥ ॐ दर्शपूर्णमासप्रकृतिं समाप्यानंतरं पशोर्विशेष उक्तो हौत्रेण प्रसंगात्पशुरारभ्यते पशुनायक्ष्यमाणोभवति
सउकल्पयत इति पशुप्रबंधात् पशुरितिपशुः द्रव्यकोयाग उच्यते सहिनित्यः तद्विधौ कर्मांते षट्सु षट्सु मासेष्विति वीप्सादर्शनात् का
म्यश्च सर्वेभ्यः कामेभ्यः पशुः सोम इतिवचनात् अयमैंद्राग्नोनिरूढः अस्यचप्रकृतिरग्नीषोमीयः पशूनांप्रकृतिः सापूर्वातंतिरथय
द्विदधातिसोत्तरातंतिरिति तल्लक्षणात् अग्नीषोमीये च पशौ नो कृत्स्नविधानात् तद्विकारऐंद्राग्नः अयंपशुः वायव्यादीनांप्रकृतिःऐंद्रा
ग्नोनिरूढः पशुबंधानांपूर्वातंतिः सर्वेकाम्याः पशवःउत्तरांतंतिरिति सूत्रंपूर्वोक्तस्य प्रकृतिविकृतिलक्षणस्यउदाहरणप्रदर्शनप
रं अतो न निरूढस्याग्नीषोमीयविकारत्वायां कश्चिद्विरोधः एवंभूतेन पशुना योयक्ष्यमाणो भवति सउकल्पयते यदुपकल्पनीयंत
दाह पौतुद्रवान्परिधीन् गुग्गुलु सुगंधितेजनं शुक्लामूर्णास्तुकां यापेत्वस्यांतराश्रृंगे द्वे रशने द्विगुणांचत्रिगुणांचद्वेवपाश्रपणी
विशाखांचाविशाखांचहृदयशूलंकार्ष्मर्यमयान्परिधीनौदुंबरंमैत्रावरुणदंडंमुखेन संमितमिध्माबर्हिरिध्मंप्रणयनीयंप्लक्ष
शाखामिडसूनंयवान्यवमतीभ्यः सक्तून्सक्तुहोमायपृषदाज्यायदधिहिरण्यमितीतिपौतुद्रवादीं चदारवान्परिधीन्गुग्गुलु १

प्रसिद्धंसुगंधितेजनंसुगंधितृणंशुक्लामूर्णास्तुकांऊर्णापिंडंयापेत्वस्यमेषस्यशृंगेअंतराशृंगयोर्मध्येगतशृंगयोर्मध्यगत्नं
उत्पन्नंतदुर्णासमुदायऊर्णास्तुकइत्यर्थः शीर्षण्याभावेअन्येतिकात्यायनः द्वैरशनेद्विगुणांचत्रिगुणांचकौशीरशनेतिकात्यायन
दर्भमय्यौरशनेभवतोद्विगुणाद्विव्यायामापशुरशनात्रिगुणात्रिव्यायामायूपस्येत्यापस्तंबः द्वेवपाश्रपणीवपाश्रप्यतेआभ्या
मितिवपाश्रपण्योपूर्वसवर्णदीर्घश्छांदसः विशाखांचशाखाभ्यांविशिष्टाविशाखानांचअविशाखांविशाखाशाखान्तद्वहितां
च॥ द्विशूलामेकशूलांचेतिभारद्वाजः हृदयशूलंचहृदयपाकसमर्थंहृदयशूलंकार्ष्मर्यमयान्परिधीन्वपाश्रपण्योहृदयशू
लंपरिधयइत्येतत्सर्वमपिकार्ष्मर्यमयंकुर्यात्कार्ष्मर्यमयानित्यस्यएतत्रितयविशेषणत्वात्कार्ष्मर्यमयानितिपरिध्यपेक्षया
पुंल्लिंगनिर्देशः कार्ष्मर्यमय्यौवपाश्रपण्याविति कार्ष्मर्यमयाः परिधयइतिचापस्तंबः औदुंबरंमैत्रावरुणदंडंमुखेनयजमा
नस्यआस्येनसंमितंदंडंयजमानमुखसंमितमितिकात्यायनः इध्माबर्हिः सामिधेनीनांसास्तदृश्यान्तदनुरूपइध्मः कार्यःइ
ध्मंप्रणयनीयंप्रणयनार्हंकाष्ठकलापंइडाइडासदंशीवसास्रुनाचइडस्तंद्रूस्वश्छांदसः इडाकुटिकोवेरलीवारणीतत्सर

प॰सू॰बो॰
२

श्रीसूत्राकरुक्ताहरयाग्रयवदानार्था इडासूत्रमिस्फुच्यते यवमिनीभ्यः अपेक्षितान्यवभृत्य आपस्तदर्थान्यवान्। सक्तून्भर्जित
यवपिष्टानि सक्तु होमार्यं। पृषदाज्य। यदधिहिरण्यमिति इदमुपलक्षणं यद्यत् पशुयागस्य तदंगानां चापेक्षितं द्रव्यमाज्यं पशुःपु
राडाशीयाः यूपः ऋत्विजः कंसं वा चमसं वा वसा होमार्थं पशुकुंभीं शरावपृषदाज्यग्रहणीमित्यादि तत्सर्वमुपकल्पयते त्याश
यः अस्यपशोः कालविशिष्टस्य विधिः समाम्नायते कर्मांते ऋतवः षड्ढोनेति षण्मास्य एष पशुबंध उक्तो भवत्यथाप्युदाहरंति
षट्सु षट्सु मासेष्वाहिताग्निना पशुनायष्टव्यं भवत्युभे काष्ठे अभियजेत माघमासे धनिष्ठाभिरुत्तरैपोत्ति भानुमान् अ
र्धश्रेषस्य श्रावणस्य दक्षिणोपनिवर्तत इत्येते काष्ठे भवतो तत्तोनी जानस्य संवत्सरो नातीयादिति अयमर्थः ऋतवः षड्ढोत्ते
तिश्रुत्या एषः षड्ढोत्र संबंधात् षड्ढोत्र शब्दलक्षितः पशुबंधः ऋतवः अत्र यथा ऋतवः षट्संख्यायुक्ताः तथा मासद्वाराष
ट्संख्यायोगात् पशुबंधस्तत्तव इति सूचयते स्म सा च विधिरुन्नीयते षण्मास्यः षट्सु षट्सु मासेषु कर्तव्य इत्युक्तो भव
तीति इत्थमुन्नीते पशुबंधस्य षाण्मास्यत्वविधो परितोषो नास्तीयस्य तत्प्रत्यतिस्फुटं श्रुत्यंतरमुदाहरति अथाप्युदाहरंतीत्यादि २

अथापि अतिस्फुटं श्रुत्संतरमप्युदाहरंति ब्रह्मवादिनः किमित्यत आह षट्सु षट्सु मासेषु आहिताग्निना पशुना यष्टव्यं भवति
अत्र षट्सु षट्सु हित्विनिवीसयानि सोयं पशुः। किं षट्सु षट्सु मासेषु यदाकदाचित्पशुना यष्टव्यमित्यत आह उभे काष्ठे अभियजे
नेति उभौ कालौ अभिलक्ष्य प्रवृत्तस्य यजेत वेलेकाष्ठे इत्यत आह माघमास इत्यादि अयमक्षरार्थः माघमासे कुंभस्थे सवितरि या अमा
वास्या भवति तदंतश्चांद्रमासो माघमासः तस्मिन् धनिष्ठाभिः धनिष्ठानक्षत्रेण न उत्तरां दिशं एति गच्छति भानुमान् धनिष्ठानक्षत्रं
स्वस्मिन्विद्यमानं भानुमंतं उत्तरां दिशं नयतीत्यर्थः तदा उत्तरायणं भवति तदारभ्य उत्तरां दिशं गच्छति श्रावणस्य सिंहस्थे सवितरि या
अमावास्या तदंतश्चांद्रमासः श्रावणः तस्य अधिकारणत्वस्य संबंधसामान्यरूपविवक्षया षष्ठी तस्मिन्नित्यर्थः अर्धाश्लेषस्य
आश्लेषस्य अर्धे अर्धाश्लेषः तत्संबंधी यदा भानुमान् भवति तदा दक्षिणा दक्षिणा दिशं उपनिवर्तते आश्लेषोत्तरार्धस्वस्मिन्विद्य
मानं भानुमंतं दक्षिणां दिशं नयति तदा दक्षिणायनं भवति एते काष्ठे अभियजेत इति शब्द उदाहरणसमाप्त्यर्थः॥ ॥
नन्वेवं नित्यसंयोगविरोधः नहि दसंभवति कदाचित्कं माघमासीयधनिष्ठाकरणकं भानुमत उत्तरायणं कदाचित्कं श्रावण

प॰सू॰टी॰ २ मासियाश्लेषसंबंधिनो भानुमतो दक्षिणदिक्गमनं रूपं दक्षिणायनं च प्रतीक्ष्य प्रतिसंवत्सरे षट्सु षट्सु मासेषु पुनिस्तेन
पशुना यष्टव्यमिति माघमासीयधनिष्ठाभिरुत्तरदिक्गमनस्य श्रावणमासाश्लेषोत्तरार्धसंबंधेन दक्षिणदिग्गमनस्य च क
दाचित्कत्वेन प्रतिसंवत्सरं तदभावेन तत्प्रतीक्षणानुपपत्तेः कदाचित्कं भानुमतो धनिष्ठाभिरुत्तरदिक्गमनं आश्लेषोत्त
रार्धसंबंधेन दक्षिणदिक्गमनं च उत्तरायणारंभकालस्य दक्षिणायनारंभकालस्य च प्रतिसंवत्सरं अन्योन्यस्य विलक्ष
णस्यैव सूर्यसिद्धांते भिधानात् प्राक्चक्रं चलितं हीने छायार्कात् करणागते अंतरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके इति
अयमर्थः सृष्ट्यादौ परमेश्वरेण सप्तविंशति नक्षत्राणि संस्थानविशेषवंति सृष्ट्वा कस्मिंश्चित् स्थानविशेषे स्थापयित्वा प्र
त्यक्चलनाय प्रेरितं तत्र प्राक्संचारिण आदित्यादयो ग्रहाश्च स्थापिताः तदेतत् भगण इति ज्योतिश्चक्रमिति ज्योतिः
शास्त्रे व्यवह्रीयते ज्योतिश्चक्रं हि सर्गादौ मकरसंक्रांतिकाले यत्र स्थाने स्थापितं तस्मात् स्थानात् चलनसप्तविंशतिः
नक्षत्रभागक्षेत्रं चलित्वा समनंतरमकरसंक्रांतिकाले पुनः प्राक्वत् स्थानमेवायाति परं तु चतुःपंचाशद्विकालात्मक २

नक्षत्रभागक्षेत्रं प्राक् भागे संबंध्य प्रविलंबते एवमेव ततः परेषु मकरसंक्रांतिकालेषु प्रत्येकं चतुःपंचाशत् विकलात्मकनक्षत्रभा
गे क्षेत्रप्राक्भागे संबंध्य प्रविलंबते तत्तत्क्रमेण स्वर्गादौ निर्दिष्टमेवस्थानं प्रयाति कदाचित्तु तद्देवचक्रं मकरसंक्रांतेः पूर्वमेव
चतुःपंचाशत् विकलात्मक नक्षत्रभागक्षेत्रमतीत्य पश्चात् गच्छति एवमेव ततः परेषु मकरसंक्रांतिकालेषु प्रत्येकं चतुःपं
चाशत् विकलात्मक क्षेत्रभागक्षेत्रमतीत्यातीत्य पश्चात् गच्छति तत्तत्क्रमेण स्वर्गादौ निर्दिष्टमेव स्थानं प्रयाति एवंस
ति एकस्मिंश्च तु युगे नवशतान्यावर्तपश्च प्रविलंबस्य संभवंति तथा च सूर्यसिद्धांते त्रिंशत् रुत्वा युगे भानां चक्रं प्राक् प्र
विलंबतु इति त्रिंशत्गुणितत्रिंशत् त्रिंशत् रुतिः तयान वभिः शते ः युगे चतुर्युगे भानां चक्रं प्राक् भागे प्रविलंबितेइ
त्यर्थः एवं ज्योतिषक सिद्धांते स्थिते मकरसंक्रांतिकालात् कर्कसंक्रांतिकालाश्च अयनसंक्रातिकालस्य एतावानंतराका
लाः एतस्मिन्समये संक्रांतेः पश्चादयनं भवति एतस्मिंस्तु काले संक्रातेः प्रागयनं भवतीति निर्णयार्थ प्रयत्नमिदं प्राक् चक्रं
चलितमित्यादि अत्र विज्ञेया अयनाभिधा इति पूर्वस्मात् श्लोकादनुवर्तते स्वर्गादौ परमेश्वरेण अत्र स्थानविशेषे भानं

चक्रंस्थापितं ततश्चलनसमयेमकरसंक्रांतिकाले॰कर्कसंक्रांतिकालेचप्राक्चलितंसृष्टिस्थानात्प्राक्देशसंबंधेनप्र
क्देशेचलितंचेत्प्रविलंबेत्स्थितंचेत् तस्यसृष्टिस्थानप्राप्तिःविलंबेनकतिचिद्दिनानंतरंभवतिचक्रस्यस्वस्थानप्राप्ति
कालएवअयनकालइत्युच्यतेतस्यैवच छायार्कइतिसंज्ञायतःतस्मिन्कालेअर्कःउत्तरायणेदक्षिणतःदक्षिणायनेउत
रश्चछायांकरोतिसंक्रांतिकालश्चकरणागतइत्युच्यतेसखलुछायार्कात्पूर्वमेवभवतितयोर्मध्येअधिकोयश्छायार्क
अयनकालस्तस्मात्हीनेकरणागतेसंक्रांतिकालेसतिशेषेःअवशिष्टेःअंतरांशेःअंतरालभूतेरंशेःविप्रकृष्टाःअय
नाभिधाःविज्ञेयाःअथकालचक्रंमकरसंक्रांतिकालेकर्कटसंक्रांतिकालेचसृष्टिकालनिर्दिष्टात्स्थानात्पश्चाच्चलि
तंचेत्संक्रांतेःपूर्वमेवायनकालइत्यागतंसंक्रांतिकालस्त्वधिकःतथातेनप्रकारेणएवमधिकेकरणागतेसंक्रांतिका
लेसतिआवत्सविपर्यस्याधिकासंक्रांतिकालाच्छायार्कअयनकालंहीनंकृत्वाशेषेरवशिष्टेरंतरांशेःअंतरालभूतेरंशे
संक्रांतेःपूर्वमेवअयनाभिधाःकालाविज्ञेयाइतिएवंचयदाचक्रंसंक्रांतिकालेप्राक्चलितंभवतितदेवकदाचिन्माघ ४

मासीयधनिष्ठाभिरुत्तरायणंश्रावणमासीयाश्लेषोत्तरार्धेनदक्षिणायनंचभवतिइदानींतुबहोः संवत्सरागण्यादारभ्यसंक्रांतिकाले
पश्चाच्चलतिकालचक्रंततश्चसंक्रांतेःपूर्वमेवअयनकालोज्ञायतेअनुभूयतेचछायापरिवर्तनात्अयनकालः तत्कथंइत्थंक
दाचित्कंमाघमासीयधनिष्ठाभिरुत्तरगमनंश्रावणमासीयाश्लेषसंबंधकृतंभानुमतोदक्षिणायनंचाग्निस्यन्नित्यःषट्सुषट्सुमा
सेषुकर्तव्योविधीयतेनित्यानित्यसंयोगविरोधादित्यतआहएतेकाष्ठेभवतइतिइमोउत्तरायणदक्षिणायनंप्रवृत्तिकालावेवअ
भिलक्षणीयौभवतःएतावेवप्रतीक्ष्ययजेतएतेनावश्यंमाघमासीयधनिष्ठानांनापिश्रावणमासीयाश्लेषोत्तरार्धसंबंधस्यादरः
कार्यइतिननुयस्यएतयोर्द्वयोरपिकाष्ठयोः उत्तरायणदक्षिणायनारंभकालयोः पशुनायष्टुंशक्तिर्नास्तितेनकिंकर्तव्यमित्यतआ
ह अंततइतिअंततइतिसप्तम्यर्थेसार्वविभक्तिकस्तसिः अंतयोः पूर्वयोरनयोर्यावंतौतयोः सतोरनीजानस्यकर्मत्वस्यसंबंध
सामान्यरूपत्वविवक्षयाषष्ठीनतश्चतयोरुत्तरायणदक्षिणायनारंभकालयोरनीजानंयजमानंशक्तिरहितंआहिताग्निंअत्र
यागानुकूलव्यापारत्वेनशक्तिः प्रतीयतेनेसंवत्सरोनातीयात्तदभावेप्रत्ययनारंभंपशुनायष्टुंशक्त्यभावेसंवत्सरेसंवत्सरेनियो

गत्तो यजेतत्तथा चाश्वलायनः निर्मित्तऐंद्राग्नः षाण्मास्यः सांवत्सरो वेति कात्यायनस्त्वाह पश्विज्या संवत्सरे प्रारब्ध्यावर्तिमुखयो
र्वेति अत्र प्रतिसंवत्सरं पश्विज्यायां प्रारब्धीति नियमः आपस्तंबस्त्वाह ऐंद्राग्नो निरूढ पशुबंधः सोर्यः प्राज्ञापत्यो वा तेन संवत्सरे य
जेत षट्सु षट्सु मासेषु इत्येके ऋतुव्यावृत्तौ सूर्यवस आवर्तिमुख आवर्तिमुखे वेति ननु इत्थं उभे काष्ठे अभियजेतेति उत्तरायण
दक्षिणायनप्रवृत्यनंतरे प्रथमदिवसे यजेतेति तत्रोभयत्रापि यजनशक्त्यभावे संवत्सरे संवत्सरे नियोगतः संवत्सरि संवत्सरे पशु
नायजेतेति विहितं कर्मांतिकल्पसूत्रेपि निरूढस्य पशोः कालो विहितः आमावास्येन वा हविषेष्ट्वा नक्षत्रे वेति । अत्र पशुनाय
क्ष्यमाणो भवतीत्यनुषज्यते अत्र आमावास्येन वा हविषेति स्फुटं नक्षत्रे वेत्यस्यायमर्थः पूर्वपक्षस्य पुण्याहे देवनक्षत्र इति कुतः
यान्येव देवनक्षत्राणि तेषु कुर्वीत यत्कारी स्यात् पुण्याह एव कुरुते इति स्वशाखायामनारभ्याम्नानात् अनारभ्याम्ना
तानां च प्रकृत्यर्थत्वात् प्रकृतिर्दर्शपूर्णमासयोः ज्योतिष्टोमे च प्राप्तं तत् प्रत्यक्षविहितेन कालेन बाधितत्वात् साक्षादत्र एव
द्विकृत्यर्थं भवतीति अपि वा य इष्ट्वा पशुना सोमेनाग्रयणेन वा यजेत सोमावास्यायां पौर्णमास्यां वा यजेतेति पशुसंतरमस्ति पशु ५

बंधस्यामावास्यापौर्णमासीविधायकंनतश्चैवैंद्राग्नस्यनिरूढस्यपशोरयनादावयनादौकर्त्तव्यस्यकथमेतेकालविधयोयुज्यंतेवि
रोधात्‌नस्ययनप्रवृत्त्यनंतरदिवसःआमावास्यस्यपजनीयमहर्भवतीतिनियमःनाप्ययनप्रथमदिवसस्यपूर्वपक्षपुण्याहदेवनक्षत्र
योगोभवतिनवाअयनसमनंतरदिवसोमावास्यापौर्णमासीवाभवतीतिनियमोस्तिनचअयनप्रवृत्त्यनंतरंप्रतीक्षयाआमावास्ये
नहविषेष्टयानक्षत्रेवेतिशास्त्रार्थःसंपाद्यतामितिवाच्यंएतेकाष्ठेअभियज्ञेतेतिशास्त्रार्थस्यउत्तरायणदक्षिणायनप्रवृत्त्यनंत
रप्रथमदिवसस्यपरित्यागापत्तेःअतःकथमत्रसमाधानमितिचेदुच्यतेषट्‌सुषट्‌सुमासेष्वित्यस्मिन्पक्षेअस्मत्सूत्रेअयन
प्रवृत्तिप्रतीक्षावाउक्तत्वात्‌कात्यायनेनआवृत्तिमुखयोर्वेतिप्रथममहःप्रतिपदकमुखशब्दप्रयोगात्‌आपस्तंबैरपिआवृत्ति
मुखआवृत्तिमुखेवेत्युक्तत्वात्‌अयनप्रवृत्तौसत्यांप्रथमेहन्येवकर्तव्यंलिंगंवात्रभवतिगृह्यपरिभाषायोअयनपशुप्रतिनि
धोस्मार्तेकर्मणि ॥ षट्‌सुषट्‌सुमासेष्वयनप्रवृत्तावितिकालविधानंसंवत्सरपशुपक्षेतुआमावास्येनहविषेष्टुनक्षत्रेवेति
विहितःकालःइष्टयादिवास्यविहितोवाकालआदरणीयःवस्तुतस्तुअयनपशुअभिप्रेत्यैवआमावास्येनवाहविषेष्टयानक्षत्रे

वेतिउक्तत्वादवगम्यते।आमावास्येनहविषेष्ट्वातस्मिन्नहनितस्यपूर्वपक्षस्यपुण्येनक्षत्रेवायजेनेतिनिर्द्देशेअथातःपशुबंधव्या
ख्यास्यामइतिप्रतिज्ञायाम्नायतेसहस्माहबोधायनःसोपवसथाइष्टिपशुबंधाइतिसोपवसथावासद्योयज्ञावेतिशालीकि
रितिइष्टयःविकृतीष्टयःपशुबंधाश्चनिरूढादयःनेसोपवसथाःकार्याःदर्शपूर्णमासविकारत्वात्सर्वेषांयद्यपीष्टिपशु
बंधानांयइष्ट्यादिवाक्येनविहितेपौर्णमास्यमावास्यकालौतौचप्रकृत्योर्दर्शपूर्णमासयोःउत्पत्तिविशिष्टकालाविरोधात्
प्रकृतिपशोरग्नीषोमीयस्यसोमयागकालानुरोधित्वात्विकृतिषुनिविशेतेनत्रचोदकेनैवतयोःप्राप्तिसंभवेयइष्ट्यादिवच
नेनपुनर्विधानंविकृतीष्टीनांसद्यस्कालत्वासिध्यर्थंननुकथमत्रइष्टिपशुबंधानांसोपवसथत्वमुच्यतइतितथापियइष्ट्यादि
वाक्यस्यस्वशाखायामभावात्अस्माभिर्यथाप्रकृतिसोपवसथत्वमेवादरणीयमितिबोधायनमतंशालीकिस्त्वाहयद्यपिअ
स्मच्छाखायांयइष्ट्यादिवाक्याभावादतिदेशात्सोपवसथत्वंभवतितथापिसर्वशाखाप्रत्ययत्वात्कर्मणांयइष्ट्यादिवाक्याव
गतंसद्योयज्ञत्वंविकल्पेननिविशतइतिपश्विष्टिविषयेद्वैधंइष्टिकरणइतिपशोपशावाग्नेयेनाष्टाकपालेनयजेतेतिबोधाय ६

नोबभ्रुकर्ण्यांचैवेतदजावन्यायांचरुर्भवतीतिशालीकिरितिइष्टिकरणेपश्वंगभूतायाइष्टेःकरणद्वमुच्यतेपशोपशोरीप्सास
र्वेषुपशुष्विष्टिसंबंधार्थासर्वेष्वपिपशुयोगेषुआग्नेयेनाष्टाकपालेनयजेतब्राह्मणेइमेवैसहास्तांतेवायुर्व्यवाद्तेगर्भमदधां
तातंसोमःप्राजनयदग्निरग्नसतसएतंप्रजापतिराग्नेयमष्टाकपालमपश्यत्तंनिरवपत्तेनैवैनामग्नेरधिनिरक्रीणात्तस्मा
दप्यन्यदेवत्यामालभमानआग्नेयमष्टाकपालंपुरस्तान्निर्वपेदग्नेरेवैनामधिनिष्क्रीयालभतइतिसमाम्नातंअत्रइमेद्यावा
पृथिव्यौसहास्तांतेवायुर्व्यवहितेकृतासंगमकरोत्तेगर्भंवन्यालक्षणमदधातांतंगर्भंसोमंप्राजनयतांतंजातंहविर्भागकामो
ग्निरग्नसततःसलोकस्रष्टाप्रजापतिरग्नेःसकाशादाग्नेयेनाष्टाकपालेननिरक्रीणात्तस्याज्जातमात्रस्यपशोरग्निगृहीत
त्वात्ततोनिष्क्रयणार्थमप्यन्यदेवत्यामालभमानःयद्वायुर्व्यचातस्माद्वायव्यादित्यादिवाक्यविहितप्रकृतदेवताभ्योप्यन्य
देवत्यांस्त्रीत्वमविवक्षितंगर्भपदेनैवप्राकृपरामर्शात्अन्यदेवत्यंपशुमालभमानआग्नेयमष्टाकपालंपुरस्तान्निर्वपेदप्यन्यदे
वत्यामित्यपिशब्दात्प्रकृतेप्याग्नेयोष्टकपालःकार्यःएवंसतिअग्नेरेवएनांएनंपशुमधिनिष्क्रीयालभतइतिसर्वेषुपशुयागेषु

प॰स्॰बो॰ आग्नेयस्याष्टाकपालस्य पुरस्तात्कर्तव्यत्वविधानात् अत्रपुरस्तात्कर्तव्यत्वविधानादवगम्यते यूपाकृतेः पुरस्तात्कर्तव्य इति
७ तथा च परिशिष्टेः कालउक्तः आपस्तंबेनतेन यक्ष्यमाणो मावास्यायां पौर्णमास्यां वा षड्ढोतारं मनसानुद्रुत्याहवनीये सग्रहं जु
होति सूर्यन्ते चक्षुरित्याग्नावैष्णवमेकादशकपालं निर्वपत्यग्न्यन्वाधानस्य प्रत्याम्नायो भवति सिद्धमिष्टिः संतिष्ठते धारय
हवनीयमुरु विष्णो विक्रमस्वेति स्रुवेणाहवनीये यूपाहुतिं जुहोति स्रुचा वा चतुर्गृहीतेनेति सोपवसथपक्षेत्तु पाणिसंमर्श
नात् पुरस्ताद्भवति वचनेन शालीकिस्त्वाह बभ्रुकर्ण्या च ब्राह्मणस्य तां बभ्रुकर्णीमालभेताभिचरन्वारुणं दशकपालं
पुरस्तान्निर्वपेद्वरुणेनैव भ्रातृव्यं ग्राहयित्वा ब्रह्मणा स्तृणुत इति विहितायां च बभ्रुकर्ण्या अजावशायां च सा वा एषा सर्वदे
वत्या यदजा वशा वायव्यामालभेत भूतिकामः द्यावापृथिव्यामालभेत कृषमाणः प्रतिष्ठाकामः अग्नीषोमीयमालभेत यः
कामयेतान्नवानन्नादः स्यामिति सारस्वतीमालभेत ईश्वरो वाचो वदितोः सन्वाचं न वदेत् प्राजापत्यामालभेत यः कामये ७
तानभिजितमभिजयेयमिति इति विहितायां चाजावशायामेव सतन् पुरस्तात्तु इष्टिकरणं यतः तत्रैव वारुणं दशकपालं

पुरस्तान्निर्वपदिति बभ्रुकण्वौ ॥ तस्मादन्यदेवत्यामालभमान आग्नेयमष्टाकपालं पुरस्तान्निर्वपेदिति अत्रावशायां द्‌
ष्टं प्रत्यक्षवचनं भवति नान्यत्र तस्मादन्यदेवत्यामालभमान इत्यस्यानुवाक्यस्य आग्नेयेनाष्टाकपालेन वशानि ष्केचुः प्रजा
पतेरन्यायावायव्यायादेवतानदृष्टवशांवशामालभमानोपीत्यर्थः अन्यथा अन्यदेवत्यामिति तद्धितप्रत्ययस्य नैरर्थक्यप्रसंगादि
ति अनेनैतद्धस्सूत्रेण पशुविशेषे विकल्पः प्रदर्शितः स च पशुः सोपवसथपक्षे सद्योयागपक्षे च साधारणः उभयथा साधारण्ये
न सूत्रप्रवृत्तेः कर्मान्ते अथायं पशुः सोपवसथ इति शालीकि बोधायनो भयसाधारणं पक्षमुपक्षिप्य प्रयोगानुक्रमणावसरे
अथ प्रातराग्नेयेनाष्टाकपालेन यजेतेति तु बोधायनस्य कल्प इत्यस्यानुक्रमणवाक्ये बोधायनस्य कल्पे इष्टिकरणमिति प्र
दर्शनेन शालीकिमते नेष्टिरित्यस्यातिस्फुटत्वात् आश्वलायनोप्याह पशुविशिष्टिकल्पं पशौ विशिष्टिरुभयत्रोन्यतरत्रो वा
ग्नेयी वाग्नावैष्णवी वा भवेदान्यतरा पुरस्तादिति अत्राग्नेय्याग्नावैष्णवी वेत्येकेनैव वा शब्देन सिद्धे द्विर्वाशब्दग्रहणं पशुविशिष्टिवि
कल्पार्थमिति सिद्धान्तसारदयः सद्योयागपक्षप्रयोगानुक्रमणपरे भाष्ये च सद्यस्कालेपि प्रातरग्नीन्विहृत्य षड्ढोतारं हुत्वा पशुविशि

प.सू.बो.
९

रूत्वा यूपाङ्गस्यादिति पश्विष्वभावपक्षेषड्ढोत्रादिति च प्रयोगदर्शनाच्चेति विज्ञेयं यूपोपकल्पनविषये द्वैधं स्फ्यो यूपो भवतीति
ति स्फ्याकार एव चषालवान् यूपो भवतीति बोधायनस्य य एवायमाग्न्यकारिको चषालो यूप स्यादिति शालीकिरिति ब्राह्मणस्यत्वं
तूपरमालभेताभिचरन्निति विहिते ब्राह्मणस्यत्वे पशौ बभ्रुकर्ण्यां च समाम्नायन्ते स्फ्यो यूपो भवतीति तत्र बोधायन आह स्फ्यो यू
पकार्यस्य पशुयोजनादेरसंभवात् स्फ्यादन्य स्फ्याकारः स्फ्यसदृश एवाचषालवान् चषालरहितो यूपस्यादिति शालीकिस्त्वा
ह स्फ्यो यूपो भवतीति यूपकार्यकर स्फ्यो भवतीति विधीयते तेन चात्र स्फ्यशब्देन लक्षणा युक्ता न विधेयपरः शब्दार्थ इति न्यायात्
अत अग्न्यगारिकः सदा अग्न्यागारे भवः स्फ्य एवायमचषालो यूपो नान्य इति युक्तमिति ननु ऐंद्राग्नो निरूढोयं पशुर्बंधोत्र निरू
प्यते कथमत्र ब्राह्मणस्यत्वपशौ बभ्रुकर्ण्यां च विहितस्य स्फ्यो यूप इत्यस्याप्रसक्तस्य विचारः क्रियत इति चेदुच्यते ऐंद्राग्नं निरूढं प
शुं पुरस्कृत्य सर्वोपि पशुः सामान्येनात्र सूच्यते अन्यथा यद्यैंद्राग्नार्थ एवायमारंभो भविष्यत् तु इंद्राग्निभ्यां त्वा जुष्टमुपाकरोमीति य
द्वेव सो वा भवतीति नावक्ष्यत् अत एव कर्मांते अथायपशुः सोपवसथ इत्यारभ्य निसादि सर्वपशुधर्मान्व्याख्यायत इत्युत्तर मनुक्रवि ९

शेषविवक्षया अथातः काम्यान्पशून्व्या[illegible]ख्यास्याम इत्युक्तं तस्मात्साधारणत्वात्पशुबंधसूत्रस्य युज्यते काम्यपशुयूपादिविचार इति अत्र
कर्मांतं स्फ्यो यूपो भवतीति कथमुखल्वस्य स्वरुरधिमंथने यूपशकल इति भवंतीत्येतस्यैवावतक्ष्णुयादपि वान्यस्य तज्जातीयस्य वृक्षस्य
कुर्याद्दचषाल एष भवति प्रोक्षणप्रभृतीन्मंत्रान्साधयेदापरिव्ययणात्तृतीयवेलायां परिव्ययेदेवमुपरसंमितायामिति स्फ्यो यूपो भवतीत्य
गा त्रस्फ्य एवाग्न्यै[illegible]रिक इत्यस्मिन्पक्षे अस्य पूर्वमेव मूलभागाद्भिन्नस्य उखल्विति वाक्यालंकारार्थौ निपातौ कथं स्वरुः अथोत्तरेणाग्नि
ष्ठामग्निं मध्यमे गुणे स्वरुमवगूहतीत्यवगूहितत्वेन विहितस्वरुः तथा अधिमंथने विषये सप्तमी अधिमंथनविषयास्त्रयः शकला यूप
शलाकाः यूपशकलमवास्यतीति यूपशकल इत्येते कथं भवंति स्फ्यस्य यूपस्य पूर्वमेव सिद्धत्वेन छेदनव्यापाराभावेन यूपच्छेदानुनिष्पन्ना
नां तेषामभावादिति प्रश्नः उत्तरमाह एतस्यैवेत्यादि एतस्यैव स्फ्यस्य पूर्वप्रसिद्धस्यैव अवतक्ष्णुयात्स्वरुयूपशकलादिलाभाय मू
लतः पूर्वमेवापगतमपि तं मूलभागे तक्ष्णुयादित्यर्थः अपि वान्यस्य यज्जातीयस्फ्यस्तज्जातीयस्य कस्यचिद्वृक्षस्य स्वर्वादि कुर्यात्
एष स्फ्य यूपः अचषालो भवति प्रोक्षणप्रभृतीन्पदार्थान् आपरिव्ययणात् परिव्ययणपर्यंतान्मंत्रान्मंत्रवंतः साधयेत् कुर्यात्तस्य

प॰सू॰बो॰

९ उपरिसंमितायांतृतीयवेलायांउपरितृतीयभागेएवंप्रसिद्धं यूपपरिव्ययणप्रकारेणपरिव्ययेत्मैत्रंश्वेतमालभेतवारुणंकृष्ण
मपांचौषधीनांचसंधावन्नकामइतिविधायाम्नायतेविशाखोयूपोभवतिद्वेस्येतेदेवनेसमध्याइतितत्रद्वैधंविशाखोयूपोभवतीत्यू
र्ध्वंरशनाकालाद्द्विशाखेचतुरश्रेअचषालेस्यातामथेतरोऽष्टाश्रिर्यूपस्यादितिबौधायनःविशाखैवेयमचषालास्यादथेतरोष्टा
श्रियूपस्यादितिशालीकिरितिविशाखोयूपोभवतीत्यत्रबौधायनआहऊर्ध्वंरशनाकालात्रशनास्थानादूर्ध्वंद्विशाखेचचतुरश्रे
चतुरश्रेवीप्साउभयोःप्रत्येकंचतुरश्रत्वसिद्ध्यर्थाअचषालेचषालरहितेस्यातांअथेतरःरशनाकालादूर्ध्वादन्यःयूपःयूपभा
गःअष्टाश्रिस्यादित्यत्रमतेविगमेविगतेशाखेयस्यसःविशाखोयूपइतिब्राह्मणार्थःतत्रस्वान्यपदार्थप्राधान्यात्बहुव्रीहेःअ
शाखाद्वयेसमंस्याद्रशनत्वादितिन्यायेनाष्टाश्रितस्यसमशोविभागेनान्वयोयुक्तइत्याशयःशालीकिस्त्वाहइयंशाखाशब्दम
पेक्ष्यस्त्रीत्वंऊर्ध्वंरशनाकालात्योयूपभागःअयमचषालरहिताशाखैवनशाखाद्वयंनचात्राष्टाश्रितायान्वयःअथेतरोयूप ९
इतरस्तु।अधस्ताद्यूपभागःअष्टाश्रीस्यादितिअत्रमतेगताविशेषेणप्राप्ताशाखायस्यसःविशाखोयूपइतिविग्रहःरत्नावकत्व

स्यौत्सर्गिकत्वात्तत्रचतत्तद्गुणसंविज्ञानेबहुव्रीहौतत्तद्वर्तिपदार्थस्यइतरपदार्थान्वयाभावेननयूपशब्दार्थाष्टाश्रिशब्दान्वयःतस्मा
द्देकोधोभागएवयूपइतिभावःआपस्तंबस्त्वाहविशाखोयूपइतिसूत्रंबोधायनस्यव्रीहीणामपिकुर्यादितिशालीकिरितिसक्तुक
रणद्दमुच्यतेसक्तून्सक्तुहोमार्थेतिसूत्रंसक्तवःभर्जितयवचूर्णानितांसक्तुहोमार्थमुपकल्पयेदित्येतदर्थकल्पसूत्रंबोधाय
नस्यमतंशालीकिस्त्वाहव्रीहीणामपिभर्जिततंडुलचूर्णानिसक्तवएवभर्जिततंडुलचूर्णमात्रेसक्तुशब्दप्रसिद्धेःततश्चयथाय
वानांसक्तवोहोमायोपकल्प्यंतेतथाव्रीहीणामपिसक्तूनांउपकल्पनंकुर्यादितिअथामावास्येनहविषेष्ट्वानक्षत्रेवेतिअथपशु
नायक्ष्यमाणोभवतीत्यनुवर्ततेव्याख्यातमेतत्गार्हपत्यआज्यंविलाप्योत्पूयस्रुचिचतुर्गृहीतंगृहीत्वाषड्ढोतारंमनसानुद्रुत्या
हवनीयेजुहोत्यन्वारब्धेयजमानेस्वाहेतिसूर्यंतेचक्षुरित्यनुवाकंयद्यपिषड्ढोषड्ढोतारोसूर्यंतेचक्षुरितिवाग्घोतेतिचानुवाको
तथापिप्रायश्चित्तीवाग्घोतेत्यनुमुखऋतुमुखेजुहोतीतिवचनेनऋतुमुखहोमेवाग्घोताषड्ढोतृणामितिवचनेनवोपधानेवा
ग्घोतेत्यस्यनियमितत्वात्अन्यत्रषड्ढोत्रग्रहणेसूर्यंतेचक्षुरितिनियमःकृतःखलुनियमःआपस्तंबेनअथैषऋतुमुखायषड्ढो

नावाग्घेतेति अत्रस्तनुमुखीय। इति विशेषणस्य नियमार्थत्वान्न तस्य सूर्यन्ते चक्षुरित्यनुवाकं होत्रामेरयस्वे संततं मनसानुद्रुत्य स्वाहेति वाचावदन् यजमानेन्वारंभं कुर्वति सति आहवनीये जुहोति ममाग्नेत्स्यानादि ष्टहवनीये होतव्यमिति सामान्यसास्त्रसिद्धत्वे पि आहवनीयग्रहणं उत्सर्गपक्षे पृथगाहवनीय षड्ढोतृहोमस्य यथा स्यान्माभूत् प्रधानार्थ आहवनीय इत्येतदर्थं आपस्तंबोप्याह षड्ढोतारं मनसानुद्रुत्याहवनीये सग्रहं जुहोति सूर्यन्ते चक्षुरिति अजस्रैरग्निभिरुरवसस्य स्मिन्पक्षे आरोपषड्ढोत्रर्थं प्रणयतं अरण्योरग्नी समारोप्योदवसाय मथित्वा स्याग्नौ। निहृत्से तस्मिन्पक्षे तु अरणीगतं मथित्वा विहारं क। स्मयि त्वागार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये सं। तति जुहोति मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहेतीति विहितस्य मनस्वती होमस्य प्रणयनं अथ षड्ढोतृहोमस्य भारद्वाजसूत्र सर्वेषामेव चतुर्होतृणां ततस्ततः शेषणाग्निपृथक्त्वं निषेधति यथाह प्राणा वा एते यच्चतुर्होतारो यश्चतुर्होतृ कृत्वाग्निमपनयेत् यजमानस्य प्राणान्विच्छिंद्यादिति विज्ञायते इति षड्ढोतृहोमानंतरं पुनर्विहृत्य कूष्मांड होमः का

र्यः धर्मप्रश्ने अथाग्न्याधेये यद्द्वादशे वहेऽनं यद्दीर्घ्यं तृणमहं वभूयायुश्चे विश्वतो दधदिति पूर्णाहुतिं हुत्वा अग्निहोत्रमारप्स्यमा
नो दशहोत्राहुत्वा दर्शपूर्णमासावारप्स्यमानः चतुर्होत्राहुत्वा चातुर्मास्यान्यारप्स्यमानः पंचहोत्राहुत्वा पशौ षड्ढोत्रा सोमे सप्तहोत्रा
विज्ञायते च कर्मादिष्वेतैर्जुहुयात् पूतो देवलोकान्समश्नुत इति ब्राह्मणवचनात् अत्र होमप्रकार आधानपूर्णाहुत्यनंतरं दर्शि
तः प्रथमे तु पशुप्रयोगे पूर्वेद्युर्नांदीमुखादि कार्यं श्वोभूते हुते प्रातरग्निहोत्रे स्नानपवनमंत्राचमनमंत्रप्रोक्षणपुण्याहवाचनादि
कृत्वा यशो रूपव्याहरणादि ऐंद्राग्नेन निरूढपशुना यक्ष्य इति विशेषः ततोन्वारंभणीयेष्ट्या यजेत सोपवसथपक्षे अयं षड्ढोत्र
होमः उपवसथात् समनंतरे यागदिवसे कार्यः द्वैधे षड्ढोतुर्होम इति सूत्रं बोधायनस्य उपवसथ एव षड्ढोतारं जुहुयादिति शा
लीकिरित्यत्र उपवसथ एव षड्ढोतारमित्यस्य प्रतिभटत्वेन सूत्रं बोधायनस्येति समाम्नातस्य बोधायनपक्षस्य स्यसोपवसथ
पक्ष उपवसथादनंतरे दिवसे कर्तव्य षड्ढोत्रहोम इत्यत्र तात्पर्याध्यवसायात् उपपन्नं स्येतत् पशुबंधेन यक्ष्यमाणः षड्ढोतारं म
नसानुद्रुत्याहवनीये जुहुयादिति ब्राह्मणे यक्ष्यमाण इति लृघटोघटनानयतनसाधारणभविष्यन्मात्र विवक्षतत्वेन पूर्वेद्युः कृ

रणेबाधकाभावात् उपवसथएव षड्ढोत्रा रमितिवदतिशालीकिः बौधायनस्यनुमते यद्यपियक्ष्यमाणइतिलघटोद्यत्तेनानद्य
तनसाधारणभविष्यत्काळइतित्वं नथापितस्मानद्यतनविभक्तिबाभावात् बाधकाभावेनागानांच प्रधानकालकर्तव्यत्वनि
यमत्वात् यागदिवसएवेतियुक्तं उपवसथेतुपशुनागस्यसान्नाय्यविकारात्तत्तोत्तिदेशाडुपवसथेयत्कर्तव्यंप्राप्तंतन्नकुर्यात्
तदिदमुक्तंद्वैधभाष्येबोधायनमते सूत्रंसोपवसथपक्षेविचारः पूर्वेद्युरग्न्यन्वाधानबर्हिर्लवनवेदिमानिध्मोभूतेषड्ढो
त्रादित्ति तत्रायंक्रमः प्रातर्हुतेग्निहोत्रे स्नानादिपंचकंकृत्वाउपव्याहृत्यऋत्विजोरत्नोदवसायाग्नीनन्वाधायउपव
सथस्यरूपंकुर्यात् शाखाहरणंतुशाखायावत्सापाकरणार्थत्वात् अत्रचवत्सापाकरणाभावात् नकर्तव्यंयदितुअग्नि
होत्रमेवदुग्धाश्रृद्दत्तस्थिनोत्पुनंतियदाखलुवैपवित्रमस्येतिअथतद्धविरितिती वचनेनपवित्रस्यपवनार्थत्वाच्चतदा
शाखापवित्रार्थंशाखाहरणंकार्यंमंत्रेणशाखामाच्छियनिदध्यात् वत्सापाकरणादित्वर्थलोपान्नकार्यंअथेध्माब ११
र्हिः सन्नहनंशाखाहरणपक्षेपवित्रकरणंयज्ञेपवित्रंपोत्तनंपयोहव्यंकरोतुमइतिसायंहुतेग्निहोत्रेपसुकुंभींव

पाश्रपर्ण्योर्हृदयश्शूलं शाखापवित्रंचसादयित्वा प्रोक्षणांतंकृत्वोपवसेत् अथश्वोभूते प्रातर्हुतेग्निहोत्रेषड्ढोत्रादियथाक
ल्पसूत्रंकर्तव्यं अस्मिन्दर्शनेत्वाहितमेवपाशुबंधिके आहवनीयेषड्ढोत्रादिशाली। कमतेतु अथायंपशुःसोपवसथ
इत्तिकर्मात्तोक्तः प्रयोगोग्राह्यः तस्यसूत्रस्यशालीकि बोधायनोभयसाधायरणं सोपवसथइतित्तस्यसूत्रस्यशालीकिम
त्ताभिप्रायत्वोपपत्तिः परंतुतत्र अथप्रातराग्नेयेनाष्टाकपालेनयजेतेतितु बोधायनस्यकल्पइत्यत्र बोधायनग्रहण
मिषिकरणात्पूर्वव्याख्यास्यते अपरंचतुर्गृहीतंगृहीत्वायूपाकृतिंजुहोत्करुविष्णोविचक्रमस्वोरुक्षयायनःकृ
धि। घृतंघृतयोनेपिबप्रप्रयज्ञपतिंतिरस्वाहेत्यो‍त्ति आहवनीयंपुनर्विहृत्य अपरंचतुर्गृहीतंपूर्ववत्संस्कृत्वासात् अ
परंचतुर्गृहीत्वा यूपाकृतिंजुहोतिसंज्ञाव्यवहारार्थात्तत्संज्ञकं मोहंकुर्यादुरुविष्णोविक्रमस्वेति अत्रेतद्बोध्यं यूपाहु
त्येहवनइति सूत्रंशालीके रत्नोहस्माहबोधायनआज्यंचारणीचादायपूपस्यांतिकेग्निंमथित्वायूपाहुतिंजुहुयादिति
यूपाहुतेसेयूपाहुत्याहवनेप्रकारः सूत्रंआहवनीयेहुत्वायूपस्यांतिकंगच्छन्त्वेष्मव्यर्चाहुत्वायूपंगच्छतीत्तिवचनादितिशा

लीकेर्मतं बोधायन आह आज्यं च प्राक् संस्कृतं श्रपणीं च आदाय यूपस्यांतिकं गत्वा तत्राग्निं मथित्वा तस्मिन्नग्नौ यूपाहुतिं जुहुया
दिति यूपसकाशे वाग्निं मथित्वा तस्मिञ्जुहुयादित्यापस्तंबः अपरं चतुर्गृहीतं गृहीत्वा यथा चसामस्थालीं स स्रुवा बर्हिर्हिरण्य
मुदपात्रं च नयंति तत्क्षणं स परशुर्मेहि यजमानेनेतीति अथ पूर्वं संस्कृतादेवाज्यात् अपरं चतुर्गृहीतं गृहीत्वा यथाचति आज्यस्था
लीं मिश्राणि एहि यजमानेनेतीति आहेति शेषः स्पष्टमन्यत् स्रुवमाज्यशीर्षं चाध्वर्युरादत्ते तस्मा शास्त्रमित्यापस्तंबः पूर्वया
द्वारोपनिष्क्रम्यत्तां दिशं यंति यत्रास्य यूपस्य देशो भवति यत्र वा वेत्स्यमन्यत इति पूर्वया द्वारा पशुबंधशालायाः स्पष्टः प्रभान्तः
यत्र वा वेत्स्यन्तृलस्यत इति मन्यते अवश्यमत्र भविष्यतीति मन्यत इत्यर्थः स्पष्टमन्यत् सम: समे भूम्येरचाप्योनेरूढोव
हुपर्णो बहुशाखोप्रतिशुष्काग्रः प्रत्यगुपनतस्तमुपतिष्ठतेत्यन्यानगान्तान्यामुपागा मर्वाक्रापेरविदं परो देरै स्तं त्वाजु
षे वैस्म वं देवयज्यायाइतीति यः भूम्येभूम्याः षष्ठ्यर्थे चतुर्थी समे देशे स्यात् स्त्रीयाप्योनेवीजात्तुरूढः अंकुरितः स्वयमु
त्थितो न तु शाखात उत्थित इत्यर्थः बहुपर्णो बहुशाखो प्रतिशुष्काग्रः प्रत्यक् यथा भवति तथा उपनतः प्रतीचीं प्रत्युप १२

नइत्तियावत्त् एवंलक्षणोयः सयूपइत्यर्थः समेशाखामशाखाजंबकुपर्णशाखामप्रतिशुष्काग्रमसुषिरमव्यारत्नमधूर्णमृजुमूर्ध्वशा
कलेअग्रंइषडुपावनतंप्रोदङ्प्रत्यङ्योपनमित्यापस्तंबः समुपतिष्ठतेत्यन्यानगामितिछंदोगास्तुसमामनंतियूपंकरोतिसक्षीरं
स्थूलमूलेवालेग्रंअनुरूपेमितितथाअष्टाश्रीःकरोतीतितथापंचदशसप्तदशैकविंशत्यरत्निंवापालाशंपुष्टिकामस्येबेल्वंब्रह्मव
र्चसकामस्योडुंबरमन्नाद्यकामस्यतत्रवर्जनीयाभवंतिगडुलोरणुलोव्यारत्नःकुटिःकुब्जःभूलोदग्धःशुष्कःसुषिरोघुणजाधइस
प्रशस्ताअथप्रशस्ताःशुद्धावर्ताअनुपूर्वसमाःप्रशस्ताइतितथामूलमरत्निस्त्वचनिस्त्वचभरवेदितितथाइंद्रस्यचषालंयदूर्ध्वंच
षालस्यांगुलमात्रंकार्यमत्साध्यानांदेवानामित्यादिअत्रछंदोगब्राह्मणेयूपसाक्षीरयस्यप्रकृतित्वंमूलेस्थूलत्वंवालाग्रत्वा
दिकंचविहितंअत्रपालाशंपुष्टिकामस्येत्यादिनापुष्पादिलक्षणेफलेपालाशादिप्रकृतिद्रव्यंविधीयतेतत्रचकामनारहितस्य
यजमानस्यएतएवपालाशादयोविकल्पेनानुष्ठेयाइतिन्यायंअस्यछंदोगब्राह्मणस्यअनारभ्याधीतत्वात् अनारभ्याधीतानां
चप्रकृतिगामित्वनियमादत्रविहिताधर्माःप्रकृतिमग्नीषोमीयंपशुमाप्यततोतिदेशेननिरूढादिकमपिपशुयागंप्राप्नुवंती

तिसिद्धंआपस्तंबसूत्रनित्यानिकाम्यानिचयूपस्यप्रकृतिद्रव्याणिविदधातियूपवृक्षाःपलाशखदिरबैल्वरोहितकाःपालाशंतेजस्का
मोवाखादिरंस्वर्गकामोवीर्यकामोवाबैल्वमन्नाद्यकामोब्रह्मवर्चसकामोवारौहितकंप्रजाकामश्चक्षुष्कामोवेति॥ऐतरेयेपिणस्तकसमा
मनंतिखादिरंयूपंकुर्वीतस्वर्गकामःबैल्वंयूपंकुर्वीतान्नाद्यकामःपुष्टिकामःपालाशंयूपंकुर्वीततेजस्कामोब्रह्मवर्चसकामेब्रह्म
वर्चसका।मइतिअथैनमाञ्जेनानक्तिदेवस्त्वासवितामध्वानक्त्वितीतिस्पष्टंउर्ध्वाग्रंबर्हिरन्तर्धायसोषधेत्रायस्वेनमितीतिस्पष्टंस्व
धितिनातिर्यंचंप्रहरतिस्वधितेमैनंहिंसीरित्तीतिस्वधितिनापरशुनावृक्षंतितत्क्षाणंसपरशुमित्यफलत्वात्परशुसाध्यत्वाच्च
यूपच्छेदनस्यनहिमांसावदानार्थेनस्वधितिनायूपच्छेत्तुंशक्यतेअसमर्थस्वधितिग्रहणोअदृष्टार्थत्वास्यात्यःप्रथमःशकलः
परापततितंप्रज्ञातंनिदधातीतिस्पष्टंतमपरिभिंदन्नक्षसंगंवृश्चतीतितंपरशुनाप्रहृतंअपरिभिंदन्अपाटयन्अनक्ष
संगंनभवत्यक्षस्यसंगःसयोगोयस्मिन्कर्मणितद्यथाभवतितथाअनक्षसंगंअक्षोयावतिप्रदेशेस्थाणोनसज्यतेशकटस्यग १३
च्छतोधोक्षंयथास्थाणुर्भवतितावतिप्रदेशेवृश्चतितिकिंयात्प्राचंवोदंचंवाप्रपातमनुमंत्रयतेदिवमग्रेणमालेखीरंतरिक्षंम

ध्येन माहिꣳसीः पृथिव्या संभवेतीति प्रांचं वोदंचं वा प्रयांतं एतं त्तेन अर्थाद्यथा प्राङ्वोदङ्वापतन्ति तथारभ्येदिति गम्यते तथा
चापस्तंबः दिवमग्रेण मा लेखीरिति प्रांचं पातयत्युदंचं प्रांचमुदंचं वेति अथारभ्वने हिरण्यं निधाय संपरिस्तीर्याभिजुहोति वनस्प
ते शतवल्शो विरोहस्वाहेतीति अथ दिवमग्रेणेत्यनुमंत्रणानंतरं आव्रश्चने आव्रश्चने स्वादित्या व्रश्चन स्थाणुस्तस्मिन् हिरण्यं नि
धायेत्यादि स्पष्टं जुहूरूढाने चतुर्गृहीतेन होमः सहस्रवल्शा विवयꣳ रुहेमेत्यात्मानं प्रत्यभिमृशत इति स्पष्टं अत्रोदकस्पर्शनं कार्यं
छेदनादि धूदकोपस्पर्शनविधानात् अत्रेद्वैधं आव्रश्चनस्याभिहोम इति सूत्रं शालीकेरत्रोहस्माह बोधायन एवमेव जुहुयाद्भूमं
तर्धाय हिरण्यमभि जुहुयात् वनस्पते शतवल्शो विरोहस्वाहेति सहस्रवल्शा विवयꣳ रुहेमेत्यात्मानं प्रत्यभिमृश्योदकं स्पृशेदिति
ति आव्रश्चनस्याभिहोमविषये द्वैधमुच्यते सूत्र अथाव्रश्चने हिरण्यं निधायेत्यादि कल्पसूत्रं शालीके र्मतं बोधायनस्त्वाह वनस्प
ते शतवल्शा इति मंत्रेण कल्पसूत्रोक्तप्रकारेणैव जुहुयात् परंतु जुहूं जुहूं स्थिते आज्येन हिरण्यमंतर्धाय न त्वाव्रश्चने हिरण्यं निधा
य ब्राह्मणे आव्रश्चने जुहोतीत्येव वचनात् सहस्रवल्शा इत्यादि गतं अन्वग्रं शाखाः प्रसूदयन्ति यं त्वायꣳ स्वधितिस्तेतिजानः प्रणि

नायमहत्तेसोभगायेत्तीतिअन्वग्रंमूलादारभ्यअग्रपर्यंतंमानुलोम्येनशाखाःप्रसूरयतियंत्वायमितिनप्रातिलोम्येननुयूपंकिंपदरत्निं
वृश्चेदित्यत्रआहपंचारत्निंतस्मैवृश्चेदित्येषब्राह्मणवनामवमइतिब्राह्मणवत्ताब्राह्मणविहिताःकल्पाःब्राह्मणवंतःपंचारत्निंत
स्मैवृश्चेद्यंकामयेतोपेनमुत्तरोयज्ञोनमेदितिषडरत्निंप्रतिष्ठाकामस्यसप्तारत्निंपशुकामस्यनवारत्निंतेजस्कामस्यएकादशार
त्निमिंद्रियकामस्यपंचदशारत्निंभ्रातृव्यवतःसप्तदशारत्निंप्रजाकामस्यएकविंशत्यरत्निंप्रतिष्ठाकामस्येत्यष्टौतेषांमध्येपंचार
त्निंतस्मैवृश्चेदित्येषकल्पःअवमःस्वल्पःलघुतरनुयलसाध्यइतियावदतोअयमेवपक्षःआदर्तव्यःयदातुफलगौरवेप्यनायासःन
दोषडरत्न्यादयोप्यनुष्ठेयाःब्राह्मणवतांकामसंबंधेपियूपंमिनोतीतिसामान्यवचनात्अन्यस्यचपरिमाणस्यावचनात्तेषांच
संनिहितत्वादेतएवनित्याइतियुक्तंएतेषांविशेषानवगमात्तत्तद्विकारेष्वप्येवमेवप्रवृत्तिरविरुद्धाएषब्राह्मणवत्ताभवइतिचब्रुव
न्नूषट्अरत्न्यादयोपिविकल्पेनैवग्राह्याइतिबोधयतिआपस्तंबस्त्वाहपंचरत्निमितिकाम्याएकारत्निप्रभृत्यास्त्रयस्त्रिंशदरत्नेर २४
व्यवायेनकेसमामनंतीतिअत्रकर्मातंपंचारत्निप्रभृतयःपाशुबंधिकायूपाभवंतिआनवारत्नेर्नवारत्निप्रभृतयअग्निष्टोमिका

यूपाभवंत्येकविंशत्यरत्नेस्त्ररत्निश्चतुररत्निर्वा निरूढपशुबंधस्यपालाशोयूपइति ब्राह्मणसमाम्नाताः पंचारत्निप्रभृतयअनवा
रत्नेर्मर्यादायामाङ् नवारत्निंविनाततः पूर्वाः पंचारत्निषडरत्निसप्तारत्नयोयूपाः पशुबंधस्यक्रतोरंगभूताः ननुकिमर्थमिदमुच्य
तेपाशुबंधिकाइति तत्तो यूपानांपशुनियोजनद्वारापशुयागोपकारेनेयतेनानुकूलसिद्धमिति चेन्नयथाकिंत्व ब्राह्मणएवविहि
तानवारत्निप्रभृतयतएकविंशत्यरत्नेरभिविधावाङ् एकविङ्शत्यरत्निनासहनवारत्न्येकादशारत्निपंचदशारत्निसप्तदशारत्नि
एकविंशत्यरत्नियअग्निष्टोमिकाआग्नीषोमीयादिपशूपकारद्वाराअग्निष्टोममध्यानुष्ठानेनाग्निष्टोमस्यसोमयागस्यांगभूताव
स्यंतेनेवमेतेपंचारत्निप्रभृतयः किंयंतेपृथकृतंत्राः पशवः वायव्योवैश्वदेव्याश्वाश्वमेधेचातुर्मास्यपशवः एवमादिषुकर्तव्याइ
त्यभिप्रायादित्थंव्यवस्थायांशाखांतरंमूलंभविष्यतीत्यवगंतव्यंनवारत्निप्रभृतयइत्यादिगूनंनिरूढपशुबंधस्यतुयूपः पलाशःप
रुशप्रकृतिकः अरत्निश्चतुररत्निर्वायूपोभवति आपस्तंबोप्याह त्र्यरत्निश्चतुररत्निर्वापलाशोनिरूढपशुबंधस्यातोन्यःसोम्यस्याध्व
रस्येतिवाज्यसनेयकमितिनंपरिषंगपरमंप्रारेशावमंचषालस्यकालेपरिवासयस्यच्छिन्नोरायःस्ववीरइतीलितंपूर्वोक्तानांपं

प.सू.बो. चारत्निप्रभृतीनांअन्यतमेनाभिमतपरिमाणेनपरिच्छिन्नंपरिष्वंगपरमंपरिष्वंगः परमःपरिणाहस्यपराकाष्ठायस्यतत्प्रदेशावमंत्र
१५ देशःअवमःपरिणाहस्यअल्पीभावोयस्यतंपरिष्वंगोः परिमाणप्रभृतिषुत्रारेश्यपरिमाणेषुयेनकेनचित्परिमाणेनयुक्तमित्य
र्थः चषालस्यकालेचषालसंबंधिनिस्थानेपर्यासेसतिचषालस्थानेनसहपरिवासयतिसहपूर्वोवासिच्छेदनेवर्तनेतेच्छिन्नस्यच्छि
न्नइतिमंत्रेणचषालस्यहिस्थानंचतुरंगुलंयूपपरिमाणापेक्षयाअधिकमन्यथाचषालस्यकालइत्यस्यानेरर्थक्यस्यप्रसंगा
त्चषालादूर्ध्वमंगुलिमात्रमधिकंयथाभवतितथाचषालस्थानंकार्यमितिछंदोगब्राह्मणउदाहृतंहिदूर्ध्वंचषालस्यांगुलमा
त्रंकार्यमितिसत्याषाढस्त्वाहयावदिदंप्रथममंगुलिकांडंतावदूर्ध्वंचषालाद्यूपस्यातिरेचयत्यंगुलिमात्रंकनीयोनांगुलेद्व्यं
गुलंत्र्यंगुलंचतुरंगुलंवेतिभारद्वाजस्त्वाहअथेनंनातिस्थूलंनात्यणुमग्रेणीयांसमष्टाश्रिंकरोतिमूलतउपरमतष्टंभव
त्यग्रतश्चषालप्रथममात्रमष्टाश्रिमध्येसंनतंयावदुत्तममंगुलिकांडंतावदूर्ध्वंचषालाद्यूपस्यातिरेचयतित्र्यंगुलिमित्येके १५
षांत्र्यंगुलिमित्येकेषामितिआपस्तंबोप्याहअग्राच्चषालंकुर्याद्यावदुत्तमंगुलिकांडंतावदुत्तंचषालाद्यूपस्यातिरिक्तंद्व्यंगु

लं चतुरंगुलं चेतियत्परं भवंतितस्य चतुरंगुलं चषालाय प्रच्छेदयन्तीति चषालस्य स्थानेन सह परिवासितात् छिन्नात् परमूर्ध्वं
पन्नं चषालाय चषालार्थं चतुरंगुलं प्रच्छेदयति छिनत्ति चषालं चतुरंगुलं चतुरश्रिमष्टाश्रि वा मध्ये संनतमंतः सुषिरं कृत्वा यूप
स्याग्रं चषालस्य स्थालं चषालापेक्षया अंगुलिमात्राद्विपरिमाणेनकेन चिदतिरिक्तं यथा भविष्यति तथा परितक्ष्य तस्मिन् यूपा
ग्रे ऊर्ध्वं प्रतिमुंचेत् तदुत्तरत्र प्रयत्नश्च चषालं यूपस्याग्रमनक्ति देवस्त्वा सविता मध्वानक्त्वित्यंतरम्य स्वभ्यक्तं कृत्वा चषालं प्रतिमुंचतीति व
क्ष्यमाणत्वात् कात्यायनस्त्वाह अष्टाश्रिं करोत्युपरवर्जं अग्राच्चषालं प्रथमात्रमष्टाश्रिमध्यसंगृहीतमूर्ध्वमग्रे प्रतिमुंचति द्व्यंगु
लं त्र्यंगुलं वा तत्र इतिक्रांतं यूपस्येति तं चतुरश्रिं वाष्टाश्रिं वा कृत्वा बाहरत्वा वाहरयसो स्वनस्तिष्ठ स्ववत्लक्षणानामेव स्वरूं कुरुतइ
ति तं पंचारत्निं तस्मै वृश्चेदित्यापस्तंबाभिहित परिमाणयुक्तं यूपं चतुरश्रिमष्टाश्रिं वा कृत्वा चतुरस्रादिकरणमुपरप्रदेशादूर्ध्वं
मूलमरत्निं खनित्वा निखनेदिति छंदोगब्राह्मणात् भारद्वाजस्त्वाह मूलतउपरमतष्टं भवतीति तेन मनष्टं उपर इति सत्याषाढः उ
परशब्देन उपरवार्ह्यप्रदेशोऽभिधीयते तनस्त्वउपरवार्ह्यप्रदेशवर्जं अष्टाश्रिं करोति उपरप्रदेशादारभ्य पंचारत्न्यादिपरिमाणं

बोध्यं अथायंयूपो यजमानस्यारत्निसंमितोभवतिइतिकर्मान्तसूत्रात् ब्राह्मणव्याख्यातानिकाम्यानि यूपप्रमाणानितेषांयथा
कामीसहोपरेषासंख्यास्यादिचसत्याषाढःआवाहयतिमनुष्यैरूयम्प आवाहारयति आहारयतिवाशकटादिनाओह्यनस्ति
ष्ठति अत्रवेस्मनुवर्तं ओह्यवानिस्तिष्ठतिअष्टाश्र्यादिकरोतिअवतक्षणानामेवशकलानांमध्येएकंशकलंस्वरुंकुरुतेएवशब्दात्
नत्याखांपादयित्वानान्यरसस्यवेस्फक्तंभवतिस्वरुमिस्कपरलक्षणमधिमंथनाश्वशकलान् अवतक्षणानामेवकुर्यात् अत्रकर्मा
न्तमुखत्वस्यस्वरुरधिमंथनेयूपशकलइतिभवंतीतिस्मय्यूपेविचारणाहिंगात् अत्रैद्वैधंयूपस्यावाहनइतियःप्राङ्वोदङ्वाप
येततमावाहयेदितिबोधायनोयांकांचदिशामपियथेनाव्यापन्नश्चेत्स्यात्तदावाहयेदेवेतिशालीकिरितितंचतुरश्रिंवाष्टाश्रिं
वा कृत्वावाहरन्तीस्फक्तआवाहनेविषयइदमुच्यतेयूपः प्राङ्वोदङ्वापद्येततेपद्यंततःसततंयूपंआवाहयेत् यूपत्वेनगृह्णीयात्
ततोन्यत्रपतितंव्यापन्नवत्परित्यजेदितिबोधायनःशालीकिस्त्वाहयांकांचदिशामपिपयेतपततदपिशाब्दमपिप्रयोजनंपा १८
तविशेषाअयपेनास्तिप्रयोजनमितिसःअव्यापन्नःपाटनभंगादिव्याप्तिरहितश्चेत्स्यात्तदातमावहयेदेवव्यापन्नश्चेदन्यो

आस्यरति अथास्यैषापूर्वेस्युरेवपाशुबंधिकीवेदिर्विमिताभवतिद्वशयदापश्चात्तिरश्चीद्वादशपदाप्राच्यष्टापदापुरस्तात्तिर
श्चीतांपरिस्तीर्यस्तंबयजुर्हरतीति अथतांपरिस्तीर्यस्तंबयजुर्हरतीत्यन्वयः अथास्यवेमि. र्विमिताभवतीत्यन्वस्यपूर्वे
स्युरवेस्यनेनविरुध्यतयाबाधितत्वादस्ययजमानस्यपाशुबंधिकीपाशुबंधार्थावेदिः तस्याः लक्षणमाह दशपदादशपदानियस्याः
सापरं पंचदशांगुलमितिशुल्बेएतावतीपश्चात्तिरश्चीद्वादशपदाप्राचीअष्टापदापुरस्तात्तिरश्चीतिएषाएवंभूतापाशुबं
धिकीवेदिः पूर्वेस्युरेवउपवसथेसद्योयागेचपक्षद्वयेपिपूर्वेस्युरेवविमिताभवतिअत्रसोपवसथपक्षेबोधायनमतेपूर्वेस्युरग्न्य
न्वाधानबर्हिर्लवनवेदिमानानिश्वोभूतेषट्होत्राहिशालीकिः सोपवसथपक्षेतुअथायंसोपवसथइतिकर्मांतसूत्रोक्तक्रमे
णयूपाहरणानंतरंपूर्वेस्युरेवावेदिमानंमिस्कंकंषट्होत्रहोमइतिद्वैधव्याख्यानावसरेतांपरिस्तीर्यसर्वतोग्नीन्परिस्तीर्यस्तंब
यजुर्हरतिवेदेः परिमाणांतरमप्युक्तंशुल्बेद्वाशपदापश्चात्तिरश्चीद्वादशपदाप्राच्यष्टायदापुरस्तात्तिरश्चीतिपाशुबंधिकायावे
देर्विज्ञायन्तेमानयोगेनतस्याः व्याख्यातोरथसंमितेत्येकेषांविराट्संपन्नस्येकेषांशम्यामात्रीचतुरस्त्रांत्क्रिर्भवन्तीत्युत्तरवेदेर्विज्ञा

यत्तेसमचतुरस्राविशेषादिति अत्रदतिपाश्रुबंधिकायावेदे विज्ञायतइति पर्यतं स्फुटं तस्याः पाश्रुबंधिकायावेदेर्मानयो
गोमानप्रकारोव्याख्यातः पूर्वदीर्घचतुरस्रं चिकीर्षन् यावच्चिकीर्षेत्तावत्याभूम्यांद्वौशंकुनिहन्यात्द्वौद्वावेकैकं अभितः समौ
यावतीतिर्यङ्मानि तावतीरज्जुमुभयतः पाशांकृत्वामध्येलक्षणंकरोतिपूर्वेषामंत्ययोः पाशौप्रति मुच्यलक्षणेनदक्षिणापा
यम्यलक्षणे लक्षणंकरोतिमध्यमेपाशौप्रतिमुच्यदक्षिणस्योपरिष्टाद्दक्षिणापायम्यलक्षणेशंकुं निहन्यात् सोंसएतेनोत्त
रोव्याख्यातस्तथाश्रोणीयत्रपुरस्ताद्द्राघीयसीमनुयात्तत्रतदर्धेलक्षणंकरोत्यथापरं प्रमाणार्ध्यधर्धां रज्जुमुभयतः पाशांकृ
त्वापरस्मिंस्तृतीयेषड्भागेनेलक्षणंकरोतितंन्यंशेनमिष्टंसार्धेषष्ठ्यांतयोः पाशौ प्रतिमुच्यन्यंछनेनदक्षिणापायम्यइष्टे
नश्रोण्यं सांनिर्हरेदिति सूत्रेणअत्रमानयोगस्यप्रकारद्वयमभिहितं इत्थं पाश्रुबंधिकावेदिः रथसंमितारथमात्रीत्येकेषांमं
तेविराट्संपन्नांविराजंविराट्संबंधिनीं दस्यसंख्यांसंपन्ना इत्येकेषांमतं शम्याषट्त्रिंशदंगुलानि प्रमाणमस्याः साशम्या १७
मात्रीसर्वतः शम्यामात्रत्वमवगंतव्यंविशेषावचनात्चतुरस्रक्तिः चतस्रः स्रक्तयः कोणानि यस्यास्तादृशी भवतीस्फुतर

वेदेः परिमाणं विज्ञायन्ते सा समचतुरश्राकार्या अन्यस्य विशेषस्याश्रवणादिति अत्रोक्तयो रथसंमितविराट्संपन्नयोः प्र

कारौ द्वैधे दर्शितः वेद्येकरण इति सूत्रमौपमन्यवीपुत्रस्यात्रोहस्माह बोधायनो रथसंमिता स्याद्रथाक्षेण प॰॰श्चात्तिर

श्ची रथेषया प्राचीत रथयुगेन पुरस्तात्तिरश्च्युत्तरयुगेणोत्तरभाभिरिति चक्षुर्निमितावास्यात्सर्वतो दशपदा विराट्संमि

तेति शालीकिरितिवेद्येवेद्याः करणं विचार्यते सूत्रं दशपद इत्यादि कल्पसूत्र मौपमन्यवीपुत्रस्य मतं बोधायन आह रथसं

मिता रथमात्री स्याद् तदेव विविच्य दर्शयति रथाक्षेण चतुः शतांगुलेन पश्चात्तिरश्ची रथेषया अष्टाशीति शतांगुलेन प्राची

रथयुगेन षडशीत्यंगुलेन पुरस्तात्तिरश्ची उत्तरयुगेन त्रयोदशांगुलेन उत्तरनाभिरिति शालीकिस्त्वाह चक्षुर्निमितावास्याद्र

थवा सर्वतो वा दशपदा स्यात् एवं सति इयं विराट्संमिता भवतीति आपस्तंबस्त्वाह रथमात्री निरूढपशुबंध्यवेदि रक्षसंमिता

पश्चात्तिर्यगीषया प्राची विपथयुगेन पुरस्ताद्यावता वा वा स्वच्छिद्रै रत्निभिर्वा चतुर्भिः पश्चात्षड्भिः प्राचीत्रिभिः पुरस्ता

दिति पशुबंधे प्रथमः खंडः   स्तंब यजुर्हरतीन्युक्तं तत्कथं कर्तव्यमित्यत आह इदमेव प्रसिद्धं पौरोडाशिकं त्रिर्यजुषा तूष्णीं

प॰सू॰बो॰ चतुर्थमित्ति इदंस्तंबयज्जुर्हरणंपौरोडाशिकंपौरोडाशिसंज्ञेप्रपाठिकेसमाम्नात्तंत्रिर्यजुषातूष्णींचतुर्थंकर्त्तव्यंप्रसि
१९ द्धेनैवप्रकृतेः सान्नाय्ययागाच्चोरकत्त्वः सिद्धमेवनापूर्वंअन्तोत्रदर्शपूर्णमासयोरुक्तएवप्रकारोग्राह्यः इदमत्रप्रसिद्ध
स्यस्तंबयज्जुर्हरणविधानमित्तरेषामित्तः प्राचीनामनागानांचोहकप्राप्तानांस्वकालेअनुष्ठानमवगमयतित्तथाचष
ड्ढोत्तुर्होमइतिद्वैधभाष्येसूत्रंबोधायनस्येतिसूत्रपदंकल्पसूत्रप्रतिपादनार्थपरंव्याकुर्वताभाष्यकारेणोक्तंपूर्वेद्युर
ग्न्यन्वाधानबर्हिर्लवनवेदिमानानानिध्मोभूत्तेषड्ढोत्रादित्तिअथकर्मोत्तंअथायंपशुः सोपवसथस्तस्यकः कर्मणः उपक्र
मोभवतीत्यजस्तैरग्निभिरुदवसायषड्ढोत्तारंकृत्वायूपकृतिंकृत्वायूपंसंयुजषंकृत्वावेदिनिमायप्रणोपायनीयमथित्वाग्नी
नन्वादध्यात्व्रतमुपेयादिध्माबर्हिः संनह्योपवसेदथप्रातराग्नेयेनाष्टाकपालेनयजेतेतितुबोधायनस्यकल्पोनग्नीन
न्वादध्यात्व्रत्तमुपेयादिध्माबर्हिः सन्नह्योपव्रस्ताणीसंम्रज्ञीतपरिस्तृणीयात्पात्राणिनिर्णिज्यसंसादयेत्त्ब्राह्मणंद १९
क्षिणतउपवेशयेत्तूष्णीकंप्रणीत्तेलोत्तरवेदिकेमंत्रेणोपविशेत्प्रोक्षणीः संस्कृत्यपात्राणिप्रोक्षेदाज्यंनिरूप्याधिश्रित्यप

र्याग्निकृत्वास्रुग्यहस्तः प्रास्तस्तंबयजुर्हरेत्‌सिद्धमत्तउर्ध्वमथशालीकेररण्योरग्नौसमारोह्योदवसायमथित्वाग्नीन्विहृत्यएवमे
वषट्‌होतारंकुत्वायूपाकृतिंकृत्वायूपंसयजुषंकृत्वावेदिंविभायाग्नीनन्वादध्यात्‌व्रतमुपेयादिध्माबर्हिःसन्नह्येसाप्यासंमृज्यौ
त्परिस्तृणीयात्‌पात्राणिनिर्णिज्यसंसादयेत्‌ब्रह्माणंदक्षिणतउपविशयेत्‌तूष्णीकंप्रणीतेत्तोत्तरवेदिकेमंत्रेणोपविशेत्‌प्रो
क्षणीःसंस्कृत्यपात्राणिप्रोक्षेदाज्यंनिरूप्याधिश्रित्यपर्यग्निकृत्वा।गार्हपत्यआज्यंविलाप्यो।त्पूयस्रुक्स्रुवौचतुर्गृहीतंगृही
त्वासमिद्वत्याहवनीयेपूर्णाहुतिंकृत्वास्रुग्यहस्तःप्राप्तःस्तंबयजुर्हरेत्‌सिद्धमत्तउर्ध्वमितिअथशब्दआरंभार्थःअयंपशु
पशुसाध्योयागआरभ्यतेयोयंसोपवसथःअत्रोहस्माहबोधायनःसोपवसथाइष्टिपशुबंधाइतिसोपवसथाःसद्यो
यज्ञावेतिशालीकिरित्यत्रप्रसिद्धःसोपवसथपक्षस्तस्यकर्मणउपक्रमःस्तंबयजुर्हरणांतःपदार्थःसकोभवतिकिं
प्रकारोभवतीत्तिप्रश्नःउत्तरमाहअजस्त्रैरितिअजस्त्रैरसमारोपितैरग्निभिःअत्रोत्सर्गपक्षेपिगार्हपत्येदक्षिणाग्न्याहव
नीययोसत्वाउपपन्नंबहुवचनंउदवसायपूर्वस्मात्‌स्थानांतरंगत्वाइदमुपलक्षणंविहारकल्पविहरणयोःषट्‌होतारंकृत्वा

अयंषड्ढोतृहोमः सोपवसथपक्षेबोधायनमतेषड्ढोतुर्होमइति सूत्रंबोधायनस्योपवसथएवषड्ढोतारंजुहुयादिति शा
लीकिरिति द्वैधसूत्रेयापूर्वेद्युरुपवसथेअग्न्यन्वाधायनबर्हिर्लवनवेदिमानानि विश्वोभूते यागदिवसेषड्ढोत्रादिति
प्रतिपादनात् यागदिवसएवकार्यः अत्रोक्तंउपवसथेषड्ढोतृहवनंअथाच्छालीकि सोपवसथपक्षाभिप्रायमितिगम्यतेषड्ढो
तृहोमानंतरंपुनर्विहृत्य धर्मप्रश्नोक्तंकूश्मांडहोमंकुर्यात् यूपाहुतिं हुत्वा अत्रापिपुनर्विहारणंकार्यंयूपंसंयुज्ज हुत्वाइद
मुपलक्षणंयूपाहरणयूपकरणयोः वेदिंविमाय इदंहिवेदिंविमायंबोधायनसोपवसथपक्षेउपवसथदिवसेबर्हिर्लवनानंतर
मित्युक्तं शालीकिसोपवसथपक्षेतत्रोक्तः क्रमः अन्तोपायनमशित्वा इतिभाष्यं व्रतमुपेयादिदमुपलक्षणमथास्यव्रतोपेतस्य
पर्णशाखामाच्छेत्तीत्यादिनाविहितस्यशाखाहरणस्येतिकेचित् अत्रवत्सापाकरणस्यप्रयोजनस्याभावेपि हविःपवनस्य
प्रयोजनस्यासद्भावादित्युक्तं यदितुवत्सापाकरणार्थत्वेवशाखायाः नपवनार्थतापीतिमतंतदावशाखाहरणंआहर
णपक्षेमंत्रेणाहृत्यनिधानमिध्माबर्हिः संनहनानंतरंपवित्रकरणमिध्ममंत्रेत्रयोविंशतिधेत्यहः यज्ञेपवित्रंपोतृतमे १९

पशुहव्यंकरोतुम इतिमंत्रइत्युक्तं इध्माबर्हिः सनह्योपवसेदिध्माबर्हिः सन्नहनं पूर्वं परिशिष्टे: ततः पशुयागस्यततोवेदकरणं पशुया
गस्यतुपयोयागविकारत्वात्तनक्ष्योरकत्वः प्रासंहविःपाकर्थस्य पात्रस्यपवित्रस्यचसायंहुतेग्निहोत्र उत्तरेणगार्हपत्यं संसादनं प्रोक्ष
णंचतदिहस्थानायत्वासासायंहुतेग्निहोत्रेवपाश्रपण्यौहृदयशूलंकुंभीचशाखापवित्रमित्येतानि संसाद्यप्रोक्षेत्प्रकृतावसं
स्कृताभिः प्रोक्षितत्वादन्येतुवपाश्रपण्यादिसादनमुपवसथेनंकुर्वंतिजुह्वादिभिः सहसादनप्रोक्षणेकुर्वंतिइतरार्थसंस्कृता
भिः प्रोक्षणेदोषाभावात्गुणातिरेकेण्यां थमत्भावएवेति अथप्रातराग्नेयेनाष्टाकपालेनयजेतेतितुबोधायनस्यकल्पः
ननुसूत्रंबोधायनस्येद्वैधेनयागदिवसेप्रातः षड्होत्रादिकरणस्याभिमतत्वाप्रतिपादत्तेनाथप्रातराग्नेयेनाष्टाकपालेनयजे
तेत्यस्यार्थः शालीकिमतत्वावगमादिहतुबोधायनकल्पत्वप्रतिपादनमसंगतमितिचेन्नबोधायनग्रहस्यऋषिविकल्पार्थत्वात्
यथालोपः शाकल्यस्यभवं स्फोटायनस्येत्यादौव्याकरणसूत्रेऋषिग्रहणं विकल्पार्थं तद्वच्छालीकिमतेप्यस्मिन्विकल्पेना
नुष्ठानार्थमृषिग्रहणोपपत्तेः नाग्नीनन्वादध्यान्नव्रतमुपेयात्परिशिष्टे: अन्वाधानव्रतोपयनोनस्तः पश्वर्थाभ्यामेवताभ्यामिष्टे

रपिप्रसंगात् उपकारसिद्धोभवतीतिभावः तथाचपश्चिष्टेरग्न्यन्वाधानव्रतोपायने ध्माबर्हिः सं हनवेदकरणानांसज्ञानत्वा
त् पाणिसंमर्शनमारभ्यब्राह्मणतर्पणांतमिष्टिः कार्याअथपशोः पाणिसंमृष्टोन्त् परिस्तृणीयात् पात्राणिनिर्णीयसंसादये
दत्रविशेषः आहवनीयस्यपुरस्तात्पात्राणिसादनीयानिस्फ्येनसहैकादशकपालानिजुह्वासहवसाहोमहवनीं उपभृत्तासह
पृषदाज्यग्रहणीं स्रुवेणसहस्वधितिमितिपशुपुरोडाशपात्राणिइदानींनिर्वापकालेवासादनीयानिएतास्मिन्समयेब्रह्मा
णंदक्षिणतउपवेशयेत् तूष्णीकंमंत्रंविनाप्रणीतेत्येत्तरवेदिकेमंत्रेणोपविशेत् ब्रह्माइदमुपलक्षणंपृष्ठास्तरणपवित्र
करणप्रणीतानामेकादशाधर्मान्सादनपक्षेप्रणीतानेतिवक्ष्यतेतत्रपवित्रंकृत्वायजमानवाचयक्षेत्येववदेत् प्रोक्षणीः सं
स्कृत्यपात्राणिप्रोक्षेत् प्रोक्षणीसंस्कारोयद्यपिअर्थेतस्यामेवस्कंचितिरःपवित्रमपआनीयेत्यादिनाआगतः तथापिनिर्णि
ज्यसंसादितायाअग्निहोत्रहवण्याः कर्मोपयोगायग्रहणोवेषायत्वेतिमंत्रस्यगार्हपत्येप्रतितपतिप्रत्युष्टं रक्षः प्रत्युष्टाअ २०
रातयइतित्रिरितिविहितस्यचगार्हपत्येप्रतितपनस्यप्रकृतौदृष्टत्वात् तदुभयमत्रापिकार्यंआज्यंनिरूप्याधिश्रित्यपर्यग्नि

कृत्वापश्चदाज्यायदधिनिर्वपेत्तद्दधिस्थाल्याआचार्येणानुक्तत्वेपितस्याअवश्यंकर्तव्यत्वादितियाज्ञिकाः।आज्यंनिरूप्याधिनि
र्वपेदधिश्रमणावर्जंदधिनिक्रियतेनैतस्यदर्भैः संस्कारोविधत्त इत्यपरमित्यापस्तंबः स्फ्यहस्तःप्रागपाश्नुकवेदिंतस्यास्तंबय
जुर्हरेदिदमुपलक्षणंवेदादानादेः।अतस्तंबयजुर्हरणादूर्ध्वंयत्पूर्वपरिग्रहादित्तत्सिद्धंपूर्वपरिग्राहंपरिगृह्णातीत्यादिनाकल्प
सूत्रेणातिविशेषः।अथकर्तव्यमित्युक्तंयूपंसयज्जुषंकृत्वाव्याख्यातं वेदिंविमाय अत्रपूर्वेद्युरेवपाशुबंधिकीवेदिर्विमिता
भवतीतिकल्पसूत्रेणएवकारेणसोपवसथेसद्योयागेचपूर्वेद्युरेववेदिविमानमितिविहितंइहतुयूपाहरणानंतरंसद्योयाग
पक्षेयागदिवसएवविधीयतइतिविकल्पोवगंतव्यः।अग्नीनन्वारध्यात्रसोपवसथपक्षेवेदिंविमायव्रतोपायनमग्निष्वेतीवअ
त्रावचनाद्वेदिंविमायाग्नीनन्वारध्यादित्येवसूत्रितत्वात्सद्योयागपक्षेनभवत्यशनंव्रतमुपेयादिध्माबर्हिः सन्नह्येत्पशोरेव
पाणीसंमृशीतपरिस्तृणीयात्पात्राणिनिर्णिज्यसंसादयेत्ब्रह्माणंदक्षिणतउपवेशयेत्तूष्णींप्रणीतेत्योत्तरवेदिकेमंत्रेणो
पविशेत्प्रोक्षणीः संस्कृत्यपात्राणिप्रोक्षेदाज्यंनिरूप्याधिश्रित्यपर्यग्निकृत्वाव्याख्यातान्येतानिगार्हपत्यआज्यंविलाप्योत्पूयन

प॰सू॰बो॰
२१

त्तु अनुपदमेवाज्यंनिरूप्याधिश्रित्य पर्यग्निकृत्वेति आज्यस्य निर्वापादि संस्कारविधानात् पुनरपि गार्हपत्य आज्यंविलाप्योत्पूये
त्याज्यसंस्कारविधिः किमर्थइति चेदुच्यते प्रकृतो आग्नेयपुरोडाशप्रधानानंतरं त्तिरः पवित्रमाज्यस्थाल्यामाज्यंनिर्वपतीति
विहितस्य अत्र प्राकृताज्यकार्यसाधनीयचोदकतः प्राप्तस्यकालविशेषेनिर्वापादिर्विहितः आज्यंनिरूप्याधिश्रित्यपर्यग्नि
कृत्वेति पशुयागेअपूर्वमाज्यकार्यं नत्तत्साधने शकृतंस्थाल्याज्यंप्रभवत्ति प्रमाणाभावादतोन्येनाज्येन तत्साधनीयंतत्र्चासं
स्कृतेनाज्येननकर्तुंयुक्तंसंस्कृताभिः अप्रोक्षितैः पात्रैर्होमश्च संमार्जितैः स्रुक्स्रुवैर्नाधिश्रितैः पक्वैः आज्येन चनप्रहरे
त् यदिप्रचारोयात्तु धानारक्षांसिपिशाचायज्ञं ग्राहयेयुरिति विज्ञायतइति वचनादतः अपूर्वाज्यस्यायंसंस्कारा अतिरिक्त
इतिगंतव्यंअपूर्वस्य चकार्यस्य परिगणिनंकुर्वंतियाज्ञिकाः निर्वापात्प्रागपूर्वेण पूर्णाहुत्याद्वयोरपि स्रुक्चपंचगृहीतंयदध्व
राजुहोति स्रुक्स्वयंस्वयंहोमेवरांजनेरण्योरग्निं प्रहृत्यचअपायेव्यपिसंतत्सवपास्तो कयसास्र्च। सकृद्धेतेषपूर्वेणस्मार्तवसं
स्कृतेनचभारद्वाजपस्त्वाह अप्राकृताआहुतय आज्यनिर्वापात्ऊर्ध्वमाज्यस्थाल्यामाहृत्याश्मरथ्यो लोकिकादित्यालेखनो २१

ध्रो वा दिस्यात्लेखनी रिति अनादेशो सकृत्त्वाहं जुह्वा सर्वत्र ह्वयत्तामिति स्कन्दि च चतुर्गृहीतं गृहीत्वा समिधमाधाय समिद्धत्यन्याप्यक्त्वा
त् आपस्तंबस्त्वाह समिद्धत्याहवनीये पूर्णाहुतिं जुहोतीति स्फ्यहस्तः आपस्तंब यजुर्हरत् सिद्धमतऊर्ध्वमिति व्याख्यातं पूर्वंपरि
ग्राहंपरिगृह्णामीति करणजपस्स्फ्यं स्फ्यस्तत्तादाग्नीध्रस्त्रिर्हरतीति अथ पूर्वंपरिग्राहंपरिगृह्णी। तीस्यारभ्यतत्तस्त्रिरग्नीध्रोहर
तीसंतंकुर्यादित्यर्थः यदाग्नीध्रस्त्रिर्हरत्यथ यावत्तिस्फ्य मुदपात्रं बर्हिः शम्यामितीतिस्पष्टं एतत्समादाये हि यजमानेतीतिस्प
ष्टं उत्तरेण वेदिं द्वयोर्वा त्रिषु वा प्रक्रमेषु स्फ्येनोद्धत्यावोक्ष्य शम्यया चात्वालं परिमिमीते विचायनीमसीति पुरस्तादुदीचीनकुंबयां
तरतः स्फ्येनालिखतीति कायनीमसीति दक्षिणतः प्राचीनकुंबयांतरतः स्फ्येनालिखत्यवत्तान्मानाथितमित्युत्तरतः प्राचीन
कुंबयांतरतः स्फ्येनालिखत्यवत्तान्माथितमितीति उत्तरेण वेदिं द्वयोर्वा त्रिषु वा प्रक्रमेषु अतीतेपुद्विपदः प्रक्रमः पदं पंचादशांगुल
मिति शुल्बे अत्र प्रक्रमः शब्दः पदवचन केचित् अत्र मूलं अन्वेषणीयं अथाप्युदाहरंति पदे युगे प्रक्रमे रत्नाविर्यत्ति शम्ययां च यथा
कामोत्तु शुल्बे अत्र यद्यपि यतःकुतश्चिद्देदि प्रादेशात् वेदिमुत्तरेण चात्वालः कार्य इति प्रतीयते तथापि सोमे चात्वालपरिलेखने

अथमहावेद्याउत्तरार्द्धंसीयार्द्धं कोर्वेद्यं तेनत्रीन्प्रतीचः प्रक्रमान्प्रक्राम स्फदंचं चतुर्थं ततो चोलस्यायतता चात्वालं परिलखत्ती
स्यत्रउत्तरार्द्धेयं सान्त्रीन्प्रतीचः प्रक्रमान्प्रक्रम्य ततउत्तरत्र चात्वाल इत्युक्ते रत्रापि तथैव कल्पयितुं युक्तं दृष्टान्तरोधित्वात्तत्कल्प
नीयाः ततश्चउत्तरार्द्धेयं सान्प्रतीचः प्रक्रमान्प्रक्रम्य ततउदकभागे द्वयोस्त्रिषु वा प्रक्रमेषु अन्तेषु स्फ्येनोध्दस्यावेश्मशाम्यया
उदीचीनकुंबया पुरस्तात्पूर्वस्यां दिशि चात्वालं परिमिमीते वित्तायनी मेसीति अंतरतः स्फ्येनालिखति उदक्संस्थां रेखां तूष्णीं
कुर्यात्ततो दक्षिणतः प्राचीनकुंबया शाम्यया परिमिमीते तितिक्षायनी मेसीतिश्रोत्राप्यंतरतः स्फ्येनालिखति प्राक्संस्थांले
खांकरोति पश्चादुदीचीनंकुंबया शाम्यया परिमिमीते अचतान्मानाथित्तमित्यंतरतः स्फ्येनालिखस्फदक्संस्थां रेखांकरोति
उत्तरतः प्राचीनकुंबया शाम्यया परिमिमीते अवतान्माव्यथित्तमिसंतरतः स्फ्येनालिखति प्राक्संस्थां रेखांकरोति अत्रेद्वैध
चात्वालस्यपरिलेखनइतिसूत्रंशालीकेरत्रोहस्माह बोधायन एवमेव परिलिखेत् बाह्यतः पुरस्ताच्चोत्तरतश्चालिखेदिती
तिचात्वालस्यपरिलेखनविषये इदमुच्यते सूत्रं शालीकेः स्फ्येन अंतरतः सर्वत्रेति शालीकेर्मतं।। बोधायनस्त्वाह एवमेवकल्प २२

सूत्रोक्तप्रकारेणैव अंतरतः परिलिखेत्बाह्यतः शम्यया बाह्यतः पुरस्ताच्चोत्तरतश्चालिखेदिनीति अथचत्वाले बर्हिर्निधाय
तस्मिन्स्फ्येनप्रहरति विदेरग्निर्नभोनामग्ने अंगिरो योस्यांपृथिव्यामसीत्यादत्त आयुषानाम्नेहीतिहृत्वोत्तरवेद्यांनवपतियत्तेनाधृ
ष्टंनामयज्ञियंतेनत्वादधइति द्वितीयंप्रहरति विदेरग्निर्नभोनामाग्ने अंगिरोयोद्वितीयस्यांपृथिव्यामसीत्यादत्त आयुषानाम्ने
हीतिहृत्वोत्तरवेद्यांनिर्वपतियत्तेनाधृष्टंनामयज्ञियंतेनत्वादधइति तृतीयंप्रहरति विदेरग्निर्नभोनामाग्ने अंगिरोयस्तृतीय
स्यांपृथिव्यामसीत्यादत्तआयुषानाम्नेहीतिहृत्वोत्तरवेद्यांनिर्वपतियत्तेनाधृष्टंनामयज्ञियंतेनत्वादधइतितूष्णींचतुर्थंहरतिस
हबर्हिषेत् अथशम्ययाचात्वालपरिमाणानंतरंचात्वालेबर्हिर्निधायतस्मिन्बर्हिषिस्फ्येनप्रहरतिविदेरग्निरितिआदत्तआयुषे
ति अत्रयद्यप्यादानक्रियाकर्मनावगम्यतेतथापिहे अग्नेवेदेरोत्तरवेदेः संबंधियोग्निर्नभोनामनइतिप्रसिद्धः अंगिरः गार्हपत्य भ
दक्षिणाग्न्यादीनामग्निरूपाणामंगानांमध्ये रसः सम्भूतः एतमुएवांगिरसंरसंमन्यंतेगाभांयदसंस्तनेतिछंदोगैः प्राणोपास्तावं
गिर[illegible]निर्वचनात् इत्थमंगिरः शब्दार्थउक्तः अस्यांचात्वालगतरूपायांपृथिव्यामसिवर्तसेसत्वंआयुषा आयुःप्रदेननाम्ना एहि

प.सू.बो

२३

उत्तरवेद्यर्थमुत्तरवेदेस्स्थान आगच्छ यत्न वनाधर्षं केनाप्यतिरस्कृतं यज्ञियं यज्ञसंबंधिनामनुभ इति तेनोपलक्षितं त्वा आदधे
उत्तरवेदिदेशेस्थापयामीति मंत्रलिंगपर्यालोचनया त्वा लगतपांसूनाहरत इत्यवगम्यते अह चापस्तंबः तूष्णीं जानुदघ्नं त्रि
वितस्तं खात्वा उत्तरवेद्यर्थान् पांसून् हरति विदेरिलीति हृत्वोत्तरवेद्यां निवपति यत्नेनाधर्षमिति एवमुत्तरयोरपि पर्याययो
र्ज्यं मंत्रे अस्यामिति पदस्थाने तृतीयस्यां तृतीयस्यामिति विशेषः तूष्णीं चतुर्थः हरति सह बर्हिषा यद्ध बर्हिर्निधाय प्रहृतं तेन स
हृपांसून् हरति लौकाग्निप्रसंगात् प्रवसतो यजमानस्य पशुबंधः सिध्यति वा न वेति विचारितं कर्मांते किमु खलु प्रवसतः पशु
बंधः सिध्यतीति किमु खलु प्रवसत इत्यादि प्रश्नः स्फुटः उत्तरमाह सिध्यतीत्यादि सिध्यतीत्येक आहुः पशोर्दर्शपूर्णमासविवे
कारत्वात् तत्र च प्रवसतो यागसिद्धेरित्याशयः अथैक आहुर्न सिध्यतीति कुत इत्याह लौकिकाग्नीनित्यादि अत्र लौकिका
ग्नय इति विदेरग्निर्नभो नमो ग्ने अंगिर इति त्रिर्हरति यएवं पुलोके ष्वग्नयस्तानेवावरुंधे तूष्णीं चतुर्थं हरति अनिरुक्तमेवावरुं २३
ध इति ब्राह्मणेन उत्तरवेद्यां विहितानि प्रहृतबर्हिः संहितत्वात्त्वा लरूपांसून् निवपनानि कौग्नय इति लक्षणयोच्यंते अग्न्यदर्शयेयशब्द

स्यक्रियावाचकत्वात् येपृथिव्यांतरिक्षंद्युलोकानांअग्नयः नभोनामानः वेदेरुत्तरवेदेसंबंधिनश्चात्वालगतमद्रूपायांपृथिव्यां
वर्त्तमानास्तेषामेभिर्निवपनेरुत्तरवेद्यामाधानात्ततश्चायमर्थः इमान्पशुबंधार्थान् लौकिकाग्नीन् बर्हिः सहितचात्वालयांस्त
निवपनानिप्रसिद्धाग्न्याधेयापेक्षयाद्वितीयंत्वात्अग्न्याधेयंब्रुवते ब्रह्मवादिनः प्रसिद्धाग्न्याधेयवदत्रापि आदध इति मंत्रवर्णसा
म्याभेत्तुखलुप्रवसतोग्न्याधेयमितिअतोग्न्याधेयत्वात् लौकिकाग्नीनांप्रवसतोसिद्धेत साध्यः पशुबंधोपि प्रवसतोनसिध्य
तीतिअत्रयजमानविषयेकर्मातंकिंयत्तुखलुपशुबंधेयाजमानंभवतीतिव्रतोपायनविसर्जनेआयत्तस्यपुनरालंभइतित्रिन
यमेवयाजमानोयाजमानंकांडेसमाम्नातमवश्यकर्तव्यंनान्यत्सर्वंयाजमानोत्सादनपक्षेयद्भवतीस्तक्तंभवतियथाकल्पस्त
त्रंयाजमानकरणपक्षेततः कान्यच्चसर्वमपिआवश्यंकर्तव्यंआज्यमानकाशयतिप्रकाशयतीत्याज्ञावकाशमाज्यानेक्षणांत
दपिएकेआचार्याः कर्तव्यंब्रुवन्तेसर्वोत्सादनपक्षेएवेदंकल्याम्नानंसर्वास्तिहपक्षेतुनियमेनअथेद्धंलौकिकाग्नीनांहर
णइतिसूत्रंशालीकेरत्रोहस्माबोधायनउत्तरवेद्यामाग्नीध्रउपवेश्यततोलौकिकाग्नीन्हरेदित्यतरादेवलौकिकाग्नीन्ह

प॰स्र॰बो॰ २५

रेदित्यौपमन्यवइतिलौकिकाग्नीनांहरणेअत्रलौकिकाग्नयइतिचात्वालगत मृदनुस्रुस्यूतानभोनामकाअग्नयोभिधीयन्ते
हरणकर्मत्वाङ्गतेःतेषांहरणंमृदाहरणेनैवभवतितस्थरणस्यैवसूत्रेविधानात्तत्रेदमुच्यतेसूत्रंशालीकेःउद्धृत्तरवेद्या
श्चात्वालनिधानपुरीषमेवकार्यमेवशालीकेमतंबौधायनस्त्वाह अभिग्रहणार्थमुत्तरवेद्यामाग्नीध्रमुपवेश्यलौकिका
ग्नीन्हरेदितिऔपमन्यवस्त्वाहउत्तरदेशादेवलौकिकाग्नीन्विहरन्अध्वर्युर्द्वयोर्वात्रिषुवाहरणेष्वभिगृह्णात्याग्नीध्र
इत्युत्तरदेशादेवलौकिकाग्नीन्हरेत्तूनत्वादित्तएवतस्योपवेशनंकारंविंदयितव्यमितिनियमइतिअथाध्वर्युःस्फ्येनचा
त्वालात्पुरीषमुद्धरतीतिस्पष्टअथाग्नीध्रमाहादित्तस्त्रिर्हरतीतिततस्त्रिराग्नीध्रोहरतीतिस्पष्टंयदाग्नीध्रस्त्रिर्हरत्य
थाध्वर्युरुत्तरवेद्यैपुरीषंसंप्रयौतिसिंहीरसीमहिषीरसीतिअथाध्वर्युरुत्तरवेद्यर्थमुत्तरवेद्याःपर्याप्तंपुरीषंसंप्रयौ
तिमिश्रयतिसिंहीरसीतिप्रथयस्वुरुप्रथस्वोरुतेयज्ञपतिःप्रथथामित्तीतिप्रथयतियावतिप्रदेशेउत्तरवेदिःका २४
कार्यातावतिप्रदेशेपुरीषंप्रथयतिप्रसारयतिउरुप्रथस्वेतिस्फ्येनसंहंतिध्रुवासीतिस्फ्येनसंहंतिसंघातयतिदृढीकरो

तिपुरीषंअथैनामद्भिरवोक्षतिदेवेभ्यःशुंभस्वेतीतिएनांउत्तरवेदिंगतमन्यत्देवेभ्यःशुंभस्वेतिसिकताभिरनुप्रकिरतीति
स्पष्टंतांप्रादेशमात्रीचतुरश्रांनिधायशम्ययापरिमिमीतेउत्तरवेदिमिमीतेतिप्रकृतत्वात्ब्राह्मणेउत्तरवेदेःशम्ययापरिमिमी
तइत्यकृतत्वादितिव्याचख्युर्भाष्यकृतःद्वैधेबोधायनमतेउत्तरयुगेणोत्तरनाभिरितिदर्शनात्उत्तरयुगस्यत्रयोदशांगुलरू
पत्वात्प्रादेशवद्द्वादशांगुलत्वतयाअदूरविप्रकर्षादुत्तरनाभेःप्रमाणांतरानभिधानात्तत्रइदंउत्तरनाभिपरिमाणमिति
युक्तंमिस्राशयोभाष्यकृतांभारद्वाजआहमध्यउत्तरवेदेःप्रादेशमात्रीचतुरस्रक्तिमुत्तरनाभिंकृत्वेतिकेचित्तुकल्पसू
त्रेउत्तरवेदेरप्रकृतत्वात्सर्वनाम्नांप्रकृतपरत्वस्यउत्सर्गसिद्धत्वात्शम्ययापरिमिमीतइत्यत्रउत्तरवेदिमित्येवेष्ट
मेकारशनास्वरूपश्च द्वितीयेप्राजापत्येषुसप्तदशरशनास्वस्वसर्वास्तु द्वाविंशतिर्द्वाविंशतिस्तृतीयेवाजपेयेसवनीय
नामेकैवरशनास्वरूपश्चतुर्थेवाजपेयेसवनीयेअदृशनास्वरवश्चेति अथयथायतनंस्रुचौसादयित्वाहपर्यग्नयेति
यमाणायामनुब्रूहीतिस्पष्टं अथैषआग्नीध्रआहवनीयादुल्मुकमादायांत्तरेणात्वोचालोत्करात्तुरेणशामित्रदेशमग्रेण
पशुंजघनेनस्रुचइत्येवंत्रिःप्रदक्षिणापर्येतीति अथप्रैषानंतरंएषपर्यग्निकर्ता आग्नीध्रआहवनीयादुल्मुकमादायअंत
रेणचात्वालोत्करौनिर्गत्यउत्तरेणाशामित्रदेशंपशुरशनानिरशानसंनेत्तद्दृष्टेचनिर्ऋत्सांदिशिचात्वालेपशुरशनानिरशान
मितिदर्शनाच्चात्वालादिशान्यांशामित्रदेशः शामित्रश्चासौदेशश्चशामित्रदेश इतिवाविग्रहः उत्तरेणचात्वालंशामित्रदेशइति
सत्याषाढःचात्वालमुत्तरेणशामित्रायपरिलिखतीतिकात्यायनःअभिपर्यग्निकृत्तेदेशेउल्मुकंनिदधातिसशामित्रइत्य

प॰सू॰बो॰ पस्तंबः अग्रेणपूर्वभागेनपशुंजघनेनवाप्रत्यक्भागेनस्त्रचइतिएवंत्रिःप्रदक्षिणंपर्येतियथाउल्मुकमंतर्भवतिस्वयंबहिर्भवतिन
९९ श्येतिगच्छतिअत्रयूपस्यदक्षिणतआहवनीयात्पुरस्तात् अवस्थितस्यपशोःपूर्वभागेनपरिगच्छन्नायूपाहवनीययोरपिपरिगमने
नर्भावोर्थात्कर्तव्यइतिकृत्वायूपाहवनीयोनोक्तोतथाचभारद्वाजआहवनीयादुल्मुकमादायाग्नीध्रःपर्यग्निकरोतिपशुशामित्र
देशचात्वालयूपमाहवनीयंचत्रिपरिद्रवत्साज्यानिवेसे।केषामित्यापस्तंबोप्याहवनीयादुल्मुकमादायाग्नीध्रःपरिवाजपतिःप
रिवाजपतिःकविरितित्रिःप्रदक्षिणंपर्यग्निकरोतिपशुयूपमाहवनीयशामित्रदेशंचात्वालमाज्यानिचेत्यकइतिकात्याय
नोप्याहवनीयादुल्मुकमादायाग्नीत्त्रिःसमंतंपर्येतिपश्वाज्यशामित्रदेशयूपचोचात्वालादाहवनीयानाज्यपशुशामित्रान्वेतिअ
त्रेढूधंपर्यग्निकरणइतिसहशामित्रंपर्यग्निकुर्यादितिबोधायनोयदन्यच्छामित्रादितिशालीकिःपशुंचाज्यानिचेतियथोत्तरःप
शुमेवेसोपमन्यवइतिस्पष्टंपर्यग्निकरोतिसर्वकृतमेवेनंकरोत्यस्कंदायेतिस्वशाखायापशुमेवेतिपक्षएवस्वरसतःप्रतीयते ९९
पक्षांतराणितुशाखांतरमूलानितिद्रष्टव्यंपशुमेवेतिपक्षेपशोर्यूपेनियुक्तत्वेनपशुयूपयोरंतरागंतुमशक्यत्वयात्तन्मात्रेपिपर्य

ग्निकरणसंभवात्त् पशोरेव पर्यग्निकरणंकार्यंनत्वग्नेरपि परित्तोगच्छेदिति गम्यत्ते अथानुपरिसरणमपव्यानिजुहोति प्रजानंतः
प्रतिगृण्हंतिपूर्वे येषामीशेपशुपतिः पशूनांयेबध्यमानमनुबध्यमानायआरण्याःपशवोविरूपाः प्रमुचमानाभुवस्परेत्तइतिय
थग्निपर्यग्निकरणानंतरंअनुपरिसरणंवीप्सायामनुपरिसरणंअग्नीप्रगमनंयथासंभवामिइत्तियावत्त् पशूनांपश्चः सर्वे
पाव्यंते अतःसर्वस्यपावनत्वात् स्वयंकेनचिदयव्याःपशवःतत्प्रतिपादकत्वात् मंत्राणामपाव्यत्वंतद्वरोधात्करणयानिकर्मा
ण्यपाव्यानितानिजुहोतिकुर्यादध्वर्युःतत्रमंत्रानाहप्रजानंतइत्यादि मंत्राणामंत्रप्रतीकेनग्रहणंपाठस्तुप्रजानंतः प्रति
गृण्हंतिपूर्वेप्राणमंगेभ्यःपर्याचरंतं स्कुवर्गयाहिपथिभिर्देवयानेरोषधीषुप्रतितिष्ठाशरीरैःस्वाहायेषामीशेपशुपतिपशू
नांचतुष्पदामुतचद्विपदांनिष्क्रीतोयंयज्ञियंभागमेतुरायस्पोषायजमानस्यसंतुस्वाहा येबध्यमानमनुबध्यमानाअभ्यैक्षं
तमनसाचक्षुषाचअग्निस्तां२ अग्नेप्रमुक्तुदेवाः प्रजापतिःप्रजयासंविदानःस्वाहाआरण्याःपशवोविश्वरूपाविरूपाःसंत्तो
बहुधैकरूपाःवायुस्तां२ अग्नेप्रमुमोक्तुदेवःप्रजापतिःप्रजयासंविदानःस्वाहा प्रमुंचमानाभुवनस्यरेत्तोगातुंधत्तयजमाना

यद्देवाः उपारुत्तꣳ शशमानं यदस्थाज्जीवं देवानामप्येतु पाथः स्वाहा इति अत्रादित्तो द्वौ प्राजापत्यौ तत अग्नेयो वायव्यो वैश्वदेव इति हो
मा इति कर्मांतो यानुवाक्ये सूत्रं किं देवस्यान्यपाव्यानि भवंतीति द्वे प्राजापत्ये आग्नेयं वायव्यं वैश्वदेवमितीति अत्रेद्धं अपाव्यानहो
म इति सहस्राह बौधायन एकं प्रथमे पर्याये जुहुयात् द्वे मध्यमे द्वे उत्तमे इति यथोपपादमिति शालीकिरिति अपव्यानां होमे कर
णे प्रकार उच्यते एकं हवनं प्रथमे पर्यग्निकरणपर्याये जुहुयात् कुर्यात् द्वे मध्यमे द्वे उत्तमे इति बोधायनः इस शाखांतरे वचनात्
शालीकि स्वाह यथासंभवमिति शाखायां वचनाभावादिति निधायाग्नीध्र उल्मुकं यथेतं त्रिपुनः प्रतिपर्येतीति निधायोल्मु
कमाहवनीयसमीपे असंस्पृष्टं यथेतं यथागतं त्रिः त्रिवारं पुनः प्रतिगच्छति एतस्मिन्काले शामित्रस्याग्नेस्थापनं कार्यं तथा
चाग्नीषोमीयपशुविषये मो पानुवाक्यं सूत्रं अथ वै भवति प्रांचमग्निं प्रहरंस्करपत्नीमानयंत्स्यचना ꣳसि प्रवर्तयंत्यथवा अ
स्येषधिष्णियो हीयते सानुध्यायति स ईश्वरो रुद्रो भूत्वा प्रजां पशून्यजमानस्य शमयितोर्यर्हि पशुमाप्रीतमुदंचं नयंति त ५०
र्हि तस्य पशुश्रपणꣳ हरेत्तेनैवैनं भागिनं करोतीति ब्राह्मणमथ वै भवति यजमानो वा आहवनीयो यजमानं वा एतद्विकर्षन्ते यद

हवनीयात्पशुश्रपणं हरंतिसर्वे यस्यां निर्मथ्यं वा कुर्यादितिसपशुं हैनं करिष्य भवतिनैनेनमन्वानयंते अजस्र एवास्यैवयद्दीप्य
मानः शेतेपशुक एवाएनमन्वारभतेतस्यपशूवेलायामुल्मुकमाहायारणीउपसंगृह्यपूर्वपशोः प्रतिपद्यतेनिर्मथ्येनहपशूश्रपयंति
विषयात्तत्सहोल्मुकमाहरंतियजमानस्य सात्मतायै इति ब्राह्मणमिति अथवैभवति ब्राह्मणमग्निंप्रणयंति अग्नीषोमप्रणयने
प्रणयनशालामुखीयाकुर्वंतिपत्नींगत्वाउद्दानयंतिप्राचादिशमनांसि अनुप्रवर्तयंति पृष्ठतः शालामुखीय सकाशंयेदेतद्देव
सर्वेसपद्येततदानीमेवअस्यपुराणगार्हपत्यः स्वाग्निस्थानविशेषोहोपतेभ्यून्याभवति सोग्निर्मनसाध्यायति अनिष्टं चिंतयति
चिंतयमानश्चरुद्रः क्रूरो भूत्वा यजमानस्य प्रजां पशून्छमयति शमयितुं समर्थो भवतितत्तस्य कः प्रतीकार इति तदुच्यते आप्री
संतिकाभिः प्रयाजयाज्याभिराप्रीतं तोषितं पशुं पदोद्दंचं नयंतितद्दानस्यप्रतीचीन गार्हपत्यस्यसंबंधिनं पशुश्रपणं हरेत्तेनैनपशु
श्वपणेनैवएवंपुराणंगार्हपत्यंएनंकरोतीतिब्राह्मणेएवंएकंशामित्राग्नेः करणंकल्प्यविधायपुनः कल्पांतरेविदधातिअथ
वैभवतिब्राह्मणयोथमाहवनीयः सयजमानः खलुप्राधान्यात् यराहवनीयात्पशुश्रपणं हरंतिहरेयुः एतद्यजमानंविक

प॰सू॰बो॰ र्षन्ते खलु यजमानस्यैवायं विकर्षः स्यात्तस्मादाहवनीयोद्धरणे दोषः अतः स एव वारणगार्हपत्य एव वा पुराणगार्हपत्यैकदेशः पुरा
५१ णगार्हपत्य इत्युच्यते तेन निर्मथ्यं वा निर्मथ्येन किंचिदग्निमुत्पाद्य तं वा पशुश्रपणं कुर्यादिति ब्राह्मणं सः अध्वर्युः यद्युद्धेनं पुराणगा
र्हपत्यैकदेशरूपं शामित्रं करिष्यन्भवति तदा एनं पुराणं गार्हपत्यं नान्वानयेत् शालामुखीयं प्रतिमान्वानयन्ति सोमे कल्पसूत्रे
विहितं पुराणगार्हपत्यस्य शालामुखीयं प्रत्यन्वानयनमुक्तं शतस्तिष्ठन्नग्निमन्वानयते उदग्ने तिष्ठानु मामुद्देहि विश्वे देवैर्य
ज्ञियैः संविदानः स्वर्गे लोके यजमानं हि धेहि मास्पृहास्था आहत्यैयामुपेम इति अत्र भाष्यं ब्राह्मण उत्तरतस्तिष्ठन्नग्निं पुरा
णगार्हपत्यं शालामुखीयं प्रत्यानयति संकल्पमात्रेण मंत्रं जपत्स्वग्र इतोति इदमन्वानयनं न कुर्यात् पुराणगार्हपत्यस्य शामि
त्रत्वपक्षे यद्युवा एनमन्वानयते यदि तु कल्पसूत्र विहितमन्वानयनं कुर्यात् यदि तत्राध्वर्योश्चिकीर्षस्यात् सोमे तु उद्धंसम
न्वानयन इति सूत्रे बोधायनस्य नाद्रियेतेति शालीकिरिति अस्यार्थः समन्वानयेत् तु उत्तरतस्तिष्ठन्नग्निमन्वायत इति सूत्रं बो ५१
मतं शालीकिस्त्वाह नाद्रियेत अकरणमेव वचनाभावादस्माकमिति सामान्यतो विकल्पोऽभिहितः इह तु व्यवस्थितो विक

त्मइत्युक्तेपुराणगार्हपत्यस्यउग्राभिन्नत्वेनान्वानयनंनिमर्थ्यंवाकुर्यादितिपक्षेतुभवत्यन्वानयनमितिप्रकृतमनुसराम:यदिकस्यसूत्र
विहितसमन्वानयनेत्वि।कीस्यात्तत्समन्वानयनंकुर्वत:पशुवेलायांपशोर्नयनकालेउल्मुकमादायाहवनीयादितिशेष:अथय
दाहवनीयाउल्मुकमितिकर्मातेतुवादर्शनात्तथाहौत्रयानुवाक्येकर्मान्तसवेदस्यादितिपुराणगार्हपत्यमभ्युपदिशतितस्यपशु
वेलायामुल्मुकमादायदक्षिणद्वारोपनिर्हृत्यदक्षिणेनसदस:परीत्यदक्षिणेनमार्जालीयंधिष्ण्यंपर्याहृत्यांतरेणयूपंचाहवनी
यंचोपात्तिहृत्यांतरेणचात्वालोत्करावुदङुपनिहृत्यतेनपशुश्रपयेयुरथयदाहवनीयाउल्मुकंस्यात्तवपायात्तसहहरेयुरितिअ
रणीउपसंगृह्यपूर्वपशो:प्रतिपद्यतआग्नीध्र:निर्मथ्यनेहअस्मिन्पक्षेनिर्मथ्येनैवपशुश्रपयंतितदुल्मुकवपयासहवपा
हरणकालेवपयासहआहरतिस्थानंप्रस्थानयंतियजमानस्यसात्मत्वाययजमानस्थानीयाहवनीयस्यैकदेशंबंधाय।इति
ब्राह्मणमितिएवमग्नीषोमीयेपशौविहितमपिचोदकेनेहप्राप्तंकल्प्यहूयंततत्रकाप्ययादाचाराच्चप्रथमपक्षआश्रितोभाष्ये
एतस्मिन्कालेपुराणगार्हपत्यात्प्रतिप्रस्थाताधिष्ण्यांगारानवदायशाखापक्षेउपवेषणउभयत्रमातरिश्वनोघर्मोसीतिमंत्र:ता

नाद्राय दक्षिणेन विहारं पर्याहृत्यांतरेण यूपं चाहवनीयं चांतरेण चात्वालोत्करा उदकपरिहृत्य शामित्रदेशे निवपतीति अथोल्मुकप्रथ
माः प्रतिपद्यंतेन्वक् शमिता पशुना पशुमध्वर्युर्वपाश्रपणीभ्यामन्वारभते वपाश्रपणी यजमान इति अथोल्मुकप्रथमाः उल्मुकं
प्रथमं अग्रे येषां ते उल्मुकप्रथमाः उल्मुकहस्तमाग्नीध्रमग्रे कृत्वा प्रतिपद्यंते तमनुगच्छंति ततः शमिता पशुं विमुच्य यूपांतर
वेद्योर्मध्येनोदङ् नीत्वा तस्य पश्चात् सह पशुना शमिता गच्छति पशुमध्वर्युर्वपाश्रपणीभ्यामन्वारभते वपाश्रपणी यजमानः अ
न्वारभत इत्येव अथाश्राव्य प्रेष्यहोतर्हव्या देवेभ्य इति स्फुटं अत्रेदं ध्यं उपप्रैषाश्रावणे इति सूत्रं बोधायनस्य श्रावयेदिति शा
लीकिरिति उपप्रैषाश्रावणे अजेदग्निरित्यत्र मैत्रावरुणप्रैषैकर्तव्यमाश्रावणमुपप्रैषाश्रावणमित्युच्यते तत्र स्पष्टमन्यत् अ
थैनं पशुमंतरेण चात्वालोत्करानुदंपत्नी यजमानमनुमंत्रयते नानाप्राणो यजमानस्य पशुना रेवतीर्यज्ञपतिं प्रियधाविशतेति
द्वाभ्यामिति स्पष्टं यत्रैतदाग्नीध्र उल्मुकं निदधाति तद् ग्रेणवोत्तरेण वा यशवे निहन्यामानाय बर्हिरुपास्यति पृथिव्याः संप
चः पाहीति कृत्वा उल्मुकस्य नेताग्नीध्रः उल्मुकं शामित्रस्य समीपे पर्यग्निकृत्वे देशे निदधाति उत्तरत आग्नीध्र उल्मुकं निद ५२

थानि सशामित्रो भवत्यपरस्माद्गार्हपत्यादाहरेत्रिर्मथ्यं वा कुर्यादिति भारद्वाजः अग्रेण पूर्वेण वा उत्तरेण वा यज्ञशवे निहन्यमानाये
त्ति द्व्यर्थ्ये व तु थः एनत् बर्हिः प्रजाते बर्हिषी निहते तयोरन्यतत् याभ्यां बर्हिभ्यां उपाकरोति तयोरन्यत्तरदाच्छादनार्थं निधायद्दक्षिणे
न शामित्रमन्यतरदुपास्यति समस्यत्तनुवाभवेति तस्मिन् पशुप्रत्यंचउदीचीन पादं संज्ञपयन्तीति भारद्वाजः पृथिव्याः संपृचः पा
हीति बर्हिरुपास्य उपाकरणयोरन्यतरी स्यापस्तंबः उपास्यति प्रस्तरस्थानीयं पशवइति तादृश्या निर्देशात् पृथिव्याः संपृचः पा
हीति मंत्रलिंगाच्च तदेतं पशुं प्रतीचीनशिरसमुदीचीन पादं निघ्नति पातंपतिशामितारः अत्रेद्वैधं प्रतीचीनशिरसमुदीचीनपाद
मिति बोधायनः उदीचीनशिरसं प्रतीचीन प्रतीचीन पादमित्ति शालीकिः प्रतीचीनशिरसमुदीचीन पादमित्यो प मन्यवइतिस्प
ष्टं अकृण्वं तमायुः संज्ञपयतेस्कंत्तेनेव यथैतमेत्यपषदाज्यावकाशआसत्ते इह प्रजा विश्वरूपा रमंतामस्मिन्यज्ञे विश्ववि
दो घृताचीः अनिकुलायमभिसंवसाना अस्मा अवंतुपयसा घृतेनेति मायुशब्दे अकृण्वंतं अकुर्वतं संज्ञपयन्त आस्तन्तस्यमार
ण संज्ञपनमित्याभियुक्ताः नकुरुत संम्रह्यमुखं दमपंत्यवाश्यमननिमित्तिकास्यायनः इत्यकाणैतेनेव यथायथेतपंथागतमेत्य

प.स्र.बो.
५३

आगत्यपृषदाज्यावकाशोपृषदाज्यसमीपेआह् इहप्रजासतिसंज्ञप्तंप्राकुरितिबहुवचनादनियमःशमितावान्योवेतिऊहोसंज्ञप्ताहत्ति
त्यश्रुर्मायुमरुतेत्तीतिइदानींपशुप्रायश्चित्ति।तानिकर्त्तव्यानिप्रायश्चित्तसूत्रेःअथातःपशुःप्रायश्चित्तानिव्याख्यास्यामःसयदिप
शुरुपाकृतोवाश्येतायदस्यपारेरजसइत्येतांहुत्वान्येमित्तिकीद्वितीयांजुहोतियस्माद्भीषावाजिष्टस्ततोनोअभयंकृधिप्रजाभ्यः
सर्वाभ्योमृडनमोरुद्रायमीढुषेस्वाहेतियस्माद्भीषावेपिष्ठाःपलायिष्टाःसमज्ञास्थाःशाकृदकुथामूत्रमकुथाइत्येनमेतेषुनेषुनि
मित्तेषुयदद्मकस्तस्मै।स्वाहेतित्तृतीयांसयदिनिषेदत्‌यस्माद्भीषान्यषदइत्येतांहुत्वातंमेत्रावरुणेनोत्थापयेदन्येनोदुंबरेणवे
र्वाऽउदुंबरऊक्‌पशवऊर्जेवास्माउर्जंपनभ्रूनवरुंधइतिब्राह्मणमुदुसत्तिष्ठेत्सगामुदश्वतिष्ठेत्यश्वमुच्छागेतिछागमुन्मेषे
त्तिमेषमुदस्राइतिवशांसउच्चैत्‌प्राकृपर्यग्निकरणानियतेतयाश्वमेधेप्रायश्चित्तिस्तांकृत्वाथान्यथैतद्दैवत्यंतद्वर्णंतद्वयसंतत्त
द्रूयंतज्जातीयंपशुमालभेततस्योपाकरणादिसर्वमावर्त्ततेनिर्मथ्यसामिधेनीतच्छेषाघारसंप्रैषसंमार्गप्रवरवर्जंअयदित्त
ज्जातीयंनविदेतासावयोगोऽश्वाइसन्योन्यस्यप्रतिनिधयोभवतितेषांछागश्वमपश्वोपाकरणोपावलाभेन्यतममाल ५३

तस्य त्वाष्ट्रेन प्रचरणकल्पो व्याख्यातो था स्याशरीर मस्क प्रवेशयति नवा उ वेत्त न्द्रियसेन रिष्यत्याञ्जानां त्वावि श्वा आत्राइद्वा
भ्यामिति अस्यार्थः अथातः श्राद्धेवा स्योपक्रमे पशो प्रायश्चित्तानि व्याख्यास्यामः स उपाकृतः पशुः यदि या त्र्येत श्राद्धं कुर्या
त्रायदस्य पारे रजसइ स्येतां एत न्मंत्र करणिका माहुतिं कृत्वा कृत्यो ने मित्तिकी नि मित्तवि शेषसंबाधिनी निमित्तविशे
षमुक्त्वा यदपठित मंत्र करणिकामितिया तद्द्वितीयामाहुतिं जुहोति जुहोति करोति एवमेव मेववाशने यया द्वितीयामा
हुतिं जुहोति जुहोति [illegible] एवमेव तेषु ते षु यस्मात् भी षावेपिष्ठाः पलायिष्ठाः समज्ञास्थाः शारुद कृथामूत्रनकृताइति
मंत्र प्रकाशित्ते षुनि मित्ते षुनिष्पन्ने षुने मित्तिकीं तत्तन्नि मित्त विशेषप्रकाशक पदं वाशिशइति पद स्थानेनि क्षिप्यत्तेन
मंत्रेणा द्वितीयां जुहोति यइदमकस्तस्मै स्वाहेति तृतीयां जुहोति यइदमकस्तस्मैन मस्तस्मै स्वाहेति तृतीयां जुहोति इत्यनु
षज्यते सः उपाकृतः पशुर्यदि निषेवेत् यस्माद्भीषान्यषद इति द्वितीयामाहुतिं कुर्यादित्याध्याहारः कृत्वा आहुतित्रयं कृत्वातं
निषण्णं पशुं मैत्रावरुणेन दंडेनोत्थापयेत् अन्येनवा ओ दुंबरदंडेनवा तत्र प्रशंसा उर्ग्वा उदुंबर इत्यादि उथापन मंत्रमाह उदुस्त

निस्वेति उ दुसृतिष्ठप्रति तिष्ठमभिषोमे मं यज्ञं यजमानं चरोरि वः स्ववर्गे लोके यजमानः धेहि शं नएधि द्विपदे शंच तुष्पद इति मं
त्रेण उस्रगां उदश्वाति षेस्य श्वं उस्य पद स्थाने अश्वेति पदं प्रक्षिप्य एतेन मंत्रेण अश्वमुत्थापय प्रदेवमुत्तरत्रापि योऽयं उच्छागेति
छागमुन्मेषेति मेष मुद्रुशा इति वशामुपाकृतः पशुः अकृण्वं तं मायुं संज्ञपयन्ते ति संप्रेषात्पूर्वं मृतश्चेत् प्रायश्चित्त न माकृतित्रय
मुक्तं वक्ष्यति च प्रायश्चित्त शेषं अथान्यं न दैवत्यइत्यादिना इदानीतु प्राक्पर्यग्निकरणान्मरणे प्रायश्चित्तमधिकमाह स उच्यते
त् प्राक्पर्यग्निकरणान्म्रियेत्तयोऽश्वमेधे अश्वमे[illegible]रणे प्रायश्चित्तिर्विहिता अश्वमेधसूत्रेण अथयद्यश्व मुपतपद्विंदेदा
ग्नेय मष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरुः ऐंद्रश्चरुरित्यथयदि नावगच्छ त्यग्नये वैश्वानराय द्वादशाक
पालो मृगारवरइत्यथयदि वडवाभिः संसृजते अग्नये अंहोमुचे अष्टाकपालः सौर्यं पयो वायव्य आज्यभागो यद्यभिचारिरोद्रे
य दिस्रावः पौष्णोयद्य स्कं वारुणः काणः सौर्य इति तस्माधि विशेषे निमित्ते प्रायश्चित्तानि विधाय विहितं एतासामार्तीनां य ५८
कांचनेतिसकृत्सैव प्रायश्चित्तिरिति एतासां प्रागुक्तानां आर्तिनां व्याधीनां मध्ये यां कांचन अतिव्याधिं प्राप्य तेन म्रियेतत

दापिप्रायश्चित्तिः तत्रतत्र प्रागुक्ता प्रायश्चित्तिरेव कार्या सा च सकृदेव न तु आर्तिमरणयोः पृथक् प्रायश्चित्तिरित्यर्थः इति प्राय
श्चित्तिरत्र कर्तव्या व्याधिमंतरेण मरणे अपरं च आह अश्वमेधे यदि नश्येद्वायव्यं चरुमिति योश्वमेधे प्रायश्चित्तिस्तांकृत्वा अ
थ उपक्रांतस्य पशुयागस्य समापनाय अन्यं तद्दैवत्यं पूर्वोपाकृतपशुदेवतोद्देशमुक्त्वा तद्वर्णं तद्रूपसंतद्रूपं तज्जातीयं मश्वमा
लभेत पलायितस्य पुनरागमनाभावेपि इदमेव प्रायश्चित्तमाम्नातमापस्तंबेः यस्माद्दीपापलायिष्ठा इति द्वितीयापलाइ
ते नागच्छत्यन्यत्तद्रूपवर्णवंसयतद्दैवमुपाकृत्य यजेतेति तस्योपाकरणादि सर्वमावर्ततेत्यनिपर्यो कोरकं सर्वमावर्तन।
यन्निर्मथ्य सामिधेनीर्लिछेषाघारसंप्रेषः संमार्गप्रवरवर्जं निर्मंथनादि तु सकृत् कृतं पुनः नावर्तते आरादुपकारवर्जं अ
गमावर्त्तत इति न्यायसिद्धस्यानुवादोयं तस्योपाकरणादीत्यादि अथ यदि तज्जातीयं न विदेत् आजापयो गो अश्वा इत्यन्योन्यस्य
प्रतिनिधयो भवंति तेषां मेषश्च छागश्चोपाकरणीयो आलाभे प्रेषस्य छागस्य वा आलाभे अन्यतममालभेत मेषादीनां
मध्ये अन्यतमं गां अश्वं तद्रूपवर्णवयसं आलाभेत प्रतिनिधेरपि पशोर लाभे प्रायश्चित्तप्रकार उक्तः सत्याषाढेन पलायि

प॰सू॰बो॰ तोयदिनागच्छेत्तद्रूपं तद्वर्णं तज्जातीयं तद्देवत्यमुपाकृत्य तेन संस्थापयेत्तज्जातीये अविद्यमाने ज्ञावयोगो अश्वा इत्यन्यो
५५ न्यस्य प्रतिनिधयो भवंति तेष्वविद्यमानेषु आज्येन शेषं संस्थापयेदिति तस्य प्रतिनिधेर्हयाकृतस्य प्रचरणः कल्पः प्रयोगप्र
कारः त्वाष्ट्रे पास्तत्रियां चे यूपो विरोहेत्सं प्रच्छिद्यास्य चषालं सवनीयस्य त्वाष्ट्रमुपालंभ्य कुर्युरिति विहितेन त्वाष्ट्रेण पशुना
व्याख्यातः सप्रपंचेण कल्पः अन्यत्तं त्रोपजीवनं उपांशु त्वाष्ट्रिश्च उक्तं खलूपांशुधर्मत्वस्य पशोः पुनराधेयकर्मेति अथेमान्यपं
शूधर्मणो रूपकर्मस्य वरत्तथैग्न्याधेयं पुनराधेयमित्यनुक्रमणमध्ये त्वाष्ट्रो यूपनिरोहणीय इति आधास्यमत्तस्य पशोः
शरीरमप्सु प्रवेशयति न वा उ वा ब्वन दिति आशानां त्वेति द्वाभ्यामिति प्रायश्चित्तविवरणाकारस्तत्तस्य त्वाष्ट्रेण प्रचरण
कल्पो व्याख्यात इति सूत्रं तस्य तु त्वाष्ट्रेण कल्पो व्याख्यात इति तस्य अन्यतमस्य प्रतिनिधिनियमस्य त्वाष्ट्रेण व्याख्यात
इति उपालंभ्य कुर्यादित्यादि स्कवाकुतिपक्षे त्वष्ट्रे स्वाहेति वपापुरोडाशहविषामिति व्याख्यानं अत्र यत्प्रपीदं सर्वं नियमेन
कुर्वंतीति इदं सर्वं प्रपंचितं यदासंज्ञप्तं पशुं प्राकुरत दापशुं प्रायश्चित्तानि संभावितानि रूत्वा ततः यत्पशुर्मायुमकृतेति ५५

संज्ञप्ताकृतिं जुहोत्यपूर्वाज्येन अथाभ्येतिशमितार उपेतनेतीति अभ्येति अभिमुख्येन गच्छति पशुशमितारः यत्रइति पाशात्पशुं प्रमुच्यमा
नमनुमंत्रयतेरितिः पाशंप्रमुमोक्तेनमिति प्रमुच्यमानं पाशात्स्पष्टमन्यत् अविशारवयोपसज्येमदिशं निरस्यत्यरातीयं तमधरंकु
ण्योमियंद्विष्मस्तस्मिन्प्रतिमुंचामिपाशमितीति अविशारवयावपाश्रपण्या उपसज्य आदायपशुरशनांइमांनैर्ऋतीदिशियस्यांवाढे
ष्योभवति नांदिशंनिरस्यति यंद्विष्मस्तस्मिन्प्रतिमुंचामिपाशमितिमंत्रलिंगात् अत्रद्वैधंपशुरशनाया निरसनइतिचात्वालेपशु
रशनामुदस्येदितिबोधायनोद्विर[illegible]भ्युक्ष्य संवस्यउदस्येत्तिशालीकिरितिस्पष्टं अथप्रतिप्रस्थातापत्नीमुदानपस्फरदकमंडलु
मुत्थाप्येति उदकमंडलुमुत्थाप्यग्राहयित्वास्पष्टमन्यत् अत्रद्वैधं पत्न्याउदानयतिसूत्रं शालीरेन्नोह स्माबोधायनेनावाप्रेहीत्सेनं
प्रणयेदथैनामादित्यमुदीक्ष्यानर्वाप्रेहीत्येवंप्रणयेदितीतिसूत्रं आदित्यावेक्षणोत्तरकालं अंतरेणचात्वालोत्करा उदङ्निष्क्रांता
याः प्राचीदिशंप्रतिनयनकालेनर्वाप्रेहीतिवाननमितिप्रतिपादकं शालीकेर्मतं बोधायनस्त्वाह पूर्वमनर्वाप्रेहीति एनांप्रण
योदानयेत् अथैनाआदित्यमवेक्षय्य पुनरपित्तेनैव अनर्वाप्रेहीतिमंत्रेणेव प्रणयेदानयेदिति अथैनामादित्यमुदीक्षयति न

प॰स्रू॰बो॰ मस्त आत्तानेतीति स्पष्टं अथैनामंतरेण चात्वालोत्करा उदङ् उपनिष्क्रम्य प्राचीमुदानयन्वाचयत्सर्वाप्रेहीघृतस्य कुल्यामनुसह
९६ प्रजयासह रायस्पोषेणेनीति स्पष्टं आगतामध्वर्यु रस्क वाचयत्यापोदेवीः शुद्धायुवः शुद्धायूयं देवाः उढ्वं शुद्धावयं परिविश
परिवेशाः रोवोभूयास्मेतीति आगतां पशुसमीपमागतां पत्नीमध्वर्युः अशिवेति निमित्तसमीप अपोवेक्षमाणां वाचयतीत्य
र्थः अ॰ ॰ त्रेत्थं अपामवेक्षणइति उपरिशाच्चत्वालस्यावेक्षयेदिति बोधायनः पार्श्वतः पशोरिति शालीकिरिति अपावेक्षणे
आगतामध्वर्यु रस्क वाचयती स्फक्ते अपामवेक्षणे आगतामध्वर्यु स्कवाचयतीस्फक्ते अपामवेक्षणे गतमन्यत्तु सानुपूर्व्य
पशोः प्राणानाप्याययतिवाक्ते आप्यायमिति वाचं प्राणस्त आप्ययतामिति प्राणं चक्षुस्त आप्यायतामिति चक्षुः श्रोत्रं
त आप्यायतामिति श्रोत्रमेतानेव पुनः संमृशति यान्प्राणाकुजगामयाचक्षुर्याश्रोत्रं यत्तेक्रूरं यदास्थितं तत्त आप्यायतां
तत एतेन शुंधस्वामितिनाभिस्त आप्यायतां नाभिं पायुस्त आप्यायतामिति पायुं प्रगृपदः प्रक्षालयतिशुद्धाश्चरित्रा ९६
शमतुभ्यः शमोषधीभ्यः शं पृथिव्या इति महोभ्यामिस्रतिशिष्टादक्षिणातोनुपृष्ठं निनयनीति सापत्नी अनुपूर्वक्रमेण

वक्ष्यमाणेनवागादीनां क्रमेणापश्शो : प्राणादवक्ष्यमाणान् वागादीनाप्यायति अद्भिः संस्पर्शयतिकथमित्यआह वाक्तआप्याय
तामिति मितिवाचमित्यादिवागधिष्ठानमेवमुत्तरत्रयादिशब्देषु अप्यधिष्ठानलक्षणयाबोध्यवागित्यादिमंत्रे सूत्रेचवाचमि
त्याद्येकवचनादधिष्ठानभेदेनविवक्षितः अन्येअधिष्ठानभेदात् मत्यधिष्ठानमावर्तयंतिद्रव्यसंस्काररूपत्वात्कर्मणः साप्या
युस्तआप्यायतामिति वायुंनाभिस्तआप्यायतामिति नाभिमितगतं संप्रगृह्य एकीकृत्वागृहीत्वापादः पदान्प्रक्षालयतिशुंधाइ
तिशं महोभ्यामित्यतिन्निष्ठोअपः दक्षिणतः अनुपृष्ठं प्रतीच्याआरंभ्य आपृष्ठांतान् भूमौपल्पेवनिनयति अत्रापिसेत्सनुव
तिः नयंति त्वीमितिपत्नी स्थायतनं प्रतिनंप्रतिउत्तानंपशुंपर्यस्यंतीतिपशुंउत्तानंधेय इदंविशेषणंपर्यस्यंतियंपरिवर्तयंति
आवर्तयंतीत्यर्थः तस्यदक्षिणस्यपार्श्वस्यविवृत्तमनुप्राचीनाग्रंबुच्छिषिदधातोषधेत्रायस्वेनमिती ति तस्यपशोर्दक्षिण
स्यपार्श्वस्यविवृत्त मनुअनुलक्षणे आवर्तलक्षितात्वंआवर्तलक्षितेत्यचः प्रदेशेप्राचीनाग्रंबहिरुपाकरणबहिषोरन्यतरत्

प॰सू॰यो॰ ५८

प्रज्ञातेबर्हिषीनिदधाति प्राङ् निहितं निहन्यमाप।नाम बर्हिरुपास्यतीति विहितादन्यत् ओषधेत्रायस्वेन मिस्कपारपापोरवि
शिषं दक्षिणेननाभिमंतर्धायेत्यापस्तंबनआचीनाग्रं निदधासोषधइतिस्वधितिनिर्यचं निदधातिस्वधितेमेनꣳहिंसीरिति
तस्यबर्हिषउपरिस्वधितिं तिर्यचं निदधाति स्वधितइति छिनत्तिबर्हि विंत्यचरूपाती तितत्तबर्हिस्वधितिना छिनत्ति विलवं
रूणति छिनत्तिअथैतस्यैवबर्हिषोणि मत्सवतइतिअथएतस्यछिनस्यैवबर्हिषः अणिमस्सूक्ष्मं अग्रसचतेअंगुल्यासक्तं क
रोति स्फ्यमडुभयतोनाहितेनाक्तेमां दिशं निरस्यतिरक्षसांभागोसीरमहꣳरक्षोधंमतमोनयामियास्मांद्वेष्टियंचवयंद्विष्म
इरमेनमथमंतमोनयामीतिस्फ्यविमत् स्फूलंमूलं उपायनः उभावंतौ लोहितेनांक्तां इमांनेर्ऋतीदिशंनिरस्यतिरक्षसांभा
गोसीरमहमतिअत्रेद्वैधंबर्हिषः समंजनइति सूत्रंशालीकिरनोहस्माद्बोधायनस्तथात्कमेवेतरस्यदितरएवैततयानि
रस्येइक्षसांभागोसीस्योदकंस्पर्शेदितीति बर्हिषः समंजनइदमुच्यतेसूत्रेस्फ्यविमडुभयतइत्यादिकल्पसूत्रंशालीकेर्म
तंबोधायनस्त्वाहयथाच्छेदनकाले अक्तं भवति तथाक्तमेवइतरतः एकस्यां तस्यां दितरत एवइतरस्त्विवतीर्वक्तव्याः एवमपिउ ५८

भयतोन्ननमनुगच्छतइतिगन्नमन्यत् अथाउपस्पर्शायआच्छापयेत्वेतिवपामुत्तूखिदन्तीतिवपाविस्तीर्णतरमाच्छापभित्वावपामुत्ति
इतिउर्ध्वषतीषेत्वेति गत्तमन्यत्तूतयावपाश्रपणीप्रोर्णोतिघृतेनद्यावापृथिवीप्रोर्णुवाथामितीत्ति तयावयवावपाश्रपणीवपाश्रपणी
विशारवांअविशारवांषेस्कंतत्रदर्शनात्सुपासुलुगितिपूर्वसवर्णदीर्घश्छांदसः वपयाद्विशूलांप्रच्छ येस्यापस्तंबःप्रोर्णोतिप्रकर्षे
णाच्छादयतिघृतेनेति अविशारवायोपरिच्चाधस्तात्परिवासयत्याच्छिनोरायःस्कवीरइति अन्यशाखया एकशूलयावपाश्रपण्याउपत
घउपतर्दनंकृत्वाभित्वाअथस्तात्परिवासयतिछिनत्तिअच्छिन्नइतिअधस्तात्परियासनविधिबलादवगम्यतेउपरिभा
गेउपरितर्दनमितिअथवात्तयावपाश्रपणीस्यादरेपराव्याख्यात्तयावपयावपाश्रपणीचपाश्रपण्योछंदसीतिपूर्वसवर्णादी
र्घः प्रोर्णोतिप्रकर्षेणाच्छादयतिघृतेनेनेतिद्वेअपिवपाश्रपण्यावाच्छादयतिवपयाआहरवबुसत्याषाढः घृतेनद्या
वापृथिवीप्रोर्णुवाथामितिद्विशूलयैकशूलांचप्रच्छादयतीतिकात्यायनोप्याहवपामुत्तिवद्यवपाश्रपण्योःप्रोर्णोतिघृतेनद्या
वापृथिवीइतीत्तिएवमंत्रवर्णउपपन्नतरोभवतिअन्यथाद्यावापृथिवीप्रोर्णुवाथामितिद्विवचनांतममनुपपंनस्यात्भारद्वाजस्त्व

मपिवर्त्तने द्यावापृथिवी प्रोर्ण्वाथामिति वपाश्रपणी प्रोर्णोति तौ यद्यपि वपया द्विशूलां प्रच्छाद्ये स्यापत्तं द्वेरुक्ते नथापि ऊर्जेत्वेति
निष्टे तत्र श्रेकशूलयोपलक्षणनीति विहितस्य एकशूलयोपमर्दनस्य वपाया अधोभागे परिहर्तुं शक्य तया नपाश्रपणी वपाच्छादनस्य
अर्थसिद्धत्वयानुरोधः अविशाखाया वपाश्रपण्यायावपायां अधस्तात् अधोभागे उपरि प्रदेशो उपलक्ष्य उपलक्षणं कृत्वा अन्ययो
पलक्षणत्यन्ययानेतिश्रुतेः एकशूलयोपलक्षणति द्विशूलयानेस्त्यर्थ इति भावः अधस्तादिति परिवासयंतिनापि संबध्यते अधस्ता
त्परिवासयति छिन्नतिअछिन्न इति अथैनां प्रदक्षिणमाहृत्याद्भिरभ्युक्ष्य शामित्रे प्रतितपतीति अथ प्रदक्षिणमाहृत्य प्रा
ङ्मुखः पर्याहृत्य एनां वपां अभ्युक्ष्य अभितः उषित्वा प्रक्षाल्य शामित्रे अग्नौ प्रतितपति इति पशौ द्वितीयाध्याये द्वितीयः
खंडः अथोल्मुकप्रथमाः प्रतिपद्यंते न्वगध्वर्युर्वपपात्रवपाश्रपणी पुनरन्वारभतेयजमानएष्वूर्वंतरिक्षमन्विहीति अथ
उल्मुकप्रथमाः उल्मुकंप्रथममग्रं येषांते उल्मुकप्रथमाः प्रति पद्यंते गच्छंति आग्नीध्रेण निहितं उल्मुकं पुनरेवाग्नीध्रो गृ
हीत्वा आहवनीयमभिमुखो गच्छति अग्निना पुरस्तादेति रक्षसामपहत्या अथो देवता एव हव्येनान्वेतीति हि ब्राह्मणं ५९

अन्वगध्वर्युर्वपया अध्वर्युर्वपाश्रपणीभ्यां घृतयावपासह आग्नीध्रमनु अन्वेति गच्छति आहवनीयं प्रति नयनसमये यजमानः
वपाश्रपणी पुनरन्वारभते एति आगच्छति उर्वन्तरिक्षमन्विहीति अध्वर्योर्मंत्रः एत्याहवनीयस्यांतिमेंगारेषु वपायै प्रतितप्य
मानायै बर्हिषोऽग्रेमुपास्यति वायो वीहि स्तोकानामितीति एतं तरेपा चात्वालोत्करावाहवनीयसमीपमागच्छेयुः आग्नीध्र आहृतमु
ल्मुकमाहवनीयेपि विसृजति वपयानत्सहोल्मुकमाहरंति यजमानस्य सात्मत्वायेति ब्राह्मणमिति ओपानुवाक्ये दर्शनात्तदु
ल्मुकं वपाहरणकाले वपाया सह आहरंति स्वस्थान आहवनीयं प्रस्थानपति यजमानस्य आहवनीयस्य प्राक् यजमानत्वेन स्कतत्वा
धस्त्वेकदेशसंबंधाय इति खलु तदर्थः अध्वर्युर्मंत्रेण गत्वा आहवनीयस्य अंतिनेषु अंतिकतमेषु संनिहिततमेषु अंतिशब्दात्कम
प्रत्ययेन मे लोभ्येति तादिलोपः अंतिकतमाश्च्वाध्वर्यो राहवनीयस्योत्तरतोंऽसा अंगारा भवंति त तम्ब्व आहवनीयस्योत्तरतो
तेष्वंगारेषु इति फलितार्थः वपायै प्रतितप्यमानायै वपाप्रतितपनार्थं बर्हिषोऽग्रमणिमत्सचत इत्य फंतं तदुपास्यति वायो वी
हि स्तोकानामिति नातमम अंगारमिति हरेदंतमम अंगारमिति हरेद्वन्ता अति मन्येत वायो वीहि स्तोकानामित्याह इति खलु ब्राह्मणं च

पायै प्रतितप्यमानाय ॥ इत्युक्तेरर्थादाहवनीयस्यांतिमेष्वंगारेषु वपायाः प्रतितपनं किंचित्कर्तव्यमित्यवसीयते अथैनामंतरेणायू
पंचाहवनीयंचोपातिहृत्य तां दक्षिणात उदङ्मुखः प्रतिप्रस्थाता श्रपयति अथ एनां वपामंतरेण यूपं चाहवनीयं चातिहृत्य प्रतिप्र
स्थाते प्रयच्छतीति शेषः प्रतीयते अन्यथाहनामित्युपात्तायावपायास्तामिति पुनः परामर्शासामंजस्यादंतरा यूपमाहवनीयं च
दक्षिणातिहृत्य प्रतिप्रस्थाते प्रयच्छतीत्यापस्तंबः गतमन्यत् अथैनां स्रुवाकुत्साभिजुहोति त्वामुतेदधिरे हव्यवाहमितीति अ
थएनामध्वर्युरपृषदाज्येन स्रुवाकुत्साभिजुहोति वपाया उपरि जुहोति त्वामुत इति ओपानुवाक्यस्थ मंत्रेण अथाह स्तोकेभ्योनुब्रू
हीतीति अथ स्तोकप्रादुर्भावानंतरं प्रादुर्भूतेषु स्तोकेषु स्तोकेभ्योनुब्रूहीति संप्रेष्यतीत्यापस्तंबः परिहितासु स्तोकीयासु सुश्रुता
यां वपायां जुहूपभृतावादाय स्वाकृम्याश्राव्याह स्वाहाकृतीभ्यः संप्रेष्यतीति परिहितासु समाप्तासु स्तोकीयासु अग्निसंयो
गात् वपायायै बिंदवः सूक्ष्माः श्चोतंति ते स्तोकाः तद्वाचकात् स्तोकशब्दान्मत्वर्थीयः छप्रत्ययः तथाच स्तोकशब्दैः युक्तासु ऋ
क्षु सप्रथस्तममित्याद्यास्वृक्षु श्रुतायां अलोहितायां श्रृतांकुर्वित्यापस्तंबः सम्यक्शृतायां वपायां सान्नाय्यस्यैव हविः संस्का ५९

राःकार्याःसान्नाय्यविकारत्वान्न पशुयागस्य स्पष्टमाह भारद्वाजः यदा शृतान्येनो भवत्यथैनासांनाय्यवदभिघार्यंत्तयोद्वास्वेत्ति तथाच
शृतायां वपायामभिघार्योद्वासयेत्तआसेति सान्नाय्यवदलंकरोति परंतु शृतायां वपायां पात्रांतरे अपूर्वाज्येनोपस्तीर्य वपां वपाश्र
पणीभ्यां स्रुधस्ता वथायाग्नावधिश्रित्य इदं सर्वं कर्तव्यं उद्वासनस्याधिश्रयणस्य च ततः पूर्वं साम्नायेदृष्टत्वात् आम्नाय मनुष्यार्थः श्र
तायां वपायां अपूर्वाज्येन पात्रांतर उपस्तीर्य वपां श्रपणीभ्यां स्रुधस्य तत्र न थायाग्नावध्यिश्रित्याभिघार्योद्वासयाभिघार्ययस्त अर्द्धे
स्यलं रुत्य वेद्यां दक्षिणतः पंचहोता सादयति पंचहोत्रा पशुमुपसादयतीति ब्राह्मणात् पंचतयेन कल्पमवेक्षेत छंदसां ब्राह्मणेन प्र
सयेन न्यायेन संख्या वचनेनेति कर्मांतवचनात् जुहूपभृतावादाय सादिव षट्कृतेन जुहोतीति गतं हे मंत्र द्विशिरा वित्तिकृतानुमंत्रणं
अथोदङ्ङत्याक्रम्य पृषदाज्यमभिघार्य वपामभिघारयतीति अथ स्वाहाकृतिप्रैष प्रचारानंतरं मुदङ्ङत्याक्रम्य संस्रावेण प्रयाजत्रोषे
णाज्येन गतमन्यत्त् अत्र कर्मांतं पशुबंधे चेदाज्यभागावुदाजिहीर्षेत् कस्मिन्नु खल्वेतौ काले यजेदिति स्वाहाकृतिप्रैषेण चरित्वा
प्राकू वपाया इति पशुबंधे आज्यभागो आर्तुमिच्छेत चेत् एतस्मिन्काले एतौ कुर्यादिति प्रश्नार्थः उत्तरं स्वाहाकृतिप्रैषेण चरित्वा प्राकू

४९ वपांचभिघारयतितथाचाह भारद्वाजः प्रत्याक्रम्य जुह्वांध्रुवामभिघारयतियदाज्य

प॰स्र॰बो॰ वपायाइति इमं कर्मांतोक्तपक्षमाश्रित्ययदाज्यभागौक्रियेत तदा संस्त्रावेणयथा प्रकृति ध्रुवामेवामेवाग्नेभिघार्यपृषदाज्यंभा
६० गौकरिष्यन्भवतिअपृषदाज्यमथवपांनोपभृत्तमितिप्रत्याक्रम्यप्रयाजशेषेणपृषदाज्यमभिघार्यवपाभिघारयति ध्रुवायां
प्रथमंपघाज्यभागौकरिष्यन् भवतीतिसत्याषाढः पक्षद्वयेपिउपभृत्तोनाभिघारणं अथोपस्तीर्यद्विः स्रुवेणवपासमवत्तंसप
न्नार्हद्राग्निभ्यां छागस्यवपायामेदसोवदीयमानस्यानुब्रूही।तीति अथजुह्वामुपस्तीर्यद्विः द्विरुपस्तीर्यवपास्रुवेणसमव
लुंपन्एकीकृत्यगृण्हानआहइंद्राग्निभ्यांइत्यादि द्विरभिघारयतीति गतं अत्रेद्वैधंवपायाः प्रदानइत्याज्यस्रुवास्युर्हिरण्यं
वाद्वितीयेचतुर्थेचेतिपूर्वः कल्पोबोधायनस्योत्तरः शालीकेरितिवपायाः प्रदानेयागेइदमुच्यतेआज्यस्रुवाएवोभयतोव
पायाः द्वौपुरस्तात्द्वावेवोपरिष्टात्वपाचैकाइतिपंचावदानानीत्येकः पक्षः हिरण्यजातरूपंवाद्वितीयेचावदानेउपस्तरणाभि
घारणयोराज्यस्रुवावेववपायाः पंचावदानानीतिपक्षांतरंगतमन्यत्तु अमुमर्थमैत्तरेयिणः समामनंतियद्यपिचतुरवत्ती
यजमानस्यादथपंचावत्तेववपाज्यस्योपस्तृणातिहिरण्यशल्कोचपाहिरण्यशल्कआज्यस्योपरिष्टादभिघारयतितदाहुः ६०

र्यद्धिरण्यंन विद्येतकथंस्यादितिद्विराज्यस्योपस्तीर्यवपामवदायद्विरुपरिष्टादभिघारयतीत्यापस्तंबोप्याहद्वत्तुरवत्तिनोपि
पंचावत्तेवस्यादिदंइति अस्याऋग्याश्राव्याहेंद्राग्निभ्यांछागस्यवपांमेदः प्रस्थितंप्रेष्येतीतिस्पष्टंअथपुरस्तात्स्वाहाकृतिंजुहो
तिस्वाहादेवभ्यइतीतिअथसंप्रेषानंतरंपुरस्तात्स्वाहाकृतिंपुरस्तात्स्वाहाकृतिः यस्यास्तांस्वाहादेवेभ्यइतिमंत्रमुक्त्वास्रुवा
हुतिंजुहोतिइयंपुरस्तात्स्वाहाकृतिःस्रुवाहुतिःउपरिष्टात्स्वाहाकृतिस्तुवपायागानंतरमथोपरिष्टात्स्वाहाकृतिंस्रुवाहुतिं
जुहोतिदेवेभ्यस्वाहाइतिविधानस्यते अथोभयत्रापिस्वाहाकारस्यस्थानन्यासेब्राह्मणेकारणंप्रदर्शयतिपुरस्तात्स्वाहा
कारावाअन्येदेवाउपरिष्टात्स्वाहाकारावाअन्येस्वाहादेवेभ्यस्वाहेत्यभितोवपांजुहोतितानेवोभयान्प्रीणातीतितत्रपुरस्तात्
स्वाहाकृतीनामुपरिष्टात्स्वाहाकृतीनांचदेवताप्रतिप्रत्यर्थमिदंकर्मातंपुरस्तात्स्वाहाकृतयोन्येदेवाउपरिष्टात्स्वाहाकृत
योन्यतिआदित्यस्यवेलेरश्मयःप्राचीनाःप्रतीचीनाश्चभवंतीतिस्पष्टंविज्ञानमेवप्रयोजनमेतस्यसूत्रस्यवषट्कृतेवपां
जुहोतिजातवेदोवपयागच्छदेवान्त्वंहिहोताप्रथमोबभूथघृतेनत्वंतनुवोवर्धयस्वस्वाहाकृतंहविरदंतुदेवास्वाहेतीति

प.स्.बो. इंद्राग्नो रहं देवयज्ययेंद्रियावी भूयासमित्ति कृत्वानु मंत्रणं ओमानं महिमानमितिमहेंद्रयाजिनः स्पष्टं अथोपरिशास्वाहाकृतिं स्क
६१ वाकृतिं जुहोति देवेभ्यः स्वाहेत्तीत्तिगर्त अत्रवपाश्रपणी अनुप्रहरत्ति प्राचीं विशाखां स्वाहोर्ध्वनभसं मारुतं गच्छत्तमित्तिनीअत्रक
ले वपाश्रपणी सह अनु प्रहरति कथमित्यत आह प्राचीमित्यादि प्राचीं प्रागग्रां विशाखां प्रतीच्चिप्रत्यग्रामविशाखां कृत्वा विप्
वी प्रहरत्तीत्ति ब्राह्मणस्यायमेवार्थ इतिभावः आपस्तंबस्त्वाह प्राचीं द्विशूलां प्रतीचीमेकशूलामेतद्वा विपरीतमिति अथैनं संस्त्र
वेणाभिजुहोतीत्ति स्पष्टं अथ उदङ् सात्क्रम्य यथायतनं स्रुचौ सादयित्वा समुत्क्रम्य चात्वाले मार्जयंत इति यथायतनं स्रुचौ सा
रयत्यध्वर्युः अथ सर्वे समुत्क्रम्य चात्वाले मार्जयंते अध्वर्युणालयोः समानकर्तृकत्वात्वाप्रत्ययः मार्जनस्यैव प्रकारं दर्शयति ह्वयं
तिपत्नीं ह्वयंति होतारं ह्वयंति ब्राह्मणं ह्वयंति प्रतिप्रस्थातारं ह्वयंति प्रशास्तारं ह्वयंत्याग्नीध्रमेहि यजमानेतीदमापः प्रवहता
वद्यं च मलं च यत् यच्चापिदुद्रोहानृतं यच्छेपे अभीरुणं निर्मामुंचामि शपथान्निर्मा वरुणाउत निर्मा यमस्य पड्बीशात्सर्वस्मा ६२
द्देवकिल्बिषादथो मनुष्यकिल्बिषादितीति अध्वर्युः पत्नीं होतारं ब्रह्माणं प्रतिप्रस्थातारं प्रशास्तारमाग्नीध्रं यजमानं च पर

स्परं कर्मनामधेयेनाहूयचात्वाले समुक्रम्य मार्जयंत इदमापइतिएहियजमानेत्तियजमानंव्हयंतीत्यस्य रयोजनाअथांजलिनाय
उपहंतिस्फ्मित्रानआपओषधयःसंत्विती ति उपहंति गृण्हात्तियजमानःगतमन्यत्यां दिशं निरुक्षतियस्यामस्यादिशिद्वेष्योभ
वत्तिदुर्मित्रास्तस्मै भूयासुर्यो स्मां द्वेष्टियंचवयं द्विष्मइत्तीतियजमानस्तां दिशं निरुक्षत्तिनिर्दिश्यसिंचातियस्यां दिशि अस्यय
जमानस्यद्वेष्योभवत्तिदुर्मित्राइतिअथाउपस्पृश्ययथायत्तनउपविशंतीतिअथउपस्पृश्यहस्तौप्रक्षाल्ययथायत्तनंस्वेषुस्वेषायत्त
नेउपविशंत्तिपञ्चो द्वितीयेध्याये तृतीयःखंडः आध्यायश्च संपूर्णः बोधायनीयसूत्रस्य कृताद्युतिःसुबोधिनी ॥ ॥पञ्चो
पूर्णोद्वित्तीयोभूदध्यायः॥ ॥अथसंप्रेषमाहाग्नीत्पशुपुरोडाशंनिर्वपप्रतिप्रस्थातःपशुंविशाधीतीत्ति अथउपवेशनानंतरं
संप्रेषमाहाध्वर्युःअग्नीदित्यादि निर्वपस्वेषआग्नीध्रंऐंद्राग्नमेकादशकपालमितिस्पष्टोक्षरार्थः अनुष्ठेयार्थोवक्ष्यत्तेअत्रक
र्मांतंअथायंपशुपुरोडाशस्तस्यकःकर्मणउपक्रमोभवतीत्तिजघनेनगार्हपत्यंस्फ्यंनिदध्यात्स्फ्योपरिपात्रीपात्र्यांव्रीहीनावपेत्
शूर्पादानादिकर्मांतस्तायत्तआप्यनिनयनांतो जघनेनगार्हपत्यमाप्येभ्योनिनयेत्प्रोक्षणीशेषेणमिश्रानिसंयोयादेवं सवनी

प·सू·बो· यानांयथोक्तन्तत्र्बोधायनस्यकल्पंवेदयंनेनिरवदायैवास्यस्विष्टकृतमवद्येत् कथमत्रचतुरवत्तंभवतीतिउपस्तीर्यपुरोडाशंद्वेधा
६२ कृत्वाभिघारयेत् एवमत्रचतुरवत्तंभवतीतिअथायंपशुमालभ्यपुरोडाशंनिर्वपतिसमेधमेवैनमालभन्तेवपयाप्रचर्यपुरोडाशेनप्र
चरत्यूर्गेवैपुरोडाशऊर्जमेवपशूनांमध्यतोदधात्यथोपशोरेवच्छिद्रमपिदधातीतिब्राह्मणेनकल्पेनचविहितोयंवपशुपुरोडाशस्यया
गः सपशुपुरोडाशः पश्वर्थः पशुयागार्थः पुरोडाशः पशुपुरोडाशः तस्य कर्मणः उपक्रमप्रयोगक्रमः तस्यैववक्ष्यमाणत्वात् कोभ
वतीति विचार्यनिश्चीयतइत्यर्थः प्रयोगप्रकारमाह जघनेनगार्हपत्यमित्यादि पशुयागेनसमानतंत्रः पशुपुरोडाशयाग इतिपक्ष
माश्रित्यप्रयोगप्रकारो जघनेनगार्हपत्यंस्फ्यंनिदध्यात् स्फ्योपरिपात्रीं पात्र्यांव्रीहीनावपदिति यथुर्वैनानोभवतिजघनेनगार्हप
त्यंस्फ्यंनिदधातीत्यनसोभावेविहितस्यानुवादोनियमार्थंगम्यते तथापात्र्यांपुरोडाशीयानावपतीतिप्रकृतोप्रसक्तव्रीहियवसा
धारणपुरोडाशशब्दंविहायव्रीहीनितिव्रीहिशब्दप्रयोगादत्रव्रीह्योनियम्यतइति गम्यते तथैवापस्तंब आह व्रीहिमयंपुरोडा ६२
शंनिर्वपतीति क्रमंगमारभ्य व्रीहिनिर्वापंकुर्यादित्यत आह शूर्पादानादिकमिति स्तायत्त आप्यनिनयनांतकर्मणः फलक

रणेतिकर्त्तव्यतारूपस्यांतःकर्मातः इतिकर्त्तव्यताअंगमित्तियावत् यथाविध्यंत इत्यत्र शूर्पादानादि आप्यनिनयनांतस्तायत्तेशूर्प
दानप्रभृत्याप्यनिनयनांतं प्राकृतमंगमनुष्ठेयं अत्र शूर्पादानादित्रिभुवन्पाशुकैः पात्रैः सहपुरोडाशपात्राणांसादनंप्रोक्षणंच
कृत्वेदर्शयतिइदंवचनादवगंतव्यंपाशुके रंगेः प्रसंगादुपकारोभवतिपशुपुरोडाशस्य इत्तिहिन्यायविदांमतं आग्नीध्रः पाणि
संमर्शनंकरोतिप्रकृतौ पाणिसंमर्शनसमानकर्त्तृकत्वात् परार्थानांपरिस्तरणपात्रासादनप्रोक्षणंएष्मास्तरणप्रणीताप्र
णयनादिनकरोतिशूर्पादानाद्याप्यनिनयनात्समानमाप्यनिनयने विशेषमाह जघनेनगार्हपत्यमाप्येभ्योनिनयेदितिप्र
कृतौजघनेनगार्हपत्यमाप्येभ्योनिनयेदितिबोधायनइतिद्वेधोक्तः पक्षोत्रनियम्यते संयवनेविशेषमाहप्रोक्षणीशेषेणापि
शनिसंयौयादितिपशौप्रणीताभावपक्षः इदमिष्टिविधौवा अन्यः पशुबंधः सोमविधौन्यः सपत्रेतदृश्यः प्रणयतिपूर्णपात्रे
निनयतिविष्णुक्रमान्क्रामतीति सइष्टिविधौनान्यः सोमविधइतिवाजसनेयकं प्रणीताभावपक्षस्यकल्पांतरेपिप्रसिद्धं अथवा
इह पशुपुरोडाशएव एतस्मादेववचनात्प्रणीताविकल्पइतिगम्यतेतथाच प्रणीतानांसंयवनार्थत्वपक्षेचनपशौप्रणीताः इतिपशु

प.स्.बो. पुरोडाशेप्रणीताः प्रणयत्ताभिः प्रोक्षणीशेषेण वा संयोयात् अदृष्टार्थत्वपक्षे तु ताभिरेव वैभवेन तंत्रेणोपकार संभवात् पशुपु
६३ रोडाशे पशुप्रणीताभिः संयवनं यद्यपि प्रोक्षणीशेषेणेति वचनं प्रणीतानामभावोभयपक्षसाधारणं तत्तस्त्वो भयत्रापि प्रोक्षणी
शेषेण संयवनं उक्तं तथापि दृष्टार्थकर्मतो यानुवाक्योक्ता विधयो मूलकल्पप्रकरणोक्तैर्विधिभिर्विकल्प्यंत इति ब्रुवतां मते पशु
प्रणीताभिः संयवनविकल्पः संभवात् वेदिकरणादि पशौ कृतमेव तन्नोद्वासनात्कार्यं प्रसंगपक्षे तु यान्यपश्वर्थानि पात्राणि त
नि पशौ न सादयंति तैः पशोरुपकाराभावात् यानि पश्वर्थानि प्रसंगेन पुरोडाशस्योपकुर्वंति तानीह न कर्तव्यानि ना[illegible]ग्न्यन्वाधा
नादिकरणं क्रियते कृतत्वात् पाणिसंमर्शनाद्याग्नीध्रः प्रतिपद्यते परिस्तरणास्य कृतत्वान्न क्रियते पात्राणि सादयति कपाल
निशूर्पकृष्णाजिनमुलूखलमुसले दृषदुपले मेक्षणं प्रणीताप्रणयनं तु विकल्पेन प्राशित्रहरणं पिष्टोद्वपनीं दारुपात्रीं मदंतीं स्था
लीमिति निनक्षास्तरणं कृतत्वात् पवित्रकरणादि समानं प्रणीताभ्यः संयवनं यदि पशौ पुरोडाशे वा प्रणीताप्रणयनं कृतं न चेत्त ६३
प्रोक्षणीशेषेण वेदिकरणादि न क्रियते प्राशित्रहरणसंमार्गः क्रियते परिभोजनीये रश्मेस्वाते जिष्ठेनेति संलपनमंत्रं संनमति संमा

र्जनप्रहरणेमंत्रेणतथाहप्रसंगपक्षंसत्याषाढःमार्जयित्वापशुपुरोडाशस्यपात्रसंसादनंप्रभृतीनिकर्माणिप्रतिपद्यतेयथार्थं
मोषधिपात्राणिप्रयुनत्त्येकाहस्ताद्वादयाकपालानितेसहशूर्पंकृष्णाजिनंशम्यामुलूखलंमुसलंदृषदमुपलांकुटरुपात्रीं
मेक्षणंवेदंप्राशित्रहरणंप्रणीताप्रणयनमिडापात्रंचेतिन्यथाप्राशित्रमिडाचक्रियेत्तेप्राशित्तायामार्जनंपिष्टलेपफलीकरण
होमोजुहोतिकपालानिविमुंचतीतिएतावत्तिकृतेनंतरंप्रतिप्रस्थातापशुंविशास्तीत्यादिअथकर्मांतसूत्रशेषोव्याख्यायतेए
षंसवनीयानामपिएवंजघनेनगार्हपत्यमित्यादितुयथोएत्तद्बौधायनस्यकल्पंवेदयंत्तेनिरवदानेवास्यस्विष्टकृतमवद्येत्
यथोयत्प्रकरणमेतत्त् अथोजुहूपभृतोपस्तृणानआहेत्यादिकल्पसूत्रमस्यपशुपुरोडाशस्ययागस्यनिरवदानेवअवदाना
नंतरमेवस्विष्टकृत्तंस्विष्टकृत्संबंधिनंस्विष्टकृत्तमवदानंकुर्यादित्येत्तदर्शितंतद्बौधायनस्यानुमत्तंकल्पंवेदयंत्तेअत्र
स्तथैवकर्तव्यमित्यर्थःकथमत्रयतुरवत्तभवत्तीतिअत्रइडायाअवदानेकथंचतुरवत्तंभवतीतिपशुःउत्तरमाहउपस्ती
र्यपुरोडाशंद्विधाकृत्वाअभिघारयेदेवमत्रचतुरवत्तंभवतीतिइडापात्रमुपस्तीर्यकृत्स्नंपुरोडाशंद्विधाद्वौखंडौकृत्वाअव

घेदभिघारयेदेवमत्रचतुरवत्तंभवतीतिअयंपुरः पुरोडाशोयद्देवत्यः पशुस्तद्देवत्यःकार्यः तथाखलुपरिभाषांकर्मान्तेसएव
पशुपुरोडाशाअन्यत्रवायव्याद्या यव्यपशुपुरोडाशावायव्येनुइष्टकापाशोवद्वादशकपालः स्तेनवैश्वानरनित्ती तिश्रुतेःद्वार
शाकपालः पशुपुरोडाशःयद्देवत्यः पशुस्तद्देवत्यःपशुपुरोडाशोभवति अन्यत्रवायव्यात् वायव्यपशोस्तुप्राजापत्यः यत्प्राजा
पत्यःपुरोडाशोभवतीतिश्रुतेरितिसमाप्ताकर्मान्तसूत्रशेषव्याख्या अथप्रकृतमनुसत्तमः अग्रेद्वैधं पशुपुरोडाशरनिर्व
पणइतिसूत्रंबोधायनस्यपशुमालभ्यपुरोडाशंनिर्वपेदितिशालीकिरित्तिपशुपुरोडाशस्यनिर्वपणाइदमुच्यतेसूत्रेअथसं
प्रेषमाहरग्नीत्पशुपुरोडाशंनिर्वपेत्स्यादिकेकल्पसूत्रचपाप्रचरणानंतरंपशो[illegible]पुरोड
शंनिर्वापविधिरयंबोधायनस्यमतंशालीकिस्त्वाहपशुमालभ्यपशुनिर्वपणानंतरंपशोर्नआलब्धस्यप्राणांश्चगृण्हाती
तिश्रुत्यामरणमालंभइति वदार्थइत्यवगतेः अथासपशुमालभ्यपशुप्रयोजनंकृत्वाश्रृतस्यत्वादेवहविःपाशोनारभइ
तिमंत्रलिंगात्नियोजनस्यालवशब्दार्थत्वात्आलब्धायस्वाहेतिनियुक्तेजुहोतीतिलिंगाच्च अत्रनियुक्तस्यपशोरा ६८

लभ्यायेतिचतुर्थ्यंतेननिर्देशेन आलंभशब्दस्यनियोजनार्थत्वलिंगं अत्रमतेवपाप्रचारानंतरमेवपशुपुरोडाशप्रचारोर
णभवितव्यंपशुमालभ्यपुरोडाशंनिर्वपति समेधमेवैनमालभन्तेवपया प्रचर्यपुरोडाशेनप्रचरन्तीतिब्राह्मणात्कल्पम
तेतुश्रृतेपशौपुरोडाशप्रचारःआपस्तंबोप्याह वपयाप्रचर्यपुरोडाशेनचेप्ररतिश्रृतेवापशाविति पशुमालभ्यपुरोडाशं
निर्वपतीत्यस्मिन्पक्षेसंज्ञपनंनियोजनंवा कृत्वा अग्नीत् पशुपुरोडाशंनिर्वपतिप्रैषःतत्तःआग्नीध्रःपाणिसंमर्शना
दिकरोतिप्रागुदग्वासनात्ततःपशुःप्रयोगःवपयाप्रचर्यपुरोडाशेनप्रचरतितिनःपशुविशासनादि अथवाअस्मिन्पक्षे
अग्नीत्पशुपुरोडाशंनिर्वपतिइतितिनसंप्रैषःपशुमालभ्यपुरोडाशंनिर्वपतीतिसमानकर्तृकत्वदर्शनात् पशुपुरोडा
शमध्वर्युरेवकुर्यात्कल्पांतरवत् अथप्रतिप्रस्थाता पशुंविशास्तिशमितर्हृदयंजिह्वांवक्षस्तानिसार्धंकुरुतात्तनिम
मतस्नोतानिसार्धंसव्यदोरेकचरंकुरुतात्तानापार्श्वेअवधत्तात्दक्षिणांश्रोण्यामध्युद्धिंकुरुतात्दक्षिणंदोसव्यांश्रो
णिमद्गुदस्यतानित्र्यंगानिकुरुतात्वनिष्ठुंवाजाघनींचावधत्तात्उरुयूःकुरुतात्त्रिःपशुप्रच्यावयतात्त्रिःपच्युतस्यापशोर्हृ

प॰ सू॰ बो॰ दयमुत्तमं कुरुतादितीति अथ अनंतरमाग्नीध्रेण पाणिसंमर्शनमारभ्य प्रागुद्वासनात्कृते सतीत्यर्थः प्रतिप्रस्थाताप
६५ शुं विशास्ति पशुं प्रत्याज्ञापयति शमितर्हृदयमित्यादिप्रैषं चरति आपस्तंबस्त्वाह हविष्कृतावाचं विसृज्य पशुं विशास्तीति
प्रैषस्यायमर्थः हृदयं जिह्वां वक्षस्तानि त्रीण्यपि सार्थं सह मिलितं एकवर्गं कुरुतात् इत्यनुषंगः सव्यं दोरेकपरं एकाकिनं कु
रुतात्तात पृथक्पृथक्स्पार्श्वे अवयवतानात् दक्षिणां श्रोणिं मध्युर्डिं ऊर्ध्वोशुक्तं कुरुताद्दक्षिणं दोः सव्यां श्रोणिमणिमत्यस
स्यत्तानि अंगानि स्विष्टकृदर्थानि कुरुतात् बहूनि पुं चज्ञायनीच अयथलात् बहुपूः बहुद्रवं जलं बहु प्रक्षिप्य बहुद्रवं कुरुत
त्रिः प्रच्यावयत्ता प्रच्यावनमुत्क्रमनमिति केचित् परिवर्तनमेव तत्कुरुतादिति अत्र प्रैषेति एकवचनांतानां क्रियाप
दानां स्थाने बहुवचनांतानि तानि प्रयोज्यानि तथैव सूत्राध्ययनादिति भाष्यकारमतिः ननु उक्तक्रमेण वर्गीकरणं किम
र्थमिति चेत् हृदयस्याग्रे द्विरवद्यति साह्यवदानवचनात् तदानुगुणात् तदानुगुण्याय इहाहि भेदेन वर्गीकरणं ननु अव ६५
दानक्रमवचनादेव अनेन क्रमेण ग्रहणसिद्धेरिह पृथक् वर्गीकरणमनर्थकमिति चेन्नहि विधौ ह्यवदानक्रमः हृदयस्या

ग्रेद्धिरवद्यत्तात्स्यादिवक्ष्यमाणः हृदयस्याग्रेद्धिरवद्यत्यथजिह्वाया अथवक्षसइतियस्यैकमवदाययथाकाममुत्तरेषामवद्यत्ती
त्वस्वशाखोक्तः क्रमएकः तत्रोभयत्रापिइत्थंवशीकरणायथास्यादित्येवमर्थइहभेदेनवशीकरणंतेनस्वशाखोक्तक्रमेहृदया
दित्रीण्यवदाययथाकाममुत्तरेषामवद्यतिपरंतुतन्निमित्तोगृहीत्वामनस्तोगृहीतव्यनान्यस्यएतेषांत्रयाणांयथाकामेना
स्तिएतेषामन्येषावक्रमेकामकारः इतिप्रयोजनसत्त्वभावादितिअत्रसंप्रैषेशमितारितिसंबोध्यमानः शमितारः त्विक्भ्यो
न्यः ऋत्विजामध्येवाएकः तथाचकात्यायनः विशास्तिपशुमन्यद्दत्विजांवैकइतिअत्रविपूर्वःशासिहिंसार्थेविकर्त्तनेचवर्त्त
तिसर्वाणिचहृदयादीनिअवदानानिसकलान्युद्धर्त्तन्यानिगात्रंगात्रमस्यानूनंकृणुतादितिमंत्रलिंगात् अत्रसंप्रैषेविद्यमा
नानिहृदयादिपदानिद्व्यानसंतेयाज्ञिकाः हृदयंपुंडरीकाकृतिजिह्वाप्रसिद्धवक्षः श्येनाकृतिमांसयुक्तास्थितनिमका
लवर्णमांससव्यभागस्थंयकृत्परनामयत्तस्कपार्श्वयोरास्रफलाकृतिरक्यापरनामानौसव्यंदोः सव्यंकमुभेपार्श्वेपदिं
शत्यावंक्रिभिर्युक्तेदक्षिणाश्रोणिः पृष्ठभागदक्षिणंपादमूलंसैवऊर्ध्वायुक्ता अध्युद्धिएकमंगदक्षिणंदोः दक्षिणबाहुफलकंस

प॰सू॰बो॰ व्याः श्रोणिपृष्ठभागसव्यपादमूलं गुदंशाकृत्त्निर्गमनार्थकांडंतस्यअणिमत्त्रैधंगुदंकृत्वाणि मन्त्स्विष्टकृते निरस्यानीतिव
६६ क्ष्यमाणेवनिष्टः स्थविष्ठं अंशं घनी पुच्छमिति अत्रैद्वैधं पशोःप्राच्यावनइतिहृदयंजिह्वांप्राच्यावयेदितिबोधायनोहृदयमेवे
त्तिशालीकिरिति पशोः प्रच्यावने परिवर्तने इदमुच्यते कल्पे समस्तं बपश्रुत्रिः पर्यावर्तयेदित्युक्तमिहबोधायनआहहृदयं
जिह्वां चद्वेएवपरिवर्तयेदितिहृदयमेवपरिवर्तयेत्उपरिगतस्यहृदयस्यपरिवर्तनंसम्यक्पाकार्थत्वात्सप्रयोजनंइ
तरेषांतुनपरिवर्तनंप्रयोजनभावादितिशालीकिः अत्रैवहृदयपाकविषयेद्वैधंहृदयस्यश्रपणइतिसूत्रंशालीकेरत्रो
हस्माहबोधायनः शूलयास्यमेवैनच्छ्रपयेदत्रैवहृदयशूलंपरितिस्तिष्ठयेयुरुपरिष्टाच्चमंत्रेणोपस्पृशेदितीतिहृदयस्य
श्रवणंइदमुच्यतेसूत्रंहृदयस्यइतरेरंगैःसहश्रपणविधिरयंशालीकिर्मतंबोधायनस्त्वाहएतन्नहृदयशूलपास्यमेवं
शूलेनपक्वंयथाभवतितथैवश्रपयेत्शूलेनप्रणोक्षहृदयंधामित्रश्रपयतीत्यापस्तंबः अत्रैवहृदयशूलंपरिनिस्तिष्ठेदु ६६
द्वासयेत्तशाक्षस्यचार्द्रस्यचसंधौहृदयशूलमुद्वासयतिशुगसिनमभिशोचयोस्मान्द्वेष्टियंचवयंद्विष्मइतिसूत्रोक्तमुद्वासनं

हृदयशूलस्यकुर्यादुपरिष्टात्स्थानएवचधाम्नोधाम्नइतिमंत्रेणा उपस्पर्शेदिति अन्यआह अत्रैवतूष्णीं मुद्धास्यउपरिष्टान्मं
त्रेणं चोपस्पर्शेदिति शृतेपशौपशुपुरोडाशं पाचतीति आग्नीध्रमिति शेषः अत्रशृते पशाविति सिद्धवन्निर्देशायथाचोदकंश्र
पणंतत्प्रकारस्तु घोरसीति मंत्रेण अध्वर्युः कुंभीं शामित्रेग्नावधिश्रपयति तस्यामुखरगं शाखापवित्रंनिदधाति वसूनां पवित्र
मसीतिकुंभ्यां[illegible]भूतमुदकमासिच्य पुरस्तात्प्रत्यङ्मुखोवदानानि सकलानि प्रक्षिपति तूष्णीं हृदयादीनां विर्गोकरणचिद्रूपा
दर्भरज्जासह प्रक्षेपः शाखाभावपक्षे अधिश्रपणानंतरमेवस्थाल्यामवदानानि सर्वाणि प्रक्षिपति ततः शामित्राय शासनं श्रप
यतीति ततः शाखापवित्रमादाय प्रस्तरेसादयेत्तूतमुपस्तीर्णाभिधारितं मुद्धास्यांतर्वेद्यासादयतीति ततः आग्नीध्रः अथा
दत्ते दक्षिणेनाज्यस्थालीं स्रुक्वां सव्येन पत्नीं वेदिमित्यारभ्य अंतर्वेद्यासादयति भूर्भुवस्स्वरित्येताभिर्व्याहृतिभिरिति पर्यंतं कुर्या
दित्यर्थः तं पशुपुरोडाशं यथाचोदकमुपस्तीर्णमभिधारितं च मुद्धास्य अंतर्वेद्यासादयतीति तु पदयोजना अथांतर्वेदि
हविषासन्नान्यभिमंत्रयते यन्मेअग्नेअस्ययज्ञस्यरिष्यादिति सूत्रविहितं याजमानं यथाचोदकमन्त्रकार्यपशौ यदि यथाकल्पसूत्र

भागेन कृत्तो नदाइहाज्यभागाभ्यां चरति पशुपुरोडाशस्य याग तस्यजन्योपकारलाभाय पश्चादाज्यभागा गकरणेतु इहनक
रोतिप्रसंगादेवोपकारलाभादाज्यभागो चेत् क्रियतेतदाआज्यस्थाल्याज्जुह्वां च तुर्गृहीत्वातेन चतुरवत्तेनोत्तम प्रयाजेन चरि
त्वा उरडु॰ स्याक्रम्य ध्रुवामभिघार्य पुरोडाशमभिघार्याज्यभा गाभ्यां चरति अथजुहूपभृत्तोरुपस्तरणानआहेंद्राग्निभ्यां पुरो
डाशस्यावदीयमानस्यानुब्रूहीत्ति पूर्वार्धादवदाया परार्धादवस्यभिघारयति प्रत्यनक्त्युपभृतिस्विष्टकृते सकृदुत्तरार्धादव
यतिद्विरभिघारयतिनप्रत्यनक्त्यस्याक्रम्यश्राव्याहेंद्राग्निभ्यां पुरोडाशं प्रस्थितं प्रेष्येतिवषट्कृतेजुहोसथसमावपमा
न आहाग्नयेनुब्रूहीत्याश्राव्याहाग्नेयप्रेष्येतिवषट्कृतउत्तरार्धपूर्वार्धेतिहाय पूर्वाआहुतीर्जुहोतीति इंद्राग्निभ्यां पुरोडा
शस्यावदीयमानस्यानुब्रूहीतिप्रैषानंतरं माभैरित्फ पस्थायभरत्तमित्यभिमृश्य पूर्वार्धादित्यादिचोदकतः प्राप्तस्यैवांग
जातस्य जुहूपभृतोरुपस्तरणानआहेत्यादिविशेषविधानार्थमत्रानुवादात्प्रत्यनक्तियदवदानानांत्तिस्विष्टकृते स्विष्टकृ
तस्थानीययोग्नयेजुहूपभृत्ताचारायासाक्रम्याश्राव्याहप्रत्याश्राविन्तआहअथजुह्वांमोपभृत्तं समावपमानआहइंद्रा ६७

ग्नेरहं देवयज्यया वृत्रहा भूयासमिति हुतानुमंत्रणं अग्नेरहं देवयज्यया युष्मान्यज्ञेन प्रतिष्ठां गमेयमिति स्विष्टकृतस्य एष मन्यत्
औपभृतं जुह्वां पर्यस्याग्नेऽनुब्रूहीत्यग्नये प्रेष्येति संप्रेष्यतीति सत्याषाढः अत्र कर्मांतं यथोक्तं तत्र बोधायनस्य कल्पं नेदयते निर
वदायैवास्य स्विष्टकृतमवस्येदिति यथा कल्पं सोऽविष्टकृतावदानं कार्यमिति तदर्थः व्याख्यानमेतत् अथाय पप्रभुपुरोडाश इति क
र्मांत व्याख्यानावसरे सत्याषाढो प्याह जुहू पभृतोरुपस्तीर्यावदाय अभिघार्येंद्राग्निभ्यां पुरोडाशस्यानुब्रूहीति संप्रेष्यतीति अथ
यथायतनं स्रुचौ सादयित्वा प्राशित्रमवदायेडामवद्यत्स्फप हृताया मिडायामाग्नी ध्रआदधाति षडवत्तप्राप्येति मार्जयंत इति अ
थ यथायतनं स्रुचौ सादयित्वे सेन तत्तद्वता गस्याचारः ततश्चेतेन प्राकृतमथो दडसाक्रम्या जुह्वामप आनीये स्याद्यप्यं दिति मिति
ज्ञेयं प्राशित्रमवदायेडामवद्यति अत्रेडावदाने अयं विशेषः इडापात्रं उपस्तीर्य कृत्स्नं पुरोडाशं द्वौ खंडौ कृत्वा अवद्येदभिघारये
दिति तथा च कर्मांतिकथमतं च तु रवत्तं भवतीति उपस्तीर्य पुरोडाशं द्वेधा कृत्वा भिघार्य येदेव मन्त्रं चतुरवत्तं भवतीति इदं स्र
त्रमधायं पप्रभुपुरोडाश इति कर्मांतसूत्रव्याख्यानावसरे प्रसंगात् व्याख्यातं एतेन याजमानभाग चतुर्धाकरणेन भवत इति ग

प.सू.बो. ष्यतेनयजमानभागमि[illegible]त्यापस्तंबः उपहूतामिडायामग्नीध्र आदधाति षडुरवत्तं प्राश्नंति मार्जयंते अत्रइडां मैत्रावरु
६९ णोपि भक्षयेदुपहूतां मैत्रावरुणाषष्ठा भक्षयितेत्यापस्तंबः उपहूतामिडां मैत्रावरुणाषड्ढ ऋत्विजः प्राश्नंतीति भारद्वाजः
न्यायंचैतन्मैत्रावरुणस्य प्रैषानुवाक्याकृत्वेन भक्षप्राप्तेः उरडुः स्वाकं स्युजुह्वा मपआदीये स्यादि प्रागन्वाहार्यपाचनात् स
मानमिति भाष्यंतु अविरुद्धं आकृतांगकला[illegible]पानुष्ठानपरंतेन औपभृतमाज्यं सर्वत्रैवाजुह्वां समानयनइसस्संभ
वितस्याविरुद्धस्य चानुनुष्ठानेपिनदोषः अत्रफलीकरणहोमेनचरंतिउत्तरत्र प्रायश्चित्तं कृत्वानफलीकरणहोमेनचर
तीतिविवचनात् प्रणीतास्तित्वपक्षे प्रणीतानिनयति अत्र पशुपुरोडाशस्यापिष्टलेपफलीकरणहोमो जुहोतीति भारद्वाजः
प्राशितायां मार्जनं पिष्टलेपफलीकरणहोमो प्रणीतासु मार्जनमुपवेषोदसनं कपालविमोचनं क्रियत इत्साषाढः अत्रा
वदानैद्वैधं पशुपुरोडाशस्येडायाअवदानइत्ति सूत्रशालीकि रत्राह स्माह बोधायनो निरवदीयतास्यपत्तिष्ठ कृत्तमिडा ६८
दवद्यदेवं सवनीयानामिति पशुपुरोडाशस्येडायाअवदानइदमुच्यतेस्विष्टकृतमहत्वा पश्चादिडावदानपरं सूत्रंमा

ग्नित्रमवदायेडामवद्यतीति कल्पसूत्रशालीकिर्मतं बोधायनस्त्वाह निरवदायास्य स्विष्टकृतं तदेवेडामवद्येत एवं सवनीयानां पशो
स्तदंगस्य पुरोडाशस्य च सौविष्टकृतावदानानंतरमेवेडावदानं धर्म इत्यभिप्रायः अथ संप्रैषमाहाग्नीदुत्तरं बर्हिः रूपसादय प्रतिप्र
स्थातः पशोः संवदस्वेति तिं अग्नीत्प्रयत् प्लक्षशाखां उत्तरं बर्हिर्भवतीति श्रुतविहितमुत्तरं बर्हिः रूपसादय प्रतिप्रस्थातः पशोपभु
गोचरं पशोः कृताकृतविषयसंवदनं मित्राकुर्वित प्रैषार्थः ननु उत्तरबर्हिः रूपसादनं स्कचादक्षिणतः पकस्य पशोरासादनंतरं
ततः दक्षिणतः पंत्रहो त्रासादयस्तेनैवसूत्राह रसे तेनेचेडसूनुमिति सूत्रादर्थैष आग्नीध्र इत्यादिस्कनुकरणपरिमिडसुनुकर
ण इति द्वैधात् नतस्य संप्रैषो भित्तैवकर्तुमुक्तोनंत्रलेति चडुत्तरं बर्हिः प्रैषानंतरं संवरनं प्रैषः सँवदनं चेत्यभिप्रायात् तदिदसुतं
भाष्ये उत्तरं बर्हिर्विशाप्यनंतरं संवदनं चशामित्राकृताश्रुतविषयमिति अथैष आग्नीध्रः प्लक्षशाखायामिडसूनुमुपगूहति तदुत्त
रबर्हिर्भवतीति यथाग्नीध्रः प्लक्षशाखायामिडसूनुमुपगूहति अथस्तात् संरत्तं करोति गुपगूहनेन इडसूनुं करोतीत्यर्थः तस
मनंतरनिर्दिष्टं प्लक्षशाखाया अथस्तात् संरतन इडसूनुमुत्तरं बर्हिर्भवतीति यत्प्लक्षशाखा रोत्तरं बर्हिर्भवतीति श्रुतिगतोत्तरबर्हिः

शब्दार्थो भवति उत्तरबर्हिःशब्दो रूढः यत्तु प्लक्षशाखायामुत्तरबर्हिर्भवतीति श्रुतेरर्थ इति भावः अत्रैद्वैधं इड सूनुकरण इति सूत्रं
बोधायनस्य च। हिंष्येव प्लक्षशाखायां हृदयं निधायावद्येदिति शालीकिरिति इड सूनुकरणमुच्यते सूत्रं अथैष आग्नीध्र इत्यादि
कस्य सूत्रं इड सूनुकरणविधिपरं बोधायनस्य मतं तत्र शालीकिस्त्वाह बर्हिषि वियमाना या प्लक्षशाखाया मेव हृदयं निधायावद्येत्
तु सूनुं कुर्यादिति न च य प्लक्षशाखायां उत्तरं बर्हिर्भवतीति श्रुतेरर्थः संभवति तथात्वे प्लक्षशाखाशब्दे सुपां सुलुगित्यादिना
सप्तम्या आकारादेश इति व्यक्तव्यं भवेन्न हि तत्र प्रमाणमस्ति उत्तरं बर्हिःशब्दस्तु प्लक्षशाखायामेव रूढं नाम अत एवाह भारद्वा
जः प्लक्षशाखोत्तरं बर्हिर्भवति तस्य मध्यो गाना भवद्यतीति अथ प्रतिप्रस्थाता पृषदाज्यं विहृत्य जुह्वां समानीयान्तरेण चात्वाले
करावुदङ् उपनिष्क्रम्य पृच्छति शृतं हवीः शमितरिति शमितेषउन्नरतो हृदयशूलं धारयंस्तिष्ठति सम्भृतमिति प्रत्याह तत्तथैव
द्वितीयमुत्क्रम्य तत्तथैवेतरः प्रत्याह तथैव तृतीयमुत्क्रम्य पृच्छति तत्तथैवेतरः प्रत्याहाथ शमितर्हृदयशूलमारायत्तेन हृदय
मुपस्तृं यत्तं शमित्रे संप्रदाय प्रपृषदाज्येन हृदयमभिघारयति सं ते मनसा मनः संप्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतवत्स्वाहेति वि

सूः रुत्वाहरत्तेस्रुक्के तेनैवयथेत्तमेसचत्तस्त्र उपस्तृणीते जुहूपभृतोरिडाधानेयस्मिंश्चसाहोमग्नाहीष्यभवतीतिअथउत्तरव
र्हिंकरणानंतरंप्रतिप्रस्थातापृषदाज्यविहसाआलोडयस्रुवेणपृषदाज्यस्योपहत्येत्यापस्तंबः जुव्हासमानीयप्रक्षिप्यअत्र
केचिदाहुः यदेवसधर्मकमनूयाजार्थपृषदाज्यंपूर्वंपृषदाज्यग्रहण्यां गृहीतंतत्त एवहृदयाभिघारणवनस्पतीज्येपृषदाज्ये
नेत्यविशेषवचनात्‌अस्यचसंनिहतत्वादन्यस्यवावचनात्‌ परार्थंतुनलभेतोपभृतेसंमार्जनसादनेइतिपरार्थादपिसांनि
ध्यादाधारवत्‌क्रियानविरुध्यत्तेसकर्मकात्‌कथमिदमिति चेत्‌प्रतिषेधाभावादविरोधः यद्विसधर्मकंयच्चाधर्मकंदधिसं
पृक्तमाज्यंतदुभयमपिपृषदाज्यशब्दार्थएवेतिअन्येतुब्रुवते आज्यग्रहणानंतरं कस्मिंश्चित्‌पात्रेअसंस्कृतमाज्यंदधिचसंसृज्य
गृहीत्वास्थापयतितेनअभिघारणवनस्पतीज्येक्रियेतेइतिअंतरेणवौचोत्सोत्करावित्यादिकंभृतमितिप्रत्याहेत्यंतस्य
षुंतंशमितारत्ततथेवभृत्त ९हवाः शमितरितिमंत्रेणेवंद्वितीयवारमुक्तमयइषत्तगत्वापृच्छतितंप्रस्थातारंतथेवभृत्तमि
तिप्रत्याहत्तंतथैवेत्यादिप्रत्याहेत्यंतंपुनरप्येवमेवव्याख्येयंअत्रेदंध्येयं पशोः संवदनसूत्रेशाखोकेरत्रोह स्माहबोधायनः पृथ्वा

प॰स॰बो भिक्रामेत् पूषामा[illegible]पशुपाः पात्विति द्वितीयं प्रस्वाभिक्रामेत् पूषामा पथिपाः पात्विति तृतीयं प्रस्वाभिक्रामेत् पूषामाधिपाः पात्वि
७० तीति स्पष्टं आप्य संवदनानंतरं अंतरेण चात्वालोत्करौ अध्वर्युः शामित्रं गत्वा शमितुः सकाशात् हृदयशूलमादाय तेन हृदयमु
पतृप्य शामित्रे संप्रदाय दत्वा पृषदाज्येन हृदयं अभिघारयति आज्येन पशु सान्नाय्यवदभिघार्य तथोद्वास्येति तत्स्रुवमाज्यस्था
लीमादाय प्रत्यंगमभिघार्योद्वास्य पुनरभिघार्य पुनः सान्नाय्यवद्दूलं करोति प्रत्यंग यस्त आत्मेति वियूः कृत्वा पृथक् यूषं कृत्वा
आहरते त्यक्त्वात्तैनैव अंतरेण चात्वालोत्करमेव यथेतमेत्य नत्वचलतरवपुन्नु स्रात् दिषूपस्तरणीति इडाधानमिडापात्रमुपस्तर
णं जुहूपभृतोः ध्रौवाज्यात् इडापात्रे आज्यस्थाल्याज्यात् वसापात्रे अपूर्वाज्यादत्रके चित्॥ प्रतिपस्थाते व हृदयोयतर्दनादिचत
स्रष्टूपस्तरणीते इत्तियावत् संवदमात्रास्य पेषणात् कथ[illegible]मिदमिति चेत् संवदस्वेति पशुव्यापारप्रदर्शनार्थं एवं चतु
ष्कमोक्षम्येति दृष्टार्थता भवति भिन्ना शृतबोधार्थं प्रश्ने सचोत्तरोपादानार्थानुष्ठानार्थः तत्रान्यस्य बोधेन्यस्यानु ७०
ष्ठानात् प्रश्नप्रबोधाच दृष्टार्थो न समानामिति अत्रेदं वक्तव्यं शृतं पशोः पशुपुरोडाशमिति सूत्रपर्यालोचनया शृतः प

शुरितिनिरूढेसैवप्रश्नप्रतिवचनयोःप्रवचनस्यकथंपशुप्रबोधावदृष्टार्थौनस्यातामितिअत्रद्वैधंपशोरभिघारणइतिसू
त्रंबोधायनस्यपृषदाज्येनहृदयमभिघार्यआज्येनेतराण्यभिघारयेदितिशालीकिरितिपशोरभिघारणइदमुच्यतेसूत्रंपृषदाज्येन
हृदयमभिघारयतीतिकल्पसूत्रंपृषदाज्येनैवसर्वेषामभिघारणंहृदयग्रहणंप्रदर्शनार्थमित्येवमर्थकंबोधायनस्यमतंशालीकि
स्त्वाहपृषदाज्येनहृदयमेवाभिघार्यआज्येनैवइतराण्यंगान्यभिघारयेदितिभारद्वाजोप्याहपृषदाज्येनहृदयमभिघारयतीति
आज्येनपशुमितिआहरंतितंपशुमंतरेणचात्वालोत्करावंतरेणयूपंचाहवनीयंचोपातिहृत्यसंतंदक्षिणतःपंचहोत्रासादयत्से
तेनैवयूपाहरंत्येनैवेउस्त्रुमितिएतत्यूक्षःपृथकुरुत्तंअंतरेणचात्वालोत्करावंतरेणयूपंचाहवनीयाचाहरंतिअध्वर्युस्तंप्रये
गेवयूपाद्बहिर्भागेनदक्षिणतोगत्वातिष्ठंतंतमाहृत्यपशुंअध्वर्युरुपान्निर्हृत्यस्तदनंतरंदेशंनीत्वास्कचांदक्षिणतःपंचहोत्राअ
ग्निर्होतेत्यादिनासादयतिआसन्नंतंयन्मेअग्नेइत्यनुमंत्रयेतयजमानःएतेनैवमार्गेणयूपाहरतिइडस्त्रुमपिएतेनैवमार्गे
णाहरंतिपरिहरणपक्षेजुहूपभृतावप्यंतरेणयूपंचाहवनीयंचअवदानदेशमाहरतिअप्रतिपरिहरणपक्षेप्रतिहरणपक्षेच

प॰सू॰बो॰ इडापात्रं वसापात्रं च एवमेव अवदानदेशं नीत्वास्थापयति इडस्तु नु उपाहरणानंतरमेवावदेशस्थापनीयं न त्विदानीं जुहूपभृदिड
७३ वसापात्राणामाहरणकाले आसादनकालेवा तस्य कर्म्मन व्यापारत्वादिदमुक्तं भाष्ये अथ प्लक्षशाखायां यथा प्लक्षशाखास्थित
न थैवेति अत्रेध्मं पञ्चोत्तरासादन इति पंचहोत्रासादयेदिति बौधायनसूत्र धर्मी मितिशालीकि रिति स्पष्टं अथ प्लक्षशाखायां हृद
यं निधाय स्वधितिना तस्याग्रे चर्ण्यन्नाह पशौ तृतीयेध्याये प्रथमः खंडः मनोतायै हविषो वदीयमानस्यानुब्रूहीति अथ
प्लक्षशाखायां स्रुचां दक्षिणत स्थितायां हृदयं निधाय स्वधितिना तस्याग्रे तस्य छिन्नदेशे प्रदेशादवद्यन्नाह मनोतायाइति अत्र क
र्मोत्तं किं देवस्य उखरुम नोता भवतीति आग्नेयीसेव स्यादिति स्पष्टं प्रयोजन मन्यत्र यस्य चान्यदेवस्य पशु राग्नेय्येव मनोता
कार्येत्यभिप्रायः हृदयस्याग्रे द्विरवद्यत्यथ जिह्वाया अथ वक्षसो अथ तत्रिन्मोथ वृक्ष्ययोरथ सव्यस्य दोष्णो अथ दक्षिणपार्श्वस्याथ ७१
सव्यस्या दक्षिणायै श्रोणेरथ गुदस्त्रेधं गुदं कृत्वाणिमत्स्विष्टकृते निदध्याति स्थविमदुभयश्योमध्यं द्वेधं कृत्वा जुहूप्रामवदद्या
स्यथ वक्ष्यमेदो यूपं नवधाय प्रोर्णोति यूष्णोपासिंचत्यभिघारयतीति हृदयस्याग्रे छिन्नप्रदेशे प्रथमं द्विरवद्यति एवमिन

रेषामपिद्विरवद्यजिह्वादिक्रमेण अथरक्ष्ययोरवद्येनुपूर्वमेवरक्ष्यमेदसीअपनीयस्रुचौस्वेनिदधाति अथतयोरवद्यतिअ
थसव्यपार्श्वस्येस्यनुषंगः अथदक्षिणायेश्रोणेरधस्तुर्द्वे दक्षिणस्याश्रोणेरधःप्रदेशात्तृतीयंगुदंगुदकांडंकृत्वास्वधितिनात्रे
धाप्रच्छिद्यअणिमत्सूक्ष्ममग्रभागं स्विष्टकृतेनिदधाति स्थविमत्स्थूलंमूलभागउपयज्भ्योनिदधाति मध्यंगुदस्यमध्य
मंभागंद्वेधाकृत्वाजुह्वामवदधाति अथरक्ष्यमेदोरक्ष्यस्यमेदः उत्ताविकस्योत्सर्गसिद्धत्वात्पूषन्नवधायपूष्णिप्रक्षिप्य
तेनजुहूंप्रोर्णोति अथसादयति यूष्णोपसिंचयति अथाभिघारयति स्रुवेण ध्रुवायाआज्यंगृहीत्वांतरेणयूपंचाहवनीयंच
दक्षिणतोनीत्वातेनाभिघारयति गतमन्यत् अथोपभृति स्विष्टकृते सर्वेषांत्र्यंगाणां सकृत्सकृत्समवद्यति सकृद्दक्षिणस्यदो
ष्णः पिशितंप्रच्छिद्यामवदधाति सकृत्सव्यायेश्रोणेरणिमद्गुदस्याथरक्ष्यमेदोयूषन्नवधायतेनोपभृतंप्रोर्णोति यूष्णाप
सिंचतिद्विरभिघारयतीति अथदैवतावदानानंतरंउपभृति स्विष्टकृते स्विष्टकृदर्थं सर्वेषांत्र्यंगाणांत्रीण्यंगानि त्र्यंगानिते
षांत्र्यंगाणां दिक्संख्येसंज्ञायामिति समासः सप्तर्षयइतिवत् त्र्यंगाणीति संज्ञा दक्षिणंदोः सव्याश्रोण्यणिमद्गुदानां

त २

प॰ सू॰ बो॰ तेषांसकृत्सकृत्समवद्यतिएतदेवक्रमविशेषलाभायप्रपंचयतिसकृद्दक्षिणस्यदोष्णःपिशितंमांसंप्रच्छिद्यावदधातिस
७२ कृत्सव्यायाश्श्रोणेरणिमद्गुदस्यअथवक्ष्यमेदःअथवक्ष्यमेदोजरंद्विरभिघारयतिध्रौवाज्यादंतरेणायूपंचाहवनीयं
चाहत्वगत्नगतमन्यत्।अथहृदयंजिह्वावक्षस्तनिममतस्नेवनिष्ठुतिमित्तिपात्र्यांसमवधाययूष्णोपसिंचत्यभिघारय
तीतिअथसोविष्टकृत्तावदानानंतरंपात्र्यामिडापात्र्यांहृदयजिह्वावक्षस्तनिममतस्नोवनिष्ठुमित्येतानिसमवधायअ
त्रहृदयमित्यादिद्वितीयपादेवलावन्नवशिष्टानिवक्षसस्तुउत्तरत्रपरिहरणविधानात्किंचदवशिष्यावशिष्टमवदधा
तियूष्णोपसिंचत्यभिघारयतिआज्यस्थाल्याज्येनअथकंसेवाचमसेवावसाहोमंगृण्हातियूष्णोपसिंचत्यभिघारयतीति अ
थऐडावदानानंतरंकंसेवाचमसेवावसाहोमंअत्रवसाशब्दःकर्मसाधनःसमानाधिकरणःवसाहोमार्थस्त्विहगृण्हाति
र्णमास्योर्द्वे अमावास्ये पूर्वा पूर्वा पौर्णमासीमुत्तरामुत्तराममावास्यां या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका या पूर्वामावास्या
सा सिनीवाली योत्तरा सा कुहूः गायत्री या अनुमतिस्त्रिष्टुप् ?? पौर्णमास्ये नमधेये जगती सिनीवाल्यनुष्टुप् कुहूरित्यमावास्ये
नामधेये इत्यर्थः । दर्शो मावास्या पूर्णमासः पौर्णमासी तत्र पौर्णमास्यमावास्ययोः स्वरूपे अत्र पूर्वस्मात् सूत्रादाचार्या इत्य
नुवर्त्तते तत आचार्या उदाहरन्तीत्यर्थः । अत्र बोधायनशालीक्यादीनि नामानि विसृज्य सर्वेषामाचार्याणां परामर्शार्थं बहुवचनं
तमाचार्यपदमुपात्तं अत्र सूत्रे पौर्णमास्यमावास्ययोः स्वरूपे निर्णयो यो जायते सर्वेषामाचार्याणामेकमत्यं भवति अतोत्र विप्रति
पत्तिर्न कार्या इति वक्तुं तद्दिदमाहुर्भाष्यकाराः यत्रैकमत्यं न तत्र तयोः पौर्णमास्यमावास्ययोः स्वरूप इति यदुदाहर्तव्यं तदाह ऊर्ध्वं
मध्यरात्रात् पौर्णमास्यां चंद्रमाः पूर्यते पौर्णमास्यां पौर्णमासीकर्मणि तस्योपवसथ्यविषये इदमुच्यते मध्यरात्रात् रात्रेर्मध्यं मध्य
रात्रः उदयास्तमयोरंतरायः सूर्यरहितः कालः सा रात्रिः तस्यां मध्ये यदा कदाचिदारभ्य तत ऊर्ध्वं चंद्रमाः पूर्यते चतुर्दश्यं तेपं ५
चदशभिः कलाभिर्युक्तः सन् निशां नीषोडश्या कलया पूर्यते कियत्पर्यंतं पूर्यते कदा पूर्णो भवतीत्यत आह स एतं चापररात्रं पूर्णो

भवतिसर्वंचाहरुत्तरस्याश्चरात्रेरामध्यरात्रात्मध्यरात्रशब्दव्युत्पत्तिः पूर्ववत्त्रिंशत्घटिकात्मकाया रात्रेर्याकांचनघटिकाम
भिव्याप्य पूर्यत्तेनतः पूर्णाभवतिननु मध्यरात्रशब्दोद्वेधाविभक्तायारात्रेर्मध्यकाले अथवात्रेधा विभक्ता यावामध्यमेभागेस्वर
सः न तु त्रिंशत्घटिकायारात्रेरविशेषेणास्यांकस्यांचित्घटिकायांरात्रेर्मध्यमध्यरात्रइतिमुत्पत्तेःसाधारण्येपितत्रप्रयोगा
भावादितिचेत् उच्यते यद्यपिद्वेधा विभक्तरात्रिमध्यकालस्यत्रेधाविभक्तरात्रिमध्यमभागस्यवावाचकोमध्यरात्रशब्दः द्वेधा
विभक्तस्यांत्कस्यान्होमध्यमावर्तनसमयंत्रेधाविभक्तस्यान्होमध्यमंवाभागंवदतितथापिइहास्मदुक्तरित्यारात्रेरन्हश्चयःकश्चा
पिसमयोर्थइतिवक्तव्यंअन्यथातत्रैवपर्वप्रतिपदोःसंधावन्वाधानकालउक्तस्यात्तदन्यकालसंधावनुक्तस्यात्अतएवेमं
दोषंपरिहर्तुंआचार्योद्दाहरणसमाप्त्यनंतरमेतद्व्याख्यानायप्रवृत्तंसूत्रंरात्रिर्हिपौर्णमास्यांसंधेयभवत्यहरमावास्यामितिप्रा
युक्तायांपौर्णमास्यांसंधेयाप्रतिपदासंधातुमर्हासंपूर्वाद्दधातेरर्हार्थेअचोयदितियत्प्रत्ययेतीत्येगुणेचसंधेयेतिरूपंप्रति
पदासंधातुमर्हेरात्रिरेवकृत्स्नापिरात्रिरवगंतव्याएवमहरमावास्यायांसंधेयंप्रतिपदासंधातुमर्हंअहरहःकृत्स्नमपिअहरित्यवगं

अमावास्यायां

सु०द० तव्यं एवंच यदा कदाचिद्रात्रिसंधौ दिवासंधौ वा राका सिनीवाल्यौ चउपवासे वगंतव्येइति अतएव भाष्यं एतस्यां पौर्णमास्यां रात्रौ छि
६ द्यन्तेतिथिः एतस्याममावास्यायामहनि छिद्यत्तेनमध्यरात्रात्रमध्यंदिनान्नियम इति एवंच एतेन सूत्रेणैव रात्रावहनिवा यदा कदा
चित्पर्वप्रतिपदोः संधिरभिमतइत्युक्तं ता दृशंव्याख्यातं इत्थं पौर्णमास्यां चंद्रमाः पूर्यतेततः प्रतिपदारभ्यते अथामावास्याया उप
वसथीयेहन्यूर्ध्वंमध्यंदिनाच्चंद्रमसमादित्योरभत्तेस एतं चापराह्णं सर्वां च रात्रिमुत्तरस्य चान्ह आमध्यंदिनादमावास्यायाः अ
मावास्याकर्मणस्तु उपवसथीये औपवसथ्ये अहनि मध्यंदिनात् दिनस्य मध्यं मध्यंदिनं उदयास्तमयोर्मध्ये य आदित्यसहितः
कालः दिनं तन्मध्ये यदा कदाचिदारभ्य ततऊर्ध्वं चंद्रमसमादित्योरभत्ते गच्छति एकत्र भवितुं स आदित्यस्तत आरभ्य एतस्या
न्हः अपरं भागं ततउत्तरां सर्वां च रात्रिं उत्तरस्य चान्ह आमध्यंदिनाद्दिनस्य त्रिंशत् घटिकात्मकस्य मध्ये यां कांचन घटिका
मभिव्याप्य रमत्ते तदा उभौ एकमंडलौ भवतः तत आरभ्य वियोगमारभत्ते शुक्लप्रतिपदारभ्यते भवतामेवं पौर्णमास्यमावा ६
स्ययोः पूरणारंभौ ततः किमित्यत आह एतं संधिमभितो यज्ञे तेतिसम्यक् सामर्थ्येन विधायते वृद्धिःक्षयो वा अत्रेति सुत्पस

विधीयते

संधिः पूरणकालं आरंभकालश्च एतं संधिमभिए तस्मिन्संधौ पूरणारंभकाले एतस्यां पौर्णमास्याममावास्यायां चात्तिथौ अभिमुख्येन अन्यत्रध
ष्टिमपहाय अत्रैव यजेन यागारंभः कार्यः अग्न्याधानमित्यादि यत्पूर्वे चतुर्विहितं तत्कुर्यात् अमावास्योदाहरणे उपवसथीयेहनीति संधि
मद्दिन पूर्वदिनस्य विशेषणात् अमावास्यायां दिवासंधौ संधिमद्दिन पूर्वदिने उपवासः पौर्णमास्युदाहरणे तदभावात् रात्रिसंधौ संधिम
द्दिने उपवासः ननु यजेतेत्यनेन यागो विधेयो न यागारंभः नत्कथं यागारंभः कार्य इत्युच्यते सत्यं सर्वत्राप्यन्यत्र यजेतेत्युक्ते यागं कुर्यादि
त्येवार्थः प्रकृते तु यागारंभं कुर्यादित्येवार्थो वक्तव्यः कस्मात्सूत्रे पौर्णमास्यामावास्ययोरन्वाधानादीन कांश्चन पदार्थाननुविधाय अनंतरदि
नइ . ने अथ प्रातर्दुत्यादिना याग विधानेन व्यहकालत्वाध्यवसायात् अत्रापि तद्देववाक्यतस्योचितत्वे नारंभपरत्वात् पूर्वाममावास्यामुत्त
रां पौर्णमासीं चोक्ता एतस्यां तिथौ यजेतेत्युक्ते चंद्रमसं वा निर्ज्ञाय संपूर्णं वा विज्ञायाग्नीनन्वादधातीति सूत्रेणैकवाक्यतया यागारंभ
परतया एवमुचितत्वाच्च तथा दित्तत्र चंद्रमसं वा निर्ज्ञायेति सिनीवालि कुह्वोरमावास्ययोः संपूर्णं वा विज्ञायेति राकानुमत्योः पौर्णमा
स्योः अन्वाधानं सामान्यत उक्तं कदा राकायामुपवासः कदा सिनीवाल्यामुपवासः कदानुमत्यामुपवासः कदा कुह्वामुपवास इत्याशंक्य

सुबो॰ध॰द॰

७

अत्रनिरस्यतेरात्रौपौणमासी प्रतिपत्संधौसंधिमद्दिनेउपवासःसाचराकाअहनिअमावास्याप्रतिपदोःसंधौसंधिमद्दिनपूर्वदिनेउ
पवासःसाचामावास्यासिनीवालीत्युक्तायथाराकातथाकुहूःकुह्वानंतरस्मिंदिनसंधिमतिराकायामितिचोपवासःयथासिनीवा
लीतथानुमतिःतस्यांसिनीवाल्यामिवपर्वप्रतिपत्संधेःपूर्वदिनेउपवास इत्यत्र सूत्रेपौर्णमास्य मावास्यास्वरूपाणांतत्रोपवा
सप्रकारस्यचविशिष्यप्रतिपादनात्अतएवइदंसर्वमभिप्रेत्यभाष्यउक्तं एतंसंधिं पूरणारंभकालेएतस्यांतिथौ यागारंभःअ
न्वाधानमित्यादियतद्ग्रहकालत्वात्नातःप्राङूर्ध्वंआरंभेअतिपत्तिरेवस्यादिति अत्रयजेतेतिशब्दःआचार्यचक्रकोदाहृत
यासमास्यर्थः। ननुमध्यरात्रमध्यंदिनशब्दाभ्यांरात्रेरह्नश्चमध्यंमध्यमोवाभागःप्रतिपाद्येततथाचतदन्यकालसंधौपौर्णम
स्यमावास्ययोरुपवासेव्यवस्थानोक्तास्यादिति अहरात्रिर्हिपौर्णमास्यांसंधेयाभवत्यहरमावास्यायामिति व्याख्यातंननुएकेका ७
पौर्णमास्य मावास्या चोक्ताराकासिनीवालीचकिंतेएवपौर्णमास्यमावास्येउतअन्यापिपौर्णमास्यमावास्यावक्तव्येसतआह
द्वेपौर्णमास्यौद्वेअमावास्येइतिद्वेद्वेतेपौर्णमास्यमावास्येतत्रएकेकोक्ताराकासिनीवालीचअपरानोक्ताअनुमतिःकुहूश्चअ

तोनुमत्ति कुह्वोर्लक्षणंवक्ष्यत इत्यर्थः। अथानुमत्तिकुह्वोर्लक्षणंवक्तुं पूर्वोत्तरयोराकासिनीवाल्योर्लक्षणमाह दिग्गत्तिपूर्वांपूर्वांपौर्ण
मासीमुत्तरामुत्तराममावास्यामि ति यापूर्वामावास्योक्ता सिनीवाली तामेवपूर्वां पौर्णमासीमनुमत्तिंविद्यात् सिनीवाली लक्षणमेवा
न्यूनानतिरिक्तं अनुमतेर्लक्षणं अत्रेदमनुमतेर्लक्षणंभाष्योक्तं अथपौर्णमास्याउपवसथीयेहन्यूर्ध्वंमध्यंदिनाच्चंद्रमापूर्यतेसएतं
तंचापराह्णे पूर्णोभवतिसर्वां चरात्रिमुत्तरस्यचान्ह आमध्यंदिनात्सा ऊनबिंबानुमतिरितिएवंकुह्वा अपि उत्तराममावास्यांयाउ
त्तरापौर्णमास्युक्ताराकासंपूर्णबिंबातांउत्तराममावास्यांकुहूंनष्टचंद्रां विद्यात् राकायालक्षणमेवकुह्वालक्षणंअत्रेदंकुह्वालक्ष
णंभाष्योक्तं अमावास्यायाऊर्ध्वंमध्यरात्राच्चंद्रमसमादित्योरभते एतंचापररात्रमारब्धोभवतिसर्वंचाहरुत्तरस्याश्चरात्रेराम
ध्यरात्रादित्येषानष्टचंद्राकुहूर्भवतीतिएतयोर्लक्षणयोर्व्याख्यानंसौत्रलक्षणद्वयवत् यापूर्वापौर्णमासीसानुमतिर्योत्तरा
साराकायापूर्वामावास्यासासिनीवालीयोत्तरासाकुहूः यापूर्वासंधिमद्दिनपूर्वदिनेउपवासयुक्तासापौर्णमासीअनुमतिःयो
त्तरासंधिमद्रात्रियुक्तेदिनेन्वाधानवतीपौर्णमासीसाराकाएवममावास्याविषयेपिव्याख्येयंगायत्रीवाअनुमतिस्त्रिष्टुप्राके

इतिपौर्णमास्येनामधेयेजगतीसिनीवाल्यनुष्टुप्कुहूरिति अमावास्येनामधेये इति एतेगायत्र्यादिशब्दाः पौर्णमास्यमावास्ययो
सु॰द॰ र्नामधेयानिप्रशंसार्थान्युक्तानि प्रशंसयाच एतं संधिमभितोयजेतेति विहितस्योपवासस्य एतासुराकानुमतिकुहूसिनीवा
६ लीषु यथाविधानं अत्यंतप्रशस्ततयावश्यमेवकर्तव्यमिति सिध्यति एवमन्वाधानकालेअवगतेतदुत्तरेद्युर्यागइत्यर्थसिद्धे
अनुष्ठानं द्वैधेतुकथमुपवसथइत्युपवासेविचारमुपक्षिप्य तत्रपुनः संशयमुद्भाव्य संध्ययागपक्षस्याशक्यत्वोपपादनेनकअकर्मतो
ली क्तोपवासपक्षाणां अनुमोदरूत्वात्ततः शौंकिबोधायनयोर्भेदेनैकैकस्यांद्वौद्वौपक्षाउक्तौतत्थाहि कथमुखलूपवसथइतिजानी भत
यात् संध्यस्थिदेवोपपाद्योथोपूरिणादर्शी त्तिसाधुखलुसंध्यःसाधुखलुसंधेरुपपादनंन नुखलुसंध्यःस्तूपपादयइवसर्वेषांले
वसंध्यःसहस्माहबोधायनोयत्रैतदुपवसतोस्तमित्त आदित्येपुरस्ताच्चंद्रमालोहिनीभवन्तिवोदीयात् नमभ्युपवसथंजानी
यात् अत्रोहस्माहशालीकिरतिपन्नः खल्वेषभवतिससंध्यंवैयोपपादयिषेतपूर्णवाभियजेततस्यचेदुपवसतोस्तमित्तआ ६
दित्येपुरस्ताच्चंद्रमालोहिनीभवन्तिशोदियाशरमताग्निहोत्रेणेस्कताःपार्वणेनप्रक्रामेत् संस्थितेपार्वणेग्निहोत्रंजुहुयादिति

र्वंतुपौर्णमास्यामथोमावास्यायामितिहस्माहबौधायनोदृश्यमानएवोपवसेन्नदृश्यमानइतिएवंचेदेवंखलुकुर्यादितिशालीकि
रस्तित्वपिदृश्यमानउपवसथोयत्रैनद्वात्रिभिरुपपन्नोणुचंद्रमाःपरिनक्षत्रमुपव्युषंभवतिनसम्भवोभूतेदृश्यतेतमुपवसथंजानीयादि
तिअयमर्थःकथमुखलूपवसथइतिजानीयात्।उखलुइत्येतौवाक्यलंकारार्थौनिपातौ।उपवसथोनामयजनीयात्पूर्वदिवसःसकिंल
क्षणइतिविविच्यजानीयात्विचार्यनिश्चिनुयादितिविचारमुपक्षिप्यसंज्ञायमुद्भावयति।संध्यस्त्विदेवोपपाद्योथोपूरिणादर्शीश्रुति।
अस्मिन्प्रकरणेसूत्रभाष्ययोःसंध्यशब्दस्यसंधावेवप्रयोगात्संधिरेवार्थःस्यात्किमर्थेकिंसंध्यएवोपपाद्यःसंधिकालएवयागेराग्ने
यादिभिर्योजयितव्यःउपवासस्तत्तदनुरोधेनतदहर्वापूर्वेद्युर्वेतिप्रथमाकोटिःअथोअथवाअपरिपूर्णश्चंद्रोभविष्यतीतिपूर्णिमायां
नादर्शिनास्तिचंद्रःप्रातःनउषःकालइत्यमावास्यायांचनिश्चित्यइतिशब्देनप्रकारांतरमुच्यतेपूर्णिमायामपूर्णेपिचंद्रेअवामास्यायां
दृश्यमानेपिचंद्रइतितथाचचंद्रमसंवानिर्ज्ञायसंपूर्णंवाविज्ञायेतिकल्पसूत्रार्थःसर्वोप्येकाकोटिःअत्रद्वितीयांकोटिंसिद्धांतयितु
प्रथमकोटेश्रुतिमूलकत्वेनसप्रमाणतयासेव्ययुक्तेतिपूर्वपक्षमाह।साधुखलुसंध्यःसाधुखलुसंधेरुपपादनं।सध्यःपर्वप्रति

सु०र० ८

पदोःसंधिकालःआग्नेयादिषुयाजेषुसाधुःनपुंसकत्वंछांदसंसंधौयजेतेतिश्रुत्यातस्यविधानात्अतःसंधेरुपपादनंआग्नेयादि
यागेःसंयोजनंसाधुयथाविध्यनुष्ठानात्तथाचसंध्यएवोपपादनीयइतियुक्तं।यद्यपिसंधौयजेतेतिश्रुतिरेवसंधिकालंयागगुणत्व
विधत्तेतथापिअशक्यविधानत्वापत्त्याननतस्यसंधिकालविधित्तयाप्रामाण्यंकिंतुसंधिसमीपकालस्तयासामीपिकस्याप्यधिकरण
तयासप्तम्यर्थत्वात्तथाचसंधिमभितोयजेतेतिश्रुत्याएकवाक्यत्वमेवमुक्तंनतुसंधिकालमात्रविधिपरत्वमित्यभिप्रायेणसिद्धां
तमाहनखलुसंध्यःसूपपादयइवसर्वेषांत्वेवसंध्यःसंध्यःसंधौयजेतेतिविहितःसंधिकालःसत्तुनैवखलुसूपपादयःनैवसामंज
स्यैनोपपादयितुंशक्यःसूपपादयइतिपदेर्ण्यनात्खलुछांदसेपिलोपाभावेरूपंकृतइत्यतआहसर्वेषांत्वेवसंध्यःसंधिकालोये
विहितःसंधौयजेतेतिसत्तुसर्वेषामेवआग्नेयोपांशुयाजाग्नीषोमीयैंद्राग्नदधिपयोयागानांसांगानामेवविहितःप्रयोगविधिवि
धेयत्वात्कालस्यपरंतुसंधिकालस्यसूक्ष्मतयातत्रसर्वेषांकर्तुमशक्यत्वात्संधिमभितोयजेतेतिश्रुत्यैकवाक्यत्वतयासंधिस
मीपकालेयजेतेतितदर्थोवगंतव्यःतस्माद्यथायागोपवसथयोर्मध्येसंध्येभवतितथाचंद्रमसंवानिर्ज्ञायसंपूर्णंवाविज्ञायअहका ८

रुलत्वं यथा भवति तथा कर्तव्यं अपराण्हादर्शीति पक्ष आश्रयणीयः। इति सिद्धं णत्वं छांदसं। अत्र गोपालः। पक्षादौ पक्षयोः संधेः संनि
कृष्टतरं दिवा पौर्णमास्यां प्रधानानि कर्तव्यान्यत्र नो गुरुरिति। पक्षादौ मुकुरुक्ष्म प्रतिपदि पक्षयोः पूर्वापरयोः संधेः संनिकृष्टतरं
यद्दिवा अत्र प्रधानानि कर्तव्यानीत्यर्थः। पौर्णमास्यामित्यस्य तु नो गुरुरित्यनेन उत्तरत्रान्वयः अन्यथा भवस्वामीमतानुगा इति प्रति
ज्ञाविरोधात् इति एवं कल्पकर्मांतो रूपक्ष एव कार्य इति स्थितं अन्योपि पक्षोस्ति याह। सहस्माह बौधायनो यत्रेत्तदुपवसतो
स्तमितं आदित्ये पुरस्ताच्चंद्रमा लोहिनी भवन्निवोदीयात् तमभ्युपवसथं जानीयात् इति स बोधयन् ये अहस्म पौर्णमास्यां यत्रैवक
स्मिन्काले अहनि पर्वप्रतिपत्संधावुपवसतोस्तमिते आदित्ये पूर्वस्यां दिशि प्रतिपद आदिम भागगतासु घटिकासु उदयकाले
चंद्रमा लोहित एव भवति इव शब्दोवधारणे अव्ययानामनेकार्थत्वात् नचैवं तस्य चेदुपवसथ इति सूत्रेपि इव शब्दस्यावधा
रणार्थता स्यादिति वाच्यं तत्र दिवा संधिमत्येव दिने उपवस्तुः संधिना सह यागं प्रयुंजानस्य कदाचित् कल्प नियत निमित्तता
समर्पक चेच्छब्द समभिव्याहरेण इष्टेः संधिना सह संबंध लाभो लक्ष्ट्येनास्तमयसंनिहित कालकर्तव्याग्निहोत्रारमणेन

सु॰ द॰ चालापइवदृश्यत इत्यत्रैवानतिस्फुटेर्थेतात्पर्यग्रहात् इह तथात्तात्पर्यग्राहकाभावात्। दीयमानचंद्रस्लोहितस्यस्फुटत्वेअस्फु
९० टत्वेचअत्रोपवासस्यपरेद्युर्वियागस्यचतुष्ट्लाचनचेदमेवकथंतमितिवाच्यंभगवद्भाष्यकारैर्लोहिनीभवन्तीवेतिप्रतीकं
गृहीत्वाप्रतिपदादिसूर्योदयकालेलोहितोभवतीतिव्याख्यानात् अत्रप्रतिपदादिष्विष्यादिविवक्षितयाउक्तार्थसिद्धेः ननुतस्यचेदु
पवसथइत्यस्यभाष्येपिलोहिनीभवन्तुदियादित्येवव्याख्यातमितिचेन्नलोहितस्यानतिस्फुटत्वेपिवस्तुतोवर्त्तनलएवलोहि
त्यंनतुध्यायतीवलेलायत्तीवेतिवलइवशब्दार्थोत्रमिथ्येत्यभिप्रायात् अत्रतमप्युपवसथमित्यपिशब्देननकेवलंकलकर्मो
त्तोक्तावेवउपवासेकालावंगीकार्यौ अपितर्हिअयमपिकालोंगीकार्यइतिसमुच्चयउक्तः तदिदमुक्तंभाष्येनसंपूर्णमेवविज्ञा
येतिअत्रसंपूर्णयाविज्ञायेतिकल्पसूत्रवाक्यानुकरणेननतत्रतात्पर्यविषययोः पूर्णत्वापूर्णत्वयोरेवकारेणव्यावृत्तिः उभाभ्यां ९०
मपिप्रकृतका लसमुच्चयस्येष्टत्वात् अत्रतमप्युपवसथमित्यपशब्दस्यैवोक्तत्वात् उत्तरेद्युर्योगः मध्येसंधिः तदाप्युक्तं
भाष्येएवमपिसंधिर्मध्यएवभवतीति। अत्रगोपालः। पूर्वस्माद्द्धोकात्पौर्णमास्यांनोगुरुरित्यनुवृत्तौयागान्वाधानयोर्मध्ये

पर्वसाध्येव पक्षयोः किंतु संधेः प्रधानानां सन्निकर्षो न पेक्षित इति। पौर्णमास्यां दिवा संधिमति दिने उपवासमंगीकृत्यैव शालीकिस्तत्र कं
चन विशेषमाह अत्रोहस्माह शालीकि र तिपन्नः खल्वेष भवति ससंध्यं चैवोपपिपादयिषेत पूर्णवाभियजेत ःअत्रोहस्माह शालीकि
दिवा संधिमति दिने पौर्णमास्यामुक्तमुपवासपक्षमंगीकृत्य तत्रैव स्वमतेन विशेषमाह अतिपन्नः खल्वेष भवति पूर्वोक्ते वोधाय
न पक्षे यद्यपि मध्ये संध्यो भवति तथापि एष संध्यो तिपन्नो विप्रकृष्टो भवति यागेः संधेर्भूयसा कालेन व्यवधानात् तस्मात् ससंध्यं
चोपपिपादयिषेत पूर्णभावियजेत संध्येन सह ससंध्यं क्रियाविशेषणं संध्येन सहितायथा यागा भवेयुः तथा संध्येन यागानुप
पादयितुं योजयितुमिच्छेत् सर्वप्रतिपत्संधिकाल एव यागाननुतिष्ठेत् अथो थे पूर्णचंद्रमसमभितो यजेत संधिमद्दिने उपवासं
कृत्वा संधिमद्दिन एव संध्यनंतरं यजेत यद्यपि संधिमति द्विने उपोष्यते तत उत्तरस्मिन्नहनि यागानुष्ठानेपि पूर्णवाभियजेतेति
सिध्यति तथापि अतिपन्नः खल्वेष एव भवतीति दूषितत्वादयं पक्षो त्रनाभिप्रेतः यद्यपि च संधिमद्दिन पूर्वदिने उपोष्य संधि
मद्दिने संध्यनंतरं यागानुष्ठानेपि पूर्णवाभियजेतेति सिध्यति तथापि संधिमत्युपवासमंगीकृत्य शालीकमतप्रवर्तनेर्नैतदपि

स०द०
११

युक्तमितिध्येयंतथाचयदाउक्तयोःप्रकारयोर्मध्येअन्यतरस्यानुष्ठानंतदासंध्यस्यसंनिकर्षएवभवतितथाचदिवासंधिमद्दिनेउ
पवसन्संधिसंनिकर्षलाभायसंधिसमीपकालएवयागाननुतिष्ठेदितिशालीकीःतथापिपक्षद्वयेपिसंध्यस्यसंनिकर्षोलभ्यतेए
वंसतिसंधिंवाभियजेतेतिसूत्रस्याक्षरानुगुण्यंभवतितथासंध्यस्यासूपपादत्वात्प्रधानयागमध्येनासंध्यस्यात्पूर्णवादृष्ट्वाभिय
जेततदासंध्यस्यसंनिकर्षएवभवतीतिभाव्यमक्षरानुगुण्यापरित्यागेनानुसतंभवतीतिनन्वेवंपक्षद्वयेपीष्ट्यग्निहोत्रयोर्युगपद
नुष्ठानापत्त्याविरोधःतथाहियदाकदाचित्षड्विंशतितस्यादौसंधिस्यात्तदापूर्णवाभियजेतेत्यस्मिन्पक्षेदिवान्तेप्रादुष्करणस
मयेअस्तमयाव्यवहितसंधौरात्रावस्तमयानंतरमिष्टेरग्निहोत्रकालेकर्तव्यास्यात्एवंससंध्यंवोपपिपादयिषेतेतिपक्षेपिसंध्ययाग
योःसंनिपातस्यकर्तव्यतयाअस्तमयाव्यवहितपूर्वसमयसंधाववग्निहोत्रकालएवेष्टिःकर्तव्यास्यात्नचेष्ट्यग्निहोत्रयोर्युगपदनु
ष्ठानंसंभवतीतिविरोधइत्यतआहतस्यचेदुपवसतोस्तमितआदित्येपुरस्ताच्चंद्रमालोहितोभवन्निवोदियादारमतनाग्निहोत्रेणेए ११
कापार्वणेप्रक्रामेत्संस्थितेपार्वणेग्निहोत्रंजुहुयादितितस्योपवसतःसंबंधसामान्येषष्ठीपौर्णमास्यांदिवासंधिमद्दिनेउपव

सतोस्तमिन आदित्ये पुरस्तात् चंद्रमा प्रा च्यां दिशि लोहित्तीभवन्निव चेदुदियात् अत्र इवशब्देन उद्यतश्चंद्रमसो नातिस्फुटं अत्यंतसूक्ष्मं
लोहित्यमवगम्यते अत एव लोके तिसृष्वेवस्तनिवक्तारो भवंति अस्तीवभातीति उद्यतश्चंद्रस्याति सूक्ष्मं लोहितस्यैव मस्तमयाति
सन्निहितपूर्वसमयसंधवेव भवनीति तादृश एव कालोनेन वाक्येन लक्ष्यते तस्मिन्निमित्ते सति तदानीं ततः पर वा सन्निहिते काले
इष्टिः कार्या अग्निहोत्रस्य तु तदानीमारमणं रुलाइष्ट्यनंतरमनुष्ठानमिति शालीकेरभिः प्राय:। अगोपाळः। पौर्णमास्यां अत्रे
ति पदद्वयानुवृत्तौ अन्यो दिवांते रात्र्यां वा प्राहेष्टिं संध्य यागयोः। सन्निपातमत स्तेन काल होमोप्यनादृत इति। पौर्णमास्यां अत्र इ
ति संधिमद्दिने उपवासे सति अन्यः शालीकिः दिवांते रात्र्यां वा अस्तमयसमनंतरमेव इष्टिं प्राह पूर्णवाभियज्ञेतेति पक्षेणेदं संध्यया
गयोः निसंपातं वा प्राह ससंध्यं वोपपिपादयिषेतेति पक्षेणेदं अतः इष्टेः संधिसाहित्यस्य संध्यव्यवहितोत्तरकालकर्तव्यत्वस्य
अवश्यकत्वात्तेन शालीकिना काले मुख्य काले होमोप्यनादृत इति। इति नु खलु पौर्णमास्यां एवं खलु पौर्णमास्यां पक्षद्वयमुक्तं
अथोमावास्यायामिति हस्माहं बोधयनोदृश्यमानयिति। अथो इत्यत्र शब्दः प्रकारप्रश्नार्थः। अथमावास्यायां कथमिति अत्रो

कृदृक्षर्थः

सु॰ द पवासे प्रकार विशेषः क इत्यर्थः। सहस्माह बोधायन आचार्यः अदृश्यमान एवोपवसेन्नेदृश्यमान इति। अथो इति प्रकार प्रश्नार्थः

१२ अमावास्यायां उपवासे प्रकार विशेषे सहस्माह बोधायन आचार्यः अदृश्यमान एवोपवसेत् यस्मादह्नः उदयात्पूर्वमुषःकाले चंद्र

मानदृश्यते तस्मिन्नेव पर्वप्रतिपत्संधिमद्दिने उपवसेन्न दृश्यमाने चंद्रे ननु अदृश्यमान एवेत्येवकारेणैव न दृश्यमान इति सिद्धेः पु

नर्न दृश्यमान इति व्यर्थमिति चेत् न अदृश्यमान उपवासोवश्यापेक्षणीया इति प्रतिपत्त्यर्थत्वात् पुनर्न दृश्यमान इत्युक्तेः अभ्या

सेस्यार्थस्य भूयस्त्वमिति न्यायात् तदिदमाङ्कुर्भाष्यकाराः न दृश्यमानत्यनपेक्षाभावार्थं गतार्थस्य वचनमिति अनपेक्षाभावः अवश्या

पेक्षणीयता। एवं चैव खलु कुर्यादिति शालीकिरस्तित्यपि दृश्यमान उपवसथो यत्रैतद्भात्रिभिरुपपन्नो गुणैश्चंद्रमाः परिनक्षत्र

मुपव्युषं भवति न समश्चोभूते दृश्यतेत्तमप्युपवसथं जानीयादिति। शालीकिराह एवं अदृश्यमान एवोपवसेदिति बोधायनोक्तमे

व खलु कुर्यात् एष एव न च प्रथमः कल्पः किंतु चंद्रे दृश्यमानेप्युपवसथोस्तिसोयमनुकल्पः तस्येदं लक्षणं यत्र यस्मिं दिने ए

तद्भात्रिभिः एताः रात्रयः रुक्म प्रतिपदादयः भाष्ये पंचदश्यादय इति पौर्णमासीमादाया तद्गुणसंविज्ञानो बहुव्रीहि; एताभिरु १२

पपन्नः संयुक्तश्चंद्रमाः एकैकस्यामेकैकयाकालयाहीनश्चतुर्दशीयोगेन चंद्रोणुः सूक्ष्मोभूत्वापरिक्षीणनक्षत्रापि दृश्यंते यदानतुप
रिनक्षत्रंएतच्चनक्षत्राणामस्तमयेसतिचंद्रमसोअदर्शनेनातिसूक्ष्मत्वज्ञापनार्थंउपव्युषंउषः समीपेनततः पूर्वंएतच्चत्रयो
दृश्यादौततः पूर्वमपिदर्शनेनतलो निवृत्यर्थंनसम्भोभूत्वेदृश्यतेसतादृशोभूतेश्चउषःकाले नियोगतोनदृश्यते एतच्चयदाच
तुर्दशीअरुणोदयात्प्रागारभ्यततः परंकृत्स्नमहोरात्रमभिव्याप्यपरस्मिं दिवसे समाप्यतेतदातत्रपूर्वदिनेउपवास निर्दृत्यर्थं
ततश्चयत्रउषःसमीपकालेचतुर्दशीयोगेनातिसूक्ष्मोभूत्वापरिनक्षत्रावस्थायामेवचंद्रमादृश्यतेनतुश्चउषःकालेदृश्यते
तमप्युपवसथंजानीयादिति।अत्रगोपालः।आमावास्यस्यपूर्वेद्युरदृष्टेंदुःप्रशस्यतेदृष्टचंद्रमहर्गौणयागस्यादपरेहनि।इ
तिद्वैधोदिताःपक्षाभवत्वामिमताःनुगाइति।पूर्वेद्युरुपवासस्य अत्रायंनिष्कर्षः पौर्णमास्यमावास्ययोः रात्रौपर्वप्रति
पत्संधौसंधिमद्दिनउपवासःअपरेद्युर्यागः दिवासंधौपूर्वेद्युरुपवासः संधिमद्दिने यागः पौर्णमास्यां दिवासंधौसंधिमद्दि
नेउपवासः परेद्युर्यागः पौर्णमास्यामेव दिवासंधौसंधिमद्दिनउपवासः संधिनासह वासंध्यनंतरंवायागः अमावास्यायांसं

सुं·द०

धिमह्निएववाउपवासः परेद्युर्यागः अत्रानुपनोसंधिमह्निपूर्वेद्युर्दृष्टचंद्रायामुपोष्यवापरेद्युर्यागः एतेषन्यतमंपक्षंकुर्वन्
१३ यथासूत्रंयथाभाष्यंचउपवासयागावनुतिष्ठतीतिमंतव्यं। दर्शपूर्णमासौचेपौर्णमासमुपक्रम्यकर्तव्यौ अतएवकर्मांतसूत्रेअथे
मौदर्शपूर्णमासौपौर्णमास्युपक्रमावमावास्यासंस्थाः चाचार्याञ्च वतइति। अग्नीनन्वादधाति। इदमग्निहोत्रंकृत्वा अनंतरमेवकार्यं
कर्मांतेसोयमाहिताग्निरुपवसथीयेहन्यूषुवाप्रातरग्निहोत्रात्पिंरव्यानुपसादयेदन्वाधानार्थान्इत्यत्रपिंरव्योपसादनानंत
रमग्निहोत्रंकार्यमित्यवगमात्पिंरव्यान्काष्ठानिस्थूलानिअग्निग्रहणसमर्थानि। योवैदेवताः पूर्वः परिगृह्णातिसएनाश्वोभू
तेयजतइतिब्राह्मणाच्च। इडादेवहूरिति देवागान्नुविद इतिचजपित्वान्वादधाति औपानुवाक्येआर्त्विज्यंकरिष्यन्शस्त्रंवाप्र
तिकरिष्यन्नेतद्यजुर्जपतीउदेवहूरितिवचनात्कर्मांतेचकउखलुयज्ञस्यारंभःकाप्रतिष्ठेतिविज्ञायतेस्वाहायज्ञंमनसा
स्वाहाद्यावापृथिवीभ्यांस्वाहोरोरंतरिक्षात्स्वाहायज्ञंवातादारभइतिवातएवयज्ञस्यारंभःवातःप्रतिष्ठेतिसूत्रेअत्रयज्ञस्यदर्श १३
पूर्णमासादेरारंभः आरभ्यतेनेनेत्यारंभः आरंभहेतुः कउखल्वितिवाक्यालंकारेप्रतिष्ठतेसमाप्यतेनेनेतिप्रतिष्ठासमाप्तिहेतुः

कइतिप्रश्नः उत्तरं विज्ञायतइत्यादि विज्ञायते आम्नायते मंत्रस्य चार्थः यज्ञं मनसा स्वाहा गच्छामि द्यावापृथिवीभ्यां द्यावापृथिव्योर्यज्ञ
स्वाहा वर्तते उ रोरांतरिक्षा उत्तरो पृथो अंतरिक्षे च यज्ञः स्वाहाय ज्ञो वर्तते तं यज्ञं स्वाहा साक्षाद्वाताद्दारभ इति वेदभाष्यकारैरुक्तः
अस्मिन्मंत्रे वाताद्दारभ इत्यंशेन वातो यज्ञस्यारंभः चांतः प्रतिष्ठा समाप्तिहेतुरित्युक्तं एतस्य च प्रयोजनं वाताद्धा अध्वर्युर्यज्ञं प्र
युंक्ते अध्वर्युर्वातमारभ्य यज्ञं प्रयुंजीतेति ब्राह्मणविहिते आरंभे आरंभहेतौ वाते वाता यज्ञः प्रयुज्यता मित्ति लिंगेन विनियु
क्तस्य देवा गातु विद इति मंत्रस्यादौ यज्ञारंभे जप इति यत एव यज्ञं प्रयुंक्ते तदेनं प्रतिष्ठापयती ति ब्राह्मण विहितस्य वाते यज्ञा
रंभहेतौ यज्ञं प्रतिष्ठापयेदिति विहिते वातविषयके यज्ञसमापने समिष्टयजुर्होमे वाते धास्वाहेति लिंगविनियुक्तस्य देवागा
तु विदो गातुवित्वेति मंत्रस्य प्रयोग इति चेति। अग्निहोत्रानंतरं दर्शपूर्णमासयोः पुनर्विहरणं कार्यं अग्निहोत्र विधौ ज्वलंतमा
हवनीयमुद्धरति सायमाहुतये ज्वलंतमाहवनीयमुद्धरति प्रातराहुतय इत्यत्र सायमाहुतये प्रातराहुतय इत्ति पदद्वयं वि
नापि प्रयोगविधिसिद्धो पुनस्तयोः पाठो नियमार्थः यदर्थं यत्प्रणयनं तत्तस्यैवोपकारकं नान्यस्यापि तंत्रेणोपकारकमितित्तेन

सु॰द॰
१४

प्रातरग्निहोत्रार्थं प्रणीतानग्नीन् होमानंतरं उद्धृत्यस्य पुनः प्रणयेदिति भाष्ये प्रातरग्निहोत्रं हुत्वा इउरदेव हृ रितिजपित्वा देवा
गातुविद इति च अग्नीन् पुनर्विहृत्य लक्ष्मी मग्नीनन्वारभ्यातौ तिअन्यत्र विहितानां केषांचिदनुक्रमणमन्यस्याप्यत्रावश्यकर्तव्य
स्य उपलक्षणार्थं। अन्यच्च कर्तव्यं पवनादि अत्र परिभाषासूत्रं वैदिककर्माणि प्रयोक्ष्यन्नादित एव स्नातो दैव्याहतं वासः परिधा
याप आचम्य एकविंशत्या दर्भपुंजलैरात्मानं पवयित्वा यस्य कुर्वन् भवति तं पवयति पवित्रं वै दर्भाः पवित्रं विष्णुः प्रतिष्ठा सोमः
प्रतिष्ठित्या इति एकविंशत्या पवमति एकविंशो यज्ञ एकविंशः पुरुष एकविंशतिच्छंदांस्येकविंशति वै देवलोकाश्छंदोभिरेवै
नं एकविंशो प्रतिष्ठाप्य पूतं मेध्यं यज्ञियं पवयति सप्तभिः पवयति सप्तछंदांसि छंदोभिरेवैनं पवयति सप्तभिः पवयति सप्त वा
स्येते पुरुषाः संततिमनुसंतन्वंति त्रयः प्रांचः त्रयः प्रत्यंच एतावन्त एवैनानू पुनाति त्रेधा विभक्तैः पवयति त्रय इमे लोका ए
भिरेवैनं लोकैः पवयन्तीति ब्राह्मणमिति। इदं पवनं। अथ मंत्राचमने परिभाषासूत्रं अप आचामन्नितरपि द्वितीये अपूलिंगा
भिः त्रिः पिबेद्व्याहृतीभिः त्रिः परिमृजेत् अपि वा व्याहृतीभिः त्रिः पिबेत् अपूलिंगाभिस्त्रिः परिमृजेद् भूर्भुवः सुवरित्येता १४

भिः सर्वपातकेभ्याचामेदिति। इदं मंत्राचमनमपि कार्यं द्वितीयं देवलक्ष्म इत्थं मंत्रप्रोक्षणमपि तथा च धर्मे। अप आचम्य सुरभिमत्याब्लिंगा
भिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृतीभिरन्यैश्च पवित्रैरात्मानं प्रोक्ष्य प्रयतो भवति अथाप्युदाहरंति अपो वगाहनं स्नानं वि
हितं सार्ववर्णिकं। मंत्रवत्प्रोक्षणं चापि द्विजातीनां विशिष्यते। सर्वकर्मणां चैवारंभेषु प्राक् संध्योपासनकाले चैतेनैव पवित्रसमूहेना
त्मानं प्रोक्ष्य प्रयतो भवतीति सुरभिमत्या दधिक्राव्ण इत्यृचा अब्लिंगाभिः आपो हि ष्ठा मयोभुव इति तिसृभिर्वारुणीभिः यच्चिद्धि ते वि
शो यथा प्र देव वरुण इत्याद्याभिस्तिसृभिर्हिरण्यवर्णाभिर्हिरण्यवर्णाः शुचयः पावका इत्यादिचतसृभिः पावमानीभिः पवमानः सुवर्जन इत्या
द्याभिरंतादनुवाकस्य अन्यैश्च पवित्रैः कयानश्चित्र आभुवदित्याद्याभिर्वामदेव्यऋग्भिः तरत्समंदी धावतीत्याद्याभिश्चतसृ
भिः शन्नो देवीरित्याथर्वण्याद्याहृतिभिश्चैत्यपदेशः एवं प्रलोपायनादिकं कार्यं तथा च कर्मांते सूत्रं सोयमाहिताग्निरुपवसथीये
ह्न्यपुराग्निहोत्रासिरव्यानुपसादयेत् अन्वाधानार्थान् प्रलोपायनं पाचयीत तस्याशितो भवति सर्पिर्मिश्रं दधिमिश्रं अक्षारमल
वणमपि शितं सर्वमेतद्दहः कोशिधान्यं वर्जयेत् अन्यत्र तिलेभ्यस्तस्य ब्राह्मणं प्रतिपाद्याश्नीयान्नैतद्दहः इत्युद्रायोच्छिष्टं दद्यात्

पत्न्या एवैतदहविरुच्छिष्टं स्यात्तां संध्यां शयीतन स्त्रियमुपेयात् मंचे वोपरि शयीत न स्त्रियं त्वेवनो पेयाद्ब्रह्मचारित्वेव स्यात् स यदि के
शश्मश्रु वापयिष्यमाणः स्यात् केशश्मश्रूणि वापयित्वा लोमानि संहृत्य नखानि निकृंतयीत स्नायादभ्यंजीतां जीतदीक्षायै रूपं कुर्वी
ताग्निनन्वादध्यादुपवसथं कृत्वा उपस्थं तु गार्हपत्यं ऊर्ध्वं जुरन्वाहार्यपचनं प्रञ्च आहवनीयं तिष्ठन् रशमी निगदेदिति। अत्र प्रात
रग्निहोत्रात् प्रागेव पित्र्याणि स्फक्के: पिंड्योपसादनानंतरमेवाग्निहोत्रं कार्यमिति गम्यते तत्र त्तोपायनीयं भोजनार्थमोदनं क्षारं
गुडादिमिश्रितं नतइहि तत्नमक्षारं पिशितं मांसं कोद्रवो स्यात्त्ती निकोद्रि धान्यं मुद्गादि तस्यान्नस्य ब्राह्मणं प्रतिपाद्य भोजयित्वा य
दी स्फक्के: पेवैने चिकत्सः अवपने पिस्नानं अभ्यंजनं नवनीतेन उपस्थसमासनं पूर्वेद्युर्नांदीमुखं कार्यं चेदक्र्माणि प्रयोक्ष्यन्
पूर्वेद्युरेव युग्मान् ब्राह्मणान् भोजयेदिति नांदीमुखा एवैत उक्ता भवंतीति परिभाषावचनात्।। यस्मिंदिने कर्मारंभः तत्र दि
ने पुण्याहवाचनं कार्यं य एवं विद्वान् पुण्याहं वाचयति नास्य कर्मोपहतं भवतीति वचनात्। इमे च नांदीपुण्याहवाचने योनेव १९
ज्जीवप्रयोगेषात्तू निमत्तश्च कर्मस्वादौ सकृदेव स्याद्धः। सर्वकर्मादौ परमेश्वरस्य ध्यानं कार्यं तथा च कर्मांते सूत्रंकउरवलु

यज्ञपुरुषइत्तीति॥ अथमर्थः यज्ञःकः किंस्वरूपः यद्यपियज्ञः क्रियास्वरूपोनत्तत्रसंदेहः तथापियज्ञाधिदेवताप्रश्नस्यविषयःपुरुषो
विष्णुःपरमात्मापुरुषोवैयज्ञो। यज्ञोवैविष्णुरितिपुरुषंएवेदंसर्वमिति चश्रुतेः एतद्धिज्ञानस्यप्रयोजनंयज्ञादौपरमेश्वरध्यानंअनु
ष्ठाने क्र प्रयोजनकस्यसूत्रस्यअक्रियार्थज्ञानमात्रोपयोगस्यान्याय्यत्वात्। एवंकर्मादौसंकल्पःकार्यः अतएवोपव्याहरणसूत्रं। अथोप
व्याहरणंविज्ञायते क्रत्वादौ क्रतुकामंकामयीतयज्ञांगादौयज्ञांगकाममिति प्राक्कूलान्दर्भान्त्संस्तीर्य तेषुप्राङ्मुखोयजमानउपविश्य
जपतियाः पुरस्तात्प्रस्रवंत्युपरिष्टात्सर्वतश्चयाः। ताभिरश्मिपवित्राभिः श्रद्धांयज्ञमारभे। देवागातुविदोगातुंयज्ञायविंदतमनस
स्पतिनादैवेनवाताद्यज्ञःप्रयुज्यतामिति श्रद्धएहिसत्येनत्वाह्वयामि। त्वाकूत्यावेदनंकरोत्याकूत्यैत्वाकामायत्वासमृधेत्वा। पुरोद
धे अमृतत्वायजीवसे। आकूतिमस्यावसेकाममस्यसमृध्यै। इन्द्रस्ययुंजतेधियः। आकूतिं देवीमनसःपुरोदधेयज्ञस्यमातासुहवा
मेअस्तु। यदिच्छामिमनसासकामोविदेयमेनद्धृदयेनिविष्टमितिमनसात्रिःसंकल्पयते त्रिरुच्चैःसर्वकामोग्नीनाधास्यइत्यग्न्या
धेयेस्वर्गकामोदर्शपूर्णमासाभ्यांयक्ष्यतिदर्शपूर्णमासयोःस्वर्गकामश्चातुर्मास्यैर्यक्ष्यइति चातुर्मास्येषुस्वर्गकामःपशुनायक्ष्य

सु.द इतिपशुबंधेस्वर्गकामःसोमेनयक्ष्यइतिसोमेसर्वकामोग्निंचेष्यइत्यग्निचयेहीनेहर्गणेवायथाकामोयत्कामोवायजतेतन्मऋ
१६ ध्यतांतन्मेसमृध्यतांतन्मेसंपद्यतांकामइत्यथर्त्विजांप्रतिवचनंतत्तऋध्यतांतत्तेसमृध्यतांतत्तेसंपद्यतांकामइत्योंतथेतिप्र
तिवचनमिति।अयमर्थःउपव्याहरणंप्रारिप्सितस्यकर्मणआरंभसमीपेवचनंउक्तिःसंकल्पइत्यर्थः।वक्ष्यतइतिशेषः।अत्रप्र
माणंब्राह्मणमुदाहरतिविज्ञायतइत्यादियज्ञांगकाममित्यंतं।क्रतुकामःक्रतुनाकर्मणाप्राप्तव्यत्वेनाभिप्रेतंकामंफलंकाम
येतस्वर्गकामोयक्ष्येयागेनस्वर्गरूपंफलंभावयिष्यइतिवत्अभिलापकशब्दोच्चारणेनप्रकाशयेत्यज्ञांगकामंयज्ञांगवद्यज्ञो
पकारकस्यगोदोहनादेःफलंकामयेतपशुकामोगोदोहनेनप्रणेष्यइतिवत्संकल्पयेत्इत्थमुपव्याहरणेप्रमाणमुपन्यस्यसेतिक
र्तव्यताकमुपव्याहरणमुपदिशतिप्राक्कूलानित्यादिनाप्राक्कूलान्प्रागग्रान्यजमानःतस्यदक्षिणतःपत्नीचसहभवेत्प
त्नीसमेतस्यैवाधिकारात्जपतिसत्येनत्वोद्धयामीत्यंतंआकूत्यावेदनेभिप्रायख्यापनंएतच्चनिविष्टमित्येतदंतंमंत्रजपः १६
उपव्याहरणंविश्यतेमनसात्रिःसंकल्पयेतेत्रिरुच्चैपतिकथमित्याशंक्यसंकल्पप्रकारमेवोल्कादर्शयतिसर्वकाममित्यादि

प्र

नासर्वकामः सर्वक्रतुफलकामः न चोक्तकाण्डर एवासर्वत्राश्रयणीयइत्ति निर्बंध किंतु यस्य यत्फलं यत्र वा फले कामना तदनुगुण ए
व संकल्प इत्याह यत्कामो वा यजेत तं निसंकल्य जपेत् महन्म इत्यादि ऋत्विज आसन उत्तरत उपवेश्य उपव्याहरणं तेषां प्रतिवचनं तंत्र
ऋध्यता मित्यादि शिष्टं स्पष्टं अथ ऋत्विजां यजमानस्य पत्न्याश्च धर्माः केचन उक्ता धर्मे अत्रोपव्याहरणे चोक्तास्तान्वक्ष्यामः उ
पव्याहरणे तावत् । आदित एव तीर्थे स्नातो दे साहतं वासः परिधाय शुद्धो हे व शुचिः पूतो मेध्यो विपाप्मा ब्रह्मचारी सहकारि प्रत्यय
आचतुर्थात्कर्मणो ऽभिसमीक्षमाणो [illegible] वे दकर्माणि प्रयोजयेत् प्राङ्मुखः प्रदक्षिणं यज्ञोपवीति दैवानि कर्माणि क्रियेत तर्हि
णामुखः प्रसव्यं प्राचीनावी । नी पित्र्याणि तिष्ठन्नासीनः प्रह्वो वा यथाम्नायमिति । आदितः कर्मारंभकाले दे त्यइत्यादयो धर्मा [illegible] आ स्ना ए ला
कर्मसमाप्तेः सहकारिप्रत्ययः सहकारिषु इतरेषु त्विक्षु प्रत्ययो विश्वास एकमत्यं यस्य यज्ञियं पदार्थं चतुर्थेन सह क्रियमाणादार
भ्य बुद्धो ऽव्यवस्थापयन् पाणिसंमर्शनकालपरिस्तरणं पात्रासादनं ब्रह्मण उपवेशनमिति एवमानात् । धर्मप्रश्नो शौचदेत्रामंत्राद
दर्थद्रव्यसंस्कारकालभेदेषु पूर्वपूर्वप्राधान्यं । उत्तरत उपचारो विहारस्तथापवर्गो विपरीतं पित्र्येषु पादोपहतं प्रक्षालयेदंगमुपस्पृश्य

सु॰द॰ सिद्धंवाउपस्पृश्योदेवं छेदननेकदनखननिरसपित्र्यराक्षसनैर्ऋत्तरौद्राभिचरणीयेषुनमंत्रनायज्ञांगेनांत्सानमभिपरिहरेदभ्यंतर
३७ णियज्ञांगानिबाह्यान्त्र्‌त्विजः पत्नीयजमानात्र्त्विग्भ्योंतरन्तयोयज्ञांगेभ्यआज्यमाज्याद्धवींषिहविर्भ्यः पशुः पशोः सोमः सोमादग्न
योयथाकर्मत्विजोनविहारादभिपर्यावर्तेरन्‌ प्राङ्मुखश्चेद्दक्षिणमंसमभिपर्यावर्तेरन्‌ प्र॰त्यङ्मुखः सव्यमंत्तरेणचात्वालोत्करौय
ज्ञस्यत्तीर्थमचात्वालआहवनीयोत्करोंतनतःकर्त्तारोयजमानःपत्नीचप्रपद्येरन्‌विसंस्थितेसंस्थितेसंचरोनूत्कररेशगत्नोप्रोक्षितय
पं प्रैन्नंक्रि॰नंकाष्ठंसमिधंवाभ्यादध्यात्‌। अग्रेणाहवनीयंब्रह्मयजमानोप्रपद्येतंजघनेनाहवनीयमित्येकेदक्षिणेनाहवनीयंब्रह्माय
त्तनमपरेणयजमानस्यउत्तरांश्रोणिमुत्तरेणहोतुरुत्करआग्नीध्रस्यजघनेनगार्हपत्यंपरस्यास्तेषुकालेकालएयदर्भान्‌संस्तृणा
केकस्यचोदककमंडलुरुपात्तस्यात्‌आचमनार्थोब्रिताये॰तोदीक्षितस्यान्नपरपापंवदेन्नक्रुध्येन्नरोदेन्मूत्रपुरीषेनावेक्षेतामेध्यं
दृष्ट्वाजपस्यवद्धमनोदरिद्रंचक्षुःसूर्योज्योतिषांश्रेष्ठोदीक्षेमामाहासीरित्यथयस्येनमभिवर्षस्कंदतीचर्लधतोजोनिर्वधिष्टे १७
नीति। दर्शपूर्णमासयोस्त्वयंक्रमः प्राक्‌प्रयोगारंभादुपकल्पनंपुराप्रातरग्निहोत्रात्परिस्त्र्योपसादनंअथाग्निहोत्रंप्रणोपाय

उत्तरतः ऋत्विजः

नीयस्योदनस्य पाकः तस्य ब्राह्मणं भोजयित्वा दंपत्योर्भोजनं यजमानो यदि केशश्मश्रु वापयिष्यमाणः स्यात्तदा वपनं ऋत्विग्यजमान
पत्नीनां स्नानं यजमानपत्न्योर्नवनीताभ्यंजनमांजनं ऋत्विग्यजमानपत्नीनां घर्षणं मंत्राचमनं मंत्रप्रोक्षणं विहारप्रवेशः गार्हपत्यस्य पश्चा
द्यजमानस्य प्राक्कूलेषु पवेशनं ततो दक्षिणतः पत्न्याउक्त ऋत्विजां परमेश्वरचिंतनं संकल्पः ऋत्विग्वरणं अग्निविहरणं अन्वाधा
नमित्यादि अग्नीनन्वादधातीत्युक्तं तत्कथं कर्तव्यमित्यत आह । त्रीणि काष्ठानि गार्हपत्येभ्यादधाति त्रीण्यन्वाहार्यपचने त्रीण्याह
वनीय इति । स्पष्टं । अत्र चंद्रमसं वा निर्ज्ञाय संपूर्णं वा विज्ञाय त्रीणीत्यादिनैवोपपत्तौ अग्नीनन्वादधातीत्यन्वाधानसंज्ञार्थं तस्य च
प्रयोजनं व्यवहारोन्वाधानार्थानीत्यादौ मंत्रवचनात्तूष्णीमन्वाधानं द्वैधे तु बहवो विकल्पा आम्नाताः अग्नीनामन्वाधानमिति सूत्रमे
पमन्यवीपुत्रस्यात्रोहस्माह बोधायनो विहृत्याभिरग्नीनन्वादध्यात् तिसृभिस्तिसृभिरेकैकं येनवसमावनेपुरथयेष्टो प्रथमां वोत्तमां
वाद्भिरभ्यावर्तयेसुरथयेदश तिसृभिस्तिसृभिरेकैकमन्वाधायोत्तरेणाहवनीयं तिष्ठं दश्रांमा निगदेदित्यत्रोहस्माह शालीकिर्येनु
खलु गार्हपत्यः स रुद्रन्नाहितएष भवन्त्यामयोनिरन्वाहार्यपचन आहवनीयमेकं विहृत्ययान्वादध्यादथालिशिष्टा उत्तरेणाहवनी

स्क०द०
१९

यंतिष्ठंदशमीं निगदेदित्यत्रोहस्माहोपमन्यवोविहृव्याभिरग्नीनन्वादध्यादेकैकमेकैकयेति शिष्टाउत्तरेणाहवनीयंतिष्ठं निगदेदि
त्यत्रोहस्माहमोद्गल्यआहवनीयमेवैकमन्वादध्यादग्निंगृह्णामिसुरथंयोमयोभूर्यउर्घतमारोहन्तिसूर्यमन्हे। आदित्यंज्योतिषांज्योति
रुत्तमंभ्योयज्ञापरमतांदेवताभ्यः। वसून्रुद्रानादित्यानिंद्रेणसहदेवताः। ताःपूर्वःपरिगृह्णामिस्वआयतनेमनीषया। इमामूर्जं
मंच दशींयेविप्रष्ठास्तांदेवान्परिगृह्णामि पूर्वः। अग्निर्हव्यवाडिहतानावहतुपौर्णमासं हविरिदमेषांमयीतिपौर्णमास्यामामा
वास्यंहविरिदमेषांमयीत्यमावास्यायामित्यत्रोहस्माहमेत्रेय आहवनीयमेवैकं विहृव्ययान्वादध्यादितिशिष्टाउत्तरेणाहवनीयं
तिष्ठंनिगदेदितिव्याहृतिभिरेवाग्नीनन्वादध्यादितिराथीतरइति। सूत्रंकल्पसूत्रंतत्रविहितंमंत्ररहितं विहृव्याभिर्विहृव्यामम
ग्नेवर्चोविहवेष्वस्त्वित्याद्याऋचः ताभिः कश्चिच्छाखायांनवसमाम्नायंलेक्वचिन्नास्तिकश्चिद्दृश्यतेतत्रस्वस्वशाखाध्ययनानुसारे
णत्रयःकल्पाः सकृदन्वाहितः गार्हपत्यस्यअधानानंतरंपवमानेष्ट्यांसकृदन्वाधानंकार्यंतत्रसकृदन्वाहितएवसर्वत्रउपकरोति
नतत्स्यदर्शपूर्णमासादौपुनरन्वाधानंश्रामयोनिरेवकेवलमन्वाहार्यपचनःअन्वाधानमंत्ररापिकर्मस्वपकरोतीतिभावः। सर्वत्रापि
न

समंत्रकेषु कर्मसु मंत्रांतेन कर्माणि संनिपातयेत्तथा च कर्मांते सूत्रं। नाप्रक्रांतं प्रक्रमयेन्न प्रक्रांतं कर्म तूष्णीं कर्मणाभिपूर
यिपेदिति नाप्रक्रांतमिति यदृचो चामयद्भिर्लवनः खल्वयं ह्रस्वो मंत्र आम्नातो भवति दीर्घमु कर्म न कर्मणो हेतोर्मंत्रोभिनिवर्तेत ता
थायं पशोर्विशसनो ह्रस्वो मंत्र आम्नातो भवति दीर्घमु कर्म न कर्मणो हेतोर्मंत्रोभिनिवर्तेत तथायं स्वयमातृण्णा यां दीर्घो मंत्र आम्ना
तो भवति ह्रस्वमु कर्म न कर्मणो हेतोर्मंत्रो विरमेद्यथो एतत्त्रिर्यजुषा सकृत्तूष्णीमिति लोकाग्नींश्चिन्वते षामुपश्रुत्य स्तंवयजुश्चेति
यथो येतत्पंचकृत्वो यजुषा पंचकृत्वस्तूष्णीमिति राज्ञस्तेषां मानमुपश्रुत्येति यथो एतत्सकृद्यजुषा सकृत्तूष्णीमिति राज्ञ एव तेषां
मानमुपश्रुत्येति यथो एतच्चतुरो मुष्टीन्व्रीहीणां निर्वपति द्वौ देवताभ्यां स्विष्टकृते तृतीयमिडायै चतुर्थ इति सर्व एव तेषां ब्राह्मण
वंतं इति। अस्यार्थः। नाप्रक्रांतं प्रक्रमयेत्। अप्रक्रांतं प्रकर्षेण आरब्धाक्रांतः संक्रांतो युक्तः प्रक्रांतः स न भवतीत्यप्रक्रांतः वचने
नानावर्तितो मंत्रः तन्न प्रक्रमयेत् नावर्तयेत् कर्मवशेन कर्मणः स्वकार्यसिद्धिपर्यंतमावृत्तासर्वस्याप्यवांतरस्य क्रियाभ्यासस्य मं
त्रं प्रति प्रधानत्वं श्रांत्या प्रति प्रधानं गुणा इति मनुरुध्य वचनमंतरा नावर्तयेत् कर्म[illegible] याया संक्रांतं किंतु मंत्रांते:
इत्युत्क्रांतं

सु॰द

१९

कर्मादीन् संन्निपातयेत् मंत्रविनियोजक ब्राह्मणवचनेषु इतिकारेण मंत्राणां करणत्वादिति तदिदमुक्तं भाष्ये अप्रक्रांतं च च
नेनानावृत्तिं न प्रक्रमयेत् नावर्तयेत् कर्मविशेनेति बहिर्लवनादौ मंत्रांते न कर्मादीन् संनिपातयेत् पुनरपि तदेक कर्मेति करा
दावृत्तिः स्यात् तन्निवृत्त्यर्थमिति च। अत्रैव सूत्रस्य तंत्रे करशेषाख्याश्रयणे नार्थांतरं उक्तं भाष्यकृता अपायस्वयमात्तृणा इत्येतस्यैव
सूत्रस्योदाहरणांतरं उदाहरणांतर प्रदर्शनपरसूत्र व्याख्यानावसरे न तु च्यते। अप्रक्रांतं कर्तरिक्तः प्रकर्षेण क्रांतो गतः क्रमे
र्गत्यर्थात् न प्रक्रांतः अप्रक्रांतः अगतः सावशेषः दीर्घ इति यावत् तं मंत्रं न प्रक्रमयेत् न गमयेत् क्रियाप्रकाशनसमर्थमेकदेशं
मंत्रमुक्त्वा एकदेशांतरस्य प्रकृत क्रियाप्रकाशनसमर्थस्य विकल्पेन प्रयोगो भवत्विति बुध्या न विरमेत् किंतु मंत्रांते नैव कर्मादी
न् संन्निपातयेत् इति। तदप्युक्तं भाष्ये तथा न अवृत्तं दीर्घ कर्मणो त्यत्वेन छिंद्यात् इति। दीर्घेपि तथा रब्धव्यं न मंत्रः खंड
शः संनिपात्य विरम्य किं तर्हि समस्तमुक्त्वा रब्धव्यमितीति च। नन्वेवं यद्यदावृत्तियुक्तं कर्म तत्र सर्वत्राप्यादौ सकृदेव मंत्रमुक्त्वा १९
मंत्रांते न कर्मादि संनिपात्य सर्वाः आवृत्तीः कुर्यात् वहिर्लवनवदित्यत आह। न प्रक्रांतं कर्म तूष्णीं कर्मणाभिविपूरयिवेदिति। प्र

क्रांतं पूर्वसूत्रप्रथमव्याख्यानरीत्याद्वित्रिश्चतुः पंचरूलोदशारूलो वा अप्रत्नं कर्म अनावृत्य मंत्रं आरोसरून्मंत्रमुक्त्वानंतरं तूष्णीं कर्मण
मंत्ररहितक्रियानुष्ठानेन आरब्धेरवशिष्टां संख्यां पूरयितुं नेच्छेत् किंतु मंत्रांते: कर्मादीन् सन्निपातयन्नेव मंत्रारब्धानां कर्मानुस
रेण यथाक्रमं प्रस्तारंति विभज्य विनियोगः कार्यः तथा च भाष्यं। प्रक्रांतं आरब्धं कर्म तूष्णीं कर्मणा नाभिपूरयितुमिच्छेत् इति यद
प्युक्तं प्रक्रांतमारब्धं कर्मानावर्त्य मंत्रं तूष्णीं कर्मणा संख्यां न पूरयेद्दित्तित्रि यजुषेत्यादिषपि तथा सर्वं मंत्रमुत्सारभ्य व्यं तूष्णी
मितरत् किंतु विभज्य प्रयोक्तव्यं यथोक्तमिति च। अत्र सूत्रद्वयोक्तानामर्थानां विस्पष्टतायै क्रमेणोदाहरणं निदर्शयति। नाप्र
क्रांतमिति सूत्राभ्यां यद्वोचामतदुदाहृत्य दर्शयाविमः। आच्छेत्तारो मा। रिष इत्ययं मंत्रो बर्हिर्लवनः खलु बर्हिर्लूयते तेनेति यु
त्पत्त्या बर्हिर्लवने करणीभूतो यथातः अतो मंत्रांतेन कर्मादिसन्निपातयेत् अपि च हस्तो मंत्र आम्नातो भवति अतः प्रतिल
वनं मंत्रावृत्तावपि प्रयोगो न विलंब्यते दीर्घमुकर्म कर्मतु दीर्घ्यं यावत् प्रस्तरावाप्ति पुनः पुनर्लवितव्यत्वात् अतः कर्मणो हेतोः
कर्मानुष्ठानाय करणीभूतो मंत्रोऽभिनिर्वर्त्तते स पिन भवति यावत्फलोत्पत्ति क्रियायाः एषेन करणावृत्तौ मानाभावादिति ए

के

सु॰र॰ कमुदाहरणं अग्नेर्वोदाहरणांतरं अथायं पशोर्विशसनः अथायं स्वधितेमैनं हिंसीरितिमंत्रः पशोः संबंधी विशसनः विशयस्यनेने
२० नेतिव्युत्पत्त्या विशसनेकरणीभूतः अतः प्रागुक्तरीत्यामंत्रांतेन कर्मादि संनिपातयेत् अत्रापिह्रस्वोमंत्र आम्नातोभवति कर्मतु
दीर्घमितिकृत्वा प्रतिविशसनं नेमंत्रमावर्तयेत् किंतुसकृन्मंत्रमुक्त्वातूष्णीमावृत्त्याकर्मकुर्यादिति अथैवसूत्रस्य द्वितीयार्थी
स्वध नुसारेणोदाहरणांतरमाह अथायं मातृणा योप्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठ इत्यादिदीर्घोमंत्र आम्नातः कर्मतुह्र
स्वमुपधानात्मकं तत्रदीर्घस्यमंत्रस्यानेकाख्यातयुक्तस्य एकतिङ्वाक्यमिति न्यायेनानेकवाक्यत्वसंभवात् प्रतिवाक्यं
क्रियाप्रकाशनसामर्थ्यानुरोधेन मंत्रंछेदयित्वानविकल्पेन खंडशः सनिपात्यविरमेत् किंतुविनियोजकवचनानुसारेणै
वसमस्तं मंत्रमुक्त्वा कर्मकुर्यादेवं प्रथमसूत्रस्य त्रीण्युदाहरणान्युक्तानि अथ द्वितीयसूत्रस्योदाहरणानि। यथा एतत्त्रिर्यजु
षा सकृत्तूष्णीमिति लोकाग्नीश्च तेषामुपस्थुत्यस्तंवयजुश्चेति। यद्यत्कर्म यजुषा मंत्रेणत्रिरभ्यस्यकर्तव्यं तूष्णीं मंत्रं विना २०
सकृत्कर्तव्यमित्यामनंति तद्यथा लोकाग्नीश्चस्तंवयजुश्च लोकाग्नीस्तावत् चिदेरग्निर्नामोनामाग्ने अंगिर इतिविह

रतियएवेषुलोकेष्वग्नयस्तानेवावरुंधेतूष्णींचतुर्थंहरत्यनिरुक्तमेवावरुंधइत्यामनंतिअनेनब्राह्मणेनउत्तरवेद्यांविहितानिप्रहृत्तवर्हिःस
हितवालत्वालपांसुनिवपनानिलोकाग्नयइतिलक्षणयोच्यंतेयेपृथिव्यंतरिक्षद्युलोकानामग्नयःनभोनामानःविदेलुत्तरवेदेःसंबंधिनश्चा
त्वालगतमृद्रूपायांपृथिव्यांवर्त्तमानास्तेषामेभिर्निर्वपनैरुत्तरवेद्यामाधानात्तथाचमंत्रवर्णःविदेरग्निर्नभोनामाग्नेअंगिरोयोस्यांपृथि
व्यामस्यायुषानाम्नेहियत्तेनाधृष्टंनामयज्ञियंतेनत्वादधेअग्नेअंगिरोयोद्वितीयस्यांतृतीयस्यांपृथिव्यामस्यायुषानाम्नेहियत्तेनाधृ
ष्टंनामयज्ञियंतेनत्वादधइति।स्तंबयुजुश्चस्तंबयजुर्हरतिपृथिव्यामेवभ्रातृव्यमपहंतिद्वितीयंहरति।अंतरिक्षादेवैनमपहंति।तृ
तीयंहरतिदिवएवैनमपहंति।तूष्णींचतुर्थंहरतिअपरिमितादेवैनमपहरतितीब्राह्मणेनहिवितं।स्तंबस्यएकदेशभूतोदर्भस्तं
बशब्देनोच्यतेतस्यप्रकाशकंयजुःपृथिव्यादेवयजन्योषध्यास्तेमूलंमाहिंसिषमितिमंत्रस्तंबयजुःअत्रहरतिसं।योगात्वेदिदेश
गतपांसवस्फ्येनप्रहृत्तदर्भस्तंबसहितास्तंबयजुःशब्देनलक्षणयोच्यंतेहरणेचैतत्करणंपृथिव्यैवर्मासीत्यादिर्मंत्रःलिंगात्तथा
चस्तंबयजुर्हरतीतिविहितस्यार्थस्यकल्पःअथांतर्वेद्युदीचीनाग्रंवर्हिर्निदधाति॥पृथिव्यैवर्मासीत्यादिन्तूष्णींचतुर्थंहरतिसह

सु॰द॰ बर्हिषेत्यंतः प्रकृतसूत्रे त्रिर्यजुषेति दर्शनात् उक्तं च यजुर्हरणमेवस्तं च यजुःशब्देन विवक्षितमित्यवगंतव्यं क्रियाभ्यावृत्ति
२१ गणन एव त्रिःशब्दस्य वृत्तेः अत्र चतुर्थपर्याये तूष्णीं विशेषणात् पूर्वं त्रिर्यजुषेत्यर्थसिद्धं इतिशब्दः प्रकारपरः एवंप्रका
राण्यन्यान्यपि अग्नये जुष्टं निर्वपामीत्याह। अग्नय एवैनाजुष्टं निर्वपति त्रिर्यजुषा त्रय इमे लोकाः। एषां लोकानामास्यै तूष्णीं
चतुर्थी अपरिमितमेवावरुंधे इति एवमादिन्यामनंतितानि सर्वाण्यपि एतद्बर्हिर्लवनादिकं यथोयथा मंत्रांतैः कर्मादीन् सं
निपात्यैव कुर्यात् अत्रायमपरो विशेषः तेषामुपभृत्येति अयमर्थः। एतेषामिति बहुवचनात् त्रिर्यजुषेति सूत्रोपात्ता
स्त्रयोभ्यासाग्रस्यंते तत्र हि त्रिर्यजुषेति त्रीनभ्यासान् प्रति मंत्रस्य करणत्वमवगतं तच्च मंत्रं सकृत्पठित्वा त्रिवारं कर्मा
भ्यासेष्वुपमन्त्रमितिकुध्याल तथा न कर्तव्यं किंतु तेषां त्रयाणामपि प्रत्येकं स्यात् तेन क्रमेण प्राधान्यात् प्रतिप्रधानं गुणावृत्तिरि
ति न्यायेन तेषां सर्वेषामप्यभ्यासानां प्रत्येकं मंत्र उपभृत्य समीपे पठित्वा मंत्रांतैः कर्मादीन् सन्निपातयन्नेव कुर्यात्। २१
अथास्यैव सूत्रस्यावृत्तिसंख्याभेदेनोदाहरणांतरमाह यथोऽएतत्पंचकृत्वो यजुषा पंचकृत्वस्तूष्णीमितिराद्गस्तेषां

मानमुपश्रुत्येति। पंचरुत्वो यजुषा पंचरुत्वस्त्वद्धमीमिति राज्ञो मानं आमनंति नदपि यथोएनत् त्वोकाम्यादिवदेव मंत्रांतैः कर्मादीन्
संनिपात्य प्रत्सभ्या सममि संदेवमिति मंत्रमावर्त्य कुर्याद्यजुषा यज्ञसाधनेन। तेन नाति छंदसर्चैति विरोधः इति शब्दः पूर्ववत्तन्
नु केषांचिच्छाखायां सकृद्यजुषा सकृत्त्वद्धमीमिति राज्ञ एव मानमामनंति किं तेषामपि शाखिनां मानं कृत्वो भ्यस्य पंचरुत्वो यजु
षा पंचरुत्वस्त्वद्धमीमिति कर्तव्यं बढ्ढीः शाखाअधिकृत्यैतस्य सूत्रस्य प्रवृत्तेरित्यत आहायथोएनत्सकृद्यजुषा सकृत्त्वद्धमीमि
ति राज्ञ एव तेषां मानमुपश्रुत्येति। सत्यं सकृद्यजुषो जुसकृत्त्वद्धमीमिति केषांचिच्छाखायां राज्ञ एव मानमाम्नातं सूत्रमपि बढ्ढीः
शाखा ऽधिकृत्य शोधप्रवृत्तमेव न तु तेषामपि शाखिनां मंत्रे कर्मवा आवर्तयेत् पचरुत्वो यजुषा मिमीते पंचरुत्वस्त्वद्धमीमि
ति आम्नायस्य सर्वशाखा प्रत्यय न्यायेन तेषामप्युपसंहर्तव्यत्वे पि आम्नाययोः परस्परविरुद्धार्थतया विकल्पे सति तेषां नेषां स्व
स्वशाखाम्नातस्य विकल्पितस्य व्यवस्थितस्यात्। किंतु यथोएनद्यथासमाम्नायमेव उपश्रुत्य सकृन्मंत्रं पठित्वा सकृदेव कर्म कुर्या
सकृत्त्वद्धमीमिति इति शब्दः प्रकारार्थः एवं प्रकाराविरुद्धाः समाम्नाया यत्र यत्र संति तत्र सर्वत्रापि यथाशाखं व्यवस्थितो विकल्प

सु॰र॰
२२

इतिननुचतु[रो]मुष्टिंव्रीहीणांनिर्वपतिद्वौदेवतायेस्विष्टकृतेतृतीयाइडाइयेचतुर्थइत्येवकेषांचिच्छाखायामाम्नातंनतुत्रिर्यजु
षातूष्णींचतुर्थमितितत्रमंत्रस्यकरणत्वानवगतेःप्रत्यभ्यासंमंत्रसंबंधानवगमाच्चतुष्णीमेवचत्वारोनिर्वापाःकर्तव्याःस्फुरि
ष्यन्तआह।यथाएतच्चतुरोमुष्टीन्व्रीहीणांनिर्वपतिद्वौदेवतायैस्विष्टकृतेतृतीयइडायैचतुर्थइति सर्वएतेषांब्राह्मणवंत
इतियद्यप्येकेषांशाखिनांचतुरोमुष्टीन्व्रीहीणांनिर्वपतिइत्याद्येवसमाम्नातंनतुत्रिर्यजुषेत्यादितथापितेषांशाखिनामपि
त्रिर्यजुषासकृत्तूष्णीमितिसर्वएवनिर्वापाःसमानशाखीयब्राह्मणेनमंत्रवत्तूपात्तूष्णींचादौत्रयोभ्यासाःप्रत्यभ्यासंमंत्रत्वे
नचोक्ताएवसर्वशाखाप्रत्ययन्यायस्याविरोधाभावात्तूभयस्तथैवकुर्यादिति।तदिदंसर्वमभिप्रेत्यभाष्यउक्तंबर्हिर्लवनादे
मंत्रान्तेनकर्मादीन्सन्निपातयेत्पुनरपितद्देवकर्मेतिकदाचिद्दारतिःस्यात्तन्निरत्यर्थंदीर्घेपितथारब्धव्यंनमंत्रःखं
डशःसंनिपात्यविरम्यःकिंतर्हिसमस्तमुच्चार्यव्यमितित्रिर्यजुषाइत्यादिष्वपिसर्वमंत्रमुच्चारब्धव्यंतूष्णीमितरत्तुकिं
तुविभज्यप्रयोक्तव्यंयथोक्तमितीतिआपस्तंबास्तुमंत्रान्तैःकर्मादीन्सन्निपातयेदाधारेधारायांचादिसंयोगइत्याहुःकास २२

यनस्क मंत्रांतेः कर्मादिसन्निपातोभिधानात् अनियमेवास्य आदित्याचार्य इति। अस्यार्थः। कर्माणि प्रयुज्यमानानां मंत्राणामंतस्य
कर्मादेश्च संनिपातः संलग्नता कार्याकुत्त एतत् उच्चरितो मंत्रः कर्माभिधातुं शक्नोति ततश्च तदनुष्ठीयते एवं सति प्रयोजनानुरो
धो भवति अनियमं वास्य आचार्य अनियमं मेने। आदौ वा मंत्रमुक्त्वा कर्मानुष्ठितं वा कर्मणि मंत्रवचनं न ह्यनुष्ठानप्रयोजनको मंत्र
उपदिष्टवचनादिनापि प्रयोगसंभवेन मंत्राणां प्रयोगनियमानुपपत्तेः यदि च मंत्रैः कर्माभिधाने कर्मस्वतिशयो जन्यत इति मवंत
ता अनियमेन प्रयोगेपि कर्माभिधायकत्वं मंत्राणां भवतीत्यतिशय उपपन्न इति आदित्याचार्यः। तु शब्दः पक्षव्यावृत्तो नानियमः
मंत्रांतेन कर्मादित्याचार्या इच्छंति यत्कारणं मंत्रेण स्मृतं कर्म कर्तव्यं समाम्नानसामर्थ्यात् इषे त्वोर्जे त्वेति शाखां आच्छिनत्तीति ब्रा
चिकरणत्वश्रवणाच्च अतो मंत्रांतेः कर्मादिसन्निपातोवगम्यते एवं दृष्टार्थता भवति मंत्राणां इतरथा अदृष्टं कल्प्यं तच्च नेष्य
ते दृष्टे सतीति। मंत्राः खलु चतुर्विधास्त्वंत्वादिभेदात्तेषु चतुर्विधेषु अयं मंत्रस्त्वाचक इत्यादिना रूपेण विशिष्य विज्ञाय प्र
योक्तव्यं। तथा च कर्मांते। चतुष्टयेन मंत्रावर्तने स्कन्त्यादिनिर्देशो नाशिषा नेव स्कन्त्यानाशिषाननिर्देशो नेति चतुर्थमिति। चतु

सु०द० ष्टयेन चतुरवयवेन समुदायेन च तुर्था मंत्रावर्त्तनइत्यर्थः। चातुर्विध्यमेव दर्शयति स्त्वये त्यादिना तत्र त्वमग्ने द्युभिरित्यादयस्तु सार्वत्ते
२३ ने एवमग्नये त्वाग्नीषामाभ्यामित्यादयो निर्देशेन इदंहविरस्यै देवतायै इति निर्देशेन रूपेण वर्त्तन्ते बर्हिषोहं देवयज्यया प्रजावान्
भूयासमित्यादयस्त्वआशिषास्त्वत्सावन्यतमरूपरहितं पञ्चतुर्थं तेन रूपेण भूर्भुवःसुवरित्यादयः अत्रे वान्येप्य देवताविषयप
श्नप्रतिवचनादयः अंबे अंबाल्यंबिके किंस्वीदासीद्घोरासीरित्यादयस्तथा च मंत्राणांप्रयोक्ता अयंमंत्रस्तृतिः अयंमंत्रो नि
र्देशकः अनेन प्रत्यगाशीः एतत्त्रितयरूपरहितोयं मंत्र इति विज्ञाय प्रयोक्तव्यमिति। अन्वाधानं याजमानमाध्वर्यवं वा उभयत्र
प्रमाणसद्भावात् याजमानमिदं कर्मान्ते सोयमाहिताग्निरित्युपक्रम्याग्नीनन्वादधातीत्युक्तेः इह च स उपकल्पयत इत्युक्ताग्नी
नन्वादधातीति वचनात् योग्नीनन्वाधाय व्रतमुपैतीति व्रतेन समानकर्तृकत्व लिंगाच्च व्रतं हि याजमानमिति निर्विवादं आ
ध्वर्यवं वा याजमानसमाख्याने अथो पवसथीये हन्नित्यत्राम्नानात् इह चाध्वर्यवे समाम्नानात् अन्वादधातीति परस्मैपदात् २३
ममाग्ने वर्चो विहवेष्वस्त्वित्यध्वर्युरादधातीति शाखांतरे दर्शनात् वेदिं विमायाग्नीनन्वादधातीति वेदिविमानादिसमानक

र्कल्पवचनाच्चोद्देश्यकर्मानौपानुयाक्योक्ताविधयोमूलकल्पप्रकरणोक्तैर्विधिभिर्विकल्प्यंतइतिमूलकल्पसूत्रोक्तमेवानुतिष्ठेति
केचिन्नारायणमतानुसारिणः अन्येपुनः मूलकल्पप्रकरणोक्तैर्विशेषविधिभिर्विशेषविधयोविकल्प्यंते।यथान्वाधानेद्देश्योक्ता
विकल्पाःकल्पेसामान्योक्तौअन्त्वविशिष्योक्ताअनुक्ताश्चविशेषत्वेनसंबध्यंतेयथाअन्वाधानएवउपस्कृत्वागार्हपत्यमित्यादि
विशिष्योक्तंअनुक्तंचपिंरव्योपसादनादिअन्वाधानमुक्त्वाअनंतरकर्त्तव्यमाह।परिसमूहंत्युपवसथस्यरूपंकुर्वंतीति।परिस
मूहंतिपरितःसर्वतःअग्न्यगारेविद्यमानानितृणपांसवादीनिसमूहंतिसंमार्जनेननिरस्यंतिसमूहंस्यग्न्यगारमित्यापस्तंबः।
उपवसथस्याग्नीनामन्वाधानस्ययजनीयपूर्वदिनस्यवारूपंरूपयतिज्ञापयतीतिरूपंअसाधारणंचिन्हंकुर्वंतिउपवसथरूप
चाग्न्यायतनानामुपलेपनंपर्युक्षणंपुष्पादिभिरलंकरणंपरिसमूहनंकर्तुंनियमेषुप्रयत्नइतिउपवसथरूपएवपरिसमूह
नस्यांतर्भावेपिपृथग्ग्रहणंपरिसमूहनाद्युपवसथस्यरूपमितिपरिज्ञानार्थंकुर्वंतीतिबहुवचनात्उडुभिःकार्यंयजमानःअ
रत्यनिरत्निसंकल्परूपंनियमेषुप्रयत्नंकुर्यात्तस्ययाजमानेअथोपवसथीयेहन्नित्यादिनासमाम्नानात्अलंकरणंयज

सु०द० मानपत्नीभ्यां कार्यं अलंकुर्वाते यजमानः पत्नी चेति खल्वाहापस्तंबः। अवशिष्टं आध्वर्यवे पाठादध्वर्युः कुर्यादिति इदं हि यजमाने
२८ समाम्नातं। अथोपवसथीये ह्नू यज्ञोपवीत्यप आचम्याग्रेणाहवनीयं परीत्य यजमानायतनउपविश्यतिरः पवित्रमप आचामति। पयस्व
पयः। अपां पयसो० सज। अथाहवनीये समिध आदधात्यग्ने व्रतपते व्रतं० तांस्वाहा वायो व्रत आदित्य व्रतपते व्रतानां व्रतपते व्रतं च
रिष्यामि त० राध्यतां स्वाहेति। अप आचम्य अत्र यज्ञोपवीती परसाहचर्यात् परिभाषासूत्रोक्तं अजिनादि यज्ञोपवीतसहितं मं
त्राचमनं कार्यं अप आचामति पयस्वतीरिति मंत्रेण सकृत् ततः स्मृत्युक्तमाचमनं। द्वैधे तु। अपामाचमन इति द्विर्मंत्रेणापामा
चामेत् सकृत्तूष्णीमिति बोधायनमतः। सकृन्मंत्रेणापामाचमेद् द्विस्तूष्णीमिति शालिकिरिति। द्विर्मंत्रेण पयस्वतीरिति मं
त्रेण सकृन्मंत्रेणेत्यपि तथा अत्र पुनराचमनं। समिदाधानविषयेपि द्वैधं। साक्षिकरण इति सहस्मा बोधायनः सर्वा एवैता
साक्षिणीः कुर्वीताग्ने व्रतपते व्रतं चरिष्यामीति अग्निर्वै देवानां व्रतपतिरित्येतद्देवतानि मन्यते इति शालीरिति पयस्वती २८
ति मंत्रेण साक्षिकरणे हे व्रतपतेग्ने अहं व्रतं चरिष्यामि तत् क्रियमाणं व्रतं तेन ते ब्रवीमि इति इति देवतानां संबोधनपूर्वकविज्ञा

पनेन इदं व्रताचरणस्य साक्षिकरणमिव प्रतीयत इति समिदाधानं साक्षिकरणमित्युच्यते तस्मिन्विषये इह मुच्यन्ते सर्वा एवै
ता अग्निवाय्वादित्याद्याः साक्षिणीः कुर्वीत सर्वैर्मन्त्रैः प्रत्येकमेकैकां समिधं यथा कल्पसूत्रमारभ्यादिति अग्ने व्रतपत इतिमं
त्र एव समिदाधानस्य प्रकरणे पाठाभावात् अग्निरेव देवानां मध्ये व्रतपतिस्तस्मादेतावदेव समिदाधानं नाधिकं कुर्यादिति शाली
किरिति ॥ द्वैध एव स्थालीतरे व्रतग्रहणस्य कालविकल्पा उक्ताः ॥ व्रतोपायन इति सह स्माह बोधायनः संगवकाले व्रतमुपेया
द्धेनुषु वा दोह्यमानासु प्रणीतासु वा प्रणेष्यत्सु हविःषु वासन्नेष्विति अत्रोह स्माह शालीकिः पूर्वेद्युः कालं खलु व्रतोपायनं भव
ति हि ब्राह्मणं बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायामिति स संगवकाले व्रतमुपेयात् ॥ अन्वाधानप्रभृति सोपमन्य
वति ॥ व्रतोपायन इति व्रतं अव्रत्यनिवृत्तिः तस्योपायनं संकल्पः पयस्वती मंत्राचमनपूर्वकसमिदाधानं न भोजनं बर्हिषा पू
र्णमासे व्रतमुपैतीति ब्राह्मणोदाहरणपर्यालोचनया समिदाधानमित्यभ्युपगमात् ॥ तस्मिन् विषय इत्यर्थः ॥ संगवकाल
औपवसथस्य धेनुषु वा दोह्यमानासु सायंदोहोपलक्षिते सायमग्निहोत्रानन्तरकाले स बर्हिषा पूर्णमासेष्वद्युः व्रतं कुर्वन् संगव

सु॰द॰ कालएवकुर्यादितिशाट्ठीकिः अन्वाधानप्रभृत्याहविषांसादनादनियतः कालइत्यौपमन्यवइति ।।अन्वाधानानंतरकालेमु
२९ ख्यःतत्रोपवसथस्यरूपंकुर्वंतीत्यनेनविधानात् ।।अथास्यव्रतोपेतस्येत्यन्वाधानानंतरकालीनस्यव्रतस्यपुनःपरामर्शात् ।।अ
भ्यासेह्यर्थस्यभूयस्त्वमितिन्यायात् ।।कर्मांतेअग्नीनन्वादध्याद्व्रतमुपेयाद्व्रतोपेतःपर्णशाखामच्छियादेवानुपूर्व्यंभवतीतिवचनाच्च
अत्रानुपपत्तौकालांतरेव्रतमितिद्रष्टव्यं ।।अथशाखाहरणार्थंगमनंविधत्ते ।।अथास्यव्रतोपेतस्यपर्णशाखामाच्छेत्ति
प्राङ्वोदङ्वावाचंयमोयत्रवावेत्स्यन्मन्यत इत्ति ।।अथअन्वाधानानंतरं व्रतोपेतस्यकृतपयस्वस्याचमनसमिदाधानस्यस
मिदाधानेनव्रतंचरिष्यामीतिव्रतसंकल्पस्यजाततया प्रभृतियजमानस्यव्रतोपेतत्वात् ।।अस्ययजमानस्यअध्वर्युःपर्ण
शाखांपलाशशाखांआच्छेत्तिआभिमुख्येनअच्छप्राप्तंएत्तिगच्छतिलिप्साकांक्षया माहप्राङ्वोदङ्वेतिप्राङ्मुखःप्राग्भागेउ
दङ्मुखःउदक्भागेवावाचंयमःवाग्यमनंकुर्वन्यदिप्राग्भागेउदक्भागेचपर्णशाखांनविंदेत्ततन्नायत्रवावेत्सन्मन्य २९
तेयस्यांदिशिप्राच्यांदक्षिणस्यांविदिक्षुवागत्वापर्णशाखांप्राप्स्यामीस्वगच्छतितत्रआच्छेत्तीति ।अथशब्दःपूर्वकृतापेक्ष

छिंद्यादप्रश्वात ऊर्ध्वं स्यादिति ॥ त्रीणि पलाशजातानि त्रयः पलाशशाखावांतरभेदाः श्लक्ष्णको लोमशकइति पलाशवृक्षभेदौ व्रततिर्वृद्धपलाशः तेषामन्
ये लोमशकादेव शाखाहरणं स एव मुख्यः ॥ तदलाभे इतराभ्यां शाखाहरणं यावन्मात्रे गोभिः कर्षते तावन्मात्रे शाखां छिंद्यात्ततस्तत ऊर्ध्वे छ

या अर्थांतरं घोतको अन्वाधानव्रतग्रहणापेक्षया शाखाहरणादेर्वैसादृश्यं घोतयति शाखाहरणादि अन्वाधानव्रतवत्तुना सन्नयतो
पि किंतु सन्नयत एवेति शाखाहर्त्रपेक्षया यजमानस्यास्येति भेदनिर्देशाः इति इत ऊर्ध्वमाध्वर्यवमेव व्रतोपेतस्येत्यनेन व्रतोपायनी
यमोदनमाशितस्येति नानुवादः तस्य ब्राह्मणं प्रतिपाद्याश्नीयात्तामिति प्रसक्तस्याग्नीनन्वारभ्यादिति विधानेन प्राप्तिसद्भावात् ॥ अन्य
त्र अशनमग्न्यन्वाधानं व्रतोपायनं अग्न्यन्वाधानमशनं व्रतोपायनमिति विकल्पाभिधानेपि नित्यप्राप्त्यानुवादेन प्रयोजनाभा
वात् । पर्णशाखां पलाशशाखां अत्र कर्मांतसूत्रं अथेमानि त्रीणि पलाशजातानि भवंति श्लक्ष्णको लोमशको व्रततिरिति लोमश
कस्यैषा शाखाच्छेत्तव्या भवति यावन्मात्रे गोभिर्निकर्षतेन ततऊर्ध्वं ततऊर्ध्वमपि छेदने शाखा अपशव्या स्यादिति । सा या प्राचीवोदी
ची वा बहुपर्णा बहुशाखा प्रतिशुष्काग्रा भवति तामाच्छिनत्तीति ॥ एतावतैवार्थसिद्धे शाखाहरणार्थे गमने आच्छेत्तीति पुनर्विधानं स्व
यमेवाहरेत् । छेदनेन प्रतिषिध्यत्रीयादित्येवमर्थं यत्र वा वेत्स्यन्मन्यत इति एतावतैव प्राच्यामुदीच्यां च दिशि शाखाया अलाभे आच्छे
ती प्राङ् वोदङ् वा याचं यमोत ऊर्ध्वं यत्र वा वेत्स्यन्मन्यते तत्र आच्छेयादिति तत्र आदत्यादिना यत्रालभमानोपि ईषत्प्राचीमुदीचीं

गमनविकल्पोसिद्धोपि प्राङ् वोदङ् वेति प्राच्यमुदीच्यं च शाखाया आलभ्य एवान्यत्र गमनार्थं अपि प्राच्यामुदीच्यां च दिशि
च

सु०द०
२८
वागत्वा यथार्थं गच्छेदित्येवमर्थं वाशाब्दद्वयं तुल्यविकल्पार्थं ॥ अत्रेदं ध्येयं । आच्छायन इति सह स्माह बोधायनो वाचंयम एव शाख
माच्छेद्याद्वाचंयम आहरेदेवं बर्हिरिति एवं चैव खलु कुर्यादित्ति शालीकिर्ब्राह्मणेन यथा अर्हं नैव संभाषेत ना ब्राह्मणेनेति
ति वाचंयम एवेति संभाषणे नियमादृष्टभंगः स्यात् । एवं बर्हिरिति वा वाचंयम एवाहर्तुं गच्छेदाहरेच्च इत्ति शालीकिस्त्वाह ए
वमेव कुर्यात् परंतु यदि ब्राह्मणः पूर्वं संभाषेत तदा तं ब्राह्मणं अर्हन् पूजयन् यथाप्रयोजनं संभाषेत ब्राह्मण एक होत्रेत्यनुवा
के ब्राह्मण एक एव होता यज्ञस्य साधकः अथोयं साक्षाद्यज्ञ एव तस्मादयं ब्राह्मणो यज्ञस्वरूपो मे सर्वमभीष्टं प्रयच्छत्विति ब्रा
ह्मणस्य यज्ञत्वप्रतिपादनात्तस्मिन्नभिमुखे सति यज्ञार्थिना अर्हणं कर्तुं न्याय्यमेवेति ॥ इत्थं शाखाहरणार्थं गमनं विधाय
शाखाच्छेदनं विधत्ते ॥ सा या प्राची वोदीची वा वा बहुपर्णा बहुशाखा प्रतिरुष्का आभवन्ति तामाच्छिनत्तीषे त्वोर्जे त्वेति हरति
॥ सा पूर्वोक्ता पर्णशाखा या प्राचीमुदीचीं वा हरति उभयोर्लोकयोरभिजित्या इति ब्राह्मणेन विस्पष्टमाहर्तव्ये नोक्ता प्रागुदी २८
ची अथ वा यत्प्राचीमाहरेत्तद्देवलोकमभिजयेदिति ब्राह्मणाम्नाता प्राची प्राच्यां दिशि गच्छन्ती अथ वा यदुदीचीं मनुष्य

लोकमितिब्राह्मणोक्ताउदीच्यांदिशिगच्छंतीपर्णशाखात्तिस्रणामपिशाखानांविशेषणानिबद्धनिअनेकानिबहुमत्तानिचप
र्णानियस्याःसाबहुपर्णाप्राचीननिंदितापर्णतानिरस्त्यर्थंइदंविशेषणंबहवःशाखाउपशाखायस्याःसाबहुशाखाअप्रति
शुष्कमग्रंयस्याःसाअप्रतिशुष्काग्राएतदुपलक्षणंअसुषिराइत्यपिद्रष्टव्यंअतएवोक्तमापस्तंबेनअप्रतिशुष्काग्रामसु
षिरामितिएवंलक्षणयुक्तापर्णशाखायाभवतिइषेत्वोर्जेत्वेतिमंत्रेणाच्छिनत्तिअत्रपर्णशाखायाअलाभेशमीशाखाया
स्याशाखान्तरेपलाशशाखांशमीशाखांवाहरतीतिसमाम्नानात् ।अथजघनेनगार्हपत्यंतिष्ठंन्नसिदंवेतिअसिदग्रहणेन
शाखांतरेसम्नानस्यापिविकल्पेनाग्रहणंभवतीतिज्ञापितत्वात्ननुप्राचीमुदीचीमाहरतीतिवाक्यैकवाक्यतयायत्प्राचं
यदुदीचीमितिवाक्ययोरपिआहर्तव्यायांशाखायांप्रागुदगग्रताविधिपरत्वमेवननुपृथक्प्रागग्रत्वोदगग्रत्वविधिपरतायच्छ
ब्दोपबंधेनउद्देश्यसमर्पकतयाचविधिवाक्यवैकुंठनादितिचेन्नफलवत्त्वज्ञातेर्थेविधेस्तात्पर्येणयच्छब्दोपबंधेपियदाग्नेयोष्टा
कपालइत्यत्रयागस्येवविध्युपपत्तेःअतएवापस्तंबेनाप्युक्तंयाप्राच्युदीचीप्रागुदीचीवाभवतीषेत्वोर्जेत्वेतिनामाच्छिनत्ति

पिवेषेत्वेत्याच्छिनत्पूर्ज्जेत्वेतिसन्नमयत्सनुमार्ष्टिवेति॥अत्रेद्वैधं॥शाखायाआच्छेदनइतिसहस्माहबोधायनइषेत्वेतिश
खामाच्छिनत्याइर्जेत्वेत्यनुमार्ष्ट्यादन्वीक्षेतवेतिशालीकिरितिस्पष्टंतथाचकल्पसूत्रोक्तेनसहत्रयःकल्पाःतांशाखांवत्सापा
करणेविनियुंक्तेत्तयावत्सानपाकरोतिवायवस्थोपायवस्थेति॥नयाच्छिन्नयावाचंयमेनादत्तयाशाखयावत्साःसान्नाय्य
दुहांवत्सानपाकुर्यात्॥प्रतिवत्संमंत्रावृत्तिःननुतत्रसाम्येतिसएवस्युरितिअथचेत्तद्वैएवस्यातामितिअथचेदेकेवस्य
दितिसान्नाय्यधुग्विषयेएकद्वित्रिपक्षाणामपिदर्शनाद्येकविषयेकथंवत्सानितिबहुवचनमितिचेन्नसंभवापेक्षंब
हुवचनमित्यभ्युपगमात्।अतएववायवस्थोपायवस्थेतिमंत्रस्यद्वयोर्वत्सयोरेकस्मिंश्चबहुत्वस्यासत्वेनबहुवचनस्य
समवेतार्थतयाअन्याय्यनिगदत्वेनविकृतेनोहः॥अत्रद्वैधं॥वत्सापाकरणइतिसहस्माहबोधायनोवायस्थेतिपुंसोवा
कुर्यात्॥उपायवस्थेतिस्त्रियोयद्यन्यतरेस्युर्नैवमंत्रोत्सर्गस्यात्स्वं सृष्टेनैवेतिशालीकिरितिअयमर्थः॥वांतिवायुवद्ग
च्छंतीतिवायवोवत्साःपुमांसःउपपुंसांसमीपेआयंतिआगच्छंतिप्रसवेननिमित्तेनउपायश्चस्त्रियोवत्साइतिमंत्रलिंगात्। २७

सो

स्त्रीपुरुषोभयसद्भावे यथालिंगं विभज्य विनियोगः अन्यत्र नरसद्भावे नैव मंत्रोत्सर्गः स्यात्। कृत्स्नो मंत्रः प्रयोक्तव्यः अथवा पुंसां स्त्रियां च
यथालिंग मंत्र विनियोगः इति बोधायनः सर्वथा कृत्स्नमंत्रप्रयोग इति शालीकिरिति॥ अथैतेषां वत्सानां मातरो या गावस्तासां गो
संचारप्रदेशं प्रति प्रेरणं विधत्ते॥ अथैतेषां मातॄः प्रेरयति देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणा आप्यायध्वमघ्निया देवभागमू
र्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशंसो रुद्रस्य हेतिः परि वो वृणक्त्विति। अथ वत्सापाकरणानंतरं
अस्मिन्सूत्रे पूर्वस्मात्सूत्रात् एतेति पदमनुवर्तते तया पर्णशाखया एतेषामपाकृतानां वत्सानां मातॄः गाः प्रेरयति गोसंचारदेशं प्रतिप्र
स्थापयति देवो व इत्यादि मंत्रेण तथा च ब्राह्मणं यत्पर्णशाखया गाः प्रार्पयतीति आपस्तंबसूत्रं च शाखया गोचराय गाः प्रस्थापयती
ति। अथ ध्रुवा इति मंत्रं यजमानेक्षणे विनियुक्ते ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरिति यजमानमीक्षत इति॥ हे गावः गवां युष्माकं
पता वस्मिन्यजमाने बह्वः अनेकाः सर्वा अपि यूयं ध्रुवा स्यात् स्थिरा भवतेति मंत्रलिंगात् गवां शब्दे प्राधान्येपि अर्थतो यजमा
नस्यैव प्राधान्यात् अनेन मंत्रेण यजमानस्य ईक्षणं कार्यं ईक्षणं कार्यं चानुभवस्मृति साधारणं ज्ञानमत्र प्रवसत्यपि यजमाने ईक्षणस्य
कर्तव्यता याचाक्षुषमात्रस्य विधानानुपपत्तेः ननु प्रवसति यजमाने कथमिष्टिः कर्तुरभावे क्रियानुपपत्तेरिति चेन्न प्रवसत्यपि य

सु०टी० मानेनस्यानुज्ञाया ऋत्विग्भिरिष्टेः कर्तुंशक्यत्वात् अत एव द्वैधं प्रवसतीयजमाने मन्त्रभेदबोधकमाम्नायते प्रवसतोयाजमानमिति
सहस्माह बोधायनः सहयाजमानः खलुयजमानः प्रवसतिसयत्रस्यात् तद्देनं ध्यायेत् सयदिविसंस्थितआगच्छेत् कृतमनुमन्त्र्य क
२९ र्मीणेनप्रक्रामेदिति त्रोहस्माह शालीकिर्यद्यस्यपुत्रोवांतेवासीवालंकर्मीणस्यात्तंतत्रप्रेष्येत् सयदिविसंस्थितआगच्छेत् कृतात
देवप्रक्रामेत् नचाद्रियेत उभौत्वेवयजमानभागंप्राश्नीयातामितीति॥ प्रवसतोयजमानस्यद्वैधीयायमानविषयेद्वेद्मुच्यते यजमा
नस्वयंप्रवसन् याजमानेनसहप्रवसति अत्रयाजमानंनकुर्यात् सतुयजमानोयत्रस्यात्तत्रैवयागकालेविहाराभिमुखस्थित्वा एत
द्याजमानंध्यायन्वदेत्। यदि प्रागदिवसे द्व्यर्थमागच्छेत् अर्धसमाप्तयागआगच्छेत् यजमानस्तदा अतिक्रान्तविषयंयाजमानमनुम
न्त्र्य कर्मीणेनप्रक्रामेत् कृतांतादारभ्यकुर्यात्। इति बोधायन आह शालीकिस्तु अस्यप्रवसतोयजमानस्यपुत्रोवा अंतेवासीवाय
द्यलंकर्मीणस्यात् यजमानंकर्तुंयोग्योयदिस्यात्तदातं यजमानेप्रेष्येत् अनुज्ञापयेत् याजमानंकुर्वीति सचकुर्यात् नविदेश
स्वयं स्थोयजमानोकुर्यात् अंगप्रधानानामेकदेशकालत्वनियमात् यदितथैवार्धकृतआगच्छेत् तदाकृतंकृतमेवकृतांतादेवप्र २९
क्रामेत् पुत्रादिकंनाद्रियेत स्वयमेवांतात्कुर्यात् इति स्पर्शादिकर्मणांविदेशस्थस्यासंभवात् तदनुज्ञातेनान्येनकृतंनैनैव

कृतंयजमानभागंतुउभौयजमानस्तत्पुत्रादिश्च भक्षयतः उभाभ्यांयाजमानकरणान्इति। शाखामाच्छिद्यततोगावोयत्रगोष्ठेवसंति
तत्रसहशाखयागत्वावत्सापाकरणंगवांप्रेरणंचकृत्वाततःशाखांगृहमानयति अतएवगोप्रस्थापनविध्यनंतरं आपस्तंबेराम्नातं ध्रु
वाअस्मिन्गोपतौस्यात बह्वीरितियजमानस्यगृहानभिपर्यावर्त्ततेइति एवंचयजमानस्यगृहमानीतायाःशाखायागार्हपत्यागारेप्रवे
शस्यमार्गंप्रदर्शयन्नेवतस्याउद्गूहनंविदधाति अथैतांशाखामग्रेणाहवनीयंपर्याहृत्य पूर्वयाद्वाराप्रपाद्यजघनेनगार्हपत्यमग्निष्ठेन
स्युत्तरार्थेवाग्न्यगारस्योद्गूहतियजमानस्यपशून्पाहीतीति।।अथयजमानेक्षणानंतरंएतांययावत्सापाकरणंगवांप्रेरणंचकृतंएतां
शाखामग्रेणाहवनीयंपर्याहृत्यआहवनीयमग्रेणविहारदेशंपर्याहृत्य वेद्युत्करयोर्मध्येनपूर्वयाद्वारागार्हपत्यागारंप्रपाद्यजघनेनपश्चि
मेनगार्हपत्यंविद्यमानेअग्निष्ठेअग्नोअग्नीसमीपेतिष्ठतीत्यग्निष्ठंतस्मिन्ननसिशकटेअग्न्यगारस्योत्तरार्धेवाउद्गूहतिनिदधाति
यजमानस्यपशून्पाहीति।।अनसिउद्गूहनंमुख्यंवाशब्दाभावात् अग्न्यागारस्योत्तरार्धइत्यनुकल्पइति ध्येयं अत्राग्रेणाहवनीयंप
र्याहृत्य पूर्वयाद्वारेत्युक्तेगार्हपत्यस्यैवशालानेतरयोरित्यध्यवस्यनेअन्यथाग्रेणाहवनीयागारमितिब्रूयात्।।आधानकल्पसूत्रेपि।।

सु॰ र॰ अथास्येतत्पुरस्तादेव जुष्टे देवयजने गारं वा विमितं वा कारितं भवति तस्य द्वे द्वारौ कुर्वंति। प्राचीं च दक्षिणां च मध्ये गार्हपत्यस्यायतनं कुर्वं
२९ ति पुरस्ताद्द्रासुनिकामेषाहवनीयस्यापि वा चक्षुर्निमितं दक्षिणतो विषुवत्यन्वाहार्यपचनस्यापि वा यथोद्धो भागो प्राक् स्यात्तामेकः पश्चा
दिति।।अस्य यजमानस्य एतत्पुरस्तादेव आधानकालात् पुरस्तादेव देवा इज्यंते अग्ने ति अभियुक्तानां प्रीतिविषये जुष्टे देवयजने अ
ग्निहोत्रार्थं गृहादौ गार्हपत्यस्यागारं अंतर्गृहं विमितं मंडपो वा कारितं भवति अत्र देवयजनं सर्वाग्निसाधारणं महाग्रहं गार्हपत्यागारं त
तः गृहे अत एव नतु दक्षिणया द्वारेति द्वैधं।।दक्षिणतो वेदिदेशात् विषुवति मध्ये शिष्टं स्पष्टं।।अत्र गार्हपत्यस्यैवागारमुक्तं नेतरयोः
न चेदमेवाहवनीयान्वाहार्यपचनयोरप्यगारमस्तीति वाच्यं।।आधान एव संभारनिवपने अथातिशिष्टानां संभाराणामर्धानि
हाय दक्षिणया द्वारोपनिहृत्यान्वाहार्यपचनस्यायतने निवपतीत्यथेतरेनेच यथेतमेत्यातिशिष्टान् संभाराणामादाय पूर्वया द्वारो
पनिहृत्याहवनीयस्यायतनेनिवपतीति सूत्रेण गार्हपत्यागारात् बहिरेव एतयोरायतनमित्यवगतेः जुष्टे देवयजने वसतो स २९
त्यकृ धारणासंभवेन प्रमाणाभावाच्चागारांतरकल्पनावकाशः।।आपस्तंबास्त्वामनंति।।अन्यदाहवनीयागारमन्यत् गार्हप

त्यस्येति गार्हपत्यागारे आहवनीयागारे वा दक्षिणाग्नि रितिन ज्ञाप्यं। अत्रेदं ध्येयं।। शाखायै संचर इति अग्रेणाहवनीयं संचारयेदि
ति बौधायनो जघनेन गार्हपत्यं संचारयेदिति शालीकिरेष सर्वकल्पे शाखायै संचरः पयसां चान्यत्र प्रावर्ग्यिकादिति उभयोरे
वा परेण प्रावर्ग्यिकं संचारयेदित्यौपमन्यव इति।। अयमर्थः।। शाखायाः संचरः गार्हपत्यागारे प्रवेशनं तत्रेदमुच्यते अग्रेणो
त्तरेणाहवनीयं पूर्वया द्वारा प्रवेशयेदिति बोधायनः जघनेन गार्हपत्यं दक्षिणया द्वारा संचारयेदिति शालिकीः।। एष संचार
विकल्पोऽत्रैव न भवति किंतु सर्वकल्पे प्रकृतिविकृति विषये सर्वत्रापि शाखायाः पयसां च संचरः।। प्रावर्ग्यिकं पयो वर्जयि
त्वा न तत्र त्वपरेणेति वचनमस्ति अतस्तत्र जघनेन गार्हपत्यमिति नियमः।। औपमन्यवस्त्वाहस्येव प्रवर्ग्यादौ उभयोर्गार्हपत्य
योः शालामुखीय प्राग्वंशयोः अपरेण शाखायाः पयसोः संचारः शाखापयोभ्यामितरस्य मुख्ये शालामुखीयस्यापरेणेति आ
चार्ययोक्त शाखाया एव विकल्पः औपमन्यवस्य पयसा सह प्रावर्ग्यकस्य नियम इति। नुयदि संनयतीति। समुपसृष्टेन यति
सान्नाय्ययागवचनः उपसर्गेण धात्वर्थो बलादन्यः प्रतीयत इति न्यायात्। श्रुतिषु कल्पसूत्रेषु च नियमतस्तत्र प्रयोगाच्च त
प॰ २ ऋ॰ भे ०१४ × अथवा एष सर्वकल्प इत्यारभ्य औपमन्यवस्य मतं यत्रैको गार्हपत्यस्तत्रैकस्यापरेण संचारयेत् ।। यत्र द्वौ तत्र द्वयोर्गार्हपत्ययोरपरेणेति २

स्क·द· थाचयदिसान्नाय्ययागंकरोतितदानुएवंअथास्येत्सारभ्यएतावन्तउद्गूहनपर्यंतंकुर्यात्।यद्युवेनसंनयतिबर्हिःप्रतिपदेवभव
३० ति।उचेइतिवाक्यालंकारार्थौनिपातौयदिनसंनयतियजमानःतदाबर्हिःप्रतिपत्प्रथमंयस्यसःबर्हिःप्रतिपदेवप्रयोगोभवति
सान्नाय्याभावश्चसदर्शपौर्णमास्यामामावास्यायांचसोमयागात्प्रागितिउभयत्रापिप्रयोगोत्रत्तग्रहणानंतरंबर्हिःप्रतिपदेव
भवतिनतुसोमयागात्पूर्वमपिसान्नाय्ययागविकल्पःसंभवतिनासोमयाजीसंनयेत्संनयेद्वेत्यापस्तंबसूत्रादितिचेन्नयद
सोमयाजीसन्नयेदित्यादिनाब्राह्मणेनतस्यपक्षस्यदूषितत्वात्।अस्मिन्नेवाधायसूत्रेनासोमयज्ञीसन्नयेदनागतंवाएत
स्यपयोयोसोमयज्ञीयदसोमयाजीसन्नयेत्परिमोषएवसोनृत्तंकरोत्यथोपरैवसिच्यतेसोमयाज्येवसन्नयेत्।पयोवैसोम
पयःसान्नाय्यंपयसैवपयआत्मंधत्तेइतिब्राह्मणमित्याम्नातत्वेनासोमयाजिनःसान्नायानुपपत्तेःअतएवसामान्यसूत्रेआ
पस्तंबेरप्याम्नातंआग्नेयोष्टाकपालऐंद्राग्नएकादशकपालोद्वादशकपालोवाअमावास्यायामसोमयाजिनःसान्नायंद्वितीयंसो ३०
मयाजिनइतिएवंचसोमयागात्।पूर्वंनसान्नाय्ययागइतिसिद्धंननुनित्यवदाम्नातानांइष्टेत्वेत्यादीनांसाय्योन्नोर्थानांकाद्गम्नि

कृत्वाभ्युपगमे नित्यवदाम्नानविरोध इति चेन्न अपूर्वस्य यागसमवेतार्थप्रकाशप्रयुक्तानां मंत्राणां द्वाराभावेनार्थलोपान्निवृत्तेः प्रयाजानू
याजाभावे जोहू वौपहृताज्य निवृत्तिवत् इति सर्वं समंजसं ॥ बोधायनीयसूत्रस्य कृता वृत्तिः सुबोधिनी ॥ प्रथमः पटलो जातस्तुष्यंतु
विबुधाःसुरा ॥ प्रथमः पटलः ॥ अथ बर्हिराहरणं विधत्ते अथेत्यादिना अथ जघनेन गार्हपत्यं तिष्ठन्नसिदं वाश्वपरशुं वादत्ते देवस्यत्वास
वितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां माददे इतीति ॥ अथशब्दस्तु पूर्वप्रकृतापेक्षया आनंतर्यमर्थः पूर्वं च समन्वयतः प्रयो
गेशाखो ऊहनं प्रकृतं असमन्वयतस्तु अत्र यहणं तदनंतरं जघनेन गार्हपत्यं तिष्ठन्नसीदं बर्हिर्लवनार्थं लवित्रं वा अश्वस्य परशुं
पार्श्वास्थिं वा आदत्ते देवस्यत्वेति ॥ अत्र वाशब्दौ तुल्यविकल्पार्थौ मानवी हि पर्शुरिति स्वशाखाम्नानात् अनाम्नानाच्चासिद
स्य समानधर्मत्वान्नस्यादिति शंकानिवृत्त्यर्थमुपात्तौ ॥ अत्रेदं ध्येयं । इध्माबर्हिषोरुपकल्पनमिति सूत्रमाचार्ययोरपराह्णे पितृभ्यो
दत्तेध्माबर्हिः सनेत्येदि सांजीगविः श्वोभूते हविष्कृदंत इत्यौपमन्यव इति । इध्माबर्हिषोरुपकल्पने सूत्रे अथ जघनेन गार्हप
त्यमित्यारभ्य एकविंशति दारुमिध्मं संनह्यति यत्स्मो रूपं कृत्वा इत्येतत्पर्यंतं सूत्रं आचार्ययोः शालीकि बोधायनयोः ॥ अप

सु०द० राह्णे पितृभ्यो दत्वेध्माबर्हिः सह्यैन्ते दित्यां ज्ञीगविः अपराह्णे इत्य कौ नु पूर्वाह्णे पितृयज्ञस्यापकर्षस्यादित्यत उक्तमपराह्ण इति म्वो
३१ भूत्तेहविष्कृदन्त इत्सौपमन्यवः। अत्र शाखांतरं मूलं अपि च अग्न्यन्वाधानानंतरमिध्माबर्हिः संनहनमाम्नानमापस्तंबेरिति द्रष्ट
व्यं। आदायाभिमंत्रयत्ते यज्ञस्य घोषदसीति। जघनेन गार्हपत्यं तिष्ठन्नसीदं वेत्संतं अस्मिन्सूत्रे उपरितनसूत्रे चानुवर्तते तत्तो
नुमंत्रणं प्रतितपनं च जघनेन गार्हपत्यं तिष्ठन्नेवासीदस्य वाम्वपर्शोर्वा कुर्यात्।। अभिमंत्रणं मंत्रेणाभिमर्शनं मंत्रेण वीक्षण
वा अभिमर्शनपक्षे वामहस्ते असीदं निधाय दक्षिणेनाभिमर्शनं कार्यं अभिमंत्रयत इत्येतावत्तेव सिद्धे आदायेत्साहान समन
तरमेवाभिमंत्रणं कार्यं प्रकृतप्रयोगानुसार्यपि संभाषणं मध्ये न कार्यमित्येवमर्थं गार्हपत्ये प्रतितपति प्रत्युष्टं रक्षः प्रत्युष्टा
अरातय इतीति। जघनेन गार्हपत्यं तिष्ठन्नसीदं वाश्वपरशुं वा गार्हपत्ये प्रतितपति प्रत्युष्टमिति।। अत्रेद्वैधं।। असिदस्य प्र
तितपन इति सहस्माह बौधायनः। प्रतितपेदेवासिदमेव मश्वपरशुं रक्षोपहननयोः पत्रो हस्माह शालिकीः तेजसि तेजः प्र
तितपेदश्वपर्श्वाः स्वस्त्वेते मंत्रा दृष्टा भवंतीति सो श्वपर्शुं प्रतितपेन्मासिद कूराभिहननायेति। असिदं अश्वपरशुं च प्रतितपेदे ३१
मेव र

यत्तदनुगतरक्षोपहननायतथा च प्रत्युष्टं रक्ष इति मंत्रलिंगमिति बोधायनस्य मतं शालिकेरुक्तं देवस्य त्वा सवितुः प्रसव इत्यश्वप
र्शुमादत्त इत्यश्वपर्शुं बर्हिरच्छैती ति चाश्वपर्शुमधिकृत्य प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति मंत्रस्याम्नानात्। अश्वपर्शुमे
व प्रतितपेन्नासीदं तेजसि तेजसः प्रतितपनेन प्रयोजनाभावात्। प्रत्युक्त असिदगतक्रूरस्य तैक्ष्ण्यस्य उपघातो मा भूदि
त्याशयः क्रूरापहननाय क्रूरस्य तैक्ष्ण्यस्य अपहननं हननस्य उपघातस्य वर्जनं तस्मा इत्यर्थ इति।। अत्र केचित्प्रत्युष्टं रक्षः प्रत्यु
ष्टा अरातय इति त्रिरिति त्रिः शब्दयुक्तं सूत्रं पठंति तेषां मते सकृन्मन्त्रेण द्विस्तूष्णीं प्रतितपने अद्भिरेवापः प्रोक्षति प्रोक्षि
ताः स्थ प्रोक्षिताः स्थेति त्रिरित्यत्र मंत्रस्य वीप्सादर्शनेन वीप्सा विरहे सकृन्मंत्रेण तत्सत्त्वे क्रियावन्मंत्रोपि त्रिरावर्त्तत इत्यध्यव
सायात्। अथाहवनीयमभिप्रैति प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा त आवहंति कवयः पुरस्ताद्देवेभ्यो जुष्ट
मिती ति। अथ गार्हपत्ये प्रतितपनानंतरं आहवनीयमभिप्रैति प्रेयमगादिति। इह बर्हिरासद इति वेदिं प्रत्यवेक्षत इति।। यत्र वेदिं
करिष्यते।। तं देशं प्रत्यवेक्षते।। इह बर्हिरासद इति। अथ तां दिशमेति यत्र बर्हिर्वेत्स्यन्मन्यत इति। अथ वेदिदेशप्रत्यवेक्षणानं

सु॰द॰ त्तरं यत्र यस्यां दिशि बर्हिः प्रास्यन्मन्यते तां दिशमेत्य गच्छति ॥ आहवनीयसमीपत इति । अत्र द्वैधं । प्रक्रमेष्विति सहस्माह बोधाय
३२ न आहवनीयादेवाग्नेय्यां चतुरो वा प्राचः प्रक्रमान्प्रक्रम्याथ तां दिशमभिप्रव्रजेत् ॥ यत्र बर्हिर्वेत्स्यन्मन्यते त्वाहवनीयादेव य व्र२
थार्थं गच्छेन्न तु दक्षिणया द्वारेति शालीकिरिति प्रक्रमेषु बर्हिराहरणार्थेषु प्रथमेषु पदविक्षेपेषु इदमुच्यते आहवनीयादे
वाग्नेय्यां चतुरो वा प्रक्रमान् प्राचः प्राक् दिक् संबंधिनः प्रक्रम्य कृत्वा अनंतरं यत्र बर्हिर्वेत्स्यन्मन्येत तां दिशमभिप्रव्रजे
त् । अथो यदेतदुक्तं यतः कुतश्चाहरतीति तत्प्राच्या एव दिशो भवतीति तत्संपादनश्रवणात् ओदो मुख्य एवार्थः । संभवेक
र्तव्यस्ततो यथार्थं गच्छेदिति बोधायनः । शालीकिस्तु आहवनीयादेव यत्र बर्हिर्वर्तते तेन तत्र गच्छेत्सवत्तो क्रियमाणे प्राच्याए
व आहृतं चेत्तद्भवति तस्य कोऽनुरोधः परं तु दक्षिणया द्वारा न गच्छेदिति । अत्राहवनीयसमीपस्थस्य दक्षिणया द्वारागमन
प्रतिषेधात् सर्वाग्निसाधारणं गृहमस्तीति गम्यते सत एवाधानप्रकरणोक्तं जुष्टे देवयजन इत्युक्तं देवयजनं जुष्ट इति वि ३२
शेषणमहिम्ना सर्वाग्निसाधारणं महागृहं भवति तस्य दक्षिणया द्वारा न गच्छेदिति प्रकृत्ते निषेधः अन्यथाहवनीयसमी

आ

पश्चस्याध्वर्योर्बर्हिराहरणाय गच्छतो गार्हपत्यस्य दक्षिणया द्वारा न गच्छेदिति निषेधानुपपत्तेः शाखोद्वहनमन्त्रभाष्ये आहवनीया
गारस्य निषेधेन तस्य दक्षिणया द्वारेति विध्यनुपपत्तेरिति इदं बर्हिराहरणार्थं गमनं यद्येकैवेष्टिरेकस्मिन् दिने कार्या स्यात्तदा
यथाकल्पसूत्रमनुष्ठेयं। यदा तु एकस्मिन्नेवाहनि द्वयोर्बहूनां वा इष्टीनां सन्निपातस्तदा द्वैधे उक्तो विशेषः। अत्र द्वैधं।। इष्टिसन्नि
पात इति ह स्माह बोधायनो याः काश्चेष्टयः समानेहनि सन्निपतेयुस्तंत्रायतंत्राय बर्हिषो गच्छेल्लूनं वा साधयेत्तं त्रेचासां व्रतमुपेत्य
तं त्रापवर्गे व्रतं विसृजेतेत्यत्रो ह स्माह शालीकिर्याः काश्चेष्टयः समानेहनि सन्नियतेयुः सकृदेवासां सर्वासां बर्हिर्लवो गच्छेल्लूनं
वा साधयेदादितश्चासां व्रतमुपेत्य सर्वासां पारे व्रतं विसृजेदिति। अस्यार्थः। एकस्मिन्नहनि वचनेन निमि त वशेन वा अनेकेष्टिसं
न्निपाते सति यथा अश्वमेधे सावित्रादिषु आधानादिषु च तंत्रायतंत्राय बर्हिष आहरणार्थं गच्छेत्।। प्रतीष्टिभेदेनैव बर्हिराहरणं
कुर्यात्।। अथवा बर्हिर्देशविप्रकर्षादिना असमाप्तिशंकायां लूनं वा प्रत्येकं मंत्रेण साधयेत् एवं प्रतीष्ट्यादौ व्रतमुपेत्यापवर्गे व्रतं वि
सृजेत् अंगानां प्रधानदेशकालकर्तृत्वनियमात्।। भेदेन च चोदकप्राप्तं व्रतमफलाधारयोग्यतासंपादनेन पुरुषसंस्कारतया
स्य

सु०२ पुरुषार्थत्वेपि तत्र तत्र कर्मण्यनुष्ठितस्यैव पुरुषार्थत्वमिति बोधायनः शालीकिस्त्वाह सर्वासामिष्टीनामर्थे सकृदेव बर्हिर्लवनाय गच्छे
३२ त्गत्वा च लवनादिबंधनांतं प्रतीष्टिभेदेन कुर्यात् ततः सर्वाण्येकीकृत्य तूष्णीं बध्वानयेत् अथवा लूनमाहृतं एवं भेदेन मंत्रेण सा
धयेत् आदित आश्वासांत्ञ्रतमुपेत्य सर्वासामपवर्गे विसृजेत्। लाघवार्थं कर्म समाप्त्यर्थं च अथवा एवं वचनादेवेदमित्थं कर्तव्यं वच
नादेव पदार्थविपर्यासोपि सोढव्यः॥ अन्तोपायनविसर्गयोश्च फलिसंस्कारार्थं तयोः सकृदेवानुष्ठानं न्याय्यमिति॥ वाचंयम एव शा
खामाच्छेया द्वाचंयम आहरेदेवं बर्हिरिति बर्हिराहरणार्थं गमनागमनयोर्वाग्यमनं विहितं उक्तं स्मर्तव्यं दर्भस्तंबं परिगृह्णाति
यावंतमलं प्रस्तराय मन्यते देवानां परिभूतमसीति। बर्हिषो देशो गत्वा तत्र स्थेषु दर्भस्तंबेषु मध्ये यावंतं दर्भस्तंबं प्रस्तराय अलमि
ति मन्यते॥ अभिप्रेतितं दर्भस्तंबं असिदेन अश्वपर्श्वा वा पपरिगृह्णाति परितो लिखति देवानां परिभूतमसीति मंत्रेण देवाना
मर्थे परिभूतमसि परिगृहीतमसीति मंत्रलिंगं। परिग्रहश्च वन्येष्व स्वामिकेषु स्वत्वापादक स्वीकारः स च प्रकृते परिलेखनरू ३२
पः न मानसः द्वैधे त्रिः कर्मावर्तयेदिति परिग्रहस्य क्रियारूपत्वावसायात्। मानसस्य परिग्रहस्य म म प्रस्तरायायं दर्भस्तंबो भव

त्विति निश्चयरूपतया क्रियावृत्त्यानुपपत्तेरिति परिग्रहस्य सकृदनुष्ठानेनैवोपपत्तेः। इह मंत्रस्य कर्मणो वा त्रिरित्यवचनात् सकृदेव
मंत्रः कर्म च॥ अत्रेदं ध्येयं॥ परिषवण इति सहस्माह बोधायनस्त्रिरेव मंत्रं ब्रूयात् त्रिः कर्मावर्तयेदेवं प्लपावटस्य परिलेखन एवं सो
मक्रयण्ये पद एवमौदुंबर्या अवट एवमुपरवेष्विति सकृदेव मंत्रं ब्रूयात्। त्रिः कर्मेति शालीकिरिति॥ अयमर्थः। परिषवणं कुशादि
स्तंबस्य। ध्वपथ्र्वा असिदेन वा परिग्रहः। तत्र मंत्रः परिग्रहश्च त्रिरावर्तनीयः त्रिर्हि देवानामिति श्रुतेः तेषां परिभूतमिति
देव संबंधावगमात्। एवमेव परिलिखितं रक्षः परिलिखिता अरातय इति मंत्रेण प्लपावटस्य सोमक्रयणीपदे ब्रूयात्। ता
वतैवानुष्ठेयार्थप्रकाशनेनावृत्तिः प्रयोजनाभावात्। कर्म तु त्रिरावर्तनीयं उक्तन्यायादिति। अत्र एतावंतं स्तंबमितिपरिमा
णविशेषेवक्ष्ये यावंतमिति प्रस्तरपरिमाणविकल्पसूचनार्थं तथा च कर्मांतं। इयंतं गृह्णातीति प्रस्तरस्य वदति सन्नखमात्रो
विशाखो गृहीतव्य इत्येकेषां स्रुग्दंडमात्रो गृहीतव्य इत्येकेषां ऊर्वस्थिमात्रो गृहीतव्य इत्येकेषामंगुष्ठरूपसंमितो गृहीत
व्य इत्येकेषामपरिमितो गृहीतव्य इत्येकेषामिति। अयमर्थः। इयंतं गृह्णातीति प्रस्तरस्य परिमाणे पृथुत्वं वदति ब्राह्मणं तत्र इ
५४ औदुंबर्यवटस्य उपरवाणां च परिलेखने मंत्रपरिलेखनयोरेवमेव त्रिरावृत्तिः कार्या तुल्यन्यायात् बौधायनः शालीकिस्त्वाह सकृदेव मंत्रं ४५

ट्टीति

सु॰द॰ यच्छब्देनविविक्षितान्परिमाणविशेषान्मतभेदेनाहसंगतोनखेःअंगुष्ठंगुष्ठनखेर्यस्यसन्नखोमुष्टिःमात्राप्रमाणंयस्यस
३४ न्नखमात्रःविथातुकःछेदनप्रवेशःप्रस्तरस्यगृहीतव्यइत्येकेषांमतंस्कक्रूदंउमात्रइत्या दावपिविशालुकइत्येवविशेष्यंन
थाचसर्वाण्यपिपरिमाणानिमूलप्रदेशेवगंतव्यानिउरूर्वादिषुयत्रपृथ्वस्छिनन्मात्रःअपरिमितःउक्तसकलप्रमाणापेक्ष
याअधिकपरिमाणइति।।अथेनमूर्ध्वमुन्मार्ष्टिवर्षवृद्धमसीतिअथदर्भस्तंबपरिग्रहानंनरंएनंदर्भस्तंबंउर्ध्वेयत्रपर्वदेशो
छेस्यतितत्रऊर्ध्वदेशेमुन्मार्ष्टिऊर्ध्वमुखेनासिदादिनाकेशकीटादिदोषोदर्भस्तंबेयथानभवेत्तथाशोधयतिवर्षवृद्ध
मसीतिवर्षवृद्धेतयास्वतःशुध्यादेवनार्थतयापरिग्रहोयुक्तइतिभावःअसिदेनोपयच्छतिदेववर्हिर्मातान्वग्माति र्यक्पर्वते
राध्यासमीतीति।।अत्रएनमित्यनुवर्ततेएनंदर्भस्तंबंअसिदेनएगउपलक्षणंयेनलविष्यंस्यात्तेनासिदेनाश्वपर्श्वावामं
त्रलिंगस्यब्राह्मणस्यचउभयसाधारण्येनासिदस्यैवोपयमनेनियामकाभावात्।।अस्मच्छाखायामश्वपार्श्वाएवाम्नानात्तस्य ३४
एवोपयमनस्ययुक्तत्वाच्चतस्मादसिदादिनापर्वदेशेउपयच्छतिआच्छेदनाययोजयतीयत्पुरुषिदिनांतदेवानामितिश्रुतेः

पर्वते राध्यासमिति मंत्रलिंगाच्च देवबर्हिरिति मंत्रेण। आच्छिनत्त्याच्छेत्तारो मा रिषमिति मंत्रलिंगाच्च॥ एनमित्यत्राप्यनुव
र्तं एनं स्तंबं आच्छिनत्ति आसमंतात्सर्वं छिनत्ति। नन्वत्र आङ् ईषदर्थः नाभिव्याप्त्यर्थः उत्तरत्र सर्वशः एवैनं स्तंबं लुनोतीति वि
ति धानाद्दिं चेन्न तस्याच्छिनत्तीति वाक्यविहितमाच्छेदनं सर्वस्तंबलवनरूपं न त्वेकदेशलवनमित्येवं विदितत्वात् न चैवमाच्छिनत्ती परत्वात्
त्यनेनैव सर्वलवने सिद्धे सर्वश इति व्यर्थमिति वाच्यं एवकारोपबंधस्वारस्येन तत्स्यशाखांतरोक्तासर्वलवनपरासंपरत्वा निरासः
त्। उक्तं हि कस्यांचरेद्देयानां परिषूतमसीति दर्भान्परिषौतीति विष्णो स्तूपोसीत्यभिप्रेतानामेकं स्तंबमुत्सृजतीत्येकः पक्षः ए
कं वा स्तंबं परिषूयत्तं सर्वं दातीति द्वितीयः अत्ति सर्वशो गवां भाग इति वेकांड्वेति स्तो वा नाडी रुत्सृजतीति तृतीयः। तत्र द्वि
तीयः पक्ष एव युक्ततरः स्वशाखायां यावतस्तंवानुपरिदिशेत्। यत्तेषा मुच्छिष्यात् अति तद्यज्ञस्य रेचयेदिति असर्व
लवनपक्षं निंदित्वा एकं स्तंबं परिदिशेत् तं सर्वं दायात् यज्ञस्यानतिरेकायेति सर्वलवनपक्षस्यैव सार्थवादविधिदर्शनात्।
इत्यभिप्रायेण सर्वश एवैनं स्तंबं लुनोतीत्याचार्यैः सूत्रितं ननु सत्यं प्रथममेव पक्ष आचार्याभिमतस्तथापि सूत्रक्रमेण सकृदाच्छे

सु०द० दानंतरं ।आच्छेदनाभिमर्शनात्प्रत्यभिमर्शनानंतरंक्रियतइति चेन्न सर्वलवनस्य एकविधिविहितस्य एकपदार्थतयातन्म
३९ ध्ये पदार्थांतरानुष्ठानानुपपत्तेः सर्वशइतिसूत्रस्य तु आच्छेदनादि विधिंव्यवधानं प्रस्तरस्य आच्छेदनादि प्रत्यभिमर्शनांतवि
धिनां प्रयोगसौकर्यार्थमव्यवहितपाठाय अत एव कल्पांतरेपि प्रस्तरपरिषवणादि विषयः पृथगेवाम्नायंतइतिध्येयं।
आच्छेदनादि कृत्वा सर्वत्रापामुपस्पर्शनं कार्यं कर्मांते पंचत्तयेन कल्पमवेक्षेते तत्र न्याय्य पदेन धर्मशास्त्रस्य विवक्षितत्व
याधर्मे च अंगमुपस्पृश्य सिंचंवा अपउपस्पृशेदेवं छेदन भेदन खनन निरसन पित्र्य राक्षस नैर्ऋत रौद्राभिचरणीये
ष्विति अंगोपस्पर्शनादौ निमित्त उदकोपस्पर्शनस्य विधानात् ।कर्मांतेतावदित्थमभिहितं।पंचत्तयेन कल्पमवेक्षेतच्छं
ने दसा ब्राह्मणेन प्रत्ययेन न्यायेन संस्छावशौंति छंदसेतियद्वोचाम यथाम्नाय प्रणिधींद पूर्वमिदमुत्तरमित्यथापि मंत्रप्र
वस्वयंकर्मप्रभूते कर्मानुवादी भवतियथे तइध्म तिप्रेयमगा धिषणा बर्हिरच्छोर्वंतरिक्षमन्विहि देवस्यत्वा सवितुः ३९
प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीतियच्छंदसानसकुर्यात् स्यपितुं ब्राह्मणेनत्तद्विकल्पयि

षेत्र् ब्राह्मण मुहैवैतान्मंत्रान्त्र ज्ञात्वा न्विदधातीदमनेनकरोतीदमनेनेति यथापि भवत्ती षेत्त्वोर्जे त्वेति शाखामाच्छिन
त्ति गायवस्थोपाय वस्थेति वत्सानपाकरोतीति अथाप्य मंत्रकाणि कर्माणि विदधाति यथैतद्व्रत्य शासुप्रक्रमेषु ब्रा
ह्मणोग्निमादधीतेति कारदशासु राजन्यो द्वादशास्र वैश्य इति व्यवस्थावर्णसंयोगेन यथो एतत्प्रत्यये तिच्छंदोगैर्होत्राध्वर्यु व
प्रत्ययेनेति यथो एतन्न्यायेनेति प्राक्त्वेतं त्रेत्रारुतन्याय मनधिगच्छन् ग्रामं न्याय मन्नतीयाद्यमिहार्हत्तांसमारंभ इति य
थो एतत्संस्थावशेनेति सोमेपहृते आदाराश्च फाल्गुनानि चाभिषुणुयादिति ।। अयमर्थः ।। पंचत्तयेन कल्पमवेक्षेत ते
छंदसा ब्राह्मणेन प्रत्ययेन न्यायेन संस्थावशेनेति ।। पंच अवयवाः अस्य पंचत्तयः छंद आदि पंचक समुदायः तेन कल्पं क
ल्प्यते नुष्ठीयत्तइति कल्पः प्रयोगः अथवा कल्पः कल्प्यते नेनेति व्युत्पत्त्या कल्पसूत्रं अवेक्षेत परिक्षेत कर्तव्यत्वेनाभि
प्रेते प्रयोगे छंदआदीनि उपपद्यंते विरुध्यंते वेति सम्यक्परीक्षेत परीक्ष्य च यादृशो प्रयोगे छंदआदीत्युपपद्यंते न विरो
धं प्राप्नुवंति तादृशं प्रयोगं कुर्यादित्यर्थः ।। कल्पशब्दस्य ग्रंथपरत्वेपि तदर्थपरीक्षणमेव तस्य परीक्षणमवगंतव्यं पंच

सु०द० तयेनेत्युक्तं किंनदित्यत आह छंदसा मंत्रलिंगेन ब्राह्मणेन विध्यर्थवादात्मकेन प्रत्ययेन प्रतीयेन प्रमीयते तेनेनेति प्रत्ययः
३६ प्रमाणं अवश्यं यत्प्रमाणेन वाक्यतया कर्म कर्तव्यं तेन न्यायेन नितरां ईयते प्राप्यते शास्त्रार्थो नेनेति व्युत्पत्त्या भावः अर्हतां
मन्वादीनां समारंभो धर्मशास्त्रं तेन संस्काररशेन सम्यक् तिष्ठन्ति फलमस्यामिति व्युत्पत्त्या संस्थाकर्मणः सिद्धिः तद्दृशे प्रक्रां
तं हि कर्मावश्यं समापनीयं असमाप्योत्सर्गे यो यक्ष्यइत्युक्त्वा न यजेत इत्यादिना दोषश्रवणात् अतो देशकालाद्यनुरोधे
नानुकल्पस्वीकारेणापि प्रयोगं परीक्ष्य निश्चिनुयादिति छंद आदिना कल्पपरीक्षणस्य संम्यग्विज्ञानाय उदाहृत्य दर्शय
ति छंदसेत्यादिना छंदसेति यदवोचाम यथाम्नायप्रणिधीदं पूर्वमिदमुत्तरमिति । छंदसेति यदवोचाम तदुदाहृत्य प्र
र्शयतीत्यर्थः ॥ आम्नायस्य आम्नायते विधीयत इत्याम्नायः पदार्थः । तस्य प्रणिधिः प्रणिधानं क्रमः तमनतिक्रम्य य
थाम्नायप्रणिधिः येन क्रमेण पदार्थाः स्थितास्तद्विरुद्धक्रमपठितानपि मंत्रानैं आगार्हपत्य उपतिष्ठत मित्ति वहुल ३६
दन्यत्रश्रुत्यादिभिरविनियुक्तान् मंत्रलिंगानुरोधेनैव तत्तेषु पदार्थेषु इदं पूर्वमिदमुत्तरमिति पदार्थेदं पूर्वक्रमेणैव

विनियोजयेत्। यथाक्रमेणब्राह्मणविहितेषु नयनोपासनवर्णहोमहविरादिषु त्वं तुरीयावशिनीत्यादिना आम्नातेषु पदा
र्थक्रमेणैव ब्राह्मणोक्तेन तेन मंत्रा विनियुक्तास्तइत्यूह्यशानुरोधित्वात् कल्पनाया इति शब्देन प्रकारवाचिना एवमादयप्रकारा
मंत्रेष्ववगंतव्या इत्युक्तं ते च प्रकाराः क्वचित् गौणसामर्थ्यमादाय वचनेन विनियोगः क्वचिद्दृष्टार्थो विनियोग इत्याद
देवं यइति ॥ ननु भवैल्लिंगेन विनियोगमंत्राणां विनियुक्तानां च करणत्वयदि लिंगं भवेत् नहेवकथमित्यत आह अथापि
मंत्र एव स्वयं कर्म प्रब्रूते कर्मानुवादी भवन्तीति। अथापि श्रुत्यादिना क्वचिद्विनियोगे अविनियोगेपि मंत्र स्वयमेव कर्मप्र
ब्रूते ॥ प्रकर्षेण ब्रवीतिननु नखलु विधत्त इत्यत आह कर्मानुवादी भवति विधिभागेन विहितं कर्मानुवदति तेन कर्मा
नुवादेनानुष्ठेयार्थप्रकाशनद्वारेण मंत्राणां श्रुत्याद्यवगतकरणत्वोपपत्तेः श्रुत्यादिना क्वचिदपि अविनियुक्तानामपि प्र
कारणावगतकर्मांगभावानां मंत्राणामकिंचित्कुर्वतस्तादर्थ्यायोगेन मंत्रजन्योपकाराकांक्षायां मंत्रगतसामर्थ्यपर्यालोच
नयासंभवेतार्थप्रकाशनद्वारेणातदनुष्ठानमेवोपकार इति कल्पनं संभवतीति न किंचिदनुपपन्नं। कर्मानुवादसमर्थान्

उ.द०
२७

लिंगवत्तो मंत्रानुदाहृत्य दर्शयति। यथेनड्वत्ति त्रेयमगाद्धिषणा र्हिं वेरङ्गो र्वंतरिक्षमन्विहि देवस्य त्वा सवितुः प्रसवेश्वि
नोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति॥ एतत्कर्मानुवादित्वं यथास्पष्टं भवति॥ तथो ह्याद्रियेन त्रेयमगादिति व
र्हिराभिमुख्येन गमनं ब्रूते न चायं मंत्र आहवनीयं प्रति गमने करणं आहवनीयमभिप्रेति त्रेयमगादिति कल्पसूत्रादिति
वाच्यं बर्हिराहरणार्थमेवानेन मंत्रेणाहवनीयं प्राप्य ततोन्यत्र गच्छेदित्यभिप्रायात् उर्वंतरिक्षमन्वीहीति उर्वंतरिक्षमन्वी
हीति गमनं देवस्य त्वेति निर्वापः इतिशब्दः प्रकारवचनः। एवं अन्यत्रापि मंत्रसामर्थ्यानुसारेण कर्मानुवादित्वमवगंतव्य
मिति। मंत्राणां लिंगेन विनियोगप्रकारमुक्त्वा वाचनिकविनियोगमाह। यच्छंदसा न शक्नुयात्कल्पयितुं ब्राह्मणेन तद्विक
ल्पयिषेत्। ब्राह्मणमुहैवैतान्मंत्रान् प्रज्ञातानाविरस्थ्याति इदमनेकरोतीदमनेनेति यथाभव तीषेत्वोर्जेत्वेति शाखाम्
छिनत्ति वायवस्थोपायवस्थेति मंत्रेण वत्सानपाकरोतीति। यत्रयत्र मंत्रेषु छंदसा मंत्रलिंगेन न शक्नुयात् विनियो २७
गं कल्पयितुं अनुष्ठेयार्थप्रकाशने सामर्थ्याभावात्। वाचनिकोपि मंत्रविनियोन दृश्यते केवलं पदार्थविषय एवश्रू

यत्ते तत्तत्र ब्राह्मणेन पदार्थविधार्थेन मन्त्राणां विनियोगं कल्पयिषेत् कल्पयिषेत् कल्पयितुमिच्छेत् फलकरणेतिकर्तव्य
ता विशिष्टा भावना विधिपरस्य पदार्थविधेरेव प्रकरणपठितलिंगरहितमंत्रसद्भावे वाचनिकविनियोगाभावे च मंत्रग
ता साधारणरूपं प्रातिस्विकविधावयितात्पर्यं कल्पयित्वा मंत्रान्विनियुंजीत तत्र यथा चतुर्जुह्वां गृह्णात्यष्टौ उपभृति चतु
र्ध्रुवायामिति आज्यग्रहणानि विहितानि तत्र याज्यमाने आज्यावेक्षणमंत्राम्नानानंतरं आज्यग्रहणक्रमे पंचानां मंत्राणां दौ
श्रौ यं त्रायधर्मा यगृह्णामीत्यादयो मंत्राः समाम्नातास्तेषां मध्ये आज्यग्रहणा चांतरप्रकरणे ध्रौवाज्यग्रहणक्रमे भूरस्माकंह
विर्देवानामाशिषो यजमानस्य देवानां त्वा देवताभ्यो गृह्णामीति मंत्राः समाम्नाताः तत्राद्यानां त्रयाणां आज्यग्रहणे विनियो
जकं लिंगं वचनं वा न दृश्यते तत्र चतुर्ध्रुवायामिति ब्राह्मणमेव ग्रहणरूपमाज्यसंस्कारं सेतिकर्तव्यताकं विदधत् प्राति
स्विकेन रूपेण मंत्रानुग्रहणां गतया विधत्त इति कल्पयित्वा मंत्रा विनियोज्या इत्यर्थः तदिदमाह ब्राह्मणमुहेयेनात्मंत्रान्
प्रज्ञातान् विदधातीति पदार्थविधायकं ब्राह्मणमेव खलु अप्रज्ञातलिंगान्मंत्रान् असाधारणरूपेणापि विदधातीदं क

सु॰र॰ च ३९

र्मनिनमंत्रेणेति वीप्सया आदिमेषु ध्रौवाज्यग्रहणेषु यथाक्रमं मंत्राणां विनियोगविधिरुक्तो भवतिशब्दः प्रकारवचनः एव
मन्यत्रापि यत्रानुष्ठेयार्थप्रकाशनरूपं लिंगं न दृश्यते न वा वैनमस्ति विनियोजकं तान पिरोहितेन त्वेत्यादीन् प्रस्तरप्रहर
णादिविषय एव विदध्यातीति सापिविनियोगप्रकारो वर्गं नव्यः इषेत्वोर्जेत्वा कचिदन्येनापियेन प्रकारेण मंत्राणां वि
नियोगो भवति यथा इषेत्वोर्जेत्वेति शाखामाछिनत्ति वायवस्थोपायवस्थेति वत्सानपाकरोतीति सापि विनियोगप्रकारो वर्गं
तव्यः इषेत्वोर्जेत्वा वायवस्थोपायवस्थेति मंत्रयोर्दर्शपूर्णमासागत्वं प्रकरणाद्वगम्यते तच्च समवेतार्थप्रकाशनेन निर्वह
तिन चानयोः शाखाछेदनवत्सापाकरणप्रकाशने असाधारणं लिंगमस्ति न च शाखाछेदनादिक्रमे पाठः अनयोः प्रथमत्त
पाठात् अन्वाधानव्रतोपायनयोः प्राथमिकत्वया शाखाछेदनवत्सापाकरणयोरेतादृशत्वात्तस्मात्तु भूरस्माकमित्यादि
मंत्रापेक्षया विलक्षणा एतादृशा मंत्राः तेषां वाचनिक एव विनियोगो वर्गं तव्य इति भाव इति शब्दछंदसेतियदेनो वामेल ३९
दाहरणसमाप्यर्थः प्रकारार्थश्च एवमादयो मंत्रस्योपयोगप्रकारा इति अत एव कउ खलु यज्ञस्यारंभ इत्यादौ यज्ञं वा तार

रभ्यइत्यादेर्मंत्रस्य वातोयज्ञस्यारंभइत्यादो प्रमाणत्वमुच्यतेसूत्रकृतेतिद्रष्टव्यं । ननुच्छंदसामप्रयोगपरीक्षणस्यावगमाय उदाहर
णप्रदर्शनावसरेच्छंदसानशंकयाकल्पयितुंब्राह्मणेनतदितिब्राह्मणस्यानुषंगितयाकश्चिदुपयोगप्रकारउक्तः किमिपाने
तब्राह्मणस्योपयोगोनान्यत्रेत्यतआह । अथाप्यमंत्रकाणिकर्माणिविदधातियथेतद्भवत्स्यास्कप्रक्रमेषुब्राह्मणोग्निमादधी
तिकादशसुराजन्योद्वादशसुवैश्य इतिव्यवस्थावर्णसंयोगात् पूर्वपर्यायेछंदसेतियदवोचामेतिवदत् । उत्तरेषुयथोक्तप्र
स्य येनेत्यादिवचनात्रपर्यायेप्रतिज्ञानकृत्ताप्रथमपर्यायएवानुषंगितयाब्राह्मणोपयोगप्रकारस्यप्रक्रांतत्वादिति । अयमर्थः ॥
अथापिअन्योब्राह्मणस्योपयोगप्रकाराविद्यन्तेअमंत्रकाण्यपिकिलकर्माणिविदधातिब्राह्मणयथैतद्भवतित्तयथास्य
ष्टंभवतितथोदाहृत्यदर्शयिष्यते । अष्टासुप्रक्रमेषुब्राह्मणोग्निमादधीत्तेत्यत्रदृष्टासुप्रक्रमेष्वितिब्राह्मणकर्तृकेआ
धानेप्रक्रमाष्टकदेशपरिमाणसंपादनमंत्रविधीयतेएवमुत्तरयोरपिविधानयोर्येजंतवेषुमानसंपादनेषुमंत्राः संति ।
नन्वत्रनप्रक्रमेयत्ताविधीयतेअपितर्हिआधानान्येवप्रमाणाद्द्विजातिप्रक्रमेयत्ताविशेषविशिष्टानिभिन्नानिविधीयतेते

सु०द०

षु चायतनेषु मंत्राणां सत्वात्सामान्य मंत्रककर्मविधेरु(द्रा)हरणानीत्यत्त आहव्यवस्थावर्णसंयोगात्वसंते ब्राह्मणोग्निमाद
२९ धीत ग्रीष्मे राजन्यः शरदि वैश्य इति वाक्य एवाधानविधिः। अनुपादेयगुणकाल समभिव्याहारे धात्वर्थस्य प्रसूता ण
विधि संभवेन च तथात्वस्य उचितत्वात् प्रकृते तु अश्वप्रक्रम्यादि संपादनस्य प्रकृतिसाध्यत्वेनोपादेयगुणसमभिव्या
हारेणाधात्वर्थस्य चप्राप्तत्वेन विधेर्गुणसंक्रांतशक्तिकत्तया प्रक्रमे यत्नविशेषसंपादनमेव वर्णविशेषसंयोगेन विधी
यते अत एव श्रुत्वे तेषां भूमे परिमाणविहारान् व्याख्यास्याम इत्यधिकृत्यस्य इदमाम्नातं तथास्मादत्रा मंत्रकाण्ये
व कर्माणि विधीयंते एतत्स्य उदाहरणमात्रत्तया अन्यान्यपि अश्वमेधादौ चित्तेष्वाविधि वेत्तसे कटे श्च्यंचिनोतीत्यादी
ष्य मंत्रकर्मविधानान्यवगंतव्यानि अत्र अमंत्रक विधिप्रदर्शनं दिक्प्रदर्शनार्थं तथा च विधिभागेन यो योर्थो यो विहि
तः अर्थवादभागेन वा यस्यार्थस्य स्तुतिर्यस्य वा निंदा भवति तत्सर्वं पर्यालोच्य सर्वाविरोधेन प्रयोगो निश्चेतव्यः अत ए
व अथ वै ब्राह्मणं भवति दर्भा तनक्ति सं दत्वा येत्यादौ तत्र तत्र ब्राह्मणमुदाहृत्य न तदनुरोधेनैव सूत्रकारः स्वयं प्रयोगं कल्प ३९

त्ति अत एव चसूत्रानुक्ता अपि ब्राह्मणोक्ता उपवेषचर्यादयः संग्राह्या एव छंदसा ब्राह्मणेनेति वचनादित्युक्तं भाष्यकारैरि
त्यवगंतव्यं । प्रत्ययेनेत्युक्तमुदाहृत्य दर्शयति । यथो एतत्प्रत्ययेनेति छंदोगबह्वृचा अध्वर्युप्रत्ययेनेति प्रत्ययेनावेक्षे
तेति यदुक्तं तदेतत् यथो इत्यवधारणे यथैव स्पष्टं भवति तथैवोच्यते छंदोगाश्च बह्वृचाश्च अध्वर्यूणां प्रत्ययेन यत्पुन
रेतत् स्वाम्नायस्वसूत्रोक्तं न प्रतिपाद्यते प्रतीयते प्रमीयते तेनेनेति प्रत्ययः अध्वर्य्वादीनामाम्नायसूत्रं च तेन परीक्षे
रन् इदमुपलक्षणं छंदोगो अध्वर्यवश्च बह्वृच प्रत्ययेनावेक्षेरन् अध्वर्यवो बह्वृचाश्च छंदोगप्रत्ययेनपरीक्षेरन् न्या
यसाम्यात् अध्वर्युप्रत्ययेन तावत् छंदोगाइयंति प्रस्तोतारं सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति सूत्रेण प्रस्तोत्तः सामगा
येत्याम्नायेन च एकवाक्यता संपादनं परीक्षणं कुर्युश्छंदोगाः किलैष्टिकसामानि प्रवर्ग्यसामानि च कर्त्तव्यानि
त्येकेन वा कुर्यादिति विकल्पिकानि सूत्रे समामनंति अध्वर्यवश्च वैत्तिरीयकाः प्रस्तोत्तः सामगायेति प्रवर्ग्यसाम्नां सं
श्लेषं नित्यवदामनंति तदेकमत्येन तैत्तिरीयकाणां प्रवर्ग्ये चंति सोमे प्रवर्ग्यसाम्नां तत्संनियोगशिष्टानामिष्टिसाम्नां च

सु०द० नित्यतयानुष्ठानंयुक्तमित्येवमादिपरीक्षणंकुर्युः एवंहोत्रप्रत्ययेननापिपरीक्षणंकार्यं महाव्रतस्तोत्रेहिऐतरेयकेआर
४० ण्यकेराजनिसाम्निस्तोभानांसहस्रसंपत्तिर्निश्चयवदाम्नाता छंदोगाराजनेपंचस्तोभानांमनंतितेषांच चार चतुष्टय
मभ्यासोविहितः तस्यानुपदंस्तोमाइति एतस्मिन्पक्षे राजनि अभ्यासचतुष्टयेन विंशतिस्तोमाइतिपंचविंशस्तोमेप
चशतंस्तोभाः संपद्यंते यदिचव्यवस्तोभेत् पदेदेचलमिति एकेइतिपक्षेण प्रतिपादं प्रतिदेवतेचाभ्यासोराजनेत
दास्तोभानांमष्टवारमावृत्तौ चत्वारिंशत्स्तोमाइति पंचविंशस्तोमेसहस्रंस्तोभाः संपद्यंतइत्ययमेवपक्षस्वीकार्यइत्यादि
बह्वृचाश्चब्रुवंति होतारमित्यादिषु हविषामनुपूर्व्यादिषु उच्चैस्त्वादिषु चाध्वर्युप्रत्ययेन शास्त्रविषये स्तोत्रीयादिषु विरुद्धे
षु छंदोगप्रत्ययेन न्यायादिनाऐक्यं संपाद्य प्रयोगंनिश्चिनुयुः अध्वर्यवः छंदोगप्रत्ययेन रथंतरादि [illegible]शेन गृहाग्रतांहोत्र
वशेन परियक्ष्यसि सोम्यमित्यादिकं निश्चिनुयुरिति इति शब्द उदाहरणसमाप्त्यर्थः ।। न्यायेनेत्यस्य मुदाहृतस्य दर्शयं ४०
ति ।। यथो एतन्यायेनेति प्राकृतेतंत्रेप्राकृतमन्यायमनधिगच्छन् ग्रामंन्यायं प्रतीयाह यमिहार्हतां समारंभ इति । यदेतत्सा

येनावेक्षेतेत्युक्तं न यथैव स्पष्टं भवति तथैवोच्यते प्राकृते प्रकृष्टेन प्रत्यक्षब्राह्मणेन कृतं विहितं श्रौतं तत्संबंधि निप्राकृ
तं तंत्रेतं त्र्यनेक्षियतेनैमित्तिकमुदकोपस्पर्शनादिकमनेनेति तत्र निमित्तं छेदनभोजनादिकं तस्मिन्तंत्रे वाचनिके सति
प्राकृतं प्रत्यक्षश्रुतिमूलकन्यायं नितरां सांगत्ता मीयते प्राप्यते प्रक्रांतं कर्मेति न्यायः उदकोपस्पर्शनादेरनुष्ठापकं कल्प
सूत्रं तदनधिगच्छन् अध्वर्य्वादिर्ग्रामन्यायं नैमित्तिकस्योदकोपस्पर्शनादेरनुष्ठापकं प्रतीयात् अवगच्छेत् ननु कोयं
ग्रामन्याय इत्यत आह । अयं ग्रामं न्यायः यइह) स्मिन्नुदकोपस्पर्शनाद्यनुष्ठान विषये अर्हत्तां वेदविदां मल्लादीनां सम
रंभः सम्यगारभ्यते नुष्ठीयते शास्त्रार्थो नेनेति समारंभो धर्मशास्त्रं तथा च यत्र छेदनादौ निमित्ते सति उदकोपस्प
र्शनादेः कल्पसूत्रमधिगम्यते तत्र तैनैव प्रमाणेनाउपस्पर्शनादि कुर्यात् तदनधिगच्छन् धर्मशास्त्रोदितं नैमित्तिकं
कुर्यात् ।। तस्य च स्मार्तस्य कर्मांगत्वं तेन श्रौतपदार्थानामव्यवधानं च न्याय्यं क्वचित्संमतमित्यवगंतव्यमिति उदाहरण
समांते संस्थावशेनेत्युक्तमुदाहृत्य दर्शयति ।। यथो एतत्संस्थावशेनेति सोमे पहृत्य आदारा फाल्गुनानि चाभिषु

श्य

सु०द० णुयादिति। यदेतत्संस्थावर्त्तोनेत्युक्तं तद्यथैवस्पष्टं भवति तथैवोदाह्रियते ज्योतिष्टोमादौ ज्योतिष्टोमेन यक्ष्य इत्यादि प्रकारेण
४१ संकल्प्य उपक्रान्तस्य क्रतोः क्रीतसोमापहरणे यस्य क्रीतमपहरेयुः दारांश्च फाल्गुनानि चाभिषुणुयादिति ब्राह्मणेन आ
दारफाल्गुनाभिषवादिकं प्रायश्चित्तमाम्नातं तत्र आदारफाल्गुनाभिषवः संस्थावर्त्तोन देवताभ्यो वा एष आवृश्च्यते यो यस्य
इत्युक्त्वा न यजत इति श्रुत्या संकल्पितस्य यागस्यावश्यं समापनीयत्वावगमात् सोमाभावे यथाकथंचिदादारफाल्गुना
भिषवेण वा समापनीयः क्रतुरित्यभिप्रायेण न तु लब्धेपि सोमे तत्परित्यागेन आदारफाल्गुनाभिषवः कार्य इत्यभि
प्रायेण अत एव छन्दोगब्राह्मणं यदि सोममक्रीतमपहरेयुरन्यः क्रेतव्यो परिक्रीतं यान्यो भ्यासस्यात्स आहृत्य इति भव
ति एवं चानेनैव न्यायेन यथा प्रारब्धं समाप्यते॥ तथा च सर्वत्र कर्तव्यं प्रयोगमध्ये सिद्धस्य द्रव्यस्य नाशे वैकल्पिकद्रव्येण
तदसंभवे प्रत्यासन्न प्रतिनिध्युपादानेनेति इत्याछेदनादाउदकोप स्पर्शनादिकमुक्तं अयमत्र विशेषः यत्र श्रौतमुप ४१
स्पर्शनादि न कृतं तत्र श्रौतं प्रायश्चित्तं यत्र तु स्मृत्युक्तं न कृतं तदा तत्र स्मार्तं प्रायश्चित्तं कर्तव्यमिति॥ आच्छेदनान्यभि

मृशतिदेवबर्हिः शतवल्शं विरोहेति। तं स्तंबं कृत्स्नश आछिद्यतत्र यानि आछेदनानि लूनावशिष्टानि प्रस्तरस्य मूलानि देवबर्हि
रित्यभिमृशति॥ अत्र द्वैधं॥ आछेदने षितिसूत्रं बोधायनस्य प्रत्यगाशीः खल्वेष मंत्रो दृष्टो भवति मंत्रप्रत्यभिमर्शनमेवे
त्यापस्तंबादिति शालीकिरिति॥ आछेदने षु आछेदनान्यभिमृशतीत्यत्र इदमुच्यते आछेदनान्यभिमृशतीति सूत्रं हे देवब
र्हिर्लूनाविशिष्ट मूलभागत्वं शतवल्शं शतशाखं यथा भवसि यथा विरोहेति तंत्रलिंगादिदमभिमर्शनं छिन्नमूलाना
माशास्यमिति अवश्यमभिमर्शनं कार्यमिति बोधायनस्यमतं शालीके एष मंत्रः॥ सकृदेव बर्हिरित्यादि प्रत्यगाशीर्दृष्टः
खलु भवति ब्राह्मणे देवबर्हिः शतवल्शं विरोहेत्याह प्रजा वै बर्हिः प्रजानां प्रजननायेति अतो मंत्र प्रत्यभिमर्शनमेवमं
त्रेण प्रत्यगाशासनमेवेत्यात् मंत्रजप एव कार्यो नाभिमर्शनमपीति॥ सहस्रवल्शा वि वयं रुहेमेत्यात्मानं प्रत्यभिमृशत
इति स्पष्टं॥ सर्वशः एवैनं स्तंबं लुनोतीति॥ एनं दर्भस्तंबं सर्वश एव एकामपि दर्भनाडीमनुत्सृजन्नेव लुनाति॥ कृत्वा प्रस्त
रं निदधाति पृथिव्याः संपृचः पाहीति॥ प्रस्तरं कृत्वा वध्वा करोतेरनेकार्थत्वात् इदं बंधनमसंदेहार्थं अवध्या स्थापने हि लवि

क्षमाणबर्हिरपेक्षयाएतस्य विशेषादर्शनेन अयं प्रस्तर इति निर्णयानुपपत्तेः निदधाति भूमौ अन्यत्तृणादिकं निधाय तदुपरि प्रस्त
सु०द ४२ रं निदधाति भूमौ निधाने हि भूमिगतकर्दमादिसंपर्केण प्रस्तरस्य दोषो भवेत्॥ तादृशात्पृथिव्याः संपृचः पाहीत्यनयोर्निदधाती
ति अत्रेद्धं प्रस्तरस्य सन्नहनमिति सहस्माह बोधायनो ह्यर्थाश्चैनं सन्नह्येदन्यत्रैवेतस्मादयुग्मानि युग्मानि निधनानि कुर्यादि
त्यत्रो ह स्माशालीकिः प्रस्तरस्य खलु मंत्रप्रतिलाभात् सर्वे बर्हिर्मंत्रं लभते तेनैवैनमभ्यर्धात्। सन्नह्येत्तरेद्वेवायुग्मतमं स्यादि
ति॥ प्रस्तरस्य सन्नहनेकृता प्रस्तरमितरस्मात्के प्रस्तरस्य बंधने इदमुच्यते कर्तव्यत्वेनाभिमुखो योऽभ्यर्थस्तस्मादभ्यर्थात् अर्थभा
गात्॥ दक्षिमतदुर्ध्वमयुजोमुष्टीन् लुनोतीति विहितान्बर्हिर्मुष्टिसमुदायात् ननु बर्हिर्मुष्टीनां बहुत्वेन प्रस्तरस्य च सन्न
रवमात्रादिपरिमाणस्य स्वल्पतया समत्वाभावात् कथमर्धभागत्वव्यपदेश इति चेत्॥ विषमप्यंशो पुल्लिंगात् अर्धशब्दप्रयोगात्
नपुंसकस्यैवार्धशब्दस्य समांशवाचित्वात् इति बर्हिर्मुष्टिसमुदायात् पृथगेनं प्रस्तरं सन्नह्येत् बध्नीयात् अपि च एतस्मा ४२
त्प्रस्तरादन्यत्र बर्हिर्मुष्टिष्वेव अयुग्मा युग्मानि निधनानि अयुंगायुंगान्मुष्टीन् निनिश्रुतिविहितानि निधनानि कुर्यादिति बोधा

यनः अत्रमते प्रस्तरं समाप्याऽयुंगा युंगानीति श्रवणात् । तूष्णीमेव लवनं गम्यते शालीकि स्वाहदेवस्य त्वा सवितुः प्रसवइत्यश्व
मर्भुमारत्ने प्रस्तरस्यादिति मंत्रविनियोजक ब्राह्मणे प्रस्तरस्यैवैनेमंत्राइति विशेषावचनात् प्रस्तरस्य मंत्रप्रतिलाभात् मंत्राः
प्रतिलभ्यतेनेनेति मंत्रप्रतिलाभो मंत्रविधायकं ब्राह्मणं तस्मादेव खलु सर्वमपि बर्हिर्मंत्रं लभते तस्माद्बर्हिर्मुष्टीनामपि मंत्रा
भक्त्याः एवं च सर्वबर्हिषां मंत्रसंस्काराविशेषात् असंदेहार्थं बर्हिर्मुष्टिभ्यः पृथक् बंधनमपि न कार्यं अयुंगा युंगानीति
ब्राह्मणं प्रस्तरेण सहितानामेव बर्हिषामयुग्मत्वमाह अत एव प्रस्तर एवायुग्मत्वमः युग्मा बर्हिर्मुष्टयस्तेषामनेन सहायु
ग्मता अत्र सूत्रे एतद् युग्मत्वमशब्दयोः क्लीबत्वं छांदसमिति तूष्णीमत ऊर्ध्वमयुजो मुष्टीन् लुनोतीति ।। अतः प्रस्तरनि
धानादूर्ध्वं तूष्णीं मंत्रं विना अयुजः समसंख्यारहितान् मुष्टीन् मुष्टिपरिमितदर्भान् लुनोति विकरणव्यत्ययश्छांदसः
अत ऊर्ध्वमिति प्रस्तरनिवृत्तिसूचनार्थं तेन पृथिव्याः संस्पृशः पाहि स्वाहसं प्रतिष्ठित्यादित्यं तेन ब्राह्मणेन प्रस्तरस्य लवनं
समाप्य तत्र मंत्राणां विनियोगे न्वरूते अतउपरि तनेनायुंगा युंगान्मुष्टीन् लुनोति मिथुनतायप्रजात्यादिति ब्राह्मणेन बर्हिर्मु

सु०द० षिरुवनस्यविधानात्तत्रैवसमसंख्याराहित्यरूपमयुग्मत्वंनप्रस्तरेणसहेतिमंत्राश्चप्रस्तरलवनएवनबर्हिर्मुष्टिलवने
४३ पिचज्ञापितंअतएवापस्तंबआहप्रस्तरमेवमंत्रेणदातित्तूष्णीमत्तिरमितिवाजसनेयकमितिअत्रतूष्णींशब्दस्यवागिं
द्रियव्यापारनिवृत्तिविषयत्वात्मंत्रमात्रंनिवर्त्ततेपरिग्रहोथावत्तुसर्वोपिगृह्यतइतिबोध्यं॥अयुजोमुष्टीनित्युक्तंकिय
न्तस्तानिस्यात्तआह॥त्रीन्वापंचवासप्तवानववैकादशवायावत्तोवात्वंमन्यतइतिपूर्वत्रायुजोमुष्टीनित्युक्तस्यायुक्तस्यत्री
न्वेत्यादिप्रपंचःअत्रत्रीन्वेत्यादिरेकादशवेत्यंतःएकोयुग्मगणसमुदायःतत्रपूर्वकल्पस्यानुष्ठानेप्रयासलाघवेनतत्रैव
पुरुषवृत्तेःपूर्वपूर्वापर्यासावेवउत्तरोत्तरपक्षेषुप्रवृत्तिर्बोध्यायावत्तइतिपरंयद्यपित्रीन्वेत्यादावन्वेतुमशक्यंतथापिवाशब्द
समभिव्याहारात्त्रीन्वेत्याद्युक्तेःसाकंएतदर्थस्यविकल्पाचगमेनपूर्वोक्तायुग्मगणातिरिक्तायुग्मगणपरःतत्रविकल्पेना
न्यतरगणपरिग्रहोवाशब्दार्थःपूर्ववदेवात्रापिएकादशानांमुष्टीनामपर्यासोत्रयोदशादिमुष्टिपरिग्रहइतिस्तरितव्ये ४३
वशात्बर्हिर्मुष्टियत्नाविशेषनियमइत्येवगंतव्यं॥अथत्रिरन्वाहितांस्तुल्वंकृत्वापसलैरावेष्टयत्सदिसैरास्तासीति॥अ

थरूलमबर्हिर्लवनानंतरंशुल्बत्रीरत्नाहिर्तत्रिः त्रिवारं अनुपश्चादाहित्ता निहिता अबययायस्यनादृशांत्रिसंधिकमितियाव
त् इत्थं एकसरं शुल्बंशुल्बकरणस्यावेष्टनसाध्यत्तया आवेष्टनस्य च सव्यापसव्यरूपेण द्वैविध्यात् तत्र अपसव्यावेष्टनस्य
अपसलैरिति द्विगुणितेविधानात् । अर्थादेकसरे शुल्ब प्रदक्षिणमावेष्टनमवगम्यत्ते एवंच प्रदक्षिणावेष्टनसिद्धंशुल्बं
एकसरं कृत्वा द्विगुणीकृत्साप सलैर प्रदक्षिणे रावेष्टयति अदित्यै रास्नासीतिके चित्तुमंत्रोनिधानार्थः ।। युक्तंचैतत्ब्रा
ह्मणानुगतत्वात्ब्राह्मणे हि आदित्यै रास्नासी त्याह इयंवा अदितिः ।। अस्याएवेन द्रास्नांकरोतीत्ति निधानएवरास्नांरश
नां इति मंत्रविनियोगदर्शनात् संमतश्चायमर्थः ।। सूत्रकारस्य पंचत्तयेन कल्पमवेक्षे तच्छंदसा ब्राह्मणेनेति कर्मोत्तउ
क्तेः नचादित्यै रास्नासीति उदीचीनाग्रं निधायेत्ति सूत्रे तच्छब्देन व्यवधानात्कथमिति वाच्यं ।। शुल्बकरणेन्वितस्य मंत्र
स्य निधानेप्यनुरसालाभस्वीकारेण तच्छब्दस्यापि विरोधाभावात् विनियुक्तोह्युभयत्रकल्पांतरकारैः अदित्यै रास्ना
सीति त्रिधातु पंचधातु शुल्बंकरोतीति ।। आदित्यै रास्नासीत्युदगग्रं वितत्येत्तिचेति वदंति यदत्र युक्तंतद्विविच्यानुष्ठे

यमिति ।अत्रेदं द्वैधं।। शुल्वस्यकरणइत्यधिकरणं चतुर्थंस्यादितिबोधायनोधिकरणमेवतृतीयमितिशाखीकिरिति।।अथम
र्थः।।अधिकरणंअधिउपरि क्रियन्तेअस्मिन्नितिशुल्वस्याशुल्वार्थंप्रथमंगृहीतादर्भाअधिकरणंतेषुखल्वन्यांदर्भान्संधा
यशुल्वंक्रियतेतदधिकरणंचतुर्थंत्रिरन्वाहितमितिशब्दार्थपर्यालोचनायांशुल्वस्यसंधित्रययुक्ततयासंधेयाअवयवास्त्रय
इतिइदमधिकरणंअवयवगतचतुःसंख्यापूरकंभवेदितिबोधायनःशाखीकिस्त्वाहत्रिरन्वाहितमित्यत्रअनुर्नपश्चाद्भावेकिंतु
क्रियाविशेषद्योतकः।।उपसर्गत्वात्उपसर्गेणधात्वर्थोबलादन्यःप्रतीयतइतिन्यायात् तथाचत्रिःत्रिवारंअन्वाहितंभावि
तःअन्वाहितः।।आवेष्टनकरणंयस्मिन्कर्मणितद्यथाभवतितथाशुल्वंकुर्वेत्यर्थः।।इत्थंचार्थस्वीकारेअधिकरणमेवतृ
तीयंनतुचतुर्थमिति।।अथसुसंभृतात्वासंभरामिअदित्यैरास्नासीतिमंत्रयोःपाठक्रमंबाधित्वापदार्थपक्रमेणविनियो
गः।।मंत्रःप्रकाश्यपदार्थक्रमानुसारेणहिविनियोगउक्तोलिंगविनियोज्यानांमंत्राणांकर्मान्तेछंदसेतियथबोधायनःयथा
कायप्रणिधीदंपूर्वमिदमुत्तरमिति।।शुल्वस्यनिधानंत्वदित्यैरास्नासीतिमंत्रेणप्रकाश्यते।।तस्मात्संभृतात्वाभरामीति ४८

मंत्रप्रकाश्यसंभरणार्थमितिपाठक्रमादर्थः॥क्रमोबलीयानितिन्यायविदः॥तदुदीचीनाग्रंनिधायतस्मिन्प्रस्तरमभिसंभरतिस्रुसंभृताच्
संभरामीतीति॥तद्विगुणीकृत्य।पसलैरावेष्टितंशुल्वंउदीचीनाग्रंनिधायआदित्याइतिमंत्रेणतूष्णीमितिकेचित्तस्मिन्शुल्वेप्रस्तरं
मभिसंभरतिबर्हिर्मुष्टिभिरेकीकृत्यस्थापयतिसमाएकीभावार्थत्वात्अत्रशुल्वेप्रस्तरमितिशुल्वस्यप्रस्तराधारतावगमात्।पाठ
क्रमाच्छुल्वेप्रस्तरन्निधायतदुपरिप्रस्तरानंतरपठितान्बर्हिर्मुष्टीन्निदधातिएवंबर्हिर्मुष्टिभिःप्रस्तरंसंभरतिएकीकृत्यस्थ
स्थापयतीतिअग्रेद्वैधं॥बर्हिषःसंभरणइतिसहस्माहबौधायनोयान्यन्यानियाजुषाणिधानानितानिपूर्वाणिमंत्रेणसंभृत्या
थोपरिष्टाद्याजुषंमंत्रेणैवसंभरेदित्यत्रोहस्माहशालीकिर्यान्यन्यानियाजुषानिधानानितानिपूर्वाणितूष्णींसंभृत्याथोपरि
ष्टाद्याजुषंमंत्रेणासंभरेदित्यत्राहस्माहौपमन्यवोयएवादिर्लवनेससंभरेणसयाजुषमेवाग्रेमंत्रेणसंभृत्यतूष्णीमितराणिसं
भृत्यविपरीकुर्याद्यग्रंथिंकुर्यादिति॥अयमर्थः॥बर्हिषःप्रस्तरात्मकस्यतदितरबर्हिर्मुष्ट्यात्मकस्यचसंभरणेएकत्रेकरणेकल्पभे
दोवक्ष्यतेयाजुषात्॥यजुषासंस्कृतात्प्रस्तरात्यद्यपिदेवानांपरिषूतमसीत्यादिनांमंत्राणांप्रस्तरव्यतिरिक्तबर्हिर्मुष्टिषु

सु०द० विकल्प उक्तः प्रस्तरस्य खलु मंत्रप्रतिलाभात्॥ सर्वबर्हिर्मंत्रं लभत इति तथापि कल्पवचनापेक्षया प्रस्तरे याजुषत्वव्यपदेशः न्त
८५ नो यान्यन्यानि धानि कृत्वानि हि तानि तानि पूर्वाणि प्रथमे वर्हिषु त्वस्योपरि मंत्रेण संभृत्य एकीकृत्य स्थापयित्वा तदुपरि प्रस्तरं मं
त्रेणैव संभरेत् तूष्णीं रेकीकृत्य स्थापयेदिति बोधायनः याजुषादन्यानि यानि निधानानि तानि पूर्वाणि प्रथममेव तूष्णीं मंत्रं विना
संभृत्य अथ निधानानामुपरिष्टाद्याजुषं मंत्रेण संभरेदिति शालीकिः॥ औपमन्यवस्त्वाह य एवादिर्लवने प्रस्तरः स एव संभरणे
प्यादिः। पाठक्रमस्य उभयत्रापि साम्यात् प्रवृत्तिक्रमाच्च अतः स संभरणं करिष्यमाणः। याजुषमेवाग्रे मंत्रेण संभृत्य तस्योपरि तू
ष्णीमितराणि निधानानि संभृत्य स्योपरि तूष्णीमितराणि निधानानि संभृत्य विपरिवृष्य यथा प्रस्तरस्योपरिभावो भवति तथा
पि परिवर्त्य ग्रंथिं कुर्यात् प्रस्तरस्य उपरिभावः। विपरिवर्तनं च परिधिपरिधानसमये प्रस्तरप्रथमग्रहणार्थमित्यध्येयं। सन्नह्यत्वे
ति इन्द्राण्यै संनहनमित्तीति॥ संभृतान् प्रस्तरं च बर्हिर्मुष्टीश्च सन्नह्यति त्रिषु त्वस्य मूलाग्रयोर्मेलनरूपं बंधनं करोति इन्द्राण्या इ ८५
ति॥ ग्रंथिं करोति पूषा ते ग्रंथिं ग्रथ्नात्विति। ग्रंथिः प्रसिद्धः। अत्रेदं ध्येयं। ग्रंथिकरण इति सूत्रं बोधायनस्य समायच्छन्ते वेतं मेङ्क्ष्व त्रं

यादिति शालीकिरिति ॥ ग्रंथिकरणे सूत्रं यथा कल्पसूत्रं प्रसिद्धस्य ग्रंथे मंत्रेण करणमिति बोधायनस्य मतं शालीके स्तु समा
यच्छन्ने वसन्नहनेन संयुक्तं शुल्बस्य मूलमग्रं च परस्परं तदोक यन्तगमयन्न् विश्लेषो यथा न भवति तथा प्रदक्षिणमावेष्टयन्नेव पूषात्
इत्येतं मंत्रं ब्रूयात् इति पूषा ते ग्रंथिं ग्रथ्नात्विति मंत्रलिंगात् इदमावेष्टनमेव ग्रंथिकरणं यथा लोको तृणभारबंधनं रज्ज्वेति भावः
॥ स ते मास्थादिति पश्चात्प्रांचमुपगूहतीति तं ग्रंथिं पश्चाद्दारुष्य प्रांचं विधेयमिदं विशेषणं प्रागग्रो ग्रंथिर्यथा भवति तथा
उपगूहति । अत्रेद्धेयं ॥ पश्चात्प्रांचमुपगूहतीति सूत्रं बोधायनस्य पुरस्तात्प्रत्यंचमिति शालीकिरिति । स्पष्टं ॥ अथैनमुपयच्छ
ग२ तइंद्रस्य त्वा बाहुभ्यामुद्यच्छ इतीति ॥ अथ उपयंतृनानंतरं एनं बर्हिर्मुष्टिभिः सहसन्नद्धं प्रस्तरं उद्यच्छते शिरसि निधानाय ऊर्ध्वदे
शं नयति इंद्रस्य त्वेति शीर्षन्नधिनिधत्ते बृहस्पते मूर्ध्ना हरामीति शीर्षन् शिरसि स्पष्टमन्यत् । एत्युर्वंतरिक्षमन्विहीति ॥ एति पु
नरागच्छति । एतसोत्तरेण गार्हपत्यमनधःसादयति दिवं गममसीति ॥ एत्य विहारदेशमागत्य गार्हपत्यमुत्तरेण अनधः अभूमौ
स्थं शाकलं यानि धायेद्धेथे अनधःसाधयतीति श्रुते रर्थं कल्पयतो बोधायनस्य मतं तथा प्रतिपादनात्तस्मिन्सादयति देवं ग

सु॰द॰ ममसीति।।तदुपरिवनिदधातियत्रगुप्तंमन्यत्तइति।।तत्तस्मादेशादुद्धृत्य उपरिव उपरिप्रदेश एवनिदधातियत्रगुप्तंमन्यते
४५ यत्रयत्रेतिसर्वैसर्वनाम्नापिबर्हिरुपसादनदेशान्नप्रत्यकृदेशोवगंतव्यः।।इध्माबर्हिरुपसादनेपश्चात्प्राङुपसादयतीतिश्रुत्य
नुरोधात्पंचतयेनकल्पमवेक्षेतच्छंदसाब्राह्मणेनेतिसूत्रात्तथैवकल्पांतरेपिदेवंगममसीत्यनयोर्निदधातियथाप्राङुपस
दयेदितिअत्रेद्धं।।बर्हिषोनिधानइतिसहस्राहबोधायनःस्फंवाशकलंवांतर्वेदिनिधायतस्मिन्मंत्रेणप्रतिष्ठाप्यतत्तो
यथास्कन्नुनिदध्यादितियत्रैवनिधास्यन्स्यात्तन्मंत्रेणनिदध्यादितिशालीकिरिति।।बोधायनआह।ब्राह्मणेअनधःसा
दयतिगर्भाणांधृत्याइतिउपरिवनिदधातिचवाक्यद्वयेनक्रियाद्वयश्रवणात्स्फ्यंवाशकलंवांतर्वेदिनिधायतस्मिन्मंत्रेणप्र
तिष्ठाप्यतउद्धृत्ययथास्कन्नुउपरिगुप्तंभवतितथानिदध्यादितिशालीकिस्तुअनधःसादयतीतिअभूमौसादनंसामान्य
नउक्तमेवविशेष्यतेउपरिवनिदधातीतिवाक्येनअतोअत्रैवउपरिगुप्तंनिधास्यन्स्यात्तत्रैवमंत्रेणनिदध्यादिति।तूष्णीं ४५
परिभोजनीयानिलुनोतीति।।परिभोजनीयाप्रस्तरबर्हिर्मुष्टिव्यतिरिक्तबर्हिःकार्यसाधनानिबर्हिषितूष्णींमंत्रंविनालु
नि

नातिनूक्ष्मीमतऊर्ध्वमितिसत्यपितूक्ष्णीग्रहणेपुनस्तूक्ष्णींग्रहणंपूर्वेषांयाजुषत्वपक्षेपिएतेषामयाजुषत्वार्थं अवन्नस्त्येव
नेत्यन्येएतेष्वेववेदार्थोपिमुष्टिरवगंतव्यः।तदर्थंतयापृथक्बर्हिर्लवनविध्यभावात्।यद्यपीह प। दभोजनीयानांलवनमु
क्तंतथापिबर्हिर्लवनकालएवलवनंलाघवात् विरोधाभावाच्चनपुनर्निधायगत्वाप्रयोगप्राप्तुभावविरोधात् सकृदाच्छिन्नंपि
तृभ्यआच्छिनत्तीति।पिंडेभ्यःपिंडपितृयज्ञार्थंसकृदाच्छेदनेनसिद्धंयथाभवतितथाबर्हिराच्छिनत्तिबर्हिर्लवनकालएव
इदमुपलक्षणंपरिस्तरणीयानामपिपैतृयज्ञिकानामत्रैवलवनंद्रष्टव्यं।अत्रेदंध्येयं।।पितृयज्ञबर्हिषीतिसमूलमेतद्बर्हिर्भ
वतीतिबोधायनः।पितृयज्ञसामान्यादितिमहापितृयज्ञाएवैतद्दृष्टंभवतिअमूल्यमेवेतस्यादितिशालीकिरितिअयमर्थ
।।पितृयज्ञबर्हिषीत्यंशःविचारोदर्भान्परिस्तरणीयानित्येतद्विषयोनसकृदाच्छिन्नविषयःतस्यक्रममुल्लंघ्यवेदकरण
विचारानंतरंपितृयज्ञविधिक्रमेविचारितत्वात्।।दर्भान्परिस्तरणीयानित्युक्तंबर्हिःसमूलमेवभवतिमहापितृयज्ञे
यत्समूलंनतपितृणामित्यनुवादात्पिंडपितृयज्ञस्यापिपितृयज्ञत्वसामान्यात्ननुविधिमंतरेणानुवादमात्रेणकथंसमू

सु०द०
८

लत्वसिद्धिरितिचेत् महापितृयज्ञेनुवादत्वेपिसमूलत्वसिद्धौ तेनैव सर्वत्रापि सिद्धत्वेन विधानार्थक्यात् अथ महापितृयज्ञेपि आ
प्राप्तार्थत्वादयं विधिरेव नानुवादः तर्हि तत्रैव यद्विधानं तदेव सर्वत्रविधानमितीहापि समूलमेव बर्हिर्भवतीति बोधायनः शाली
किस्तु महापितृयज्ञ एवैतत्समूलं बर्हिः इदं तत्रैव यत्समूलं तत्पितॄणामिति श्रवणात् न च तस्य सामान्यरूपतामात्रेण सर्वपि
तृयज्ञेषु समूलत्वसिद्धिः पितृयज्ञबर्हिष्ट्वलक्षणसामान्यरूपेणापि आग्नेयीवत्प्रकरणपठितमेव व्यक्तिवचनानां सन्नि
हितव्यक्तिपरत्वमिति न्यायेन महापितृयज्ञबर्हिरुद्दिश्य तत्र समूलत्वविधानात्। तथा च मूलमेवैतद्बर्हिः स्यादिति। अथ
तथैव त्रिरन्वाहितं शुल्वं स्तृणैः कविंशतिदारुमिध्मं संनह्यति यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन्। ततस्त्वामेकविं
शतिधा संभरामि

सुसंभ्रनेतीति ।अथबर्हिर्निधानानंतरं यद्यमावास्यायां बर्हिर्लवनसमयेपित्तयज्ञार्थं सकृदाच्छिन्नादिबर्हिर्लवनंनकृतं तदाकालां
तरेपित्तयज्ञबर्हिर्लवनानंतरं इध्मसंभरणं तथैवयेनैवप्रकारेणबर्हिःसंभरणेशुल्वं कृतं तेनैवप्रकारेण त्रिरन्वाहितं शुल्वं कृत्वा
तेन एकविंशतिदारुं एकविंशतिःदारुणीअभिन्नकाष्ठानियस्यतं इध्मं अग्नेर्हविर्दाहानुकूलदीप्तसंपादकं समित्समुदायं सन्न
ह्यतिबध्नातिमस्त्रुक्ष्मोरूपमिति मंत्रेण अत्रतथैवेत्येवप्रकारातिदेशो सिद्धेपुनस्त्रिरन्वाहितग्रहणंमंत्रनिरस्त्यर्थं यत्स्रुक्ष्मोरूपमित्तिमं
त्रेण एकविंशतिइति पदइध्मगतैकविंशतिसंख्यायानित्यत्वाभिप्रायंसंभरणस्यप्रकारभेदाश्रयणेनएँविंशतिधासंभरामीत्यन्व
ायोगेन एकविंशतिसंख्याप्रकारकं त्वामिध्ममित्यर्थोवगंतव्यः ।तथाचेद्वैधोक्ते अपरिमितमितिशालीकिरित्तिनित्यापरिमितप
क्षेमंत्रनिरतिःअसामर्थ्यात्ननत्वानर्थक्यंअनुत्तामिधेनीध्मंकुर्यादिति बोधायनइति पक्षेकृतार्थत्वात्तत्रीत्तचानुब्रूयादिति
चमादिषुकाम्येनैमित्तिकेषुनित्यानुवचनविकारत्वाद्गूहःयोवक्तुयाज्यपरिमितमनुब्रूयादितिनैमित्तिकापरिमितपक्षेनमंत्रनिर
त्तिःअप्रकृतिवद्भावापत्तेःनोहःविधेमात्तिस्विकसंख्याशब्दाश्रवणात्नकिंतुएकविंशाधेतिपदनिरत्तिःप्रकृतोचउपात्तेध्मसंख्या

सु०द० प्रकाशः नमनेनकृतमित्तिर्यावंत इध्माउपात्तास्तत्संख्याभिधानव्याजग्रहणे इध्माकाष्ठानामेकविंशतेर्विनियोगभेद उक्तः पंचद
८८ शेध्मदारुण्यभ्यादधाति त्रीन्परिधीन्परिदधाति उर्ध्वे समिधावादधाति अनुयाजेभ्यः समिधमतिशिनष्टीति। अत्रेद्धेध्मं। अ
नुसामिधेनीध्मं कुर्यादिति बोधायनो परिमितमिति शालीकिरिति। पंचदशेध्मदारूण्यभ्यादधातीत्यभ्याधेयत्वेन विहितमि
ध्मं अनुसामिधेनी सामिधेनीसंख्यानुसारेण सामिधेनीनां यासंख्या तत्संख्याकमिध्मं कुर्यात् इति बोधायनः शालीकिस्तु सा
मिधेनीयां यासंख्या ततोधिकसंख्याकमिध्मं कुर्यादिति न च पक्षद्वयेपि पंचदशेध्मदारूणीति श्रुतिविरोधः अनुसामिधेनीध्म च
विधायकश्रुतिदर्शनेन बोधायनमते पांचदश्यश्रुतेः प्रकृतौ नित्यत्वाभिप्रायात् अपरिमितश्रुतिदर्शनेनैव शालीकिमते वि
कल्पोपत्तेः परिधिकरणे द्वैधं परिधीनां करण इति सहस्माह बौधायन उरः संमितो मध्यमः स्याद्दथेतरौ वाहुमात्रौ स्यातामिति
सर्व एव वाहुमात्राः स्युरिति शालीकिरिति। परिधीनां करणे परिमाणकरणे स्पष्टमन्यत्। इध्मपरिधीनां परिणाहे तु विशेषः। ८८
तिस्रः शम्याः परिधीन्कृत्वा मध्यमांगुलिरनामिका कनिष्ठिकेति स्थविष्ठो मध्यमो णीयां द्राघीयां दक्षिणार्ध्यो णिष्ठोत्त

सिष्ठउत्तरोंगुष्ठमात्र मष्टादश याज्ञिकानि काष्ठानि प्रादेशमात्राणीति। अत्रकमोंतं। इयतीर्भवंतीति समिधां वदति प्रादेशमात्री
रेवैता उक्ता भवंत्यनेन संमिता: कार्या इत्याकुरनेन ह्यग्ने प्रजापतिः प्रजा असृजतेतीति। अस्यार्थ:। इयती: इदंपरिमाणमासां इति वि
ग्रहे इदमोवतुप् किमिदंभ्यां वो घ इति घ त्वं इयादेश: उगितश्चेति ङीप् इदं किमोरीश्की इती शादेश: यस्येति चेति लोपो वाच्छ इतीति
पूर्वसवर्णदीर्घ: इइंइति प्रादेशसुद्दां प्रर इर्ष्वेरः परिमाणं दशयति इयती भर्वंतीति प्रादेश: परिमाणमासां भवंतीत्यर्थ:। नतु कास
मिदंपरिमाणमित्यत आह समिधामिति तेन समिधोऽभ्यज्याद्दधातीति समिधामधिरूतत्वात् तासां समिधां वदतीत्यन्वय:। नन्वाथा
न प्रकरणेऽप्याहोदीनवत्समिधां श्रुतमिदं प्रमाणंतत्कथमिध्मसमिधां परिमाणं भवतीति चेत् उच्यते यथा किल बोधायनमते
पितृयज्ञबर्हिषि यत्समूलं तत्पितॄणामिति श्रवणं सामान्यत: पितृयज्ञमात्रविषयमिति महापितृयज्ञ इव पिंडपितृयज्ञेपि
परिस्तरणबर्हि: समूलमेव तथा अत्रापि एतस्य प्रादेशपरिमाणस्य समित्सामान्यरूपलिंगित्वत्वयासर्वासां समिधां प्रादे
शपरिमाणत्वमेव कर्तव्यत्वात् अन्यथा अथेमौ दर्शपौर्णमासौ पौर्णमास्युपक्रमा वित्यारभ्य प्रतिपा- द्यमानेषु किं दक्षिणम

सु०द० ग्निहोत्रमित्यत्र प्राकृतेषु दर्शपूर्णमासिकपदार्थेषु मध्ये तन्निरूपणस्य सांगत्वात् पुरस्तादुपरिष्टाच्च दर्शपूर्णमासांगसंदंशे
८९ न दर्शपूर्णमासावांतरप्रकरणादपि प्रथमे वावसीयते अपि च दर्शपूर्णमासिकांगसमभिव्याहारादपीयमेव व्यवस्था युक्ता विपराभ्यां
जेरित्यत्र परोपसर्गसाहचर्यादुपसर्ग एव विः न तु विशब्दोपि तेन विजयन्ते राजेत्यत्रात्मनेपदं न तु वक्तु विजयन्ति वनमित्यत्रेति
वत्समभिव्याहारस्यार्थविशेषनिर्णायकत्वात् अरत्निमात्राः परिधयः शुष्का आर्द्रा वा सत्वक्काः प्रादेशमात्राण्येकविंशतिमिध्म
दारूणी भवंतीति स्मार्तपरिभाषावचनाच्च युक्तमेवं ध्मस्य प्रादेशपरिमाणत्वमिति द्वि प्रादेशइध्मइतिवैलिकिमतानुसारिणः
अर्थलक्षणेनैवायामपरिणाहोकस्यापि शेषानुक्तेरिति केचित् न नु इयत्ता भवंतीत्येतावत्ता कथं प्रादेशपरिमाणनिर्णयः तस्य सा
मान्यशब्दत्वादिति यदि कश्चिन्न्ब्रूयात्तं प्रत्याह प्रादेशमात्रीरेवैता उक्ता भवंतीति प्रादेशमात्रीरित्यत्र पूर्वसवर्णदीर्घश्छांदसः एताः
समिधः शाखांतरे प्रादेशपरिमाणा एवोक्ता वर्त्तंते अतो वश्यंयाः काश्चन समिधस्ताः सर्वा अपि अनेन प्रादेशपरिमाणेन संमिता
उक्ताः कार्या इत्याह दुर्जलवादिनः हि यस्मात् अग्रे पूर्वं प्रजापतिः अनेन प्रादेशपरिमाणेन प्रजा असृजत इति खलु शाखांतरे प्रादेशस्य

क

प्रशंसादृश्यन्तेअन्तःसर्वसमित्स्विदं प्रादेशपरिमाणं कार्यमिति ।अत्र वृक्षजातिविशेषउक्तः प्रायश्चित्तसूत्रे । पालाशाः खादिरोवैध्म
स्तयोरलाभेयज्ञिकानांवा वृक्षाणामन्यतमस्तेषामलाभेरुः।कपित्थकोविदारशल्मलिश्लेष्मातकनीपनिंबतिलकवाभ्राणसर्वे
भीतकराजवृक्षैरंजपण्यार्जुनवर्जमिति आपस्तंबस्त्वाहखादिरंपालाशंवैकविंशतिदारुमिध्मंकरोति त्रयःपरिधयःपलाश
काश्मर्यखदिरोदुंवरविल्वरोहीतकविकंकतानांयेवायज्ञियावृक्षाआर्द्राःशुष्कावासत्वक्कास्थविष्ठोमध्यमोणीयान्द्राघीयान्द
क्षिणार्ध्योवर्षिष्ठोह्रसिष्ठउत्तरार्ध्योदृढआधारसमिधावनूयाजसमिदेकविंशतीति।वेदंकरोतिवत्सज्ञुंपशुकामस्यमूलकार्य
मन्नाद्यकामस्यत्रिरत्नंतेजस्कामस्योर्ध्वाग्रंस्वर्गकामस्येति।वेदंवेदिसंमार्जनादिकार्यार्थंदर्भमुष्टिंकरोतियदियजमानःपशु
कामस्यात्तदातस्यवत्सज्ञुंशयित्तवत्सजानुसदृशंवेदंकरोति।अन्नाद्यकामस्यअन्नाद्यंभोज्यंकामयमानस्यमूलकार्यंमूलंधान्य
वपनार्थंतृणपुंजसन्निवेशविशेषः तद्वत्कार्यंयस्यतंधान्यावपनयोग्याकृतिविशेषरूतमितियावत्तथाविधंकुर्यात्तेज
स्कामस्यत्रिरत्नंमूलेवध्वात्रिशिखंऊर्ध्वाग्रंमूलेबध्वाच्छिन्नस्वर्गकामस्यकरोतिकामनाविरहेकल्पांतरस्यानुवादानादेत

सु०द० एवनित्यार्थेपिअत एवद्वैधे एतानेवचतुरः पश्चानुक्रामोपबं धरहितान् मतभेदेनदर्शयत्याचार्यः। अत्रद्वैधं। वेदस्यकरणइति
५० वत्संतं कुर्यादिति बोधायनो मूलकार्यमिति शालीकिस्त्रिरत्नमित्यौपमन्यव ऊर्ध्वाग्रमित्यौपमन्यवीपुत्रइति। स्पष्टं। अत्रखादि
रादिष्विव नित्येष्वेवा रुतिविशेषेषुकामाः। अत्रापस्तंबः शुल्वात् प्रादेशोपरि वास्य वेदपरियासनानिनिदधातीति। वेदिंकरोति
प्रागुत्तरात्परिग्रहात् इति। अथवेदमादत्तइत्यारभ्यब्रह्मन्नुत्तरंपरिग्राहमित्यतः प्राक् यद्वेदिकरणंयस्यत्ते तेन प्रकारेणवेदिं
करोति न नु हविरभिवासनानंतरंपुनर्वेदिः समाम्नायते अतः कतमे कालेनुष्ठानमितिचेत् उच्यते आमावास्येनपौर्णमासेन
वाहविषा यक्ष्यमाणोभवतीत्यत्र पूर्वकर्तव्यपौर्णमासमनंतरमुद्दिशतीति अनंतरं कर्तव्यंच आमावास्यं पूर्वमुद्दिशतीतितस्येदंप्र
यो जनं अमावास्यायांकस्यचित् पदार्थस्य पूर्वप्रयोगानंतरं पौर्णमास्यां प्रयोग इति अयंचपदार्थोवेदिकरण मिति अत्रेयमाप
स्तंबसूत्रं अग्न्यन्वाधानं वत्सापाकरणमिध्माबर्हिर्वेदो वेदिः प्रागुत्तरात्परिग्राहात् स्रुचाश्चोभूत्त आप्यलेपन्निमीयोत्तरंपरि
ग्रहीयात् परिस्तरणंच पूर्वेद्युरमावास्यायां पौर्णमास्यांत्वन्वाधान परिस्तरणोपवासाइति। अपिचवेदिकरणानंतरं अमावास्या ५०

कालेकर्तव्यः पिंडपितृयज्ञो विहितः तत्तश्च सायंदोहनसाहचर्यात् इदानीं वेदिकरणं अमावास्यायामेवेति। अथापराह्णे पिंडपितृय
ज्ञेन चरति। अथ वेदिकरणानंतरं अपराह्णे पिंडपिंडपितृयज्ञेन चरति यजमानः अत्र यद्यपि अमावास्यापौर्णमासी साधारण्येनापरा
ह्णे पिंडपितृयज्ञेनेत्युक्तं तथापि तस्मात् पितृभ्यः पूर्वेद्युः क्रियत इति पितृयज्ञविधिवाक्यशेषे सोमावास्यां प्रसागच्छदिति श्रवणा
त् शाखांतरे चामावास्यायामपराह्णे पिंडपितृयज्ञेन चरंतीति चैवेनात् अमावास्यायामपराह्णे कार्यं। रवैतौ बोधायनीयस्य द्वितीयः
पटलोऽधुना। संपूर्णो विबुधाः सर्वे तुष्यंतु प्रियतां शिवः। खंडः। अथैतस्यै शाखायै पर्णानि प्रच्छिद्याग्रेण गार्हपत्यं निवपतीति।
अथ यजमानेन पिंडपितृयज्ञे कृते तदनंतरं एतस्यै शाखायै पाषर्णशाखातदभावे शमीशाखा वा आहृत्य निगृहिता षष्ठ्यर्थे चतु
र्थी पर्णानि सर्वाण्यपि पलाशादन्यसर्वाणी स्यापस्तंबसूत्रवत्। अत्रासर्वाणीति विशेषणाभावात् भाष्ये द्वैध सूत्रव्याख्यानावस
रे सूत्रं शालीकेरिति मतं आरभ्यास्य तागार्हपत्यस्याग्रेण सर्वेषामिति व्याख्यानाच्च ग्रहे कृत्ववत्तु द्वेश्य गत संख्याया अविवक्षि
तत्वात् नात्र बहुत्वस्य त्रित्वे पर्यवसानं प्रच्छिद्य प्रकर्षेण सामर्थ्येन छित्वा गार्हपत्यमग्रेण पूर्वेण निवपति अत्र पर्णानीति सामान्यतः

सु॰द॰ क्वापि सत्सरुकाणां निवपनं कार्यं पर्णत्सरुकाणामिति द्वैधे निर्देशात्। अत्रेद्वैधं। पर्णत्सरूणां निवपन इति सूत्रं शालीकेरत्रोहस्मा
५१ ह बोधायनस्तृतीयमग्न्यगार उद्धपेत्तृतीयनं नेवेदि निवपेत्तृतीयेन वत्सानांधूननं कुर्यादेवमेव हि पशूनां नेदीयान्भवतीति। पर्णयुक्ताः
त्सरवः पर्णत्सरवः तेषां निवपन विषयेऽयमुच्यते। सूत्रं अथैतस्यै शाखायै पर्णानी त्यादि कल्पसूत्रं शालीकेर्मतं अत्र मते सत्सरुकाणां
सर्वेषां पर्णानामग्रेण गार्हपत्यं निवपनमिस्यक्तं बोधायनस्त्वाह तृतीयं पर्णत्सरूणां त्रिधेकेऽग्न्यगार उद्धपेत् अग्न्यगारस्योपरिक्षि
पेत् तृतीयमंतर्वेदि निवपेत् अथ तृतीयेन पर्णत्सरूणां त्रिधेकेन सहितया शाखया वत्सानांधूननं प्रातर्दोहाय अपाकरणं कुर्यात्
हि यतः कारणादेवं क्रियमाण एव पशूनां नेदीयान् भवति सन्निहिततरो भवति एतत्कल्यानुष्ठाने पशुमान् भवतीति यावदिति तथ
च शाखागतपर्णवद्धुत्वा यानं शाखासंवं धमावेदयति शाखाहरणे ब्राह्मणं यं कामयेत पशुमान्स्यादिति बहुपर्णां तस्मै बहुशाखामा
हरेत् पशुमंतमेवैनं करोतीति। आपस्तंबा अपि अंतर्वेदि शाखायाः पलाशान्य सर्वाणि प्रशात्येति पर्णानामेकदेशस्य निवपनं वि ५१
धाय तयैव शाखया दर्भैर्वा सायंदोहच प्रातर्दोहाय वत्सानपाकरोतीति च पर्णेकदेशसहितया शाखया विकल्पेन प्रातर्दोहाय वत्सा

पाकरणमामनंतीति ध्येयं। अथैनामधस्तात्परिवास्य जघनेन गार्हपत्यं स्थविमदुपवेषाय निदधातीति अथ सत्सरुपर्णनिवपनानंतरं
एनां प्रच्छिन्नपर्णां शाखामधस्तात् मूलप्रदेशे परिवास्य वटुच्छित्वायावति प्रदेशे छेदने उपवेषामपर्याप्तं भविष्यति तावति तच्छि
त्वा स्थविमत् स्थूलं भागं उपवेषाय अंगारनिरूहणार्थं कष्ठमुपवेष इति समाख्यायते तदर्थं निदधाति अत्र एनामिति स्त्रीलिंगद्विती
याविभक्तिभ्यां शाखायाः प्राधान्यमवगम्यते उपवेषस्त्वनुनिष्पादी तेन शाखाया दोषनाशापहरेषु मंत्रा रक्ष्यां शाखायाः पुनराहरणं
उपवेषस्य दोषादेन मंत्रैराहरणं नास्ति किंतु तूष्णीमाहरणं अपि च अमावास्यायाम सन्नयतः पौर्णमास्यां च तूष्णीमेवोपवेषः का
र्यः उपवेषस्य धर्मप्रयोजकत्वाभावात्तु न च पौर्णमास्यामुपवेषासंभवः निरूहणादेः कार्यस्य सत्वात् केवलसान्नाय्यर्थत्वे पौर्णमा
स्यां तस्य विकल्पानुपपत्तेः पौर्णमास्यामुपवेषकरण इति कुर्यादिति बोधायनो न कुर्यादिति शालीकिरिति द्वैधे विकल्पोक्तेः भारद्व
ज आह चोद्यमाने कर्मणि द्रव्यमुत्पादयेत् यथा पौर्णमास्यामुपवेष इति। अथास्याः प्रादेशमात्रं प्रमाय दर्भनाडी। प्रवेश्य तत्त्रिरच्छा
वा पवित्रं करोति त्रिवृत्पलाशे दर्भइया प्रादेशसंमितः। यज्ञे पवित्रं पोतृतमं पयो हव्यं करोतु म इति। अथ उपवेषनिधानानंतरं

सु०द० र्भनाडीः प्रवेश्य प्रदक्षिणमावेष्टकियत्पर्यन्तमित्यत आह प्रादेशमात्रं प्रमायेति प्रादेशमात्रं मीत्वा दर्भनाडीः प्रवेश्येत् तत्र आवेष्टि
५२ ता दर्भनाडीः शाखापवित्रं विशेष्यं अपेक्ष्य नपुंसकत्वमेकवचनं च त्रिरनु त्रिगुणाः अस्याः शाखायाः संबंधिनीः मूले मूलं अग्रेऽग्र
णी कृत्वा शाखापवित्रं करोति शाखायां पवित्रं शाखापवित्रं तन्मंत्रेण करोति दर्भाणां मूलदेशादारभ्य प्रदक्षिणावेष्टनेन त्रिरोरज्जू
कृत्वा त्रिवृद्दर्भमयं पवित्रं शाखालग्नं करोति त्रिवृत्पलाशशाखायां दर्भमयं भवतीति न द्विधानात् त्रिवृत्पलाशो दर्भ इति मंत्रलिंगा
च्चतथापस्तंबसूत्रमपि त्रिवृद्दर्भमयं पवित्रं कृत्वा बस्तूनां पवित्रमसीति शाखायां शिथिलमवसजति मूले मूलान्यग्रे अग्राणि न ग्रंथिं क
रोतीति। अथवा प्रादेशमात्रं प्रमाय दर्भनाडीः प्रवेष्टेस्यन्वयं छित्वा अस्याः प्रादेशमात्रं प्रमायेत्यन्वयो ग्राह्यः एवमन्वयग्रहणे
अस्या उपवेषं कृत्वा अवशिष्टायाः शाखायाः संबंधिनं यत्र पवित्रं सुकरं तं कंचन प्रदेशं प्रादेशमात्रं प्रमाय दर्भनाडीः प्रदक्षिण
मावेष्टयेत् तच्छाखासंबंधि प्रादेशमात्रं आवेष्टितदर्भनाडीश्च मूले मूलं मग्रेऽग्राणि निधाय त्रिवृत्कृत्वा दर्भगुणाभ्यां शाख ५२
याच सह त्रिवृच्छाखापवित्रं करोतीत्यर्थः। अस्मिन्पक्षे त्रिवृत्पलाश शाखायामिति प्राप्लणे त्रिवृत्पलाशो दर्भ इति मंत्रे च परि

त्रैकेदेशाद्दर्भनाड्याधारत्वेन गौणमधिकरणत्वं सप्तम्यर्थ इति मंतव्यं अत्र पक्षद्वयेपि पवित्रस्य ग्रंथिर्न कार्यः असमाम्नातत्वन्न ग्रथिं क
रोतीति शाखांतरे निषेधाच्च किंतु शाखायां शिथिलत्वमवसज्जति। अत्रेद्वैधं। दोहनपवित्रस्य करणइति सह स्माह बौधायनो मूले मूला
नि बध्वा द्विगुणां रज्जुं संप्रस्तार्याग्रेग्राणि निग्रथ्नीयादेवमस्याग्रमग्रैरभिसंपन्नं भवतीत्यत्रोह स्माह शालीकिर्मूले मूलानि बध्वा
द्विगुणां रज्जुं संप्रस्तार्य मूले परिहृत्य त्रिगुणां रज्जुं संप्रस्तार्याग्रेग्राणि निग्रथ्नीयादेवमस्याग्रमग्रैरभिसंपन्नं भवतीति। अ
शाखापवित्रं यमर्थः दोहनं दोहः तत्संबंधिपवित्रं तस्य करणे प्रकारभेदः कथ्यते। शाखामूले दर्भमूलानि बध्वा तत आरभ्य एकसरां रज्जुं द्विगु
णां संप्रस्तार्य प्रादेशमात्रं रज्जुद्वयं कृत्वा शाखाग्रे रज्वोर्दर्भाग्राणि निग्रथ्नीयादेवं सति अस्य शाखाग्रं दर्भाग्रैरभिसंपन्नं युक्तं भव
तीति बौधायन आह शालीकिस्तु शाखामूले दर्भमूलानि बध्वा प्रादेशपरिमाणापेक्षया द्वौ द्विप्रादेशां रज्जुं कृत्वा प्रादेशमात्रे
प्रदक्षिणमावर्त्य द्विगुणां रज्जुं संप्रस्तार्य कृत्वा आमूलात् पुनर्मूले परिहृत्य प्रदक्षिणमावेष्ट्य त्रिगुणां रज्जुं संप्रस्तार्य पुनर्मू
लादारभ्य त्रिगुणां कृत्वा शाखाग्रे रज्जुदर्भाग्राणि बध्नीयात् एवं सति शाखापदार्थस्याग्रं दर्भाणामग्रैरभिसंपन्नं भवतीति।

सु०द० अथ सायंहुतेऽग्निहोत्र उत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु चतुष्टयं संसादयति दोहनं पवित्रं सान्नाय्यतपन्यौ स्थाल्याविततीति। अ
५२ थ शाखापवित्रकरणानंतरं सायमग्निहोत्रे हुते सति गार्हपत्यस्योत्तरेण तृणानि दर्भान् संस्तीर्य तेषु दर्भेषु दोहनं दुह्यतेऽस्मिन्नि
ति व्युत्पत्त्या दोहनं दारुमयं पवित्रं शाखापवित्रं सान्नाय्यपे तेभ्यो सान्नाय्यं सान्नाय्यार्थं पयः तप्यते श्रप्यते नयोरिति सान्नाय्य
पाकार्थे स्थाल्यौ इति चतुष्टयं द्वंद्वं संसादयति तान्येवमेव द्वंद्वमिति परिभाषितत्वात् दोहनं पवित्रमित्याद्युत्क्रमणादेव
सिद्धे चतुष्टयग्रहणं सान्नाय्यसाधनेषु द्रव्येषु मध्ये इदं चतुष्टयमेव संसादयतीति नियमार्थं केचित्तु आपो देवीः शुन्धध्वमिमा
पात्राणि शुंधत। उपात्तं क्याय देवानां पर्णचरक सुतशुंधत। देवेन सवित्रोत्पूता वसोः सूर्यस्य रश्मिभिः। गां दोहपवित्रे रज्जुं सर्वा
पात्राणि शुंधते त्याच्छिद्रकमंत्रे गवादीनामपि प्रोक्षणस्य प्रकाशनात्। चतुष्टयग्रहणमुपलक्षणं गोरज्ज्वादीनामित्याहुः।
अत्राथ सायंहुतेऽग्निहोत्र इति अग्निहोत्रोच्छेषणोपकल्पनानंतर्यं सूचयति अग्निहोत्रानुनिष्पादित्वादग्निहोत्रोच्छेषण ५२
स्य तथाच कस्यांतरं अमावास्यायां रात्र्यां स्वयं यजमानेन यवाग्वाग्निहोत्रं जुहोत्यग्निहोत्रोच्छेषणमातंचनार्थं निदध्या

तीति। तथा चाग्निहोत्रोच्छेषणोपकल्पनानंतरं सान्नाय्यपात्रासादनादि कार्यं। अत्र द्वैधं अग्निहोत्रोच्छेषणस्य करण इति
सहस्माह बौधायनो य यस्याज्येन वौषधेन वा प्रक्रांतं स्यात् पयसैनां रात्रिं जुहुयात् पयस एवाग्निहोत्रोच्छेषणं कुर्यादित्य
त्रोह स्माह शालीकिर्नासमासे काममावर्तयेद्यस्याज्येन वौषधेन वा प्रक्रांतं स्यात्तस्य [illegible] हुत्वा तस्यैवाग्निहोत्रोच्छे
षणं कुर्यादिति। अग्निहोत्रोच्छेषणविषये बौधायन आह अस्य यजमानस्याज्येन वौषधेन ओषधिविकारेण यवाग्वादिना
नावाशाब्दारभ्याय यग्निहोत्रं प्रक्रांतं स्यात् यावज्जीवदध्नाग्निहोत्रं होष्यामीति वचनादिंद्रियकामो दध्नाहोष्यामीति वच्चसंक
ल्प्याग्निहोत्रं प्रक्रांतं स्यात्तदैतेनैतां रात्रिं अमावास्योपवसथस्य रात्रौ कालाध्वनोरत्यंतसंयोग इति द्वितीया एतस्यां रा
त्रौ सर्वदा पयसैव जुहुयात् पयस एवाग्निहोत्रोच्छेषणं कुर्यात् इति शालीकिस्त्वाह नासमासे काम्यप्रयोगे पयसा जुहु
यात् किंतु काम्यं काम्यत्वेन इंद्रियादिकमनेनेति कामो दध्यादिस्तमेवावर्तयेत् तेनैव कुर्यात् कामादन्यत्रैव पयसैनां रात्रिमि
ति वचनं तस्य कामनावतो यजमानस्याज्येन वौषधेन वा यवाग्वादिना दध्ना वा अग्निहोत्रं प्रक्रांतं स्यात्तदा तेनैव हुत्वा तस्य

उ०र० चञ्चोषमग्निहोत्रोच्छेषणं कुर्यादिति। अत्रकर्मान्तास्य यग्निहोत्रोच्छेषणात्प्रमादेन पुनरेवाग्निहोत्रं जुहुयात्। अग्निहोत्रोच्छेष
५८ णे प्रमादे सति पुनरग्निहोत्रं कृत्वा तच्छेषेणाःस्यात्तं आदित्यर्थ इति केचित् अग्निहोत्रोच्छेषणे प्रमादे सति पुनरग्निहोत्रापत्याप्
नुः कृतेप्यग्निहोत्रे तस्याग्निहोत्रानंतरं कृतस्याकस्मिकतया अग्निहोत्रत्वाभावेन तच्छेषस्याग्निहोत्रोच्छेषणत्वं दुरुपपादमिति
इदं सूत्रं अप्रमादार्थमित्यन्ये। अथैनान्यद्भिः प्रोक्षति शुंधध्वं दैव्यायकर्मणे देवयज्यायाइति त्रिरिति। अथ दोहनादेः संपादना
नंतरं एनानि दोहनादीनि अद्भिः प्रोक्षति शुंधध्वमिति। गुणानां मिथः संबंधाभावेन त्रिरिति न मंत्रेणान्वेति अपितर्हि प्रो
क्षणेन तस्य प्राधान्यात् एवं च सकृन्मंत्रमुक्त्वा त्रिः प्रोक्षेदिति। अत्रेदं ध्येयं। सान्नाय्यपात्राणां प्रोक्षणइति तूष्णीं संस्कृताभिरद्भिः
प्रोक्षयेदिति बोधायनः कमंडलुभिरद्भिरिति शालीकिरिति। तूष्णीं मंत्रं विना संस्कृताभिः कमंडलुभिः दीर्घः छांदसः कमं
डलुगताभिरद्भिः शिष्टं स्पष्टं। अथ जघनेन गार्हपत्यमुपविश्योपवेषेणोदीचींगारान्निरूहति मातरिश्वनो घर्मोसीति। स्पष्टं। ५८
तेषु सान्नाय्यं तपनीमधिश्रयति द्यौरसि पृथिव्यसि विश्वधाया असि परमेण धाम्ना दृंहस्व माह्वारिति। तेष्वंगारेषु सान्नाय्यत

पत्नीसायंदोहश्रपणार्थास्थाली। अधिश्रयतिद्यौरसीतिमंत्रेण। अत्रैद्वैधं। अथजघनेनगार्हपत्यमुपविश्योपवेषेणोदीचोंगारानि
रूहतिसूत्रंशालीकेरत्रोहस्वाहबोधायनस्तूष्णीमंगारान्निरूहेत् सर्वएवैषोधिश्रयणमंत्रस्यादिति। अथजघनेनगार्हपत्यमिस
रिकंमातरिश्वनइतिमंत्रेणअंगारनिरूहणविधायकंसूत्रंशालीकेर्मतंतस्यचमातरिश्वनोघर्म॥ एषांलोकानांविधृत्याइतिश्रा
ह्मणेननिरूहितानामंगाराणांमातरिश्वनोघर्मोसीतिसंबोधनंकार्यंसंचांतरिक्षंतद्रूपेणचांगाराणांसंबोधनंएषांलोकानां
विधृत्यैभवतीतिपूर्वभागस्यांगारनिरूहणेद्यौरसिपृथिव्यसीत्याहेत्यादिनाचउत्तरभागस्यउखाद्रिंश्रयणंभेदेनविनियोगा
त् इमौद्वौमंत्रावित्याशयः। बोधायनस्वाहतूष्णीमेवमंत्रंविनैवांगारान्निरूहेत् एषसर्वोप्येकएवमंत्रः अधिश्रयणेचतस्यविनि
योगइतितस्यचमतेहेस्थालिवायोःसंचारस्थानप्रदानेनदीपकोयोंतरिक्षलोकस्तद्रूपात्वमसीतवोदरेंतरिक्षसद्भावादितिस्थ
र्वद्दलमपिस्थाल्याअभिधानार्थंसंभवतिहित्रिभिर्लोकैरभिधानंस्थाल्याएवअग्नेरनधिकारादित्याशयः। तस्यांप्राचीनाग्र
शाखापवित्रंनिदधातिवसूनांपवित्रमसिसहस्रधारमितीति। तस्यामधिश्रितायांस्थाल्यांस्पष्टमन्यत्। अत्रैद्वैधं। दोहन

सु०द० पवित्रस्याधानइतिमंत्रेणकृत्वामंत्रेणस्थाल्यामादध्यादिति बौधायनस्तूष्णींकृत्वामंत्रेणस्थाल्यामादध्यादितिशालीकिरर्थेनकृत्वा
५५ र्थेनस्थाल्यामादध्यादित्यौपमन्यवइति। दोहनपवित्रस्यस्थाल्यामाधानेप्रकाराः केचिदाहुः त्रिरत्पलाशइत्याच्छिद्रकेणमंत्रेणपवि
त्रंकृत्वावस्तूनामितिमंत्रेणस्थाल्यामादध्यादितिबौधायनोमंत्रंविनैवपवित्रंकृत्वावस्तूनामितिमंत्रेणस्थाल्यामादध्यादितिशाली
किः अर्थेनवस्तूनांपवित्रमसिशतधारमितिपूर्वभागेनकरणंशेषेणनिधानमितिऔपमन्यवइतिअन्येतुसूत्रमित्यवचनात्क
ल्पेपक्षांतरंतथाचवस्तूनामितिकृत्वातेनैवनिधानमितिबौधायनः सकृदाम्नातत्वात्सकृदुच्चरितः शब्दइतिन्यायेनमंत्रलिंग
स्यसकृदेवमंत्रविनियोजकत्वात्तूष्णीमेवकरणंमंत्रेणनिधानमितिशालीकिः वस्तूनामितिमंत्रोद्वौएवदलद्वयस्यपरस्परान्व
याभावेनवाक्यभेदात्अतः पूर्वोभागः करणउत्तरोभागआधानइत्यौपमन्यवइत्याहुः। नहन्वारभ्यवाचंयमआस्तइति। तच्छाखाप
वित्रमन्वारभ्यवाचंयमः मंत्रादन्यांवाचंयच्छन्उत्तरत्रमंत्रविधानात्स्पष्टमन्यत्। अत्रयद्यपिअन्वारभ्यवाचंयच्छतीतिब्रा ५५
ह्मणेन्वारंभविधौपवित्रवत्यानयतीतिवाक्यस्तपवित्रस्यसान्नाय्यकुंभस्योपस्थितेः तस्यैवान्वारंभोविधातुंन्यायः धारयन्त।

स्त इतिनु पवित्र विषयंपयसः शोधनायपवित्रस्य धारणेोचि सात् अनयोश्च युगपदनुष्ठानायोगाद्विकल्पउचितः तथाचापस्त
वः कुंभीमन्वारभ्य वाचंयच्छति पवित्रंवा धारयन्नास्त इति आचार्यस्तत्रगारवांतरेणासूत्रयन्निति मंतव्यं। अथगा आयतीः प्रती
क्षन एतना आचरंति मधु मद्दुहानाः प्रजावतीर्यशसो विश्वरूपाः। वह्वीर्भवंती रुपजायमाना इहव इंद्रो रमयन्तु गावइतीति। अथ
सायंदोहाय विहारसमीपदेशं आयतीः आगच्छंतीः सर्वागाः प्रतीक्षते एताइति मंत्रेण यद्यपि अत्रगा आयतीरितिउक्त्यायं
यते कंचनस्वसमीपदेशमायतीः प्रतीक्षत इति प्रतीतं तथापि कस्यांतरेगां चोपस्पर्शं विहारं चांतरेणासंचारिष्टेतिसंप्रेष्यतीतिसं
प्रेषेण उपस्पृश्यायागोर्विहारस्य च मध्येसंचारा निषेधात् यद्युपस्पृष्टं व्ययेयात् सान्नाय्यामाविरलोपीति न्यायादित्यंतरागमन
प्राय श्चित्ता म्नानाच्च विहार समीपदेशमित्य ध्यवसीयत्तेन नु गोचरात् गोष्ठमायतीः एवंच प्रातर्दोहेपि मंत्रः। इहवइंद्रोरमय
तु गावइति मंत्रभागेन हे गावो वो युष्मान् इह विहारसन्निहितेदोहनप्रदेशे इंद्रोरमयन्तु तोषयि त्वित्य नेन प्रकारेण गवांशाब्द
प्राधान्यमवगम्यते तदुपसर्जनत्वेनेंद्रः अतोविरुद्धत्वेनेंद्रपरस्तोहइत्यत आहमहेंद्र याजीभवति। सत्यं गवांशाब्द प्राधान्यं
इतिवायदिमहेंद्र

सु०१० तथापींद्रः संप्रधानत्वात्तत्तदुपात्तसान्नाय्यापेक्षया प्रधानं उद्देश्यत्वात् कर्मणा यमभिप्रैति संप्रदानमिति व्याकरणाच्च इंद्रो हि अ
५६ त्मार्थमेव गारमयति यतस्तत्तदुत्पन्नं सान्नाय्यं स्वस्मै भवति अत इंद्रोर्थतः प्रधानं विरोधे च प्रमाणबलाबलापेक्षया प्रमेय
बलाबलं च स्तीय इति न्यायविदः अत इंद्रप्राधान्यमेवात्र पुरस्करणीयं महेंद्रस्य च नैमित्तिकतया विकारत्वात् मंत्रस्य तत्सं
बंधे इंद्रपदमूह्यमिति भावः महेंद्र इति महेंद्रयाजी स्येत्तावत्तेबोधः सिद्धौ यदि शब्दप्रयोगो ज्ञापयति गतश्रियोपि सं
वत्समिंद्रेज्यास्तीति सर्वसाधारण्येन नैमित्तिकत्वावगतेः अयमप्यर्थो महेंद्रायेति यदि माहेंद्रयाजी भवतीति वा शब्दं वि
नैव सिध्यति अथ च वाशब्दः प्रयुज्यते संवत्सरादूर्ध्वमगतश्रियोपींद्रमाहेंद्रविकल्पो यथा स्यादिति सर्वपुरुषसाधारण्येन
खलु वाशब्देनात्र माहेंद्रविकल्पो बगत इति। अत्र द्वैधं। येनूनामनुमंत्रण इति सहस्माह बोधायन एकैकामेवासामनुमंत्रये
ताथासामेकैकां दोहयेदित्यत्रोह स्माह शालीकिः सरुद्दैवेनाः सर्वा अनुमंत्रयेताथासामेकैकां दोहयेदित्यत्रोह स्माहोपम ५६
न्यवः सरुद्दैवेनाः सर्वा अनुमंत्रयेत सरुद्दैवेना दोहयेदत्र चेवस्तोकानुपरिनिस्तिष्ठेदित्येकैकामेवासां सर्वेण कर्मणापरिनि

सर्वेण

स्तिष्ठेदिति सोपमन्यवीपुत्र इति धेनूर्नांसां नाय्य दुहां गवामनुमंत्रणे एता आचरंतीत्ति मंत्रे णेक्षणं अनुमंत्रणं मंत्रेणेक्षणं तत्र
प्रकाराउच्यंते आसां सान्नाय्य दुहां मध्ये एकैकां क्रमेणानुमंत्रयेत एता इति मंत्रेण अथ आसामनुमंत्रणानंतरं एकैकां दोहयेत्
अथाहोपसृशमिस्सारभ्यतामनुमंत्रयेतेति विहितानुमंत्रणांतं कुर्यात् अत्र मते एकैकस्यां गवि एता आचरंतीत्ति बहुवचनांतो
मंत्रः। अदितिः। पात्रा निनिवतद्र ष्टव्यः विहारसमीपे गवामानयस्य अनुमंत्रणस्य च दोहार्थनयादोहस्यैवायमारंभ इति दोहभेदेस
ण स्यारंभभेदस्यावश्यकत्वयाप्रति धेन्वनुमंत्रैमिति बौधायनः शालीकिस्त्वाह एताः सान्नाय्यदुहः सर्वा अपि सकृदेव युगपदनुमंत्र
येत मंत्रस्य बहुवचनयुक्ततया युगपदभिधानसामर्थ्यात्सर्वदोहार्थश्चायमारंभः। अथासामेकैकां दोहयेदिति शालीकिमतेवदे
व युगपत्सकृत् सर्वासामनुमंत्रणं सकृद्युगपदेवेना गारोहयेत्त्रिभिर्धेर्दोभिः अत्रेव युगपदनुष्ठान विषय एव स्तोकांश्चप
रिनिस्तिष्ठेत् दुःतस्तोक इति स्तोकानुमंत्रणं च कुर्यात् सकृदेव कुर्यादित्यर्थः। एतस्मिन्पक्षे सा विश्वायुः सा विश्वव्यचाः सावि
श्वकर्मेति सकृदेव यथाब्राह्मणं दुग्ध्वा गव्यनुमंत्रणमिति सोपमन्यवस्य मतं एता अचरंतीत्यनुमंत्रणप्रभृति दुग्धा गव्यनुमंत्रणांतं

सु०द० प्रतिधेनुप्रत्येकमेवकुर्यादित्यौपमन्यवीपुत्रइति अथाहोपस्पृशंमेप्रब्रूतादिति अथगवांप्रतीक्षणानंतरंआह दोग्धारंउपस्
५७ र्शंमेप्रब्रूतादितिउपसमीपेस्पर्शेविस्पर्शेवत्सोयस्यास्तांदोहनायसंयोजितवत्सामितियावत्तांब्रूहीत्यर्थः। अस्यप्रेष
स्यदोहनार्थतयादोहाभ्यासेप्रतिप्रधानंगुणावृत्तेर्न्याय्यत्वयाप्रतिदोहंप्रेषाभ्यासोपगंतव्यः। अभ्यासावचनंतुन्यायतः
सिद्धिमभिप्रेत्यअत्रदोग्धाआर्यःशूद्रोवाब्राह्मणेशूद्रएवनदुह्यादितिशूद्रस्यनिषेधात्अग्निहोत्रमेवनदुह्याच्छूद्रइतिप्र
कृतेतस्यप्रतिप्रसवाच्चविधिप्रतिषेधाभ्यांतस्यविकल्पावगतेः॥ आपस्तंबोप्याह। नशूद्रोदुह्यात्दुह्याद्वेति। उपस्पृशंप्राङु
रितिदोग्धास्वत्संगोसमीपेउपसृज्यउपसृष्टेसत्यध्वर्युप्रतिब्रूयात् बहुवचनंबहुभिर्दोग्धृभिर्युगपद्दोहनमपिकदाचिद्दो
न पमन्यवमतेर्भवेदितिद्योतयति। अत्रकल्पांतरंउपस्पृशंमेप्रब्रूतामितिसंप्रेष्यत्वंउपसृजामीत्यामंत्रयतइति। दोह्य ५७
मानमनुमंत्रयतेहुतस्तोकोहुतोद्रप्सोग्नयेबृहतेनाकायस्वाहाद्यावापृथिवीभ्यामित्तीति। दोह्यमानायांगोर्लभ्यमानान्
स्तोकानूद्रप्सांश्चहुतस्तोकइतिमंत्रेस्तोकानांद्रप्सानांचकर्मत्वावगतेः ब्राह्मणेचमंत्रविनियोजकेदोहनसमयेपात्राद्न्यत्र

वहिःपतद्भिस्तोकैरीप्सेभ्यह विषस्कन्नत्वदोषपरिहाराय मंत्र इत्युक्तेः द्रुतस्तोको द्रुतो द्रप्स इत्याह प्रतिष्ठित्यै। हविषो स्कंदा
या नहि द्रुतं स्वाहाकृतं स्कंदति। दिविनाकेनाम्नाग्नेः। तस्य विप्रुषो भागधेयं अग्नये च हुतेनाकायेत्याह। नाकमेवाग्निं भागधे
येन समर्धयतीति ब्राह्मणं। अनेन च विप्रुषो भागधेयत्वकथनेन विप्रुषामेव स्तोकद्रप्सशब्दार्थत्वावगतेः। स्थूला विप्रुषो द्रप्साः सूक्ष्मा
स्तु स्तोका इति भेदः। न चैवमपि दोह्यमानानामित्यस्य सूत्रस्य गोपरत्वं स्तोकानामनुमंत्रणमिति द्वैध विरोधात् द्रुतस्तोको द्रुतो द्रप्स इ
ति विप्रुषोनुमंत्रयत इति कल्पान्तराच्चायमेवार्थो युक्तः तानेनुमंत्रयेत द्रुतस्तोक इति अत्र विप्रुषोनुमंत्रयत इत्येव वक्तव्ये दोह्यमा
मं
नानामिति वचनं प्रतिगवं स्तोकानुमंत्रणं त्रीणत्वयथं तेन मंत्रस्य त्रिवारमावृत्तिर्वोध्या। अत्र द्वैध। स्तोकानामनुमंत्रणमिति सूत्रं शा
लीकेराख्यातमौपमन्यवस्यात्रोहस्माह वोधायनः आनत्यैव स्तोकानामनुमंत्रयेतात्रैव स्तोकानां मंत्रो भवतीति स्तोकानां उप्य
स्तोकानामनुमंत्रणे द्रुतस्तोक इति मंत्रजपे प्रकारा उच्यंते सूत्रं दोह्यमानामनुमंत्रयत इति कल्पसूत्रं शालीकेर्मतं अत्र प्रत्येकं दो
ह्यमानामित्यर्थ इत्युक्तं अत्र औपमन्यवस्य मतमाख्यातं इतः पूर्वस्मिं सूत्रे अत्र चैव स्तोकान् परिनिष्ठितेति सूत्रभागेन दोहनका

स०२० ळएवयुगपत्सकृदनुमंत्रयेतेत्याख्यानमित्यर्थः। बोधायनस्त्वाह आतच्येवआतंचनानंतरमेवस्तोकानामनुमंत्रयेत अत्रैवआ
५९ तंचनानंतरमेवस्तोकानामंत्रः समाप्तिर्भवति तथाच एतस्मिन्नेवकाले सर्वान् बहिः पतितान् स्तोकानुद्दिश्यानुमंत्रयेतेति अथ
पुरस्तात् प्रत्यगानयंतं पृच्छति कामधुक्षइतीति। अथस्तोकानामनुमंत्राणानंतरं वेद्युत्तरयोरंतराविहारदेशं दुग्धंत्राप
य्यस्थाल्याः पुरस्तात्प्राग्गे स्थित्वा प्रत्यक्भागस्थितां स्थालीं प्रस्थानयंतं स्थाल्यां पयः सिंचंतं दोग्धारं पृच्छति कामधुक्षइति
दोग्धायदि शूद्रः स्यात्तदान्यः परिकर्मी पय आनयेत् अत्रकामधुक्षः षड्वमानां सान्नाय्यगवीनां मध्ये कामधुक्षः इति प्रश्ना
र्थः प्रश्नस्यच एतावतैव समाप्तत्वादेतावानेवमंत्रः। अन्येत्वाहुः कामधुक्षः प्रणोब्रूहि इंद्राय हविरिंद्रिय[illegible]मित्या
च्छिद्रकमंत्रोत्र प्रश्नीकेन गृहीत इति। अमुमितीतरः प्रत्याहेति। इतरः पयस आनेता गंगा यमुना सरस्वती त्यादिनायज्ञमा
नेर्व्यवहारार्थं संकेतितेन गोनाम्ना अमूमिति शब्दस्थाने गंगा यमुनामित्यादि शब्दं प्रयुज्य प्रतिब्रूयात् ब्राह्मणे अमूमि ५९
तिनामगृह्णातीति नामग्रहणस्य विधानात् प्रतिवचनस्य एतावतैव समाप्तत्वात् एतावानेवमंत्रः अन्येत्वाहुः अमूं यस्यां दे

वानांमनुष्याणांपयोहित्तमिति आच्छिद्रकमंत्रेस्येवात्रापिप्रतीकेनग्रहणं एवंचभद्रमेवासांकर्म्माविष्करोतीत्यर्थवाद उपपद्य
ते मंत्रेणदेवमनुष्यसंबंधिहितपय आधारत्वस्यप्रकाशनादिति एवंसतिअमूमित्तिनामग्रहात्तीतिनामग्रहणविधिविरोधः
अर्थवादस्यान्यविषयत्वाभिधानात् मंत्रस्यापिविधानेवाक्यभेदात् गंगादिनाम्नापिवकुक्षीरप्रदानलक्षणयाभद्रकर्माविष्कारसंभवेनार्थवादोपपत्तेः श्वेतिमंतव्यं। तामनुमंत्रयेतसाविश्वायुरितिनी। तां प्रथमं दुग्धांसाविश्वायुरित्यनुमंत्रयेत्। द्वितीयमानयंत्तं पृच्छतिकामधुक्षइति। अमुमितसेवेतरःप्रत्याहेति। तामनुमंत्रयेतेसाविश्वव्यचाइतित्तृतीयमानयंतं पृच्छतिकमधुक्षइति। अमुमित्स्येवेत्तरःप्रत्याहेतितामनुमंत्रयतेसाविश्वकर्मेतीति। द्वितीयवारंदुग्धंपयोद्वितीयं एवंतृतीयमितिशिष्टानिस्पष्टानीति। अत्रप्रधानंगुणावृत्तिरितिन्यायेनप्रश्नप्रतिवचनाभ्यासेसिद्धेपिवचनं आपद्येकविग्रहाद्वावपिप्रश्नप्रतिवचनाभ्यासार्थंकेचितुप्रैषाभ्यासावचनंएकत्वपक्षेप्रश्नप्रतिवचनाभ्यासार्थंनित्यर्थमित्याहुः। तिसृषुदुग्धासुवाचं
विसृजतेयद्गुदुग्धीद्रायदेवेभ्योहव्यमाप्यायनांपुनः। वत्सेभ्योमनुष्येभ्यःपुनर्दोहायकल्पतामितिनीति। तिसृषुगोषुदुग्धासुवद्रुद्र

सु०द० ग्धीत्तिमंत्रोच्चारणेनवाचंवाङ्कुः नियमंविसृजतेउत्सृजेत्।अयंमंत्रोदुग्धगवीविषयः।इंद्रार्थंदेवार्थंचबहूपयोदुग्धिहेगोदुग्धी
५९ स्यामंत्रणेलोट्।तच्चदुग्धंपयःहव्यंहविर्भूत्वाधुनराप्यायतांभूयोपिवर्धतांउत्तरासांदोहनेन।अथवत्सेभ्योमनुष्येभ्यश्चपुन
स्ततोबहुतरस्यदोहायकल्पतांदोहसामर्थ्यंतवास्तुपयश्चतथाभूतमस्त्वितिमंत्रार्थः।एवंचमंत्रस्यदुग्धगवीविषयत्वपाप्रति
गवंमंत्रावृत्तिः।इत्थंमंत्रस्यदुग्धगवीविषयत्वएवतिसृषुदुग्धास्विस्यनुक्रमणमुपपद्यते।अन्यथावाचंविसृजतइत्येवावक्ष्यत्।ब
हुदुग्धीत्तिचैकवचनमेवंसत्युपपद्यते।केचित्तुदुग्धगवीविषयत्वेपित्रिरित्यवचनात्सकृदेवेत्याहुः।ब्राह्मणेतुबहुदुग्धींद्रायदे
वेभ्योहविरित्तिवाचंविसृजतइत्तिमंत्रांतरंविहितंतस्यानेनविकल्पः।एकार्थास्तुविकल्पेरन्नितिन्यायात्।केचित्तुइमंमंत्र
संप्रैषंदोग्धृविषयंब्राह्मणंचएतस्यैवमंत्रस्यप्रतीकेनविधायकमाहुः।भोदोग्धस्त्वमिंद्रायतद्वहुचरेभ्यश्चदेवेभ्यःपर्या
संबहुक्षीरंसंपादयित्वंतिस्रस्यउत्तरागादुग्धहव्यंहविःभूर्वदुग्धंपयःउत्तरासांपयसांपुनराप्यायतांवर्धतांपुनश्चवत्सेभ्यो ५९
मनुष्येभ्यश्चदोहायकल्पतांगवांसामर्थ्यंभवतुपयश्चसंभूतंभवत्वितिचव्याचख्युःएतस्मिन्दर्शनेत्रिराहत्रिषसाहिते

वाइति ब्राह्मणेनाऽरत्निविधाना त्रिरेव मंत्रः एतस्मिन्पक्षे मंत्रो विरुतावुत्तराभावेन प्रवर्त्तते अर्थाभावादिति वोध्यं। महें
द्रायेति वा ये दिमहेंद्रयाजीभवन्तीति। गत्तं विसृष्टवागन्वो नेरभ्य तूष्णीमुत्तरादोहयित्वा दोहनेपआनीय संक्षालयमानयति
संस्थ्यध्यमता वरी रूर्म्मिणी र्मधुमत्तमामं द्राधनस्यसात्तयइत्ती ति विसृष्टवाक्येन सविसृष्टवाकु अनन्वारभ्य अन्वारंभंवि
सज्यइरमुपलक्षणं आरदीमावास्य तूष्णीं शब्देन वागिंद्रियव्यापारो निवर्त्यते तेनोपसृष्टामित्याद यो मंत्रा न संति इत्यमुत्तरा
दोहयित्वा दोहने दुह्यते स्मिन्पय इति दोहनं दोहनपात्रं तच्च दारुमयं कामम्मेव दारुपात्रेण दुह्यादितिहि ब्राह्मणं दारुपात्रेण दो
ग्धी स्वापस्तंबः। तस्मिन्पय आनीय आसिच्य से दोहनपात्रं संक्षाल्य संक्षाल्यते दोहनमनेनेति संक्षालनं उदकं तत्साान्नाय्यस्थ
स्यामानयति सिंचति मंत्रेण। अत्रे द्वैधं। उत्तरासां दोहन इति विसृष्टवागनन्वारभ्योत्तरा दोहयेदिति वोधायने आनीयमाना एवा
नन्वारभे न वाचं यच्छेदिति कात्यइति। उत्तरासां निसृभ्यः प्रथमाभ्यः उत्तरासां सान्नाय्य दुहां दोहनविषये इदमुच्यते यथा कल्पसूत्र
९ विसृष्टवागनन्वारभ्योत्तरादोहयेत् गवानयनप्रभृतिस्था स्तां पय आसेचनांतं दोहनं तत्संत्रं वाग्यमनं आरत्त्तचविनाकार्यमितिवोध

स०द०

६० ना

यनस्यमतं आनीयमानाः सान्नाय्यदुहउपलक्ष्यपवित्रं चान्वारभेतवाचंच यच्छेत् अवाचंयमोनन्वारभ्योनराइत्तिब्राह्मणेन
उत्तरासांदोहनकालएववाग्यमेन्वारंभोत्सर्गविधानात् उपसृष्टांमेप्रब्रूतादितिसंप्रैषादितिचदोहनमिति ततः प्राकुगवानय
नकालेप्राप्तयोस्तदन्वारभ्यवाचंयमआस्त इतिविहितयोरन्वारंभवाग्यमनयोरुत्सर्गायोगादितिकास्यमतमिति। सान्नाय्य
दुहांगवामियत्ताविषयेकमीमांसा। अथेमाः सान्नाय्यदुहः षडवमाः समाम्नाताभवंतितिस्रश्चेतिस्रएवस्युः प्रथमांचोत्तमांवाचतु
र्विगृह्णीयादथचेद्वेएवस्यातामितरेतरांत्रिर्विगृह्णीयादथचेदेकैवस्यात्तामेवषट्कृत्वोविगृह्णीयात् विसृष्टवागनन्वारभ्योन
रादोहयेदितिअपरिमितानामेवेतउक्तंभवतीति। अथशब्दः सान्नाय्यधुग्विषयकविधिविशेषोपक्रमार्थः अथैषांमानः
प्रेरयति अथगाआयतीः प्रतीक्षतइतिसमाम्नाताइमाः सान्नाय्यदुहः षडवमाभवंति कामधुसइत्याह। तृतीयस्याइति
श्रुतिपर्यालोचनयाप्रश्नप्रतिवचनपूर्वकदोहने गवांत्रित्वावगमात् अवाचंयमोनन्वारभ्योतराइतिचवहुवचनस्यगवांत्रि ६०
त्वतोपिन्यूनतायामनुपपत्तेः अपरिमितत्वेप्युपपत्तेश्च षट् अवमास्वल्पतमायासांताः षडवमाः संपाद्यास्ताः सान्नाय्य

डुहन्तिस्त एव वसुश्चेत् प्रथमां वा नमां वा चतुः चतुर्वारं विगृह्णीयात् विच्छिद्य विच्छिद्य दोहयेत् एवं च इतरयोर्दोहनाभ्यां षट्दोहना
नि तत्र त्रीणि प्रथमतः समंत्रकाणि तत उत्तराणि तूष्णीमिति विभागः अत्र केचित् इदमुपलक्षणं यदि च तस्रो गावस्युस्तदा प्र
थमां वा नमां वा त्रिर्विगृह्णीयाद्यदि च पंच प्रथमां वा नमां वा द्विर्विगृह्णीयादिति पक्षयोरित्याहुः अथ द्वे एव स्यातां चेत् इतरेतरां ए
केकां त्रिर्विगृह्णीयात् अथ चेदेकैकैव स्यात् तदा तामेव षट्कृत्वो विगृह्णीयात् । अत्र सर्वस्मिन्नपि पक्षे आदितस्त्रीणि दोहनानि मंत्रे
ण कुर्यात् इतराणि तूष्णीं ननु विसृष्टवागनन्वारभ्योत्तरां दोहयित्वेति तिसृभ्य उत्तरासां गवां दोहने मंत्राभावविधानात् आदित
स्तिसृणां दोहनेन मंत्राभाव उपपन्न इत्यत आह विसृष्टवागनन्वारभ्योत्तरा दोहयतीत्यपरिमितानामेवेतदुक्तं भवतीति ब्राह्म
ए व णे अवाचंयमोनन्वारभ्योत्तरा इति वाक्येन यद्यपि तिसृभ्य उत्तरासां दोहनकाले वाग्यमनस्यान्वारम्भस्य च उत्सर्जनं नियतत्वेन प्रतीय
ते तथापि ब्राह्मणेनापरिमितानां गवां दोहन एव वाग्यमनस्यारम्भस्य च र्जनं उत्तरगोदोहनकाल एवेत्येतदुक्तं भवतीति अप
रिमितपक्षस्य मुख्यत्वात् । अत एवापरिमित एवावरुंध इत्यपरिमितार्थवादोप्युपपद्यते यदा तु ताश्चेत्तिस्र एव स्युरित्यादि पक्षप

स०द० रिग्रहः नदातिस्त्वेव चतुर्थदोहनप्रभृति प्रथमायां वा इतरस्मात् स्थालीमेव दोहनं नियम्यते। एवं ह्येकपक्षायोरपि वत्सेभ्यश्च वाए
६१ ताः पुरा मनुष्येभ्यश्चाप्यायंत। देवेभ्य एवेनाइन्द्रायाप्याययतीत्यस्मिन्न्नेनएना इति गोसंचारदेशं प्रति प्रेर्यमाणा गावः पराम
ृश्य इंद्राय इंद्रसंबंधि दधिपयो यागार्थं यावदपेक्षितं पयस्तदर्थं आप्याय पत्निवर्धयंतीति यजमानीयसंभाविनाशोषग
तीचैव इंद्रपदयो यागार्था पेक्षिता। दोहनसाकल्यश्रवणात् षडवमास्त दोहनेषु षड्दोहनानि तत्र समंत्रकाणि त्रीणि दोह
नानि अमंत्रकाणि च त्रीणि तानि सर्वाण्यपि ह्येकपक्षे ह्यपि कर्त्तव्यानीति भावः। यदि यजमान एकामपि सान्नाय्य दुहे
न लभेत किंतु दुग्धमेव लभेत तत्रेद्धं यं। दुग्धं लभमानस्यैव वत्सापाकरणप्रभृतीन् मंत्रान् साधयेदिति बोधायन आसेच
न प्रभृतीनिति शालीकिरिति। अयमर्थः। दुग्धं पय एव लभमानस्य प्राप्नुवतो यजमानस्य वत्सापाकरणप्रभृतीन् वाय
व स्थोपायवस्थेत्यादीन् मंत्रान् साधयेत् ब्रूयादध्वर्युः मंत्राणामदृष्टार्थत्वात् सत्याम्नानसामर्थ्यादिति बोधायनः शा ६१
लीकिस्त्वाह अनुष्ठेयार्थप्रकाशना मंत्राः। एवं च दुग्धमेव लभमानस्य प्राप्नुवतो यजमानस्य वत्सापाकरणप्रभृतेरर्थस्य

लुप्तत्वात् आसेचनप्रभृतीन् आसिच्यते संक्षालनमनेनेत्यासेचनः संपृच्यध्वमृतावरीरिति मंत्रः। नत्प्रभृतीन् लुप्ता
र्थान् मंत्रात्सादयेदिति। अथैनन्नस्योदनुद्वास्य शीती कृत्वा तिरः पवित्रं दध्नातनक्ति सोमेन त्वातनच्मीन्द्राय दधातीति। अथ
संक्षालनानयनानंतरं एनत्तु स्थाल्यामानीतं पयः तत्स्याद्दधियोग्यं यथा भवति तथा पक्वं कृत्वा उदगुद्वास्य शीतं कृत्वा तिरः
पवित्रं उदगग्रं तिरश्चीनं पवित्रं कृत्वा दध्ना आतनक्ति आलंचनेनं दधि करोति सोमेन त्वेति मंत्रेण। महेंद्रायेति वा यदि
महेंद्रयाजी भवति निर्व्याख्यातं। यावत्तां मूर्छयिष्यन्मन्यते तावदानयतीति। यावता दध्ना मूर्छयिष्यन् पयसो मूर्छो ध
नीभावं करिष्यन् करिष्यामीति मन्यते तावधेन केनचिदुद्वृतेन दध्ना सकृदेव आतनक्ति स्रुवस्य वा संख्या या वा अ
नुक्तेः। अत्रेदं यं आतंचन इति चतुर्थे स्रुव आनयेत् यावत्तां मूर्छयिष्यन्मन्यतेति बोधायनस्तृतीये स्रुव आनयेद्यावता
मूर्छयिष्यन्मन्येतेति शालीकिरिति त्रिभिः स्रुवैर्दध्यानीय चतुर्थे स्रुवे यावता दध्ना मूर्छयिष्यन्मन्येत तावद्दध्यानयेदि
ति बोधायनः [illegible] तृतीये स्रुव आनीत एव यावता मूर्छयिष्यन्मन्येत तावद्दध्यानयेदिति शालीकिः मतद्वयेपि चतुरानय

स्र·द·
६२

नंतुल्यंपरंतुआनयनेनसंहेवनेनविनैवेति भेदः कस्यो कस्येवा ना विशेषद्वयं कस्ये पक्षांतरं वा आलं चनार्थस्य दध्नेनाशो
विशेषः। द्वैधं। हविरातने खिति सहस्माह बौधायनो हविरालं चनालं चनान्येतानि भवन्तीत्य श्रोह शालीकि दधिरवत्व
तं चनार्थे द्रव्यं भवन्तीति तस्मिन्नविद्यमान एतेषामेकेनातं च्यादिति। अयमर्थः हविरातच्यनैतैनेति हविरातं चनं दधि
द भातनक्तीतिश्रुतेः तस्यैव आतंचनानि दधिभावसंपादकानि एतानि प्रत्यक्षब्राह्मण दृष्टानि पूतीकादीनि न हविषः
तथा च दध्नो नाशापहारादौ प्रति निधिस्तैः कार्य इति बौधायनः शालीकि स्वाह दधिरवत्वातं चनार्थे आतंचन विध्यर्थे
भातनक्ति सेंद्रत्वायेति ब्राह्मणे दृष्टे आतंचन साधनत्वेनावगतं भवति तथा च तेनैव हविरातं चनन्याय्यं तस्मिन्नसत्यर्थे
प्राप्तमन्यस्यातं चनस्य ग्रहणं तच्च वाक्यशेष श्रुतानां पूतीक पर्णवल्कादीनामेव ग्रहणं न्याय्यमिति तेषामेकेना
तंच्यादिति। अग्निहोत्रोच्छेषण मभ्यातनक्ति यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनु संतनोमीति अभि आतंची
तस्य पयस उपयस्त उपरि अग्निहोत्रोच्छेषणमातनक्ति आनयनेन प्रतिपादयति मंत्रेण अयमर्थो न्यायानुगुणः वसु ६२

तस्कहेतोर्द्वितीयाआतंचितस्यपयसउपरि अग्निहोत्रोच्छेषणे आतनक्ति अग्निहोत्रोच्छेषणसाधनकातंचनेनापिद
धिकुर्यादित्यर्थः । एवंसति सर्वथाग्निहोत्रोच्छेषणात्प्रमाद्येत् पुनरेवाग्निहोत्रं जुहुयादिति सूत्रानुगुण्यं संभवति उच्छेषणा
तंचनस्य प्रधानकर्मतयाउच्छेषणस्यनाशादौ पुनःसंपादनस्ययुक्तत्वादिति अत्रेदं ध्येयं । अग्निहोत्रोच्छेषणमभ्यातनक्तीतिसू
त्रं शालीकेरत्रोहस्माह बौधायनोग्निहोत्रोच्छेषणमानीयहविरातंचनमानयेदेवमस्योमयमभ्यातनक्तीति । अयमर्थः । अ
ग्निहोत्रोच्छेषणं आतंचितस्यपयसउपरि आतनक्तीति सूत्रं शालीकेर्मतं अत्र बौधायन आह दभ्यातनक्ति सेंद्रत्वायाग्नि
होत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संतत्या इत्यस्यायमर्थः सेंद्रत्वाय दभ्यातनक्ति दभ्यातनक्तीति यत्तदग्निहोत्रोच्छेषणोपय
स्थाल्यामानीयतस्योपरि एवं चाग्निहोत्रोच्छेषणस्यापि आतंचनसंस्कृतत्वेनेंद्रयागांगतया अव्यवधाय कृत्वादिदमा
तंचनं यज्ञस्य संतत्यै कृतं भवतीति तस्मादग्निहोत्रोच्छेषणं पयस्थाल्यामानीयहविरातंचनमानयेत् एवं सत्यस्य यज्ञस्य
यथाब्राह्मणं उभयमभि उभयस्याप्युपरि आतंचनेन उभयमभ्यातनक्तं भवतीति । अथैनदुदन्वतां कंसेन वा चमसेन वा पिद

माभिपूर्वमग्निहोत्रोच्छेषणं ४

का०६० धान्यदस्त मसि विस्मवे त्वायज्ञाया पिदधाम्यहं। अद्भिररिक्तेन पात्रेणयाः पूताः परिशेरत्त इतीति। अथ अग्निहोत्रोच्छेषणातंचनार्थं
६३ नरंए त सान्नाय्यं उदन्वता कमंडलुज लयुक्तेन कंसेन वा चमसेन वा अपिदधाति। अदस्तममसीति मंत्रेण। अयस्पात्रे दारुपात्रे वा
प आनीय अदस्तमसी०ऽत्रो रत्त इति तेनापिदधाती सापस्तंबः। अत्र द्वैधं। उदन्वतापिदधाती त्युदन्वता पिधाय सर्वां रात्रिं परिशाय
ये दिति बोधायन उदन्वतापिधाय सिक्तेनापो विदध्यादिति शालीकिरि-ति उदन्वतापिदधातीत्यस्मिन्विषये उदकयुक्तेन पात्रे
ण्यपिधाय पात्रस्थमुदकं सर्वां रात्रिं परिशाययेत्। स्थापयेत् याः शृताः परित्रो रत्त इति मंत्रवर्णात् उदन्व इयति आपो वै रक्षोघ्नी
रक्षसामपहत्या इति ब्राह्मणे नाभिहितस्य रक्षोहननस्य सर्वस्यां रात्रौ कर्तव्यत्वाच्चेति बोधायनस्य मतं उदकसंबंधिना पात्रेणापिध
नस्य हितत्पलमभिहितं ब्राह्मणे तस्य च पिधानस्यानुष्ठाने सत्यनंतरं मुदकधारणस्य न प्रयोजनमस्तीति सिक्तेनापो पिदध्या
दिति शालीकिरिति। तदुपरि वनिदधाति यत्र गु मं मन्यते विदमोहव्यं रक्षस्येतीति। तदुन्नतापिहितं सान्नाय्यं उपरि व उपर्ये
व शिक्यादौ अनधः सादयती तिश्रुतेः निदधाति स्थापयति यत्र उपरिदेशे निहितं पयः गुप्तं सु [illegible] रक्षि [illegible] तं भवति [illegible] तो ६३

[illegible] मन्यते तत्रैवोपरिगुप्तं दध्याद्दिह्मोहव्यमिति मंत्रेण। एतस्मिन् काले दर्भैः प्रातर्दोहायवत्सानपाक
रोतिवृक्षिभिमिति एतस्मिन् उपरि सान्नाय्यतिधानानंतरकाले प्रातर्दोहार्थं दर्भैर्वत्सानपाकरोति मातृभ्यः पृथक् कुर्यात् मं
त्रवर्जं यद्यपि सायंदोहे इशाखाया विनियुक्तत्वेपि यत्पर्णशाखया वत्सानपाकरोतीति वचनस्य सायंदोह प्रातर्दोहोभयसा
धारणत्वयासायंदोहस्येव प्रातर्दोहस्यापि शाखयैव वत्सापाकरणं न्याय्यं तथापि दर्भैरिति वचनं तथा शाखांतरे दर्शनादित्यवगं
तव्यं पर्णलरूणां निवपन इति द्वैधसूत्रे पर्णशाखयावत्सानामपाकरणं बोधायनमत इस्फुटं आपस्तंबोपि तयेव शाखया द
र्भैर्वा सायंदोहवत्प्रातर्दोहाय वत्सानपाकरोतीत्याह। अत्र ब्राह्मणे न उपस्तीर्यः पूर्वश्चाग्निरपरश्चेत्याहुरित्यग्नीनां परिस्तरणं
विधाय प्रशंसा कृता। अतनोक्तमेव परिस्तरणं कर्तव्यं अत एव न कं परिस्तीर्णा एवैतेग्नयो भवंतीत्यनुपदमेव वक्ष्यति। अ
त्रैद्वैधं। अग्नीनां परिस्तरण इति सूत्रमाचार्ययोरत्रोहस्माहोपमन्यव उपवसथ एवाग्नीन् यथोत्पन्नं परिस्तीर्णा एवैतेग्नयो भवं
तीत्यनुपदमेव वक्ष्यति स्तृणीयादेवं हि ब्राह्मणं भवत्युपास्मिं च्छ्रोपस्रमाणे देवता वसंतीति य एवं विद्वानग्निमुपस्तृणातीति। अग्नी

क०द०
६४

नांपरिस्तरण विषये इद मुच्यते नक्तं परिस्तीर्णा एवैते ग्नयो भवंति यद्युवा अपरिस्तीर्णा भवंस्ताहवनीये भवत्यग्र इत्यादि सूत्रम
चार्ययोः शालीकि बोधायनयोः नक्तं वा परेद्युर्वेत्यर्थः। औपमन्यवस्त्वाह उपवसथ एव नक्तं न विकल्प्य ।।उत्पन्नं गार्हपत्यादि क्र
मेण अग्नीन् परिस्तृणीयाद्धि यस्मात् एवं नक्तं परिस्तरणीय एवमित्यादि ब्राह्मणं भवति य एवं विद्वानग्निमुपस्तृणाति अस्मि
न् अग्नीनां परिस्तरणं कर्त्तव्यमिति श्वो यक्ष्यमाणे यजमाने यजमानस्य समीपे देवता उपवसंतीति ब्राह्मणस्यार्थः यथोत्पन्नमिति
सूत्रेण अग्नीनामुत्पत्तिक्रमेण परिस्तरणे वचनमनुमीयते उपस्तीर्यः पूर्वश्चाग्निरपरश्चेत्यत्र क्रमो न विवक्षितः चा चाः क्रम
वर्त्तित्वेनयो गे पद्यानुपपत्त्या क्रमस्यानादर्त्तव्यत्वेन नानावैतत्त्रविवक्षानुपपत्तेरिति अत्रानानन्त्रान विषये उपवसथे रात्रौ ब्राह्म
णे यजमानेन ग्राम्याश्च पशवो वरुंध्या आरण्याश्चेत्याकुर्य ग्राम्यानुपवसतीति तेन ग्राम्यानवरुंधे यदारण्यस्याश्नाति तेना
रण्यान् यदनाश्वानुपवसेत् पितृदेवत्यस्याद्दारण्यस्याश्नातीत्यारण्याशनं अपोश्नातीत्यनशनं यदनाश्वानुपवसं ति
वज्ञेणैव साक्षात् स्कधं श्नात्तव्यं हंतीत्यपयस्वेति पक्षत्रयं विहितं इदं पक्षत्रयमपि मत्तभेदं परिग्रहार्यदर्शितं द्वेधे। अ ६४

शनाशनइत्यारण्यं चापश्चाश्नीयादिति बोधायनोपएवेति शालीकिर्नाप्यपश्चैत्यौपमन्यव इति स्पष्टं। अत्र यद्यपि आरण्या
शनपक्षे अपांसमुच्चयो न दृश्यते ब्राह्मणे तथापि आरण्यस्य कठिनद्रव्यतया अपां साहित्येन विना प्राशनानुपपत्तेरयमर्थप्रा
प्तः समुच्चयस्तस्येदं वचनमिति आपस्तंबस्त्वाह न तस्य सायं येन प्रातर्यक्ष्यमाणस्या दारण्याद्योपवत्स्यन्नपो श्नाति न चा इति। अ
स्यां रात्रौ आहवनीयागारे यजमानः शेते गार्हपत्यागारे वेत्याह॥ बोधायनकृते सूत्रे तृतीयः पटलोऽधुना। व्याख्यातो विबुधाः सर्वे
तुष्यंतु प्रीयतां शिवः॥ खंडः।५॥ अथ प्रातर्हुते ग्निहोत्रे हस्तौ संमृशते कर्मणे वां देवेभ्यः शकेयमितीति। अथ प्रातर्दोहाय वत्सापा
करणानंतरं अमावास्यायां पौर्णमास्यां तु वेदकरणानंतरं आपस्तंबस्त्वाह उदित आदित्ये पौर्णमास्यां त्वन्वाधान परिस्तरणोपवा
साः सद्यो वा सद्यस्कालायां क्रियत इति प्रातः उदयानंतरं पौर्णमास्यमावास्ययोः आपस्तंबस्त्वाह उदित आदित्ये पौर्णमास्यास्तंत्रं प्र
क्रमयति प्रागुदयादमावास्याया इति हुतेग्निहोत्रे नंतरं पूर्ववद्धस्तौ संमृशते व्यत्यययेनात्मने पदं कर्मणो वामिति अत्र द्वैधं। पाणिसं
मर्शन इत उत्तरेणाहवनीयं तिष्ठन् पाणि संमृशेदिति बोधायन उत्तरेण गार्हपत्यमिति शालीकिरिति। स्पष्टं। कृत्स्नोक्तस्यैवमौप्र

सु०द०

६५ न

कारो अत्र शाखांतरं मूलं। नक्तं परिस्तीर्णा एवैतेग्नयो भवंति यद्युवा अपरिस्तीर्णा भवंत्याहवनीयमेवाग्रेपुरस्तात्पस्तृणात्यथद
क्षिणतोथपश्चाद्थोत्तर एवमेवान्वाहार्यपचनं परिस्तृणाति एवं गार्हपत्यमिति। नक्तमेव परिस्तीर्णाः उपास्मिं दृ्ढोयक्ष्यमाणइत्य
त्र एवशब्देन परिस्तरणं कृतवतो विवक्षितत्वात् अयं नियमः एतेग्नयो भवंति उपस्तीर्यः पूर्वश्चाग्निरपरश्चेत्याकृ रित्यत्रापरशा
ब्दे एकवचनेन द्वित्वं विवक्षितं व्यत्ययानुशासनादितिभावः यद्युवा अपरिस्तीर्णा भवंति य एवं विद्वानग्निमुपस्तृणातीतो निर्दिश्य
विज्ञानपूर्वकस्तरणकर्तुरेवेउपास्मिन्नित्यत्रापि अस्मिन्निति शब्देन विवक्षितत्वात् नक्तपरिस्तरणस्य परामर्शाभावाद्विकल्पः आ
हवनीयमेवाग्रे पुरस्तात्परिस्तृणात्यथदक्षिणतोथपश्चादथोत्तरत इति अत्रापस्तंबे विशेष उक्तः। उदगग्रैः प्रागग्रैश्चदर्भैरग्नीन्प
रिस्तृणात्युदगग्राः पश्चात्पुरस्ताच्चेति दक्षिणा उपरि उत्तरा अधस्तात्पश्चिमाः प्राच्या अप्युत्तरेषामुपरि आचारात् एवमन्वाहार्यप
चनमेवं गार्हपत्यं दक्षिणाग्रैः परिस्तरणानंतरं गार्हपत्यस्यस्तरणमित्यत्र शाखांतरं मूलं परिस्तरणादीनां परिभोजनीयेभ्यो दर्भाग्रायाः
भारद्वाजस्त्वाह अग्नीन् परिस्तृणाति पूर्वांश्चापरांश्च प्रागग्रैर्दर्भैरपि वोदगग्राः पश्चात्पुरस्ताच्च भवंतीति। सत्याषाढ आह दर्भैरग्नीन् ६५

परिस्तरणात्साहवनीयं परिस्तीर्य गार्हपत्यमथ दक्षिणाग्निं गार्हपत्यं वा परिस्तीर्य दक्षिणाग्निमथाहवनीयमिति। अत्रेद्वैधं। अग्नीनां परि
स्तरण इति सूत्रं शाइति सूत्रं शालीकेराख्यातं तयोपमन्यवस्यात्रोह स्माह बोधायनो गार्हपत्यमेवाग्रे पुरस्तात्परिस्तृणात्यथ दक्षिणतोथ पश्चा
दथोत्तरत एवमेवान्वाहार्यपचनं उपरिस्तृणीयादेवमाहवनीयमिति। नक्तं परिस्तीर्णा एवैतासादि कल्पोक्तं उपवसथेन क्तं वा यजनीयेना
इति विकल्प सहितं आहवनीयादेस्तरणं शालीकेर्मतं औपमन्यवस्यमतंतु उपवसथ एव नक्तं यथोत्पन्नं गार्हपत्यदक्षिणान्वाहवनीया
नाक्रमेण परिस्तरणमित्याख्यातं बोधायनस्त्वाह नक्तं वा यजनीये वेति काले विकल्प एव क्रमस्तु गार्हपत्यदक्षिणाग्न्याहवनीयानामि
ति। अथाग्रेण गार्हपत्यं तृणानि संस्तीर्य तेषु द्वंद्वं न्यंचि यज्ञायुधानि संसादयन्ति स्फ्यं च कपालानि चाग्निहोत्रहवणीं च शूर्पं च कृष्णाजि
नं च शम्यां चोलूखलं च मुसलं च दृषदं चोपलां च जुहूं चोपभृतं च स्रुवं च ध्रुवां च प्राशित्रहरणं चेडापात्रं च मेक्षणं च पिष्टोद्वपनीं
च प्रणीताप्रणयनं चाज्यस्थालीं च वेदं च दारुपात्रीं चेति। अथाग्नीनां परिस्तरणानंतरं गार्हपत्यमग्रेण प्राग्भागे तृणानि परिस्तरण
भोजनीयेभ्यो गृहीत्वा संस्तीर्य सम्यक् स्तीर्त्वा द्वंद्वं द्वयं द्वयं न्यंचि अथो बिलानि यज्ञायुधानि यज्ञसाधनानि पात्राणि संसादयन्ति सम्यक्स

सु०द०
६६

क्षाल्य। स्थापयति पात्राणि प्रक्षाल्य द्वंद्वं प्रयुनक्तीति भारद्वाजः कारितानीत्यत आह स्फ्यं चेत्यादि स्फ्यादीनां लक्षणं सूत्रकारो वक्ष्य
ति आपस्तंबस्त्वत्राह खादिरः स्रुवः पर्णमयी जुहूराश्वत्थ्युपभृद्वैकंकती ध्रुवैतेषां वा रक्षणामेकस्य स्रुवः कारयेन्नू वाहुमात्र्योरत्नि
मात्र्यो वाग्राग्रा स्वक्तो विलाहसमुख्यः स्फ्यः शम्याः प्राशित्रहरणमिति खादिराणान्यहोमार्थानीति नन्विमान्येकादश द्वंद्वानि किमि
त्यन्येव संसाध्यानीत्यत आह। यानि चान्यानि पात्राणि योक्त्रं च वेदपरिवासनं च धृष्टिं चेध्मप्रवश्चनं चान्वाहार्यस्थाली मदंतीच
तान्यपि एवं स्फ्यादिवत् द्वंद्वं संसाद्येत्यर्थः। द्वंद्वंन्यंचि यज्ञायुधानीत्येव सिद्धे पात्राणामनुक्रमणं द्वंद्वविशेषलाभार्थं यानि चान्य
नीत्यनुक्तानां योक्त्रादीनां संसादनार्थं यानि चान्यानि पात्रा णीत्येतावतैवानुक्तसंग्रहे सिद्धे तान्येवमेव द्वंद्वं विशेषलाभार्थं संसाद्येति
परिभाषार्थं सर्वत्र सानाय्यपात्रादिष्वन्यत्र द्वंद्वाद्युपसंग्रहार्थं अत्र संसादय तीत्यनुवृत्त्या संसादनावगमसंभवे संसाद्येति तस्य ल
वं तेनानुवादः ब्रह्माणं दक्षिणत उपवेशयेत्यादि समनंतरसूत्रोक्तात्पूर्वं किंचित्कुर्यादित्यवगमयति तच्च धर्मप्रश्ने यदुक्तं दक्षिणेन
हवनीयं ब्रह्मायतनम् अपरेण यजमानस्योत्तरां श्रोणिमुत्तरेण होतुरुत्करम् अग्नीध्रस्य जघनेन गार्हपत्यं पत्न्यास्तेषु काले काल ६६

एवं दर्भसंस्तरणान्तीति ब्रह्मादीनां काले आसनकल्पनं तत्र ब्रह्मयजमानयोः कार्यमित्तरेषां च तत्तत्कार्यकाल इति आपस्तं
बस्तु पात्रासादनात्पूर्वं परिस्तरणमाम्नायाह दक्षिणेनाहवनीयं ब्रह्मयजमानयोरासने प्रकल्पयति पूर्वं ब्रह्मणोपरं यजमा
नस्येति । अत्रेदं ध्येयं । पात्राणां सादनमिति सूत्रं शालीके रत्नोहस्माह बोधायन उत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु पात्राणि सा
दयेदिति उत्तरतो ग्न्यगारस्य पात्राणि सादयेत् तेषां यथार्थमाददीतेति राथीत्तर इति । पात्राणां सादने अग्रेण गार्हपत्यमिसादि
कल्पसूत्रं शालीके मतं उत्तरेण गार्हपत्यमिति बोधायनः राथीतरस्त्वाह अग्न्यगारस्योत्तरतः पात्राणि सादयेत् तेषां मध्ये य
थाप्रयोजनमपेक्षितं पात्रमाददीतेति । अत्र कर्मान्ते । द्वादश द्वंद्वानि दर्शपूर्णमासयोस्तानि संपाद्यानीति स्फ्यश्च कपालानि चे
ति पंच वत्सं चोपावसृज उखां चाधिश्रयणीति सप्त तानि द्वादशाम्नायामेवेत्तत्संभवतत उपपद्यते नासन्नयत इति अयमर्थः
द्वादश द्वंद्वानि दर्शपूर्णमासयोस्तानि संपाद्यानी त्याह कुर्वत्सं चोपावसृज उखां चाधिश्रयत्यव च हंति दृषदौ च समाहंत्यधि च वपते
कपालानि चोपदधाति पुरोडाशं चाधिश्रयत्याज्यं च स्तंब यजुश्च हरत्यभि च गृह्णातीति वेदिं च परिगृह्णातीति पत्नीं च सन्नह्य

सु०द०
६७

त्ति प्रोक्षणीश्चासादयत्याज्यं चेति ब्राह्मणेन गां दोग्धुं वत्सोपसर्जनमेकं कर्म दोहनेन संपादितं क्षीरं धारयितुं पीठस्थापनमपरं
तदेतदुभयमेकं द्वंद्वं तथा व्रीहीणामवघातो दृषदुपलयोः पात्राणां तरेण तमाघात इत्येतदुभयं द्वितीयं एवं द्वादश कर्मद्वंद्वा
न्यध्वर्युणानुष्ठेयतया विहितानीति न्यायविदः। तेषां द्वादशानां द्वंद्वानां मध्ये यच्च द्वंद्वानि स्फ्यश्च कपालानि चाग्निहोत्रहवणी च
शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च मुसलं च दृषच्चोपला चेति पूर्वानुवाके नुक्रांतानि तत्रापि इदं स्फ्यस्य संसादनमे
कं कर्म इदं कपालानां संसादनमपरं एतदुभयमेकं द्वंद्वं एवं प्रकारेण पंच द्वंद्वानि एतानि वै द्वादश द्वंद्वानि दर्शपूर्णमासयोरित्यत्र एत
द्वेन सर्वनाम्ना अपेक्षावशेन च पूर्वशब्दोपाभानामेव परामर्शस्यावश्यवक्तव्यत्वात् प्रकृते च वत्सोपावसर्जनोखादिश्रयणादीनि
सप्त तान्याह स द्वादशामावास्यायामेव एतद्द्वादशद्वंद्वसंपादनं कार्यं न पौर्णमास्यायां तत्रापि सन्नयत एवैतदुपपद्यते अतो न
सन्नयतोपि कार्यं दर्शपूर्णमासयोरिति द्विवचनं तु अमावास्यामात्रे नुष्ठाने नोभयत्रापि य एवं संपाद्य यजते प्रजाते नैव यज्ञेन
यजते प्र प्रजया च पशुभिर्मिथुनैर्जायत इति स्तुतफलजनकत्वाभिप्रायमिति। ब्रह्माणं दक्षिणत उपवेशयेति। दक्षिणत आह ६७

वनीयात्‌ब्रह्मणंतत्रैवासनक्लृप्तेः इदमुपलक्षणंयजमानेनापीदानींस्वायतनउपवेशनंकार्यंप्रयोगकालेतत्रैवस्यातव्यत्वात्
अत्रद्वैधं। ब्रह्मणउपवेशनइतिव्यपेत्यदक्षिणेनाहवनीयमुपविशेदितिबोधायनोव्यवेत्यैवदक्षिणेनाहवनीयमितिशाली
किरिति। व्यवेत्यजघनेनाहवनीयमग्नीनांव्यवायेनदक्षिणातिक्रम्यअव्यवेत्यदक्षिणतउपविशेदितिबोधायनोव्यवेत्यैवद
क्षिणतइतिशालीकिरिति। स्पष्टं। धर्मप्रश्नेपिअग्रेणाहवनीयंब्रह्मयजमानोप्रपद्येते जघनेनाहवनीयमित्येकइति। ब्रह्म
णंदक्षिणतउपवेश्येत्सादौसर्वत्रापिक्ता प्रत्ययांतस्यप्रयोगोत्रपदार्थानांकर्मांगमितिख्यापनार्थः पृष्ट्यांस्तृणातिसंततांगा
र्हपत्यादाहवनीयात्‌॥६॥ यज्ञस्यसंततिरसियज्ञस्यत्वासंततैस्त्वायज्ञस्यस्तृणामीति। पृष्ट्यापृष्ठमर्घ्यप्रदेशः तत्रसाधुरश्च
यदक्षिणोभागोयमुत्तरइतिनिर्णयेमध्यदेशकार्येसाधुः समर्थाः पृष्ट्यासाचेहतृणसंततीतिपृष्ट्यातृणानामितिद्वैधेदर्शनात्तृ
परिभोजनीयेभ्यस्तृणात्सारायतेगार्हपत्यादारभ्यहवनीयावधिसंततां अविच्छिन्नांपृष्ट्यामध्यदेशज्ञापकांतृणसंततिंस्त
रणेनकुर्यात्‌यज्ञस्येतिमंत्रेण। अत्रद्वैधं। पृष्ट्यावेस्तरणइतिसूत्रंबोधायनस्ययथाकल्पसूत्रंकर्तव्यमेवस्तरणंशालीकिस्त्वाह

स्तृणामिसंततसेत्

क०द० सोम एव पृष्ठ्यास्तरणं न दर्शपूर्णमासादिष्विति अत्र शाखांतरं मूलं द्रष्टव्यं। बर्हिषः पवित्रे कुरुते प्रादेशमात्रे समे अप्रच्छिन्ना
६९ ग्रे अनखच्छिन्ने इमौ प्राणापानौ यज्ञस्यांगानि सर्वशः। आप्याययंतौ संचरतां पवित्रे हव्यशोधने इत्नीति। बर्हिःस्तरणार्थात् द्वे ष
पन्ये नुपयुक्ता इति शालीकिमते दर्शनेन सूत्रमन्ते उपयुक्त बर्हिष एव पवित्रकरणस्य युक्तत्वा प्रादेशः प्रमाणमानयोः प्रादेशमात्रे स
मे परिणाहतः दैर्घ्य साम्यस्य पूर्वेण सिद्धेः अप्रच्छिन्ने अग्रे ययोस्तेन स व्यतिरिक्तेन छिन्ने पवित्रे कुरुते इमौ ∴ प्राणापानाविति।
अत्र द्वैधं। पवित्रयोः करण इति सूत्रं बोधायनस्य पृष्ठ्यात्तृणानामिति सोपमन्यवो येन्येनुपयुक्ताः कुशास्तेषामिति शालीकि
रिति। पवित्रयोः करणे सूत्रं बर्हिषः पवित्रे कुरुते इति कस्य सूत्रं बोधायनस्य मतं स्तरणार्थात् बर्हिषस्तेषां कर्मार्थत्वात् पृष्ठ्य
तृणानां संबंधिनां तृणानां मध्ये द्वे तृणे पवित्रे कुरुत इत्सोपमन्यवः अनुपयुक्ताः कर्मणि ये कुशास्तेषां मध्ये द्वे कुशे पवित्रे कुरु
त इति शालीकिरिति। अत्र कर्मांतं। किं देवत्य उ खलु पवित्रे किं पूते भवत इति वैष्णवी वायुपूते इति ब्रूयादनखच्छिन्ने स्यातामिति। ६९
पवित्रे किं देवत्ये किं पूते भवत इति प्रश्नः वैष्णवी वायुपूते इत्युत्तरं वैष्णवे इति वक्तव्ये इकारांतश्छांदसः प्रयोगोयं पवित्रे स्थो वै

ष्णवीस्थो यज्ञियेस्थो वायुपूतेभ्यो विष्णोर्मनसापूतेभ्यो यज्ञस्य पवनेस्थ इति मंत्रस्य परप्रत्यभिज्ञानाय तथा च मंत्रलिंगात् विष्णुदेव
त्येवायुपूते इत्यर्थः। इदं पवित्रयोर्विष्णोर्दैवत्यत्वं वायुपूतत्वं च प्रयोगकाले अध्वर्युणा अवगंतव्यमिति विधानमत्र क्रियते अनुष्ठा
नप्रयोजकत्वात् कल्पसूत्रस्येत्यवगंतव्यमिति। गतमन्यत्। अथैनेअद्भिरनुमार्ष्टि पवित्रेस्थो वैष्णवीस्थो यज्ञियेस्थो वा
युपूतेस्थो विष्णोर्मनसापूतेस्थो यज्ञस्य पवनेस्थ इतीति। अथ पवित्रकरणानंतरं एने पवित्रे अद्भिरनुमार्ष्टि पवित्रेस्थ इति
मंत्रेण। पवित्रयोर्ग्रंथिकरणमाचारात्। अथोत्तरेण गार्हपत्यमुपविश्य कंसं चाचमसं वा प्रणीताप्रणयनं याचतीति वाग्राद्दोगो
दोहनादि सूचयति। अथ पवित्रयोरनुमार्जनानंतरं प्रणीताः आपः प्रणीयंते अनेनेति प्रणीताप्रणयनं स्पष्टमन्यात्। तस्मिंस्तिरःप
विमपे आनयमाह ब्रह्मन्नः प्रणेष्यामि यजमानवाचं यच्छेतीति तस्मिन् प्रणीताप्रणयने तिरःपवित्रे यस्मिन् कर्मणि तद्यथाभव
तितथा अप आनयन्नाह ब्रह्मन्नपः प्रणेष्यामीति मंत्रं यजमानवाचंयच्छेति संप्रैषाद्यजमानेन वाग्यमनं कार्यं हविष्कृतावाचं वि
सृज्याज्यानी र्जुहुयात् हविष्कृतावाचं विसृज्योत्तरमनड्वाहं विमुंचतीत्याहो आध्वर्यवसमानं कर्तृकत्व दर्शनात् अध्वर्योर्वाग्यमः अ

म०द० ध्वर्योरपिवाग्यमनारंभस्यायमेवकालः तथाचापस्तंबः प्रणीतास्तप्रणीयमानास्ववाचंयच्छतेध्वर्युश्चयजमानश्चाहविष्णुतद्
६९ न्तिनुदृढ़ित्वावाचंयच्छन्तीति । ब्रह्मणेयजमानस्ययानस्यवाग्यमनेप्रयत्नस्यैवमंत्रविधानेनवाग्यमनविच्छेदाशंकायामवि
दार्थसुक्तेनारंभायानस्यप्रेषणजातत्वात् वाग्यमनंचाहविष्णुतः आपस्तंबेस्तथाविधानात्ब्राह्मणस्तसवाचंयमोभव
न्तिप्रणीतास्तप्रणीयमानास्वाहविष्णुतइतिब्रह्मत्वप्रकरणेअभिधानात् ब्रह्मणोपिवाग्यमनं । अत्रेदंध्येयं । सवाचंयमो
भवतिप्रणीतास्तप्रणीयमानास्वाहविष्णुतइस्यंतर्हन्वेतेषुसंपातेषुसंभाषेतेतिबोधायनोविसृष्टवागितिशालीकिरि
न्ति । सवाचंयमोभवतिप्रणीतास्तप्रणीयमानास्वाहविष्णुतइतिब्रह्मणोविहितमाहविष्णुतोवाग्यमनंसंपातेषुप्रकृतया
गानुष्ठानोपयोगितयाअवश्यापन्नेषुसंवादनेषुअंतर्हेतुः हन्वोः अंतर्हनुविभक्त्यर्थेऽव्ययीभावः । मुखांतर्गतमेवसंभाषे
तसंभाषणमतिमंदंकुर्यात् अर्थगरीयस्त्वादितिबोधायनोविसृष्टवागेवसंभाषेतकार्यगरीयस्त्वादेवमुखान्तर्गतमेवसं ६९
भाषेतेतिवचनाभावादितिशालीकिरिति । सवाचंयमइतिब्रह्मत्वसूत्रोदाहरणात् अध्वर्यवेएतंनिरूपणाच्चअध्वर्युन्नत्य

विषयोयं विचार इति ध्येयं। प्रस्तुतः समं प्राणेर्धारयमाणो विषिंचन्नुद्धृत्योत्तरेणाहवनीयं दर्भेषु सादयित्वा दर्भैः प्रच्छाद्येति प्र
स्तुतः ब्रह्मणा अनुज्ञातः अध्वर्युः अद्भिः पूरितं अविषिंचन्निति विशेषनिषेधस्वारस्यात्पूर्णपात्रमिति सिद्धवदं तेवचनाच्च प्र
णीताप्रणयनं कंसं चमसं वा प्राणैः समं नासिकया तुल्यं धारयमाणो विषिंचन् विशेषमकुर्वन्नुद्धृत्योत्तरेणाहवनीयं दर्भेषु साद
यित्वा दर्भैः प्रच्छाद्येति। अत्र कर्मान्तं। प्रणीताः प्रणयत्यध्वर्युः अनया यः प्रणयामीति मंत्रेण प्रणयेत् अनयेति करणत्वेनानि
र्दिष्टां पृथिवीं मनसाध्यायेत् मनसा प्रणयतीयं वै मनो नयेयेनाः प्रणयती हि ब्राह्मणं किंच प्रणीता आहवनीयं प्राप्याणमिध्मा
बर्हिरित्येतानि समानि तुल्यपंक्तीनि कुर्यात् यज्ञस्य शिरस्स्थानीयमित्येतदाचक्षत इत्यापस्तंबः। उपविलं च मसं पूरयित्वा प्रोक्ष
णीवदुत्पूयाभिमंत्र्य ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छेति संप्रेष्यतीति पवित्रमादाय प्रदक्षिणमावृत्य प्रत्यञ्चं दुत्याद त्तेद
क्षिणेनाग्निहोत्रहवणीं सव्येन शूर्पं वेषाय त्वेति। प्रणीतानां दर्भैः प्रच्छादनानंतरं प्रदक्षिणमावृत्य दक्षिणपार्श्वेन पर्यावृत्य प्र
त्यङ्मुख आवृत्य दक्षिणेन हस्तेनाग्निहोत्रहवणीमादत्ते सव्येन शूर्पं वेषाय त्वेति मंत्रस्य शूर्पादाने मंत्रः। वेषाय हस्तेन दादत्त इत्य

क०द थवाद्गनसएत ज्ञे नेनपुंसककलिंगे नभूर्पस्छपरामर्शात् सव्येनश्रूर्पंवेषाय त्वेत्तिसूत्रेमंत्रस्यश्रूर्पानंतर्याच्चकस्यांनरेवेषायत्वे
७० त्तिमंत्रस्यश्रूर्पादानएवविनियोगाच्चयानस्यत्यासिरक्षायत्वेतिअग्निहोत्रहवणीमादत्ते वेषायत्वे त्तिश्रूर्पमित्यापस्तंवः॥ देवस्य
त्वासवित्तुः प्रसवेश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यामाददेयानस्यत्यासीत्यग्निहोत्रहवणीमादत्तेवेषायत्वेत्तिश्रूर्पमित्तिसत्याषाढः।अन्ये
तुउभयार्थोमंत्रइत्याहुः।गार्हपत्येप्रतित्तपत्तिप्रत्युष्टंरक्षः प्रत्युष्टाअरात्तयइत्तित्रिरित्ति।उभयं।अथजघनेन गार्हपत्यमग्निष्ठमनोभ
वंत्तीत्तिअग्नेोअग्निसमीपेत्तिष्ठतीत्यग्निष्ठंअनः जघनेनपश्चिमेन गार्हपत्यंभवत्तिप्रागीषत्वर्थंभवत्तीत्तिगम्यतेत्तस्यानोयुगस्यउ
त्तरांधुरंउत्तरंभागंएत्यत्तांधुरमभिमृशत्ति धूरसीत्तिमंत्रेणअत्रापस्तंवः।अपरेणगार्हपत्यंप्रागीषमुदगीषमुदगीषंवानडुद्युगंश
कटमवस्थितंभवत्तिव्रीहिमयवमद्धाधूरसीत्तिदक्षिणांयुगधुरमभिमृशत्युत्तरांवेत्ति।अनेोभिमंत्रयते त्वंदेवानामसिसस्नितमं
प्रितमंजुष्टतमंवन्हितमंदेवहूतममहुतमसिहविर्धानंदृंहस्वमाह्वारित्तित्ति।अत्तोअग्निष्टंशकटमभिमंत्रयत्तेउत्तरामीषामाल
भ्यजपत्तित्वंदेवानामसीत्ति।अत्रापस्तंवः।त्वंदेवानामसिसस्नितममित्युत्तरामीषामालभ्यजपत्तीत्ति।अथविष्णोःक्रमोसीत्तिदक्षिण ७०

४ त्तितस्येसोत्तरांधुरमभिमृशत्ति।।७।।धूरसिधूर्वधूर्वंतंधूर्वतंयोस्मांधूर्वत्तितंधूर्वयंवयंधूर्वामइत्तीत्ति।।अथश्रूर्पाग्निहोत्रहवण्योगार्हपत्येप्रतित्त
पनानंतरंजघनेनगार्हपत्यमग्निष्ठमनोपस्तव व्रऊ५

मक्षपालिं क्रमित्वाभ्यारुह्य प्रउगे भ्रूर्पं निदधातीति। अथ अनसोभिमंत्रणानंतरं अनसो दक्षिणपार्श्वं गत्वा दक्षिणं दक्षिणस्यां
दिशि विद्यमान मक्षपालिं अक्षाग्रं क्रमित्वा संक्रम्य आरुह्य शकटं प्रउगे शकटस्य पूर्वार्धे शूर्पं निदधातीति। शूर्पे स्रुचं स्रुचि
पवित्रे इति। स्रुचि अग्निहोत्रहवणीं पवित्रे पूर्वकृते निदधातीत्यनुषंगः। अथ पुरोडाशीयान् प्रेक्षते मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा
संविक्था मा त्वा हिंसिषमिति। अत्र स्रुचि पवित्रद्वयानिधायानंतरं पुरोडाशीयान् पुरोडाशीयार्थान् व्रीहीयवान् तत्र विद्यमा
नान् प्रेक्षते मित्रस्य त्वेति मंत्रेण। उरुवातायेति तृणं वा किंशारुं वा निरस्यतीति। उरुवातायेति मंत्रेण तत्रस्थं तृणं किंशारुं वा संवा नि
रस्येत्। अथ उपस्पृश्य दशहोतारं व्याख्यायेति। अथ तृणस्य किंशारुणो वा निरसनानंतरं अप उपस्पृश्य दशहोतारं व्याख्याय उ
क्ता। चित्तिस्रुक्। चित्तमाज्यं। वाग्वेदिः। आधीतं बर्हिः। केतो अग्निः। विज्ञातमग्निः। वाक्पतिर्होता। मन उपवक्ता। प्राणो हविः। साम
ध्वर्युः। इति दशहोता। वाचस्पते विधे नामन् विधेम ते नाम। विधेस्त्वमस्माकं नाम। वाचस्पतिः सोमं पिबतु आस्मासु नृम्णं धात्स्वा
हेति स्रुग्रहः। चतुर्होतारं मनसानुद्रुत्याहवनीये जुहोतीति समाम्नायत ततो बहिर्वग्रहो भवतीति सार्थवान् विधिदर्शनान् अथवा

क्र.द॰ समस्तोप्यनुवाको दशहोता पुरस्ताद् दशहोतारमुदं च मुपदधातीति यावत्पदमिति पदपदेनग्रहव्यावर्त्तनादिति। अत्रेदं ध्येयं। दशहोतृव्या
७१ ख्यानइति प्रणीताः प्रणीयप्रत्ययइत्र्यवन्दशहोतारंव्याचक्षीतेत्याचार्ययोर्मुष्टिमेव गृह्णीष्यन्तिसोपमन्यवइति। हविर्निर्वप्स्यंद
शहोतारंव्याचक्षीतेतिब्राह्मणे हविर्निर्वापकालात्पूर्वकाले दशहोतृव्याख्यानस्यविहितत्वात् अग्निहोत्रहवणीग्रहणप्रभृतिनि
र्वापइति अप्रणयनानंतरमेवदशहोतृमंत्रइत्याचार्ययोर्मतं औपमन्यवस्त्वाह प्रजातमेवैनं निर्वपतीत्यर्थवादेन एतल्लिंगव्यस्य
च्छांदसः निर्वपणीयंहविः प्रजातमेव प्रभूतमेव दशहोतृव्याख्यानयुक्तेन निर्वापेणकरोतीति स्तुत्यानिर्वापांगत्वावगमात् निर्वा
पकाल एव प्रथमं दशहोतारमुक्त्वानंतरोनिर्वपेदिति। द्वैधएवस्त्वकांतरे। होतॄणांव्याख्यानइतिसंग्रहान्तेस्वाहाकारानिसेक
मन्तेग्रहानित्येकं सस्वाहाकारानित्येकं पूर्वः कल्पो बोधायनस्योत्तरो शालीकेरिति। होतॄणांव्याख्यानेदशहोतारंव्याख्याये
त्यादिषु इत्थमवगंतव्यं सग्रहोनुवाकोहोतृशब्दार्थः स एव वक्तव्यः। स्वाहाकारस्यतु प्रदानार्थत्वयाइदन्नदभावान्निवृत्तिरिति ७१
प्रथमः पक्षः ग्रहान् ग्रहसंज्ञकभागान्तेहोतृपदवाच्यं अंतेस्वाहाकारयुक्तं ब्रूयात् चतुर्होतारंमनसानुद्रुत्याहवनीयेजुहुया

दित्य. काग्रहो भवतीति ब्राह्मणे समाम्नानात् होतृशब्दार्थात् वहिरेव ग्रह इति गम्यते स्वाहाशब्दस्य प्रदानाभावेपि वर्हिः प्रोक्ष
णादिवदुपपद्यत इति द्वितीयः। सग्रहान् सस्वाहाकारान् होतृन् ब्रूयात् अनुवाकहोमो हि दशहोत्रादिः अतः सर्वोप्यनुवाको दश
होतृशब्दार्थः। कश्चिच्च पुरस्ताद्दशहोतारमुदंचमुपदधातीत्य त्रैकाग्रहव्यावर्त्तनाय ब्रवीति यावत्पदमिति यावत्सदपदार्थमि
त्यर्थः। यथा वकाशं ग्रहानित्युत्तरत्राभिधानात् इदं च रुत्वस्यानुवाके स्य दशहोतृशब्दार्थत्व एवोपपद्यते नान्यथा ग्रहो भवतीति
नु अवयववादः तथा चार्थवादः दर्शपूर्णमासयोः सृष्ट्योर्थत्वात् इति पूर्वशेषतां दर्शयति तथा च रुत्वोनुवाको होतृशब्दवाच्यः पू
र्वो भागः सामाध्वर्युरित्यंतः पदशब्दवाच्यः शेषो ग्रहशब्दवाच्यः स्वाहायोगस्तु पाठादिति तृतीयः। स्पष्टमन्यत्। अत्रापस्तंबः।
न इमे चतुर्होतारो यत्र होमार्थाः सग्रहः सस्वाहाकारास्तत्र प्रयुज्येरन् यत्राहोमार्था अग्रहा अस्वाकारा यत्र जपा याजमानास्ते
षां ये विहारसंयुक्ता आहिताग्नेस्तान् प्रतीयादुभयोरितरानितिह विर्निवप्स्यामीति यजमानमामंत्र्य पवित्रवत्याग्निहोत्रहवण्या
निर्वपतीति। हविर्निर्वप्स्यामीति मंत्रः। अत्रादौ यजमानग्रहणं केचिदिच्छंति यजमानमामंत्र्येति वचनात् ब्रह्मण्यारत्नयेत्तथै

क०द० वचकुमुचितत्वाच्चभारद्वाजः यजमानमामंत्रयते। यजमानहविर्निवप्स्यामीतीतिच एवंच यजमानहविर्निर्वप्स्यामीति यजमानम
७२ मंत्र्य संवोध्याग्निहोत्रहवण्या निर्वपतीति। इत्थं अनःसत्वेप्रयोगमभिधाय तदभावेप्रयोगमाह। पयुवेनानो भवत्यथ जपनेनगा
र्हपत्यं स्फ्यं निदधाति स्फ्योपरि पात्रीं पात्र्यां पुरोडाशीयानावपतीति। यदियजमानस्याग्निष्ठ मनो न भवति नविद्यते तदा अथा
ग्निहोत्रहवण्याः शूर्पस्य गार्हपत्ये प्रतितपनानंतरं जपेनेन गार्हपत्यं स्फ्यं निदधाति स्फ्योपरिस्फ्यस्योपरि पात्रीं तस्यां पात्र्यां
पुरोडाशीयान्व्रीहीन् यवान्वा आवपति। अथ धूर्वार्थं पात्र्या अभिमृशति धूरसि धूर्व धूर्वंतं धूर्व तं योस्मान् धूर्वति तं धूर्व यं व
यं धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वन्हितमं देवहूतमम मह्रुतमसि हविर्धानं दृंहस्व माह्वारितीति। अथ
पात्र्यां पुरोडाशीयावपनानंतरं पात्र्याः धूर्वार्थस्य चाभिमर्शनं कार्यं शकटे आरूढस्य कूर्शूर्पनिधानवचनात्पात्र्याश्चस्थानाप
त्याधर्मलाभात् अथवा पात्र्यामारोहणाद्यभावात् पात्र्याः धूर्वभागे शूर्पं तदुपर्यग्निहोत्रहवणीं तदुपरि पवित्रे च निधायाभि
मर्शनं कार्यं अथ पुरोडाशीयान्प्रेक्षत इत्यादि पवित्रवत्याग्निहोत्रहवण्या निर्वपति तस्य सूत्रस्य व्याख्यानं पूर्ववत् तीयया ७२
३ मभिमृशति धूरसीति मंत्रेण अयं शाकरमंत्रः पात्र्यां शारसं। तदेवचनंदक्षा प्रयुक्त आचार्यैरिति। अग्निहोत्रहवनाणी शूर्पहस्ते नैवचयुगधुरः पात्र्याः धूर्वार्थं

निर्वपनेस्रुक्करणं ३

निर्वापे अग्निहोत्रहवण्याः करणत्वमवगम्यते सा कर्म्मा कश्च शूर्पस्याधिकरणत्वं। ओं निर्वपेति यजमानोनुजानातीति। स्पष्टं। अथ निर्वपति
देवस्य त्वा० भ्यामग्नये जुष्टं निर्वपामीति। ॐ निर्वपेति यजमानोनुज्ञानंतरं अग्निहोत्रहवण्या शूर्पे निर्वपति देवस्य त्वेति मंत्रेण आदा
ने हस्तः करणं स्रुगधिकरणं शूर्पमधिकरणं निवपने मंत्रः। तस्य निर्वापत्वात्। नादाननिधानयोः तयोरार्थत्वा दिति कथमित्यत आह
त्रिरेतेन यजुषा सकृत् तूष्णीमिति। एतेन देवस्य त्वेति यजुषा त्रिः त्रि वारं निर्वपति तूष्णीं मंत्रं विना सकृन्निर्वपतीति ब्राह्मणे देवस्य
त्वेति सवितुः प्रसवे इत्याहेत्यादिना तूष्णीं चतुर्थमित्यंते नाग्नेयस्य निर्वापं विधाय स एवानुपूर्वं हवींषि निर्वपतीत्य ग्निषोमीयादाव
निर्देशः कृतः। देवतावाचकपदाभिप्रायमेवमंते ग्नि पदमित्यभिप्रायमित्याह॥ अथवा प्रतियत्संते धर्मा अनयोक्ति प्रतिधर्म प्रापक
उपदेशः एतामेवेति प्रपञ्चकमपेक्ष्य स्त्रीलिंगत्वं एतां कृतं निर्वापोपदेशमेव प्रतिपदं उपरि निर्वापेषु प्रकारोपदेशं कृत्वा अग्न
यइतिपदस्थाने अग्नीषोमाभ्यामिति पदमुच्चार्य पौर्णमास्यां निर्वपेत् तथा चापस्तंबः एवमुत्तरं यथादेवतमग्नीषोमाभ्यामिति पौर्णमा
स्यामिति तैत्ती ब्राह्मणमपि स एवमेवानुपूर्वं हवींषि निवपतीति अत्र पौर्णमास्यां साधारण्येन सोमयाज्यसोमयाजिनो रग्नीषोमीयो यागः प्रति

= नुजानातीति स्पष्टं। अथ निर्वपति देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति। ॐ निर्वपेति यजमानो = ८

स्क०द० यत्नेभारद्वाजोप्याह एवमेवोत्तरं पुरोडाशं निर्वपत्यग्नीषोमाभ्यामिति पौर्णमास्यामिंद्राग्निभ्यामित्यामावास्यायामसंनयत इति ।आ
७३ श्वलायनोप्याह अग्निमग्नीषोमाविति पौर्णमास्यामग्नीषोमयोस्थान इंद्राग्नी अमावास्यायामसंनयत इति ॥आपस्तंबस्त्वाह आग्ने
योष्टाकपालोग्नीषोमीय एकादशकपाल उपांशुयाजश्चैते पौर्णमास्यां प्रधानानि तदङ्गमितरे होमा आग्नेयोष्टाकपाल ऐंद्राग्नएक
दशकपालो द्वादशकपालो मावास्यायामसोमयाजिनः सान्नाय्यं द्वितीयं सोमयाजिनो नासोमयाजिनो नासोमयाजिनो ब्राह्मणस्याग्नी
षोमीयः पुरोडाशो विद्यतेन्वैंद्राग्नः सन्नयतो वर्णाविशेषेणेति ।अत्र असोमयाजिनो ब्राह्मणस्याग्नीषोमीयपुरोडाशनिषेधात्
क्षत्रियवैश्ययोरसोमयाजिनोरनुमत एवाग्नीषोमीयः तथाच निर्वापप्रकरणे आपस्तंबः। एवमुत्तरं यथादेवतमग्नीषोमीभ्यामि
ति पौर्णमास्यामिति साधारण्येनैव इति। आचार्यस्याप्येतत्रैव पक्ष आशय उन्नीयते। उपांशुयाजयागानंतरं वक्ष्यति अथोदं २ त्या
कम्योत्तरस्य पुरोडाशस्यापरार्धादवद्यन्नाहग्नीषोमाभ्यामनुब्रूहीति पौर्णमास्यामिंद्रायवैमृधायेति येति अत्र सूत्रे आग्नेयपु ७३
रोडाशादुत्तरदेशस्थत्वं अग्नीषोमीयवैमृधपुरोडाशयोरभिधीयते न त्वग्नीषोमीयवैमृधपुरोडाशयोरभिधीयते न त्वग्नीषोमी

यसद्भावे वैमृधस्याग्नेयादुत्तरत्वं संघटते अथ च वक्ष्यति अन्तो नाग्नीषोमीयः कदाचित् पौर्णमास्यामिति गम्यते एतच्चकल्पान्तरानु
सारेणनासोमयाजिनो ब्राह्मणस्याग्नीषोमीयः पुरोडाशो विद्यत इति तन्त्र पर्येणेनिभाष्यकामतिः ॥ ब्राह्मणमपि शाखान्तरीयमुदाहरन्ति
आग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वाग्नीषोमीयो भवतीति उपांशुयाजद्रव्यदेवतादिविषयो विचारः तत्तु आज्यस्य गृहाने आहे
तितस्सूत्रव्याख्यानावसरे करिष्यते ॥ इंद्राय वैमृधाय चेति ॥ अत्र च शब्देन एतामेव प्रतिपदं कुर्वेति पौर्णमास्यामिति पदान्यनुवर्तन्ते अर्थं
पूर्ववत् मंत्रे अग्नय इति पदस्थाने इंद्राय वैमृधायेति विशेषः ॥ अत्र वैमृधस्य पौर्णमासीतन्त्रे मध्ये निर्वापाभिधानाच्च तुर्दशे पटले अथे
न्द्रः स्याकम्यो तरपुरोडाशस्यापरार्धात् द्वयधन्नाहाग्नीषोमाभ्यामनुब्रूहीति पौर्णमास्यामिंद्राय वैमृधायेति पौर्णमासीतन्त्रम
ध्ये वैमृधयागानुष्ठानविधानाच्च पौर्णमासवैमृधयोः समानतन्त्रत्वमवगम्यते यद्वैमृधः पौर्णमासेनु निर्वाप्यो भवतीति वैमृधवि
धौ अनुशब्देनाग्नेयादिप्रधानयागानन्तर्यविधानाच्च समानतन्त्रतायुक्ताः प्रथम एव प्रयोगे अथ पौर्णमासवैमृधाभ्यां यजते स
निष्ठते ग्नाधेयनित्सत्र चातुर्मास्येषु पूर्णमासे वैमृधाभ्यामुक्ते विच पूर्णमासाय्थक् निर्देशेन पात्र्यां द्वेधोपस्तृणीत इति वैमृध

स्म०द०
७८

वर्जनात्तु संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति शाखांतरे विधानात्तु भिन्नतंत्रत्वमवगम्यते तेन तस्मोद्वैमृधसमानतंत्रत्ता
भिन्नतंत्रता चेति विकल्पः अयं हि वैमृधः पौर्णमास्यामनित्यः यद्यपि अस्मदीये ब्राह्मणे यद्वैमृधः पौर्णमासेनु निर्वाप्यो भ
वतीति नित्योवगम्यते तथापि शाखांतरे यदि निर्वपेदन्वेव निर्वपेदिति वाक्येन प्रथमे प्रयोगे यदि वैमृधं निर्वपेदनुनिर्वपे
देव प्रति पूर्णमासं कुर्यादेव प्रथमे प्रयोगे यदि न निर्वपेत्तदा कदापि नैव निर्वपेदिति प्रक्रमनियमार्थे विधीयद्युपवंधेन अ
नित्यत्वाप्यवगम्यत इति विकल्पः ।। इदं चानित्यत्वं अग्नीषोमाभ्यां मिंद्राय वैमृधाय चेति पौर्णमास्यामिति। अग्नीषोमीयेनत्तु
ल्यत्वया निर्देशं कुर्वन्व्यवधानेन निर्दिशन्ननित्यत्वरूपमतुल्यत्वं दर्शयति ।। अपि च अष्टौ दक्षिणत्त एकादशोत्तरत्त इति
एवमेवोत्तरं पुरोडाशमधि पृणक्ति श्रपयति पर्यग्निकरोति द्वैधोपस्तृणीति उद्वासयतीमानि सूत्राण्यनित्यत्वलिंगानि तं
त्रनेदज्ञापनं तु नात्र प्रयोजनं प्रथम एव प्रयोगे पौर्णमासे वैमृधाभ्यानित्यनैनैवात्तिस्फुटत्वादिति। अत्रापस्तंबः ।। संस्था
प्य पौर्णमासीमिंद्राय वैमृधाय पुरोडाशमेकादशकपालमनुनिर्वपति समानतंत्रमेके समामनंति तस्य याथाकामी प्रक्र ७८

मेप्रक्रमात्तु नियम्यतइति। तस्यैवेमृथस्य प्रक्रमे आरंभ यथाकामी आरभेत्त वा न वा आरंभे कृते प्रति पूर्णमासं समानतंत्रेण वा
भिन्नतंत्रेण वा यथेप्यं कर्तव्यमित्यर्थः॥ ननु प्रक्रमे समानन्नु प्रक्रमे समानतंत्रत्वे समानतंत्रेत्ते च भिन्नतंत्रत्वे भिन्नतंत्रत्वेवै
त्यर्थः॥ प्रक्रमाभावेनैव कर्तव्य इति। अत्र सत्याषाढः संस्थितायां पौर्णमास्यां वैमृधस्य तंत्रं प्रक्रमयति तस्यैंद्राग्नेन क
ल्पो व्याख्यातः पंचदश सामिधेन्यः सप्तदश सामिधेन्य निर्वापकाले इंद्राय वैमृधाय प्रभूतान् व्रीही निर्वपति दक्षिणां क
ले यथाशक्ति दक्षिणां ददाति तत्र याथाकामी प्रक्रमे प्रक्रमात्तु नियम्येतेति अयं वैमृधः सोमयाजिन एव अथवा सोमया
ज्यसोमयाजि साधारण इत्यपरो विकल्पः तथा च कल्पः अथ वैभवति सत्वे दर्शपूर्णमासौ यजेत य एनौ संद्धो यजेतेति
वैमृधः पूर्णमासेनु निर्वाप्यो भवति तेन पूर्णमासः संद्रइंद्रं दध्यमावास्यायां तेनामावास्या संद्वेत्ति केन स्विदानिज्ञानस्यैसं
द्धो भवत इति ऐंद्राग्नेन पुरोडाशेनेति ब्रूयादिति॥ अत्र सोमयाजिनः पौर्णमासे वैमृधः अमावास्यायामैंद्रं दधि तेन दर्शपू
र्णमासयोः संद्धत्वं सिद्धं असोमयाजिनस्तु पूर्णमासे वैमृधः अमावास्यामैंद्राग्नः इति संद्धत्वमिति॥ अत्रेदं ध्यं॥ वैमृधस्य

स्क०द०
७५

नुनिर्वपण इत्तिसूत्रं बोधायनस्यनानिष्ट्वा प्रथमसोमेनानुनिर्वपेदित्तिशालीकिरित्ति॥ सूत्रं सोमयाजिनो सोमयाजिनो सो
मयाजिनश्च वैमृध इति बोधायनस्य मतं नासोमयाजिन इतिशालीकिरिति। येंद्रं मृधः पूर्णमासेनु निर्वाप्यो भवतीति वि
धौ पूर्णमासशब्दस्य कर्मपरत्वं सप्तमी च निमित्तत्वे अतः पूर्णमासांगं वैमृधः अथवा पूर्णमासशब्दः कालवचनः कर्मप
रत्वे गौण्यापत्तेः सप्तमी चाधिकरणत्वे एवं चोत्पत्तिशिष्टकालयोगित्तया फलसंबंधात्॥ प्रधानमाग्नेयादिवदित्याहुः॥
भाष्यकाराः तं त्वांगत्वपक्ष एव सम्यक् पूर्णमासांगं वैमृध इति हि न्यायविदः आपस्तंबोप्याह। आग्नेयो ष्टाकपालोग्नीषो
मीय एकादशकपालउपांशुयाजश्च पौर्णमास्यां प्रथा. नानिनदंगमितरे होमा इति तस्यैद्राग्नेन कल्पो व्याख्यात इति व
दता सत्याषाढेनापि अंगत्वमेवाभ्युपगमात्तं प्रधानत्वे हि तस्यापि शेषितया आग्नेयादिवत्स्वत्त एवांगसंबंधे ऐंद्राग्न
विकारत्वानुपपत्तेरित्ति समुदायांगत्वाच्च पौर्णमासविकारेषु नातिदेशः पार्वणहोमवत्तन्न च पार्वणहोमस्य पौर्णमासी
देवत्ते निपौर्णमासी व्यत्तिरिक्ते न प्रवृत्तिः न तथा वैमृधस्येति वैलक्षण्यमिति निर्दिष्टे वाच्यं उपकारकत्वस्यैवातिदेशप्र ७५

योजकत्वपानत्सत्वेपौर्णमासीदेवताविहरस्यात्तिदेशबाधकत्वाभावात् समुदाययोपकाररूपस्यार्थस्याभावान्निवृत्तिरिति तुल्यं
वैमृधस्यापीति॥ इंद्राग्नीभ्यामित्यमावास्यायामसंनयत इति एतामेव प्रतिपदं कुर्वते सन्नुवर्त्तत एव असंनयतो यजमानस्यामा
वास्यायां पूर्वोक्तप्रकारेणाग्नेयनिर्वापानंतरं ऐंद्राग्नस्य निर्वापः कार्यः। मंत्रे अग्नय इति पदस्थाने इंद्राग्नीभ्यामिति विशेषः
इंद्रायेति संनयत इति विशेषणात् संनयत एवायं पुरोडाशः तस्याग्नेयनिर्वापानंतरं ऐंद्रपुरोडाशाय निर्वापः कार्यः। इंद्राय जु
ष्टमिति विशेषः। अयं चैंद्रपुरोडाश आचार्येण शाखांतरं मूलं दृष्ट्वा विहितः शाखांतरे दर्शपूर्णमासप्रकरणे इंद्राय वो जुष्टं प्रो
क्षामीति मंत्राम्नानाच्च अथवा अथवा अस्मच्छाखायामेवैंद्रपुरोडाशस्य विधिरस्ति श्रूयते हि न दारुपात्रेण दुह्यात् अग्निवद्धे दा
रुपात्रं यद्दारुपात्रेण दुह्यात् यातयाम्ना हविषा यजेत अथो खल्वाहुः पुरोडाशमुखानि वै हवींषि नेत इत्तः पुरोडाशं हविषो
यामोऽस्तीति काममेव दारुपात्रेण दुह्यात् इति॥ अत्र दारुपात्रेण सांनाय्यस्य दोहने दारुपात्रस्याग्निमत्त्वात् तदुग्धस्य हविषः
यातयामत्वापत्तेः निर्दारुपात्रेण दुह्यादिति पूर्वपक्षमुपपाद्य अथो खल्वाहुः दारुपात्रे दोहननिषेधस्य प्रतिभटं दारुपात्रे

ऋ०द० दोहनंखल्वाकुः शाखांतराध्येतारोब्रह्मवादिनः। हवींषिलोके क्रियमाणानिहवींषिसान्नाय्यानि पूर्वपक्षेहविःषदेनसा
७६ न्नाय्यस्यैवप्रतिपादितत्वेनात्रापिसान्नाय्यामेवपरामृष्यते पुरोडाशमुखानिपुरोडाशः मुखंसारः प्रधानंवाएषांतानीदृशानि
खलुयज्वभिः क्रियमाणानिदृष्टानितथाचपुरोडाशसंबंधात् यावत्तः सान्नाय्यानिहविषः सान्नायस्यइत्तइतः पुरोडाशं
पुरोडाशमंतरेणयदुपर्युपरि शिरोहरेदित्यत्रोपरिशब्दस्येवइत्तइत्तइति द्विर्वचनं यामः सारोस्तिअत्तः पुरोडाशसंबंधे
नसारवत्वात्तदारुपात्रेणदोहनंयुज्यतइति सिद्धांतउक्तः अत्रयथालोकेदध्नः पयसश्च अपूपसंबंधस्यओदनसंबंधस्
चाक्षुउपशामकतयासारवत्वंनकेवलस्यतद्विहितापिपुरोडाशसंबंधात्।।सारवत्वमुपपादितंनहीदमाग्नेयमादायोप
पादयितुंशक्यंतस्यभिन्नदेवतत्वेनावदानप्रक्षेपादिप्रचारेषुसाहित्याभावात्।।अतःश्रुधिबोधितसंबंधान्यथानुपप
त्यासंप्रतिपन्नदेवताकैंद्रपुरोडाशसंबंधएवायमित्यभ्युपगंतव्यंअत्रचैंद्रपुरोडाशस्तूयतेअतिप्रशस्तोयमैंद्रःपुरोड
शःयतोदधिपयसोरपिसारवत्वंमहेंद्रपुरोडाशायत्तमिति।एवंचाविहितस्यस्तुत्यनुपपत्यानयेवस्तुत्याविधिरनुमी ७६

यन इति कल्पां तं कारैश्चानाम्नानात् ऐंद्रपुरोडाशस्य विकल्पः महेंद्रायेति वा यदि महेंद्रयाजी भवतीति अथवा इंद्राय जु
ष्टमिति स्थाने महेंद्राय जुष्टमिति निर्दिशेत् यदि यजमानो महेंद्रयाजी भवेदिति ॥ ननु कोयं महेंद्रयाजी यस्यायं विशेषो
विधीयत इति चेत् अत्र कल्पः अथ वै भवति नागतश्रीर्महेंद्रं यजेत त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यस्तेषां महेंद्रो
देवतेति स योन्य एतेभ्यो महेंद्रं यजेत स संवत्सरमिंद्रमिष्ट्वाग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति साप्रसिद्धेष्टिः सं
तिष्ठते यथामावास्यायागच्छतितस्यां महेंद्रं यजति सोत ऊर्ध्वं महेंद्रयाज्येव भवति यो वै स्वां देवतामतियजते प्र स्वायै देवता
यै च्यवते न परां प्राप्नोति पापीयान्भवतीत्यथ वै भवति संवत्सरमिंद्रं यजेत संवत्सरं हि व्रतं नाति स्वैवैनं देवतेज्यमानाभूत्या
इंधे वस्तीयान्भवतीति ब्राह्मणं अथ वै भवति संवत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत्संवत्सरमेवैनं
व्रतं जभ्निवांसमग्निर्व्रतपतिर्व्रतमालंभयतीति ततोधिकामं यजेतेति ब्राह्मणमिति ॥ अस्यार्थः शुश्रुवान्वेदत्रयाभिज्ञः
प्राप्तश्रीर्भवति श्रीरूपत्वं च ऋग्यजुःसाम्नामाम्नायते । ऋचः सामानि यजूंषि सा हि श्रीरमृता सतामिति ग्रामणीः ग्रामाध्य

तुमन्तांतरं तस्य चायमर्थः यो वै श्मश्रुवदादिः ततोन्ये वा स्वां द्रव्यस्य दध्नः पयसश्च स्वीयां देवतामिंद्रं ऐंद्रं दध्यमावास्यायामैं
द्रं पयो मावास्यायामिति वचनात्। अतीत्य महेंद्रं यजते स स्वायै द्रव्यस्य देवतायै प्रच्यवते किंच अन्यदेवत्यमन्यस्मै हरन्देवता
यशान्तो त्कर्ष प्राप्नोति प्रापत्तरो भवति अतः किं कर्तव्यमित्यत आह ॥ अथ वै भवति संवत्सरमिंद्रं यजेतेत्यादि श्मश्रुवदादि
तो। तोन्यो वा संवत्सरमिंद्रं यजेतेत्यादि अर्थः पूर्ववत्। ततो धिकामं यजेत्यस्यायं तु तस्मिन्पक्षे श्मश्रुवदादिः महेंद्रं यथाका
मं यजेत इतस्त इंद्रं वा महेंद्रं व्यय जेत अथवा श्मश्रुवदादिस्ततोन्यश्च यथाकाममिंद्रं वा महेंद्रं वा यजेतेत्यर्थः॥ इत्थं वा व्याख्या
नमभिप्रेत्य। अत्रैदैर्थं॥ नागतश्री महेंद्रं यजेत त्रयो वै गतश्रियः श्मश्रुवान्ग्रामणी राजन्यस्तेषां महेंद्रो देवतेति स यो न्यएते
भ्यो महेंद्रं पि पक्षेन स संवत्सरमिंद्रमिष्ट्वा महेंद्रेज्यां लभेतेति बोधायन एवापि संवत्सरमिंद्रमिष्ट्वा महेंद्रेज्यां लभेरन्निति शा
लीकिरिति। सोतऊर्ध्वं महेंद्रयाज्येवस्यादि सं तं सूत्रं बोधायनमतं अथ वै भवति यो वै स्वामि स्यादि सूत्रं शालीके मतं प्रथम
व्याख्याने तु सूत्रं कृत्स्नमपि बोधायनमतं सूत्रात् बहिरेव शालीकिमतमत्र सूत्रितमिति॥ एत एवापीति समुच्चयोभिधीय

×हबोधायनेयस्याममावास्यायामादितंइंद्रंयष्टुंप्रक्रमेतसंवत्सरेपर्यवेतेमहेंद्रंयजेतसोतउर्ध्वंमहेंद्रयाज्येवस्यादित्रोहस्मा ३

सु०र० न्ते॥शुश्रुवरादयोन्येचउभयेपीत्यर्थः॥स्पष्टमन्यत्।शाली कि नायो वे स्वा मित्यादिश्रुतोउभयेषां परामर्शाभ्युपगमात् ततोधि
७९ कामंयजेतेति विकल्पाभिधानमपिश्रुश्रुवरादीनामन्येषां चेंद्र महेंद्र विषयेतुल्यमिति बोध्यं॥ महेंद्रयागोपक्रमविषयेद्वे थं
संवत्सरमिंद्रंयजेतसंवत्सरं हि व्रतं नातीतिसूत्रं शालीकेरत्रोहस्मोहैपमन्यवोभ्यारूढः खल्वस्यैवंसंवत्सरोभवति यस्याम
मावास्यायामादितइंद्रं यष्टुं प्रक्रमेत स संवत्सरेपर्यवेतेयाततः पूर्वामावास्या तस्यां महेंद्रं यजेतसोतउर्ध्वं महेंद्रयाज्येवस्यादि
ति अयमर्थः॥अथैवंभवतिसंवत्सरमिंद्रंयजेत संवत्सरं हि व्रतं नातीतिकल्पसूत्रं महेंद्रयागोपक्रमविषयंशालीकेर्मतं तं
त्र हि संवत्सरमिंद्रयागं संवत्सरस्य परस्ताद्व्रतपतीविंच विधायएनं संवत्सरमिंद्रयागं कुर्वाणं अग्निर्व्रतपतिर्महेंद्रयागंप्र
पयतीत्युक्तं॥एवंचचैत्रामावास्यायामिंद्रयागारंभेकृते पुनश्चैत्रामावास्यात्रयोदश्यामासेभवतिततः पूर्वद्वादश्यामाव
स्याद्वादश च मासाः संवत्सर इति द्वादशस्वमावास्यास्विंद्रमिष्ट्वा त्रयोदश्याममावास्यायां महेंद्रं यजेतेति अत्रचैत्रशुक्लप्र ७९
तिपदमारभ्यऐंद्रः संवत्सरः पुनश्चैत्रशुक्लप्रतिपदः पूर्वामावास्याऐंद्रे वेतिइंद्रयागस्यैवारंभः आरब्धत्वात्।प्रतिपदीइएव

यष्टव्य इति प्रथमः पक्षः अत्र बोधायन आह यस्यां चैत्रामावास्यायां आदित्यः प्रथमइंद्रं यषुं प्रक्रमेत आरभेत तस्याः प्रतिप
दमारभ्य इंद्रयागस्य संवत्सरो द्रष्टव्यः एवं च स इंद्रयागं कुर्वन्संवत्सरे पर्यंते निरवशेषेण समाप्तमहेंद्रयज्ञेन सोत ऊर्ध्वमहेंद्रया
ज्येवस्यादिति।। अस्मिन्पक्षे चैत्रामावास्यायामिंद्रयागारंभे तस्याः प्रतिपदमारभ्य मासपरिगणने क्रियमाणे उपक्रमे याग
स्यैवैशाखशुक्ले प्रतिपदमारुत्तत्वात् उपवसथेन पूर्यंते मासः संवत्सरोपि चैत्रामावास्यया पूर्यते इदानीं च संवत्सरस्य सावशे
षत्वात् इंद्र एव यष्टुं प्रक्रांत इति तदैंद्रयाग एव उत्तरस्यां तु चतुर्दशामावास्यायां महेंद्रयागारंभ इति द्वितीयः औपमन्यवस्त्व
ह एवं वदतो बोधायनस्य शालीकेश्च मतं अयं महेंद्रो द्वितीयः। संवत्सरः इंद्रेणाभ्यारूढः आभिमुख्येन आरूढः संक्रां
तः तथा हि नासोमयाजी संनयेदित्यसोमयाजिनः सान्नाय निषेधेन सान्नाय्यस्य सोमयागानंतरं भावित्वात् यस्मिन्पूर्व
पक्षे सोमसिद्धत्वं पूर्वपक्षमारभ्य सान्नाय्य संवत्सरः तत्र प्रथमे मासि त्रिंशत्तिथामावास्यायां आरभ्यते सान्नायेतत्तस्य ये
स्मिन्सोमयागस्ततः पूर्वपक्षात्पूर्वा या अमावास्या तस्यां संवत्सरः ...

स्क०द० [illegible] समाप्यते प्रतिपच्च त्रयोदशो मासः एवं सति यदि त्रयोदश्यां
७१ द्वादश्यां वा अमावास्यायामिंद्रं यजेत तदा इंद्रेण माहेंद्रसंवत्सर आरब्धो भवति त्रयोदशे मासे इंद्रस्य यजनात्। न च संवत्सर
मिंद्रं यजेत सोत ऊर्ध्वं महेंद्रयाज्येव स्यादिति शास्त्रविरुद्धं तस्माद्यस्यां यन्मास संबंधिन्याममावास्यायां आदितः इंद्रं यष्टुं प्रक्रमे
त अन्यस्मान्नाय्यं कुर्वाणः संवत्सरे इंद्रयागसंबंधिनी पर्यवेते निरवशेषेण परिसमाप्तेत ततः यस्मिन्पूर्वपक्षे सोमयागः सिद्धस्ततः
पूर्वा या अमावास्या तस्यां द्वादश्याममावास्यायां महेंद्रं यजेन तत यद्यपि इयममावास्या द्वादशो मासि विद्यते स च ऐंद्रो मासः तत्र क
थं महेंद्रयागारंभ इति तथापि यागः प्रतिपद्येव यागस्य प्रधानं यो यमन्वाधादिर्नो नारंभः स तु तस्य गुणः तत्र प्रधानानुरोधित्वात्
गुणानां प्रधानं यागो महेंद्रस्येति तदंगमन्वाधाना यद्यपि महेंद्रयागस्यैव कर्तव्यं सोत ऊर्ध्वं महेंद्रयाज्येव स्यादिति। [illegible]
आपस्तंबस्त्वाह। नागतश्रीर्महेंद्रं यजेत त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यस्तेषां सोमेज्याया महेंद्रं य
जेरन्न्योवा कश्चिदिति॥ इति देवताविचारः॥ निर्वपणे द्वैधं॥ निर्वपण इति सूत्रं शाखीके रत्नोह स्माह बोधायनः शक्ता
निर्वपणे द्वैधं।

देवनिर्वपेद्धुरौ अभिमृश्याक्षणिं क्रमेत् विष्णुस्त्वा क्रमतामिति पुरोडाशीयान् प्रेक्ष्याभिमृशेत्। यच्छन्तां पंचेति त्रिर्यजुषा सकृ
त्तूष्णीमिति पंचावत्तीनां सर्वानेव यजुषेति कात्यइति॥ निर्वपणे प्रकारः सूत्रं शकटाद्वापात्र्यां वा निर्वपेदिति सूत्रं शालीकेर्मतं बौ
धायनस्त्वाह शकटादेव निर्वपेत् धूरसीति मंत्रेण धुरौ हृदं अपि दक्षिणोत्तरे प्यनिमृश्य विविधमावृत्याभिश्य विष्णुस्त्वा क्रमतामि
ति मंत्रेण दक्षिणमक्षपालिं क्रमेत् पुरोडाशीयान् संप्रेक्षणानंतरं यच्छन्तां पंचेति पुरोडाशीयानभिमृशेत्॥ अनंतरं तृणं वा नि
शारु वा निरस्यती त्यादि निर्वपणं चतुरावत्तिनां त्रिर्यजुषा सकृत्तूष्णीमिति पंचावत्तीनां तु त्रिर्यजुषा त्रय इमे लोकाः एषां लो
कानामाप्त्यै तूष्णीं चतुर्थं अपरिमितमेवावरुंध इति श्रुतिश्चतुर्वत्तिविषयेति भावः॥ कात्यस्त्वाह। सर्वानेवामुष्मीन् यजुष
त्र यनिर्वपेत् इति अत्र शाखांतरं मूलं। अथ पंचावत्तारं हविषये द्वेधं। पंचावत्तस्य क्रमण इति निर्वपणात् पंचावत्तं प्रक्रमे प्र
दिति बौधायनो वदानइति शालीकिः प्रदानत इ स्योपमन्यव स्वात्तुष्यारण्यादी स्योपमन्यवी पुत्र इति॥ पंचावत्तस्य प्रक्रमेण प्र
रंभे प्रकाराः निर्वपणमारभ्य अवत्तस्य पंचसंख्या प्रक्रमेत् कुर्यादिति बौधायनः अवदानत अवदानमारभ्य प्रथमपुरोडाशावदान

स्क०द०

७९ [illegible] समाप्यते प्रतिपच्च त्रयोदशोमासः एवंसतियदित्रयोदश्यांवा

द्वादश्यांवा अमावास्यायामिंद्रंयजेत तदाइंद्रेण माहेंद्रसंवत्सरआ भ्यारूढो भवति त्रयोदशो मासेइंद्रेस्ययजनात्। नच्च संवत्सर

मिंद्रं यजेत सोत्त ऊर्ध्वं महेंद्रयाज्येवस्यादिति शास्त्रविरुद्धं तस्माद्यस्यां यन्माससंबंधिन्याममावास्यायो आदित इंद्रं यष्टुं प्रक्रमे

तन्यसान्नाय्यं कुर्वाणः संवत्सरेइंद्रयागसंबंधिनी पर्यवेते निरवशेषेण परिसमासेन तः यस्मिन्पूर्वपक्षे सोमयागः सिद्धस्ततः

पूर्वीया अमावास्या तस्यां द्वादश्याममावास्यायां महेंद्रंयजेत तयद्यपि इयममावास्या द्वादशो मासि विद्यते सच ऐंद्रो मासः तत्रक

थे महेंद्रयागारंभ इति तथापि यागः प्रतिपद्येव यागस्य प्रधानं योयमन्वाधाद्दिनो नारंभः सतु तस्यगुणः तत्र प्रधानानुरोधित्वात्

गुणानां प्रधानं यागो महेंद्रस्येति तदंगमन्वाधाना द्यपि महेंद्रयागस्यैक कर्तव्यं सोत्त ऊर्ध्वं महेंद्रयाज्येवस्यादिति।। [illegible]

आपस्तंबस्त्वाह। नागतश्रीर्महेंद्रं यजेत त्रयो वै गतश्रियः इत्यक्तोमो वैगौतमो भारद्वा जस्तेनं तरं सोमेज्याया महेंद्रंय ७९

जेरन् योवाकश्चिदिति ।।इति देवता विचारः।। निर्वपणे द्वैधं ।। निर्वपण इति सूत्रं शालीकेरत्रोह स्माह बोधायनः शक्त्या

निर्वपणे द्वैधं।

स्कं०ह० मारभ्यइतिशालीकिः प्रदानं यागः तमारभ्य आज्यभागादारभ्येतियावत् इत्सोपमन्यवः चतुष्प्राशनार्थं गृह्यतइतिचातुष्प्राशयंइ
९० डावदानमितिभाष्यंतदारभ्येत्सोपमन्यवीपुत्रइतिनिरुप्तानभिमृशतीदंदेवानामितीति॥ निरुप्तान्शूर्पेविच्यमानान्व्रीहीन्य
यान्वाइदंदेवानामित्यभिमृशति॥ इदमुनःसहेतियेतिशिष्टाभवंतीति॥ अभिमृशतीत्यनुषज्यतेनिरुप्तेभ्यो येतिशिष्टाःशक
टेपात्र्यांवावर्तंतेतानभिमृशति॥ स्फ्यात्येतानारात्याइतीति अतिशिष्टानभिमृश तीत्यर्थः॥ ननुइदमुनःसहेतिमंत्रोतिशिष्टा
भिमर्शनेविनियुक्तः स्फवरभिविरव्येषवैश्वानरंज्योतिरितितुआहवनीयेक्षणेविनियोक्ष्यतेस्फ्यात्येत्वत्स्यकथमंत्रविनियो
गइतिचेत् कर्मांतस्त्वत्रादित्यवेहि॥ तथाहि अत्रकर्मांतं॥ कउरवल्कुमंत्रमंतरितंकल्पयेत्स्थानाद्वास्थानंप्रतिज्ञातेभिरू
प्येण वाप्रोहेणवेतिस्थानात्स्थानमितियदवोचामयोनंतरोमंत्रआम्नातःस्यात्। तेनैनंसहकल्पयेत्। पूर्वकालेनवोत्त
रकालेनवेतियथोएतदभिरूप्येणेतियथोएतत्त्वदवसा धासानासुवीर्यं रायस्पोषं स्वभिवयं॥ रहस्पतिनारायास्व ९०
गाकृतोमह्यंयजमानायतिष्ठेतियथोएतन्प्रोहणवचस्येग्निकल्पःखल्वयमिष्टकाभूयान्समाम्नात् तत्रयोमंत्रांतरि

तस्यादिष्टका भूयमेनमापादयेत् अथाश्वमेध आहुतिभूयान्समाम्नायस्तत्रयो मंत्रांतरितस्यादाहुति भूयमेनमापादयेदि
ति ब्राह्मणे वा कल्पे वा अंतरितं अविद्यमानविनियोगं मंत्रं कउ खलु कस्मिन्पदार्थे कल्पयेत्। विनियुंजीतेति प्रश्नः तत्रोत्तरं स्था
नादूहेति अंतरितो विनियोगो यस्य मंत्रस्य तस्य स्थानात् आम्नानस्थानात् स्थानं प्रत्यासत्त्यनुसारेण प्रतिज्ञास्तेन प्रकर्षेण
सम्यग्विचार्य निश्चिनुयात् अत्र वाशब्द उपायांतरस्य व्यवस्था प्रदर्शनार्थः॥ एवमुत्तरावपि वाशब्दो अभिरूप्येण मंत्रलिं
गेन वा प्रतिज्ञास्तेन प्रोहेण प्रकर्षेण ऊह्यते नेनेति वा प्रकर्षेण ऊह्यत इति वा प्रोढः। प्रायंपाठः स आलोच्यमानः येन संबध्य
ते तेन संबंधोस्येति विचार्य निश्चिनुयादिति॥ स्थानास्थानमिति यदवोचाम स्थानाद्वा स्थानं प्रतिज्ञा सो नेति यदुक्तं तस्य
विस्पष्टतायै अयं निर्णयः प्रदर्शते यस्य मंत्रस्य विनियोगो न दृश्यते पूर्वो मंत्र उत्तरश्च विनियुक्तः तत्राविनियुक्तस्य मध्य
ममंत्रस्य अनंतरः अंतररहितः सन्निहितो यो मंत्रः पूर्वो वा उत्तरो वा ब्राह्मणेन सूत्रेण वा विनियुक्तः तेन सह एकवाक्य
त्वापन्नं एनं विनियोगरहितं मंत्रं कल्पयेत्। विनियुंजीतेत यथा अग्नेः अनंतरमंत्रस्य चरुरूपवर्षवर्ण एहीत्याह पशवे

स्रू॰द॰ याइडेति विनियोगः समाम्नातः मध्यममंत्रस्याग्निर्मोउ रिष्टात् पाति सार्द्रेनोक्ते विनियोगः॥ तत्रोक्तं द्वेधे सर्व एवैष स्विष्टकृदनुमंत्रणो मं
८३ त्रस्यात् इतितत्थाइइमुनः सहेति एति शिष्टाभवंती ति पूर्वो मंत्रो विनियुक्तः उत्तरश्चाहवनीयमीक्षते स्रुवरभिविख्येषं वैश्वानरं ज्योति
रिति विनियुक्तः मध्यमस्य स्फ्यास्ये त्वा नारात्याइति विनियोगरहितस्य सूत्रे मंत्रमात्रपाठः तत्रापि अभिमर्शतीयेति शिष्टाभवंती त्यस्या
नुवृत्तिं कृत्वा तत्राभिमर्शने विनियोगः॥ यथो एतदाभिरूप्येणेति आभिरूप्येण वेस्क क्तस्योदाहरणमुच्यते आभिरूप्यं लिंगं अ
शासानः स्रुवीर्यमित्यादिर विनियुक्तमंत्रस्य लिंगात् यूपोपस्थाने आहवनीयोपस्थाने वा विनियोगः॥ यथो एतत्प्रोहेणेति प्रोहेणे
वैस्कक्तमुदाहृत्य प्रदर्शितं अग्निकस्य। अग्निप्रयोग इष्टका भूयस्यो। यस्मिन्स इष्टका भूयान् समाम्नातः तत्र योमंत्रोत्तरिनस्यात् विनि
योगरहितः स्यात्। तं मंत्रं इष्टकामंत्रप्रायपाठात् इष्टकोपधानार्थं विनियुंजीत तत्र यथा तिस्र त्तिस्र इति प्रस्कस अक्षरपंक्तीः पश्चा
दिति विहितं तत्राग्ने तमद्येस्ता याश्च न स्तोक्षरपंक्तियः समाम्नातः अत्रातिरिक्तां चतुर्थीमक्षरपंक्तिमिष्टकामंत्रेणेव प्रक्षिपेत् ८३
अत्रैदो वैदाहरणांतरं अथाश्वमेध इत्यादि अश्वमेधः आहुतिभूयान् भूयस्य आहुतयो यस्मिन्स आहुतिभूयान् समाम्नातः।

अश्वमे(ध)चरितानिजुहोतीतिमंत्राश्वबहवः तत्रयोमंत्रोनरितोअविद्यमानविनियोगः॥आम्नातस्यात्तु एनंआकुतिभूयमापाद्ये
त् आकुतिप्रापपाठात् आकुतावेवविनियुंजीतेति॥एवचस्फ्यास्येखानारात्याइतिमंत्रः।अतिशिष्टानामभिमर्शनेविनियोक्तव्यः॥
ननुतत्रइदमुनःसहेतिमंत्रोस्तितथाचतेनैवतत्रप्रयोजनसिद्धेःस्फास्याइतिमंत्रस्यनप्रयोजनमितिचेत्न इदमुनःसहेत्यस्य
निरुप्तव्रीह्यपेक्षयाअतिशिष्टानांव्रीहीणांव्यावृत्तिःप्रयोजनंस्फास्येखानारात्याइत्यस्य तुगुप्तिःप्रयोजनंतथाचब्राह्मणं
इदंदेवानामिदमुनःसहेत्याहव्यावृत्त्याइतितथास्फास्येखानारात्याहगुप्त्याइतिचेतिचेतितदिदंप्रयोजनमाकुर्भाष्यका
राः एकविषयमंत्रांतरविधिप्रयोजनंव्यावृत्तिःगुप्तिःभिन्नप्रयोजनत्वात्भिन्नवाक्यत्वस्थापनार्थंविनियोक्रेजेसूत्रद्वयमिति
आपस्तंबस्त्वाहइदंदेवानामितिनिरुप्तानभिमृशतीदमुनःसहेत्यवशिष्टान्स्फास्येखानारात्याइतिनिरुक्तेनेवाभिमंत्र्येति॥
भारद्वाजस्त्वाहइदंदेवानामितिनिरुप्तानभिमृशतीदमुनःसहेतियतोधिनिर्वपतिस्फास्येखानारात्याइतिहविराद्यायोपनिष्क्रम
तीतिसत्याषाढस्त्वाहइदंदेवानामितिनिरुप्तानभिमृशतीदमुनःसहेतियतोधिनिर्वपतिस्फास्येखेतिनिरुप्तानेवेतिवैखानसस्

स्रु०९० ९२

त्रं इदं देवाना मिति निरुप्तान भिमृशतीदमुनीः सहे स्यवदानस्थानंस्फास्येस्वेति निरुप्ताने वेति ॥ अतिशिष्टानामावपनइति तान् कोष्ठेव
पल्येवाचयेदिति बोधायनोऽत्रैवेनानन्वावपेयुरिति शालीकिरिति कोष्ठे कुसूले पल्येवापस्वसिंते रुपर्युपरि वेष्टिते धान्यावपनस्थानवि
शेषे वानानतिशिष्टान्व्रीहि नावपेदिति बोधायनः अत्रैव निरुप्तेष्वेव एनानन्वावपेयुः पुनः प्रक्षिपेयुरिति शालीकिरिति ॥ अथाह
वनीय मीक्षते स्कवर भिविरुद्धेषं वैश्वानरं ज्योतिरितीति ॥ अथइदमुजः सहस्फास्येत्वा नारात्या इति शिष्टानाम भिमर्शनानंतरं मि
स्य स्रार्थे च गम्यते यद्यपि तथापि द्वे विहितस्यातिशिष्टावपनस्यातिशिष्टावपनस्यातिशिष्टाभिमर्शनानंतरं कर्तव्यत्वात्तदनं
तरं आहवनीयेक्षणं कार्यमिति स्पष्टमन्यत् ॥ अथ गृहानन्वीक्षते इदं हं ताउर्या द्यावापृथिव्योरितीति ॥ गृहान् यजमानस्य महान
सादीन् अग्न्यंगाराणि वाशिष्टं स्पष्टं ॥ अथैनानादायोपोत्तिष्ठतीति एनान् निरुप्तान् व्रीहीन् सम्पूर्णान् अग्निहोत्रहवणीयुक्तान् स्प
ष्टमन्यत् ॥ ननु भवतु अथैनानादायोपोत्तिष्ठत्यूर्वन्तरिक्षमन्विहीति सूत्रस्य विभागः ॥ तथाच उर्वन्तरिक्षमन्वीहीति मंत्रं उपोत्थाने ९२
विनियुज्यतामिति चेन्न कर्मांत सूत्रे अथापि मंत्र एवस्वयं कर्म प्रब्रूते कर्मानुवादी भवति यथैतद्भवति प्रेयमगाद्धिषणा बर्हिरच्छोर्वन्त

रिक्षमन्विहीति लिंगविनियोज्यमंत्रेष्वस्यमंत्रस्योदाहरणेनउर्वंतरिक्षमन्विहीत्याहगत्याइतिब्राह्मणेनचमंत्रप्रकाश्येगमनेविनियो
ज्यभिधानेनउर्वंतरिक्षमन्विहीत्येत्येवसूत्रविभागस्यउचिततात्।तदिदमुक्तं भाष्येउर्वंतरिक्षमन्विहीत्याहगत्याइतिब्राह्मनेनचमंत्र
प्रकाश्यगमनेविनियोगाभिधानेनउर्वंतरिक्षमन्विहीत्येतिगमनमंत्रः॥तथाचकर्मांतेभिव्रजनेमंत्रइत्स्फाक्षमिति॥उर्वंतरिक्षमन्विहीत्ये
त्येति॥गार्हपत्यसमीपमेत्यतस्योत्तरतउपसादनविधानात्॥उत्तरेणगार्हपत्यमुपसादयत्यदित्यास्त्वोपस्थेसादयामीति॥उपसाद
यतिनिरुप्तान्व्रीहीन्यवान्वाश्चपस्थानुगतमन्यत्।गार्हपत्यमभिमंत्रयतेग्नेहव्यंरक्षस्वेकत्तीति॥अभिमंत्रयतेअभिमुखोगा
र्हपत्यंपश्यन्मंत्रंब्रूयात्॥अत्रेद्वैधं॥परिदानयथानिरुप्तंपरिददातीतिबोधायनोत्रोहस्माहशालीकिरग्नेहव्यंरक्षस्वेत्येवब्रूयात्
विष्णोहव्यंरक्षस्वेतिपयोविष्णुर्हिपयसांगोप्ताभवत्यग्निरोषधस्येति॥गार्हपत्यस्योत्तरतोहविरुपासाद्यग्नेहव्यंरक्षस्वेतिगार्ह
पत्यस्याभिमंत्रणंहविषोरक्षणार्थंगार्हपत्यस्यहस्तेपरिदानमिवभवतिअग्नेहव्यंरक्षस्वेत्याहगुप्त्या।इतिब्राह्मणस्वारस्याच्चअतोत्र
गार्हपत्यामभिमंत्रणमेवपरिदानमित्युच्यतेतत्रप्रकाराःयथानिरुप्तंनिर्वापंअजतिक्रम्ययागदेवताभ्यःपरिदद्यात्तस्यामितात्तास

स्क०द०
८३

तद्यथा अग्नेहव्यंरक्षस्व अग्नीषोमोहव्यंरक्षेथामितिपौर्णमास्यां अग्नेहव्यंरक्षस्व इंद्र महेंद्रहव्यंरक्षस्व इंद्राग्नीहव्यंरक्षेथामितिचा
मावास्यामितिबौधायनः अस्मिन्मते अग्नेहव्यंरक्षस्वस्वेति मंत्रे अग्निपदं यागीयदेवतोपलक्षणकं ऊहश्चनि। वपिमंत्रवदिति
बोध्यं शालीकि स्वाह अग्नेहव्यंरक्षस्वेत्येवयथासाम्नानमेवब्रूयात् यथा विष्णुहव्यंरक्षस्वेतिपयः हि यस्मात् यथापयसंगोप्ता
विष्णुर्भवति मंत्रलिंगात् तथा औषधस्यत्री स्यादेरग्निर्गोप्ता भवेतिमंत्रवर्णादेवेतिबौधायनकृतेसूत्रेचतुर्थः पटलोधुना। व्या
ख्यातस्तत्रतुष्यंतुविद्वांसः श्रीयत्नांशिवः खंडाः ॥१॥ अथैतस्यामेवस्रुचितिरः पवित्रमपआनीयोदीचीनाग्राभ्यां पवित्राभ्यां
त्रिरुत्पुनातिदेवोवः सवितोत्पुनात्वच्छिद्रेण पवित्रेणवसोः सूर्यस्य रश्मिभिरितिपच्छइति॥ अथ अग्नेहव्यंरक्षस्वेतित्यभिमंत्र
णानंतरं एतस्यामेवनिर्वापानंतरमशोधितायामेवस्रुचि अग्निहोत्रहवण्यांतस्या एवनिर्वापसाधनात्वात् एतच्चशालीशरावादि
ना बार्हस्पत्येनैवारचर्वादौ निर्वापेपि अग्निहोत्रहवण्येवप्रोक्षणमित्येतदर्थं स्थाली भिश्चैवचरुंनिर्वपेदितिहिप्रायएवियेकर्मांतं
सम्भृकायामग्निहोत्रहवण्यामपआनीयेत्यापस्तंबः। तिरः पवित्रमितिक्रियतविशेषणं तिरश्चीनं पवित्रं यथाभवति तथा अपआ ८३

नीय उदीचीनाभ्यां पवित्राभ्यां देवो वः सवितेति मंत्रेण पच्छ उत्पुनाति पादेन पादेनोत्पुनाति। अन्ये तु मंत्रं पच्छो विगृह्य मंत्रांते
त्रिरुत्पुनाति त्यध्याहृत्य व्याचक्षते तच्चिंत्यं अपरिपूर्णे खल्वध्याहारः पच्छ उत्पुनातीत्यनेन निराकांक्षीभवति हि वाक्यमिति।
अत्रेदं ध्येयं। प्रोक्षणीनामुत्पवन इति सूत्रं बोधायनस्य निगदेनैवैतामृचं त्रिरुत्पुनीयादिति शालीकिरिति॥ सूत्रं कस्य सूत्रं पच्छो
गायत्र्येति वचनादिति बोधायनस्य मतं शालीकिस्त्वाह एतां सावित्रीमृचं निगदेनैव पच्छ उच्चारयन्नेव त्रिरुत्पुनीयात्॥ ननु प्रति
पादं पादांत एवेति नियम इति आपस्तंबस्त्वाह पवित्रांतर्हितायामग्निहोत्रमग्निहोत्रहवण्यामप आनीयोदगग्राभ्यां पवित्राभ्यां
प्रोक्षणीरुत्पुनाति देवो वः सवितोत्पुनात्विति प्रथममच्छिद्रेणेति द्वितीयं वसोः सूर्यस्य रश्मिभिरिति तृतीयमिति॥ उत्पवनस्य प्र
कारमाहाश्वलायनः॥ अप्रच्छिन्नाग्रावनंतर्गर्भौ प्रादेशमात्रौ कुशौ नाना तयोर्गृहीत्वांगुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणि
भ्यां सवितुष्ट्वा इति प्रागुत्पुनातीति॥ अथैना उन्महयत्युपोत्तिष्ठत आपो देवीरग्रेपुवो अग्रेगुवोऽग्र इमं यज्ञं नयताग्रे यज्ञपतिं धत्त
युष्मानिंद्रोऽवृणीत वृत्रतूर्ये यूयमिंद्रमवृणीध्वं वृत्रतूर्य इतीति॥ केचित्तु सूत्रे सर्वत्राप्यथशब्दस्य पूर्वपदार्थानंतर्यमर्थः॥ यत्र

क०द० तुविरोधोस्तिनवविज्ञाप्यप्रदर्शयिष्यते॥एनाउत्पूताअपःउन्मदयन्उच्छ्वदऊर्ध्वभाववेमदमत्तिःपूजार्थेएवंचएनाऊर्ध्वदेशेपू
९४ जयन्तीत्यर्थः॥पूजनमपिस्कचएवोद्यमनंउच्चारणंकेधरुंमंत्रजपएवपूजाउपोत्तिष्ठतिमंत्रंरचन्तीत्यन्ये॥अद्भिरेपेःवोप्रोक्षत्तिप्रो
क्षितास्थप्रोक्षितास्थेतित्रिरिति॥आपउत्पूताअद्भिरेवउत्पूताभिरेवअन्याभिरित्यपरेतन्नअद्भिरेवेत्येवकारणेनाभिरेवेत्यवगमात्।
कचएवपृथक्कृत्यएकेदेशेनप्रोक्षणंहस्तेनतुग्रहणमाचारात्॥मंत्रे यत्रवीप्सातत्रसर्वत्रमंत्रस्यकर्मणश्चत्रिरावृत्तिःयत्रसकृ
न्मंत्रमुक्तात्रिरिस्कृच्यतेनत्रकर्मैवावर्तनेकेचित्तुदृष्टेपरिषवणेत्रिरेवमंत्रंब्रूयात्त्रिःकर्मावर्तयेदितिचसकृदेवमंत्रंब्रूयात्त्रिःक
र्मेतिचप्रदर्शनार्थत्वादुत्सर्गः।कल्पेतुकश्चिन्मंत्रेवीप्सामंत्रकर्मणोरावृत्तिनियमार्थेतिवदन्तिनचिंत्यंमंत्रावृत्तिवि।कल्पवचनस्यउ
त्सर्गत्वेदृष्टेयूपावटादिषुतिदेशवचनस्यनिःप्रयोजनत्वापातात्॥अत्रकर्मान्तेकिंप्रोक्षिताउखलुप्रोक्षण्योभवन्तीतिविज्ञा
यतेब्रह्मवादिनोवदंत्यद्भिर्हवींषिप्रोक्षीःकेनापइतिब्रह्मणोपिब्रह्मप्रोक्षिताएवभवन्तीति॥प्रोक्षण्यआपःकिंप्रोक्षिताःके ९४
नप्रोक्षिताइतिशुद्धिंप्राप्यस्वयमन्येषांप्रोक्षणेनशुद्धिंकुर्वन्तीतिप्रश्नार्थः॥ब्राह्मणेइमंप्रश्नमवत्तार्यउनरप्यभिहितंनदेवा
म

त्रोत्तरे भविष्यन्तीत्याशयेनाह विज्ञायत इत्यादि ब्राह्मणे खल्वेवं विज्ञायते ब्रह्मवादिनो वदन्ति हे अध्वर्यो अद्भिः प्रोक्षणीभिर्हवींषि प्रो
क्षीः प्रोक्षणेन शृताभ्यकार्षीः केनापः प्रोक्ष्यसीति प्रश्नः उत्तरमपि विज्ञायते ब्राह्मणे इति प्रोक्षितास्थेति मंत्रेणेत्यर्थः ॥ ननु प्रोक्षणं
नाम सेचनं तत्र द्रवद्रव्यमेव करणं न मंत्रः तत्कथं मंत्रेण स्फक्तमित्यत आह प्रोक्षिता एव भवन्तीति प्रोक्षितास्थ प्रोक्षणशोधितास्थेति
मंत्रेणाभिधानमात्रेणैव शृताः शुद्धा आपो न तत्र सांद्रव्यमंतरेण प्रोक्षणं कार्यमित्यर्थः ॥ एवं च कल्पसूत्रे मंत्रं त्रिरभ्यस्याद्भिः स्त्रिः प्रो
क्षणे विहितेपि कर्मान्ते मंत्रोच्चारणमेवात्र प्रोक्षणं नाद्भिरपि न कार्यमित्यवगम्यते ब्रह्म प्रोक्षिता एवेति वचनात् ॥ आपस्तंबे
पि अद्भिरेव हवींषि प्रोक्षति ब्रह्मणा प इति ब्राह्मणेन अपामभिमंत्रेणमेव प्रोक्षणमभिमेतमित्यभिप्रायेण सूचितं आपो देवा स्रे
स्रुच इत्यभिमंत्र्येति ॥ अथ पुरोडाशीयान् प्रोक्षति देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये वो जुष्टं प्रो
क्षाम्यग्नीषोमाभ्याममुष्मा अमुष्मा इति यथादेवतं त्रिरिति पुरोडाशीयान् पुरोडाश्यर्थान्निरुप्तान् व्रीहीन्यवान् प्रोक्षणेन सं
स्करोति देवस्य त्वेति मंत्रे अग्नये वो जुष्टं प्रोक्षामीत्यंतं यथाम्नानमुक्त्वाग्नीषोमादिशब्दांश्चतुर्थ्यंतानुच्चरेत् यथादेवतं अ

सु०द० मुष्मा अमुष्मा इति चतुर्थ्यंतस्यानुकरणं वीप्सया च प्रतिदेवतापदं चतुर्थ्यंतत्वेनोच्चारणमवगम्यते तथा च ब्राह्मणं अग्नये वो जुष्टं
८५ प्रोक्ष्याम्यग्नीषोमाभ्यामित्याह यथादेवतमेवैनान् प्रोक्षतीति॥ अत्रेद्वैधं॥ अवग्राहशः प्रोक्षेदिति बोधायनो देवताः समनुद्रुस
त्रिरेवेति शालीकिरिति अवग्राहशः अवग्रहावग्रह विच्छिद्य विच्छिद्येति यावत् देवस्य त्वेति नुद्रुत्याग्नये वो जुष्टं प्रोक्षामीति
सकृन्मंत्रमुक्त्वा त्रिः प्रोक्षति देवदेवस्य त्वेत्यनुद्रुत्याग्नीषोमाभ्यां वो जुष्टं प्रोक्षामीत्यादि प्रतिदेवतं पृथक् त्रिः प्रोक्षेत् अस्मिन्द
र्शने पृथगेव प्रतिदेवतं निर्वापः। तत्तद्देवत्यस्य च यथादेवतं मंत्रेण प्रोक्षणे अत्र चावहननादो संसर्गः अनंतरं विभागश्रुतेः इ
ति बोधायनमतं शालीकिस्त्वाह यथासमाम्नायमेव सर्वा देवताः समनुद्रुत्य त्रिरेव प्रोक्षेत् अस्मिंदर्शने सहनिर्वापः सहमंत्रपा
ठात्॥ अग्रे विभागवचनेन साहित्यस्यावश्यकत्वात्। निर्वापमार्गस्य पार्थक्ये अदृष्टार्थप्रसंगाच्चेति। उत्तानानि पात्राणि कृत्वा प्रोक्षति
शुंधध्वं दैव्याय कर्मणे देवयज्याया इति त्रिरिति॥ पात्राणि याणि द्वंद्वं विसादितानि उत्तानानि कृत्वा सव्ये हस्ते प्रोक्षणीर्निधाय दक्षि ८५
णेन पाणिना पात्राणि उत्तानानि कृत्वा प्रोक्षति शुंधध्वमिति मंत्रस्यायमर्थः॥ हे पात्राणि देवयज्यात्मने दैव्याय कर्मणे शुंधध्वं शुद्धा

निभवत्तेति अत्र मंत्रे शुंधध्वमिति बहुवचनेन सर्वेषां पात्राणामुक्तत्वान्मंत्रावृत्तिप्रयोजनाभावात्सर्वेषां पात्राणां सकृन्मंत्रः त्रिः प्रोक्ष
णं एवं च यदि कश्चित्प्रोक्षितव्यं एकं पात्रं द्वे पात्रे स्यातां तदा शुंधस्व शुंधेथामित्यूहो मंत्रस्येति द्रष्टव्यं।।अत्रैद्धं।।पात्राणां प्रोक्षण
इति सूत्रं शालीके रत्नोहस्माह बोधायनः शुंधध्वं दैव्याय कर्मणे पात्राणि देवयज्याया इत्तीति।।सूत्रं पात्राणीति।पदं विना प्रोक्षणे मं
त्र इति शालीकेर्मतं तद्युक्त एव मंत्रः तथा शाखांतरे पाठादिति बोधायनमिति।।अतिशिष्टाः प्रोक्षणीर्निधाय कृष्णाजिनमवधु
नोत्यूर्ध्वग्रीवमुदगग्रस्यावधूतं रक्षोवधूता अरातय इति त्रिरिति।।अतिशिष्टाः पात्राणां प्रोक्षणानंतरं अग्निहोत्रहवण्यां
अतिशिष्टायाः प्रोक्षण्य आपः इध्माबर्हिर्वेदिप्रोक्षणार्थं निधाय अग्रेण गार्हपत्यं तथा चापस्तंबः प्रोक्षणीशेषमग्रेण गार्हपत्य
निधायेति उदगग्रस्य ऊर्ध्वग्रीवं कृष्णाजिनं कृष्णाजिनमिति षष्ठीतत्पुरुषः।।ननु कृष्णं च तदजिनं चेति कर्मधारयः पूर्वपदल
क्षणाभावेपि यज्ञो देवेभ्यो निलायत तत्कृष्णो रूपं कृत्वेत्यर्थवादावरीधात्कृष्णो मृगविशेषः तस्याजिनमित्यर्थः।।अवधूनोत्य
वधूतं रक्ष इति त्रिः।।देवस्य त्वा सवितुः प्रसव इति कृष्णाजिनमादायावधूतं रक्षोवधूता अरातय इत्यस्करेत्त्रिरवधूनोत्यू

क०द०
८६ ध्वंग्रीवं बहिष्ठा विशसनमिति । अति शिष्टानां प्रोक्षणीनां निधाने द्वैधं । । अति शिष्टानां परिशायन इत्येता एव परिशायीरन्निति बो
धायनः सिक्ता आप उपरिशिष्टा अन्याः संस्कुर्वीरन्निति शालीकिरिति । । अतिशिष्टानां प्रोक्षणीनां परिशायनं निधानं तत्र पात्रप्रोक्षण
र्थं उत्सृष्टाया आप एता एवायः । परिशायीरन् अंतर्भावितण्य र्थोयं परिशायीरन्निदध्युरिति बोधायनः एता आपः सिक्ता उ
त्सृज्यकृतार्थत्वात् उत्तरत्र इध्माबर्हिर्वेदि प्रोक्षणार्थं अन्या आपः संस्कृत्य गृह्णीयादिति कृष्णाजिनस्यावयवन इत्युपनिष्क्र
म्यागारात् उत्तरे परे वांतरे देशे कृष्णाजिनमवधूनुयादिति बोधायनः अंतरे वेत्तां दिशमिति शालीकिरिति कृष्णाजिनस्यावय
वने इदमुच्यते अग्न्यागारात् गार्हपत्यागारात् उपनिष्क्रम्य उत्तरे परे वात्तरदेशे वधूनुयादिति बोधायनः अंतरे वा अनुपरिक्र
म्याग्न्यगार एवतां दिशं तत्रैवांतरदेशे तिष्ठन्नवधूनुयादिति शालीकिरिति । अथैनत् पुरस्तात् कृष्णाजिनस्य पुरस्ताद्भागा
द्वारभ्य पश्चाद्वारभ्येति यावत् प्रतीचीनग्रीवस्य हि कृष्णाजिनस्य अर्थात् पुच्छस्यैव पूर्वभागत्वात् तत्तश्च कृष्णाजिनं पुच्छप्रदेशा ८६
द्वारभ्य प्रतीचीनग्रीवमुत्तरलोम उपसमीपे स्तृणाति अदित्यास्त्वगसीति । । अत्र द्वैधं । । कृष्णाजिनस्यास्तरण इति सहस्माह बोधाय

नो अविसृजन्नेन तत्कर्म कुर्यात् ॥ कृष्णाजिनस्यावयवनादास्तरणादेव मुलूखलाध्यूहनाद्दापुरोडाशीनामापवनादेवं मुसलस्या
वयवनादा शूर्पस्योपोहनादेव मधिपेवनादाप्रस्कन्दनादेवं कपालस्योपधानादायोगादुभाभ्यामेवं प्रस्तर आस्कन्दनादेवमग्न्याद
खननात् एवं भोडुबर्याभिहोमादेवं शूर्पे आपरिव्ययणादिति यथोपपादमेवैतानि कुर्यादिति शालीकिरिति कृष्णाजिनस्यास्तरणेड
दमुच्यते स हस्माह बौधायन उभाभ्यां हस्ताभ्याममुंचन्नेन तत्कर्म कुर्यादिति एतत्कर्मेति सामान्यतो निर्दिष्टं विशिष्य दर्शयति कृष्णाजिन
स्यावयवनादि स्यादि संभवे उभाभ्यां हस्ताभ्यामविसर्गः । असंभवे तु दक्षिणस्य कार्यान्तरे व्यापृतत्वात् सव्येनाविसर्गः सव्याश्मन्ये निद
धातितथा च वाजसनेयिनः समामनन्ति अभिनिहितमेव सव्येन पाणिना भवति अथ दक्षिणेनोलूखलमाहरतीति अत्र हि दक्षिणस्य
पाणेर्व्यापृतत्वात्सव्येनान्वारंभेण अनुत्सर्गो षगंतव्यः तथा चापस्तंबः । तस्य तस्यांगुल्याभिधानमंगाराधिवर्तनं च वाजसनेयिनः
समामनंति सव्यहस्तांगुल्या चान्वारंभः अत एव कात्यायनः सव्यांगुल्या अश्मन्ये अंगारं निदधाति अग्नेर्ब्रह्मेति तस्य षंच वाजसनेयके
श्रूयते अभिनिहितमेव सव्यस्य पाणेरंगुल्या भवतीति ॥ ननु सव्येनैवान्वारंभं कुर्वन् कथमुभाभ्यामविसृजन् भवतीति चेदुच्यते नख
× रंभो विहितः कात्यायनसूत्रमपि कृष्णाजिनाधिकारे सव्याश्मन्ये निदधात् सू उलूखलमद्रिरसीति ग्रावासीति वेति कपालोपधाने तु अंगुल्या ना २×
अ

स०९० ८७ रुत्प्रकृत उभाभ्यामन्वारंभो विहित किल विसर्गः।। तत्तश्च दक्षिणेनैव हस्तेन विसृजन्नपि उभाभ्यामविसृजन्नीति व्यपदेशुं शक्यत
इति न विरोधः अविसृजन्निसेत्ता वत्तेव मित्यर्थे प्यन्यतर हस्तेन। विसर्गे उभाभ्यामिति संभवे उभाभ्याम न्वारंभार्थ एवं चोभाभ्यां कृष्णा
जिनास्तरणं कार्यमिति कृष्णाजिनस्यावयवनादास्तरणादित्यास्तरणादिषूदाहरणेषु कृष्णाजिनस्यावयवम मारभ्येति त्यक्तोपे पंच
मी। आरणादित्यादौ आउः भिविधौ भूपस्यापोहनं उपयमनं आयोगादिति यागस्यानित्यत्वात् सति योगे अयोगान् भसत्ति तु आयोग
कालात् उभाभ्यामिति तु पदस्याविसृजन्नुभाभ्यामिति पाठे युक्तः नत्त आरभ्य तदन्वयेस्पष्टत्वात् आयोगा उभाभ्यामिति क्रमविप
र्यासेन पाठस्त्वैद्धिकः एवं प्रस्तरे पुनर्गृहीते औदुंबरी यूपोदाहरणयोरुच्छ्रयणादारभ्याग्निहोमादापरिव्ययणादिति।। शा
खीकिस्त यथोपपादमेव उपपादः उपपत्तिः यथोपपत्त्यैव अनुत्सृज्यन् अविसृज्य वा कुर्यादिति।। तस्मिन्नुलूखलमध्यूहति ।। ९०।। अ
धिषवणमसि वानस्पत्यं प्रतित्वादित्यास्त्वग्वेत्ति त्वीति।। तस्मिन्नास्तीर्णे कृष्णाजिने स्पष्टमन्यत् तस्मिन्पुरोडाशीयानावपत्य ८७
ग्निस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामीतीति।। तस्मिन् अध्यूहिते उलूखले पुरोडाशीन्सर्वा न पिमतिर्देवतं निर्वपेत्रो

क्षणे च भेदेन कृत्ते पि पुरोडाशीयानि स्यविशेषवचनेन अग्रेविभागवचनेन तानि सहावघ्नंति सहपिंषंती तिश्रुत्यंतर दर्शनेन च सर्वेषां
सहावहनन प्रोक्षणयोः कर्तव्यत्वात् शिष्टं स्पष्टं ।।अत्रेदं ध्यं।।पुरोडाशीयानामावपन इति सूत्रं बोधायनस्य पंचमुष्टीन् पंचावत्ति
नामावपेदिति शाखीकिरिति।।सूत्रं सहैव सर्वेषां पुरोडाशीयानामुलूखले आवपनमिति बोधायनस्य मतं शाखीकिस्त्वाह। पंचाव
त्तिनां पंच मुष्टीनिति।।आपस्तंबस्तु अग्नेस्तनूरसी ति तस्मिन्हविरावपति त्रिर्यजुषा तूष्णीं चतुर्थमिति न तस्य यथा कल्पसूत्रं च तु
रवत्तिनां सहैवावपनमिति सहावपनपक्षे शूर्पेणावपनं हस्तेनावपने सहत्वासंभवात्। प्राजापत्यवपानां युगपत्स्रुवेणावदानानुप
तेः कंसेन स्रुझामावपनं धारणार्थत्वात् कंसस्य एवमोषधानां धारणार्थत्वाच्छूर्पेणावपनमिति।।मुसलमयद्यथात्यद्रिरसि वानस्प
त्यः स इदं देवेभ्यो हव्यं सुशमि शमिष्वमिच्छेति।।अथ तस्मिन्निस्यनुस्तं उलूखलं च तस्यार्थः।।स्पष्टमन्यत्।।अथ हविष्कृतमाह्वयति
हविष्कृदेहि हविष्कृतं पर्जन्यं अन्यं वा अवहनेहविषः कर्तारमाह्वयति हविष्कृदेहीति त्रिरिति।।अत्र कर्मांतं हविष्कृदेहीति ब्राह्मण
स्य वदति हविष्कृदागहीति राजन्यस्य हविष्कृदाद्रवेति वैश्यस्य हविष्कृदेहीति पर्जन्य एवैष युक्तो भवन्ति अथाप्युदाहरं एत्ति हवि-

ऋन्द० संस्कारिणमेवैतदाहेनीति॥हविष्कृदेहीत्याहेतियद्वदति ब्राह्मणंन ब्राह्मणस्यक्षत्रियेवैश्ययोक्तहविष्कृदागहीत्यादि इगरवांतरान्
९९ हविष्कृदेहीत्यादेो चयएषउक्तोहविष्कृत्सपर्जन्य एवयएवदेवानांहविष्कृतःतानह्वयतीतिश्रुतेः देवानामध्येपर्जन्यःखलुव
र्षेणोषधिनिष्पादनेनपुरोडाशादिहविष्करोति॥अथापीत्यत्राथशब्दोंर्थांतरपक्षः।अथापिपर्जन्यादन्यविषयत्तयापिहवि
ष्कृच्छब्दमुदाहरंतिब्रह्मवादिनःहविःसंस्कारिणमेवअवघातादेोअध्वर्योःसहायभूतंपरिकर्मिणमेवएनद्धविष्कृत्यदमाहेतिस
स्यवघातादिनाहविःसंस्कारोत्तीतिअत्रदेवतायाआह्वानमितिपक्षेउदमदृष्टार्थसहायाह्वानपक्षेतुदृष्टार्थमिति॥आपस्तंबस्त्व
ह।हविष्कृदेहीतित्रिरवहंस्यनवघ्नन्वाहविष्कृतंह्वयतिहविष्कृदेहीतिब्राह्मणस्यहविष्कृदागहीतिराजन्यस्यहविष्कृदाद्रवेतिवैश्य
स्यहविष्कृदाधावेतिशूद्रस्यप्रथमंवासर्वेषामवरक्षोदिवःसपत्नवध्यासमवहंनीति।उच्चैःसमाहंतवाइति चेति॥इमेमंत्रश्रूयादि
त्याध्याहारःउच्चैःसमाहंतवाआहविजित्याइतिहिब्राह्मणंहेअग्नीन्केनचित्पाषाणेनदृषदुपलाचोच्चैःसमाहंतवेताउनीय ९९
इतिमंत्रलिंगात्त्रिष्फलीकर्तवाइतिवत्संप्रेषोयंपंचत्तयेनकल्पमवेक्ष्येतच्छंदसेत्तिकर्मोत्तउक्तेःविस्पष्टमुक्तमापस्तंबेनउच्चैः

समाहंत्तवाइतिसंप्रेष्यतीतिवैखानसस्त्वाह प्रादुर्भूतेषुलंउले षूच्चैः समाहंत्तवाइतिसंप्रेष्यतीति अथ दृषदुपले रथारवेणोच्चैः समा
हंतीषमावदोर्जमावदद्युमद्वदतवयं संघातं जेष्मेतीति॥ दृषदुपले रथारवेण पाषाणेनउच्चैर्ध्वनिर्यथाभवतितथा समाहंतिना
डयेत् षेइमावदेति अच दृषदुपलग्रहणं प्रदर्शनार्थं सर्वेषां पात्राणां यावंतोस्यभ्रातृव्या यज्ञानामुद्वदंतामुपश्रृण्वंतितेपराभवंती
तिब्राह्मणेदर्शनात्समाहननंचाग्नीध्रः कुर्यात् अध्वर्योरुच्चैः समाहंतवाइतिसंप्रेषकर्तृत्वेन समाहननेतस्यकर्तृत्वानुपपत्तेः।उ
च्चैः समाहंतवाइतिमंत्रे संबोधनत्वोएवमध्यमपुरुषयोरभावेन प्रेषत्वानुपपत्तेः॥ अध्वर्युरेवसमाहन्यादितिकेचित् दृषदुपलयो
रेवाहननमित्यपि पक्षः कर्मांतउक्तः तथाहि। दृषदुपले रथारवेणोच्चैः समाहंतीति विज्ञायते ब्राह्मणमुच्चैः समाहंतवा अह
विजित्यैयावंतोस्यभ्रातृव्या युज्ञायुधानामुद्वदतामुपश्रृण्वंतितेपराभवंतीति द्विर्दृषदि स कृदुपलायां नवकृत्वः संपादयतीति
विज्ञायत इति। अत्र ब्राह्मणमित्यारभ्यतेपराभवंतीत्यंतेनक   त्योक्तस्य संप्रेषपूर्वक सर्वयज्ञायुध समाहननपक्षप्रया
णोपपादनमुख्येनपुनरुपदेशः तैत्तिरीयकाणां स्वशाखाविहितत्वेनावश्यादरणीयतासूचनार्थः॥ तत्रविजित्याइत्यंतं संप्रेषप्रमा

स्रु०द० णांयावंतइत्यारभ्यतु सर्वयज्ञपात्राणां समाहनने प्रमाणमिति ध्येयं ॥ दृषदुपलइत्यारभ्य विज्ञायत इत्यंतं शाखांदृषदुपलयोर्दर्भादवे
८९ णोच्चैः समाहननं कार्यमित्यत्र प्रमाणोपन्यासः। द्विर्दृषदीत्यादितु तत्रैव प्रकारविशेषेन वकृत्वोभ्यासे च प्रमाणां तरीयं शाखांतरी
यं एतत्स्य वचनद्वयस्याप्येकविषयोपनिपातात् सामान्यविशेषभावावगमाच्च समुच्चित्यानुष्ठान एतस्मिन्पक्षे सर्वेषां यज्ञायुधानां
परामर्षाभावात् दृषदुपलयोरेव समाहननमिषमावदेत्ति द्विर्दृषदि सकृदुपलायां त्रिरभ्यासेनच्चनवकृत्वः संपादनं तथा चापस्तंबः
कुटरुरसि मधुजिह्व इत्याग्नीध्रोश्मानमादायेषमावदोर्जमावदेति दृषदुपले समाहंति द्विर्दृषदि सकृदुपलायां त्रिः सचारयन्नवकृ
त्वः संपादयतीति। केचित्तु सर्वेषां पात्राणां समाहननपक्ष एव द्विर्दृषदुपलयोर्द्विर्दृषदि सकृदुपलायामिति त्रिरभ्यस्यंति तत्र प्रमाणं
गवेषणीयं ॥ अत्रेदं ध्येयं ॥ दृषदुपले रषारवेणोच्चैः समाहंतीति सूत्रं बौधायनस्य शम्ययावेति शालीकिरिति ॥ सूत्रं रषारवेण समा
हंतीति बौधायनस्य मतं रषारवेण शम्यया वेति शालीकिः अस्मदीये ब्राह्मणे उद्धारनमात्रस्य विधानादिति अचहसो तुषान्कृत्वोत ८९
रतः शूर्पमुपयच्छति वर्षवृद्धमसीति ॥ अध्वर्युरवहत्य पुरोडाशीयान्नतुषान्कृत्वा उलूखलस्योत्तरतः शूर्पमुपयच्छति निरथा

त्ति वर्षवृद्धमसीति। तस्मिन् पुरोडाशीयानुद्वपति प्रतित्वा वर्षवृद्धं वेत्त्विति तस्मिन्नुपनीयन्ते शूर्पे पुरोडाशीयान्व्रीहीन्यवान्वा उद्वपति उद्
त्य स्थापयेत्॥ प्रत्तीत्वेति॥ अत्रेद्वैधं॥ शूर्पस्योहन इति सूत्रं शालीकेरत्रोहस्माह बोधायनस्तूष्णीं शूर्पमुपोहेत् समस्तेनैव मंत्रेण पुरोडाशी
यानुद्वयेत्॥ वर्षवृद्धमसि प्रतित्वा वर्षवृद्धं वेत्त्विति शूर्पस्योपोहने निधाने प्रकारः सूत्रं उपयच्छति वर्षवृद्धमसीति उपद्वति प्रतित्वा वर्ष
वृद्धं वेत्त्विति कल्पसूत्रं इमौ द्वौ मंत्रौ भिन्नार्थत्वात्॥ एकवाक्यत्वे शूर्पविषयस्य वर्षवृद्धशब्दस्यानुरसनुपपत्तेरिति शालीकेः आपस्तंबो
प्याह वर्षवृद्धमसीति पुरस्ताच्छूर्पमुपोहत्येकतरतो वा वर्षवृद्धा स्थेत्यभिमंत्र्य प्रतित्वा वर्षवृद्धं वेत्त्विति संवपतीति॥ बोधायनस्त्वाह॥ तूष्णीं मंत्र
विना शूर्पमुपोहेत् वर्षवृद्धमसि प्रतित्वा वर्षवृद्धं वेत्त्विति पुरोडाशीयानुद्वपेत्। एक एव हि मंत्रः॥ नस्यत्र वर्षमिति पदद्वयं शूर्पविषयं ए
कस्यैवं पुनश्श्रुतिरविशेषादनर्थकं हि स्यायेदिति न्यायेनाभ्यासस्यार्थांतरविषयत्वनिगमात् तत्तश्च प्रथमो वर्षवृद्धशब्दो धान्यविषय
द्वितीयस्तु शूर्पविशेषयः॥ तथा च ब्राह्मणं वर्षवृद्धमसि प्रतित्वा वर्षवृद्धं वेत्त्विति आह वर्षवृद्धा वा ओषधयः। वर्षवृद्धा इषीकाः॥ स
मध्या इति इषीकावेणवस्तेषां वर्षवृद्धत्वात्॥ तदीयविदल निर्मितस्य शूर्पस्यापि वर्षवृद्धत्वं बोध्यं धान्यानां तु वर्षवृद्धत्वं प्रसिद्धमेवे

स्रु०द० ति।अथोदङ्पर्यावृत्त्यपरापुनातिपरापूतं रक्षः परापूता आराताय इत्तीति।उदङ्मुखोयथा भवेत्तथा पर्यावृत्त्य परापुनातिशूर्पेनतु

१० षानन्तं तुलेभ्यः पृथक्करोतिपरापूतमिति।।अत्रद्वैधं।।अथोदङ् पर्यावृत्त्यपरापुनाति सूत्रं बोधायनस्य पाकांचिद्दिशमभिपर्याव

त्यपुनातीतिशालीकिरिति।।स्पष्टं।।सव्येनतुषानपहत्येमां दिशं निरस्यति रक्षसांभागोसीति सव्येन वामहस्तेनतुषानपहत्यगृही

त्वा इमांदिशमिति यद्यपि सामान्यशब्दःस्तथापि रक्षसंबंधात्पश्चिमदक्षिणेतिगम्यते तांदिशंनिरस्यतिरक्षसांभागोसीति।।अत्र

द्वैधं।।तुषाणांनिरसनइतिसूत्रं शालीके तत्रोह स्माह बोधायनो न त एव यावन्मात्रानुपहस्य कृष्णाजिनस्य ग्रीवासु उपवपेत् रक्षसां

भागोसीत्यथोदकंस्पृशेदितीति।।तुषाणांनिरसनेप्रकारभेदः सूत्रं सव्येन इमां राक्षसींदिशमिति शालीकेमतं बोधायनस्त्वाह अत

एव सव्यहस्तेनैवयावमात्रान्तुषान्गृहीतुं शक्नोतीति तावन्मात्रानुपहत्य गृहीत्वा।।कृष्णाजिनस्यग्रीवायां वा निरतिदेशे उपवपे

द्रक्षसांभागोसीति तत उदकमुपस्पृशेदिति आपस्तंबस्त्वाह।मध्यमे पुरोडाशकपाले तुषानोप्य रक्षसांभागोसीत्यधस्तात्कृ

ष्णाजिनस्योपवपमुत्तरमपरमवांतरदेशं हस्तेनोपवनीति चकृचब्राह्मणंभवतीति।।अथाउपस्पृश्येति।।स्पष्टं विनिनक्ति १०

तायुर्वो विविनक्ति तीति ॥ विविनक्ति तंडुलान्व्रीहीश्च पृथक्करोति शूर्पेण ॥ पात्र्यां तंडुलान्प्रस्कंदयति देवो वः सविता हिरण्यपाणिः
प्रतिगृह्णात्विति तीति ॥ पात्र्यां संसादितायां दारुपात्र्यां तंडुलान्प्रस्कंदयति देवो व इति । अवहंत्र्ये प्रयच्छन्नाह त्रिष्फलीकर्तवै विष्फ
लीकृतान्भिः प्रभूतादिति ॥ अवहंत्र्ये पत्न्येन दाहापस्तंबः ॥ त्रिष्फलीकर्तवाइति संप्रेष्यति वा यजमानस्य पत्नीमभिहत्यावहंति
यो वा कश्चिद्विद्यमानामिति ॥ प्रयच्छिन्नाह ददत्संप्रेष्यति त्रिष्फलीकर्तवे फलीकरणं त्रिवारं कर्तव्यं ॥ त्रिष्फलीकरणं वाध्व
र्युभर्त्तान्व्रीहीनुलूखले अवोप्य अवहत्य तुषान्कृत्वा शूर्पे ओप्य पराप्लूय विविच्य तंडुलान्प्रस्कंदय नीत्ये तस्य त्रिर
भ्यासेन सर्वेषां व्रीहीणां वितूषीकरणं त्रिष्फलीकृतांश्च तंडुलान्भेभूतास्त्वभ्रूहीतीति त्रिष्फलीकृतान्प्राहुरिति ॥ बहुवच
न नियमार्थं स्पष्टमन्यत्तु फलीकृत्य करणान्प्राज्ञाता निदध्यादिति पत्नी वक्ष्यमाणत्वात् आह च कात्यायनः फलीकृत्य कणा
न्निदध्यादिति ॥ भारद्वाजोप्याह फलीकरणान्निधायेति । अत्र केचित्सर्वानपि तुषान हपत्यजिरस्येत्सर्वेषामेव यज्ञं रक्षा
ंस्यनुप्राविशन् ॥ तान्यस्मात्पशुभ्यो निरवासयंत ॥ त्वोषैरोषधीभ्यः इति रक्षसां भागोसीत्याह तुषैरेव रक्षांसि निरवदय

स्क०२० त्त इतिच ब्राह्मणे तुषैरिति बहुवचनेन सर्वेषामेव प्रतिपादनीयत्वावगतेः ॥ अत्रेदं ध्यं ।तुषाणां निरसन इति सूत्रं शालीके रक्षोहस्माह बोध
९१ यनोऽत एव यावन्मात्रानुपहत्य कृष्णाजिनस्य ग्रीवात उपवपेत् रक्षसां भागोसीत्यथोदकं स्पृशेदिति ॥ तुषाणां निरसने प्रकार उच्यते सूत्रे
शालीके मतं बोधायनस्त्वाह ॥ अपि च सव्ये हस्ते तैनेव यावन्मात्रान्स्त्रैणाप्यवधात्तेन यावत्प्रमाणान्तुषा उत्पन्नास्तावत्तो पि उपहत्य ग
ही त्वा कृष्णाजिनस्य ग्रीवायामुपवपेत् । यद्वा ग्रीवायां निधाय तथैव दक्षिणपश्चिमस्यां दिशि निरस्येत् रक्षसां भागोसीतीति तत उद
कमुपस्पृशेदिति ॥ आपस्तंबस्त्वाह ॥ मध्यमे पुरोडाशकपाले तुषानोप्य रक्षसां तु भागोसीत्यथस्तात्कृष्णाजिनस्योपवपत्युत्त
रमपरमवांतरदेशं हस्तेनोपवपतीति बह्वृच ब्राह्मणं भवतीति ॥ रक्षःसंबंधिकर्मानुष्ठानेन संभावितासु चित्तनिर्हरणाय उप
स्पृशतिमध्ये त्वायेति विहितमुदकोपस्पर्शनं विधत्ते ॥ अथाप उपस्पृश्येति ॥ स्पष्टं ॥ विविनक्ति वायुर्वो विविनक्तिनीतिं विविनक्ति
कणांस्तंडुलांश्च न तुषान्ही नांस्तंडुलांश्च अवहत्यो तुषाः कुर्वेत्यत्रैव कृतत्वात् तुषोद्गमनेन परावपनेन च सर्वतुषनिरासात् ॥ तथा च धूर्त
स्वामिमतिः ॥ विविनक्ति सर्वानवहत्य पराप्य चैति सर्वेषां प्रस्कंदनं शूर्पादिति च ॥ तथैव कर्त्र्य ॥ वायुर्व इति विविनक्ति पृथक्क ९१

रोति तंडुलांन्कणांश्चसंकलितानां व्रीहीणां वितुषीकरणाय तस्यैतद्विवेकीकरणं तुषनिरसनात्पूर्वं प्रतिपत्तव्यं ॥ सामर्थ्यात्तु
अशेषनिरसनं ह्येव भवति । उक्तंच विरोधे तत्परत्वादिति सूत्रक्रमश्च यथाश्रुतौ सदोषः । सचायमवघातः कृष्णाजिनादिस्तुष
विनो कालः तस्तनार्वाडे ष्वा हविरावपनमुसलयोजनहविरुद्वपननिष्पवनविवेकीकरणा[illegible] निर्भेदनमत्रयंतिहविष्य
रत्वामंत्रस्य शेषं तंत्रेणेति त्रिष्फलीकरणं तु कणनिरसनेन स्फलीकरणाय तथा त्रिष्फलीकरण आपस्तंबसूत्रं देवेभ्यः शुं
धध्वं देवेभ्यः शुंधयध्वं देवेभ्यः शुंभध्वमिति स्फलीकृतान्करोति नूष्णीं वेत्ति । तंडुलान्प्रस्कंदयति देवोवः सविता हिरण्य
पाणिः प्रतिगृह्णात्विति तंडुलान्सर्वान् ॥ अवहंत्र्येप्रयच्छन्नाह त्रिष्फलीकर्तवै त्रिष्फलीकृतान्मे प्रब्रूतादिति ॥ अवहते पत्न्यै
तथाचापस्तंबः या यजमानस्य पत्नी साभिद्रुत्यावहंती ति इदं फलीकरणं स्फलीकरणरूपं तत्त्रिवारं कर्तव्यं त्रिष्फलीकृतश्च
तान्त्रिष्फलीकृतान्मेइति मे प्रब्रूतादिति । त्रिष्फलीकृतान्प्राहुरिति गतं । फलीकरणांश्च प्रज्ञातानां निदध्यात् । तथाच कात्यायनः ।
फलीकृत्य कणान्निदधातीति ॥ भारद्वाजोप्याह प्रज्ञातान्फलीकरणान्निदध्यायेति व्याचक्षते यदत्र युक्तं तदंगीकरणीयं विद्वद्भिः

स्र०द० रिति ।। त्रिष्फली क्रियमाणा नां योन्यं गो अवशिष्यते ।। रक्षसां भागधेयमायस्त अवहनादि तदिति तंडुलप्रक्षालन मंत्रैर्वेदि निनयत्
९२ त्तरदेशे वेति ।। वेद्यांत अर्वेदि विभक्त्यर्थे अव्ययीभाव उत्करदेशे वा तंडुलं प्रक्षणलनं तंडुला: प्रक्षाल्यंते अनेनेति तंडुलप्रक्षाल
नमुदकं त्रिष्फली क्रियमाणा नामिति निनयति । हविष्कृतावाचं विसृज्येति यत्र यत्र वदत्याचार्यस्तत्र सर्वत्रापि तंडुलोदक निनय
नांतं कुर्यात् आतिथ्येकस्य सूत्रे हविष्कृतावाचं विसृज्ये स्फ्तं कर्मांते शूर्पादान प्रभृतिकर्मा तत्ता यत्त आप्रस्कंदनात्प्रस्कंदनांतं क
र्मकुर्यात्स्यन्यद्यन्तः उत्तरमनङ्वाहं विमुच्य राजानं प्रतिपादयेत् सिद्धमाग्निष्टोमिकं कर्म जानीयादासंप्रैषात् इति मध्ये सोमिकपदा
र्थानानुक्रम्य पुनरातिथ्य पदार्थस्यानुक्रमणं कुर्वता कृष्णाजिनावधवनेनातिथ्यस्य प्रति पद्यत इति पद्यत इति कृष्णाजिनावधवना
देरनुक्तत्वात् तंडुलोदकनिनयनांतस्य प्राक् कर्तव्यत्वावगतेः ।। अथवा कृष्णाजिनावधवनेनेत्येतत् ।। तंडुलप्रक्षालननिनयन
देरुपलक्षणं पूर्वं प्रस्कंदनांतं कर्म कुर्वीतेत्यभिधानात् ।। प्रस्कंदनांतमेव कार्यं एतत्तरे वचनानां बीजे संगी कार्यं एवं च तंडुलोदकनि ९२
नयनं तंत्रं भविष्यतीति ।। एतस्मिन्काले प्रातर्दोहं धेनुर्दोहय स्फ दर्भाग्रेण पवित्रेण नात्रातनक्ती ति ।। तस्मिन्काले तंडुलप्रक्षा

लन निनयनांतरं मातर्दुर्ग्धेत इति प्रातर्दोहः पयः तं धेनुर्दोहयति श्रुतौ दोहनार्थानां मंत्राणां ब्राह्मणविहितानामावर्तनं
च सायंप्रातर्दोहयोरविशेषेण प्रातर्दोहेऽपि प्राप्तिरस्तीति अथ जघनेन गार्हपत्यमुपविश्योपवेषेणोदीचोंगारान्निरूहेतिमा
तरिश्वनो घर्मोसीति॥ सूत्राविहिता दोहनधर्माः सर्वेप्यत्र कर्त्तव्याः अत एव ब्राह्मणे सायंप्रातर्दोहयोः साधारणधर्मान्विधाय
विशेषधर्मयोः पृथक् विधिर्वर्त्तते प्राक् सायमधीनिदधाति॥ तत्प्राण्यापानयोरूपं॥ तिर्यक् प्राक्तः तद्दर्शस्यरूपं दर्शंहे तद्दहरि
ति॥ तदिदमाह सूत्रे इति उदगग्रेण पवित्रेणेति इदमुदगग्रत्वमेव ब्राह्मणोक्तं तिर्यक्त्वमित्यर्थः॥ आतंचनस्य दधिभावार्थात्ता
न्वा वनत्कर्त्तव्यमित्याह नात्रातनक्रीति तथा चान्यदपि यदध्वर्थंशीतिकरणादि तदपि नात्र कर्त्तव्यो अभ्यातंचनसाह
चर्यात् सायंदोहस्यैवाग्निहोत्रोत्क्षेपणाभ्यां तंचन इत्युक्तं मंत्रब्राह्मणाभ्यां सायंदोहवत्प्रातर्दोपि उपदेशात् एव धर्मप्राप्तेः
सायंदोहधर्माणां प्रातर्दोहे ध्वतिदेशेन कृत आचार्येण इति ध्येयं॥ आपस्तंबस्त्वाह॥ उपधाय कपालानि सायंदोहवत्प्रात
र्दोहं दोहयत्पातंचनापिधानेऽपिधानं च निवर्त्तत इति॥ अत्र केचित् अतःप्रातर्दोहं धेनुर्दोहयतीत्येवसिद्धे एतस्मिन्काल इति

क०द०
९३ ब्राह्मणोक्तस्यकालांतरस्यज्ञापनायब्राह्मणेहि सायंदोहप्रातर्दोहयोर्विधौ प्राकृसायमधिनिदधातिर्यकृप्रातरिति प्रातर्दोह
धर्मस्यसायंदोह धर्मानंतरमाम्नानं सायंदोहानंतरं प्रातर्दोहस्यकालइतिज्ञापयति तेन प्रातरग्निहोत्रानंतरमेवपाणिनामर्श
नात्पूर्वंप्रातर्दोहस्य ब्राह्मणोक्तःकालस्यचस्वशास्त्रोक्तत्वेनविस्पष्टत्वान्नोक्तआचार्येणेत्याकूतः।। बोधायनकृतेसूत्रेपंचम
पटलेऽधुना। व्याख्यातस्तेन विधिनाविद्वांसःप्रीयतांशिवः॥११॥ अथप्रोक्षेषुत्रिष्फलीकृतेषुतथैवकृष्णाजिनमवधूनो
त्यूर्ध्वग्रीवमुदउत्तरत्या वधूतं रक्षोवधूताआरातयइतित्रिरिति॥ त्रिष्फलीकृताइत्यध्वर्युप्रत्यक्तेषुतंडुलेषुतथैवअवघा
तवदेवउपनिष्क्रम्यांतरेवैतांदिशमित्याचार्येतेषकृष्णाजिनमथधूनोति अवधूतंरक्षोवधूताआरातयइतित्रिरिति
अत्रयद्यपित्रिष्फलीकृतान्प्राकुरित्यनंतरं तंडुलप्रक्षालननिनयनस्यविहितत्वात्तदानंतर्यमेववक्तव्यंतुत्रि
ष्फलीकृतोक्तेषुरानंतर्यंअथप्रोक्षेष्वित्यवघातसमाप्तिर्लक्ष्यतेतथाव्यवधानादिनितथापिअवघातस्यकृष्णाजिना ९३
दानादितंडुलोदक निनयनांतत्यानदानंतर्यमेतस्यकृष्णाजिनावधवनस्येतिध्येयं।अयंचक्रमःपौर्णमास्याममावा

स्यायाम संनयनम्भसन्नयनस्त प्रातर्दोहानंतरमिदं रुक्मा जिनावधवनं अन्येतु अस्माच्छाखायां दर्शपूर्णमासार्थमंत्राणां
मध्ये निष्फलीक्रियमाणाना मित्रिमंत्रस्याध्यायनाभावात् तंडुलोदक निनयनस्य प्रत्यक्षविध्यश्रवणात् अत्र च फलीकृत
वचनानंतरं रुक्मा जिनावधवन वचनात् अतिथ्येकर्मान्ते प्रस्कंदनांतं कर्मक लेस्फला पुनः सौमिकपदार्थान्विधाय रुक्मा
जिनावधवनेनातिथ्यस्य प्रतिपद्यपइति वचनाच्च तंडुलोदकनिनयननित्यमिस्याहुः ।अपरे तु एतदपि ज्ञापकं प्राकृपा
णिसंमर्शनात् प्रातर्दोह संमतः सूत्रकारस्येत्यत्रेति वदंति ॥ अथेनस्तुरस्तात्प्रतीचीनग्रीवमुत्तरलोमोपस्तृणात्यदित्या
स्त्वगसि प्रतित्वा पृथिवी वेत्तिनी ।त॥ पूर्ववद्व्याख्यो यं॥ अथ तथैव रुक्माजिनमुपस्तृणातीत्यतिदेशेनैव प्रकारे सिद्धे पुनर
थैनत्पुरस्तादितिवचनं स्वशाखोक्तत्वेनेत्तिरीयाणामित्थमेव रुक्माजिनास्तरणं कर्तव्यमित्यभिप्रायाविष्करणार्थं रु
क्माजिनस्य पुनरास्तरणइति सूत्रमाचार्ययोः प्राचीनग्रीवमुत्तरलोमसौपमन्यवस्त्वाह प्राचीनग्रीवमुत्तरलोम रुक्मं अ
जिनस्यस्वत्तः सिद्धलोमकप्रदेशः उत्तरं उपरिभागो यस्मिन्कर्मणि तदुत्तरलोमं उपस्तृणातीति अत्र शाखांतरं मूलमिति

स्क०द० तस्मिन्नुदीचीनकुम्बां शम्यां निदधाति दिवस्कंभनिरसि प्रतित्वादित्यास्त्वग्वेत्तीति तस्मिन्नास्तृते कृष्णाजिने उदीचीनं कुम्बस्थू
९४ लोत्तप्रदेशो यस्याः सा उदीचीनकुम्बा विधेयमिदं विशेषणं शम्यायाः तथा शम्यां निदधाति दिवस्कंभनिरिति तस्यां प्राचीं दृषद
मध्यूहति धिषणासि पर्वत्या प्रतित्वा दिवस्कंभनिर्वेत्त्विति ।। तस्यां कृष्णाजिने निहितायां शम्यायां दृषदं यस्यां पिष्टानि पि
ष्यंते तां प्राचीं प्राचीनाग्रां अध्यूहति निदधाति धिषणासीति ।। अत्र वैखानसः धिषणासि पर्वत्येति तस्यां प्राचीं दृषदं प
श्चार्थेनाधिवर्त्तयतीति ।। दृषद्युपलामध्यूहति धिषणासि पार्वतेयी प्रतिपर्वतिर्वेत्त्विति ।। उपलां यया पिष्यं पिष्टानि
तां प्रेषणार्थत्वात्तिरश्चीमिति गम्यते शिष्टमन्यत् । तस्यां पुरोडाशीयानधिवपति देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहु
भ्यामग्नये जुष्टमधिवपाम्यग्नीषोमाभ्याममुष्मा अमुष्मा इति यथादेवतमिति ।। तस्यां दृषद्येव उपलाया अव्यवहितपू
र्वशब्दोपात्तत्वे तित्तस्यां पेषणाभावात् पेषणार्थत्वादधिवपनं दृषद्येव पुरोडाशीयानधिवपति सर्वान्सर्वेषामिति पेष ९४
णेन संस्कार्यत्वात् देवस्य त्वेत्यादि पूष्णो हस्ताभ्यामित्यंतमुक्त्वाग्नये जुष्टमधिवपाम्यग्नीषोमाभ्यामिंद्राय वैमृधायेति

यथादेवतं पौर्णमास्यां इत्थममावास्यायामपि देवस्यत्वेत्यास्यनुद्रुत्याग्नये जुष्टमधिवपामीन्द्राग्निभ्यामित्यसंनयतः इंद्रायेति
सन्नयतो महेंद्रायेति वा महेंद्रयाजी भवतीति ।। अत्र यद्यपि देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां मधिवपा
मीति त्वेत्तावानेव मंत्रः पठितः ।। तथापि ब्राह्मणे अधिवपामीत्याह यथादेवतमेवैनानधिवपतीति यथादेवतत्वविधानात् अग्न
ये जुष्टमधिवपाम्यग्निषोमाभ्यामित्यादिकस्मिर्त्तं कल्पकारैरिति बोध्यं । अधिवपामीत्याह अधिवद्दत धान्यमसि धिनुहि देवां
धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञनियमितीति ।। अधि आधिक्या यह विषो वदन्ते वदन्ति मंत्रं धान्यमसीति मंत्रे
णसंबोध्य उक्तं धान्यं संप्रधानभूतदेवताभिलषितपरिमाणयोगाय वर्धते मंत्रबलेन तथा च ब्राह्मणं धान्यमसि धिनुहि दे
वानित्याह एतस्य यजुषो वीर्येण यावदेकादेवता कामयन्ते यावदेकाला वदाहुतिः मप्यते ।। न हि तदस्ति ।। यत्तावद्देवस्यात् ।।
यावज्जुहोतीति ।। अत्र यद्यपि धान्यमसि धिनुहि देवानित्येतावानेव मंत्रो धीयते ब्राह्मणे च एतावत्ता एव ग्रहणं तथापि ब्रा
ह्मणे मंत्रे च शाखांतरीयस्य मंत्रस्य एकदेशाध्ययनं शाखांतरीयमंत्रस्य प्रतीकाध्ययनमित्यभिप्रायेणाचार्यैः शाखांतरीयो मं

का०द० ऽ्रो विनियुक्त इति ध्येयं ॥ पिंषंति प्राणाय त्वा पानाय त्वा व्यानाय त्वेति पिनष्टीति वक्तव्ये पिंषतीति छांदसो निर्देशः पिषंति पे
९५ षणेन निष्पादयति पिष्टानि प्राणाय त्वेत्यादिरेको मंत्रः तथा च ब्राह्मणं प्राणाय त्वा पानाय त्वा इत्याह प्राणानेव यजमाने दधा
नीत्येकमंत्रत्वं वदति ॥ बाहू अन्ववेक्षते दीर्घामनु प्रसितिमायुषे धामिति इति ॥ बाहू अध्वर्युः स्वस्य बाहू तयोरेव प्रतिकर्म
संतानं दीर्घभावदर्शनात् प्रसितिः कर्मसंततिः स्पष्टमन्यत् । कृष्णाजिने पिष्टानि प्रस्कंदयति देवो वः सविता हिरण्यपाणिः
प्रतिगृह्णात्विति इति सर्वेषु तंडुलेषु पिष्टेषु कृष्णाजिने स्थूलानि पिष्टानि प्रस्कंदयति पुनः पेषणेन सूक्ष्मीकरणार्थं तथा चाप
निकुरुतादिति प्रेषः तदर्थमेव च हविः प्रैष्ये प्रदानमिति अन्ये तंडुलानां मुष्टिमात्रमध्युप्यापि ष्टा प्रस्कंद्य हविः प्रैष्यैः सर्वे
षां प्रदानमिति वदंति ॥ अत्रेद्धं ॥ पेक्षणइति सूत्रं शालीकेरत्रोहस्माह बोधायनः प्राणाय त्वेति प्राचीं प्रोहेदपानायेति नि
रश्मीं कर्षेदथ प्राचीं प्रोहेद् दीर्घामनु प्रसितिमायुषे धामिति कृष्णाजिने पिष्टानि प्रस्कंदयेत् देवो वः सविता हिरण्यपाणिः ९५
प्रतिगृह्णात्विति इति । पेषणविषये इदमुच्यते सूत्रं प्राणाय त्वेत्याद्येको मंत्रः दीर्घामिति बाहू अन्ववेक्षत इति कल्पसूत्रो

त्कं शाखीके र्मतं बोधायनस्त्वाह त्रयो मंत्राः तेषां च विभज्य विनियोगः प्राणाय त्वेति प्राचीं प्रोहे दपानाय त्वेति प्रतीचीं व्यानाय त्वे
ति तिरश्चीं कर्षेदिति कात्यायनो प्याह पिनष्टि प्राणाय त्वेति प्रतिमंत्रं दीर्घामिति कृष्णाजिने प्रोहतीति अथ प्रेषणानंतरं दीर्घाम
नुप्रेति मायुषे धामि तिप्राचीं दिशं प्रेति प्रोहति पिष्टानि प्रापयति दृषद्येव ततः। कृष्णाजिने पिष्टानि प्रस्कंदयेत् प्रक्षिपेत् देवो व
इति मंत्रेण प्रोहणमेव कृष्णाजिने प्रस्कंदनमिति भ्रमव्यावृत्त्यर्थं कृष्णाजिने पिष्टानीति सूत्रमिति ध्येयं आपस्तंबस्त्वाह प्रा
णाय त्वेति प्राचीमुपकर्षं प्रोहत्यपानाय त्वेति प्रतीचीं व्यानाय त्वेति मध्यदेशे व्यवधारयति प्राणाय त्वापानाय त्वा व्यानाय त्वे
ति संततं पिनष्टि दीर्घामनु प्रसितिं मायुषे धामिति प्राचीं मंततो व प्रोह्य देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्विति कृष्णा
जिने पिष्टानि प्रस्कंदयत्विति॥ हविः पेष्ये प्रयच्छन्नाहासंवपंती षि९ पांशून्निकुरुतादितीति॥ हविः पेष्ये दास्ये पत्न्ये वा तथा चा
पस्तंबः दासी पिनष्टि पत्नी वापि वा रत्नवहंति शूद्रा पिनष्टीति प्रयच्छन्नेषणार्थं कृष्णाजिने स्थितानि पिष्टानि पिष्टो रूपन्यां
अन्यस्मिन्पात्रे वा गृहीत्वा प्रयच्छन्नाह संप्रेष्यति असंवपंती पत्नी नान्प्रक्षिपंती यथा न पतंति तथेत्यर्थः॥ हविः पेक्षिका दास्वा

क्र०द० दिः अणूनि अतिसूक्ष्माणि पिष्टानि कृत्वा कृष्णाजिने प्रस्कंद्य स्थापयेत्॥ कृष्णाजिनात्पिष्टानित्क नरत्नवचनात्पिं षंति पुरो
९६ डाशीयां निचरव्यां दधाति यदि चरुं करिष्यन् भवतीति।।पुरोडाशार्थं स्तंडुलान्पिषंति बहुवचनं दासी पत्नी शूद्राणामनियमेन
प्राप्तिसूचनार्थं चरव्यान् चर्वर्थांस्तंडुलान्निदधाति यदि उपांशुयाजं द्वैधोक्तं चरुं करिष्यन्भवति॥प्रागधिवपनाच्चरुपुरोडा
शीयान्विभजेरन्निति उपांशुयाजस्य चरुपक्षे दृषदि तु पुरोडाशीयानामधिवपनात्पूर्वमेव चर्वर्थाः पुरोडाशार्थाश्च तंडु
लान् विभजेरन् चरव्यान्निदधातीति पूर्वसूत्रेणैव सिद्धे विभागे पुनर्विभागवचनं चरव्याणां पुरोडाशीयानां च तत्तद्देवताउद्दिश्य
अग्नये अग्नीषोमाभ्यां त्वा विष्णवे इत्यादि देवताविभागार्थं॥अत्रापस्तंबः॥चरुपुरोडाशाच्चगणे चेत्पुरोडाशीयान्प्रागधिवपनाद्वि रु
भजंति यथादेवतमुपलक्षयतीदं शब्दस्तंत्रं स्यादिति इदमुपलक्षणं कृष्णाजिनपुनरास्तरणादेः पेषणांतस्य पदार्थजात
स्य पुरोडाशार्थत्वाच्चरुतंत्रेण प्रवृत्तिः॥अपि च नानाबीजेष्वधिवपनादि असंभवंतीपि पिष्टानि कुरुतादित्यंतमेकैकस्य पृथ ९६
क्कर्तव्यमित्यवगंतव्यमिति बोधायनः॥कृतस्यासौरतिः सूत्रस्य मत्वा त्वाषष्ठस्तत्पटलः पूर्णशंकरः प्रियतां गुरुः खंड

।।१३।।अथैतानि कपालानि प्रक्षालितानि जघनेन गार्हपत्यमुपसादयत्यंसेदक्षिणत एकादशोत्तरत इति।।एतानि यदाग्नेयो
ष्टाकपाल इत्यपत्तिवाक्यावगतहविःसंस्काराधिकरणभावानि कपालानि प्रक्षालितानि जघनेन गार्हपत्यं गार्हपत्यस्य पश्चाद्द्वा
दक्षिणोत्तरपक्तिं कल्पयित्वा उदगपवर्गा पदक्षिणतोष्टाउपसादयति उत्तरतस्त्वेकादश वैमृधस्य तंत्रत्वेन तोप्येकादशकपा(ल)
पुनरतः सादनीयानीति ध्येयं।।अथकपालानीत्यादि सूत्रकरणेनापि प्रकृतसिद्धौ एतानीति संन्निहितवचनेन कपालानां परा
मर्शः सर्वेषां पात्राणामाधानप्रभृति धारणं दर्शयति प्रक्षालितानीति सिद्धवदुपदेशात्सर्वाणि पात्राणि प्रक्षाल्य सादनीयानीति ग
म्यते तथा च पात्राणि निर्णिज्य संसादयेदिति तत्र तत्र वदत्याचार्यः कपालानां संख्यो उपसादने सौकर्यार्थमुपदिष्टे प्रदर्शनार्थं चैत
त्सर्वत्रोपयोज्यद्रव्याणां प्राग्विनियोगात्सन्निधापनं कार्यमिति एवमविलंब कर्मणो भवति।।अथ जघनेन गार्हपत्यमुपविश्य
दृषिमादत्ते धृष्टिरसि ब्रह्म यच्छेतीति।।जघनेन गार्हपत्यं गार्हपत्यस्य नियमविध्यर्थं आपस्तंबस्त्वाह।।आहवनीये गार्हपत्ये वा
हवींषि श्रपयतीति धृष्टिं उपवेषमादत्ते ब्राह्मणे धृष्टिर्वा उपवेष इति उपदेशो धृष्टिशब्दप्रयोगात्।।धृष्टिरसि ब्रह्म यच्छेत्युपवेषम

क०द० दायेतिकल्पांतरांच्च धृष्टिरुपवेषस्य एवंपौर्णमास्यामपि कार्यानुरोधेन उपवेषस्य संदंशोपचितत्वात् उक्तं हि भारद्वाजेन चोद्यमाने
२७ कर्मणि द्रव्यमुपादायेयथा पौर्णमास्यामुपवेषइति उपवेषश्चसान्नाय्यस्यैव पुरोडाशस्यापि शेषः अंगारनिरसनादिवर्तनादेस्तत्पर्य
स्याच दर्शनात्।।अत एव द्वैधे पौर्णमास्यामुपवेषविकल्प उक्तः पलाशः शमीविकारो वा कार्यसमर्थः काष्ठविशेष उपवेषः तस्मा
च पक्षे पौर्णमास्याममावास्यायामसन्नयनश्चान्यत् काष्ठमंगारनिरसनाद्यर्थमाददीत मंत्रेणेति।।अत्र द्वैधं।।नैकचरोर्धृष्टेरादा
नं विद्यते न च द्रुरिति शालीकिरत्रोह स्माह आदित्त एव धृष्टिमाददीत धृष्टिरसि ब्रह्म यच्छेति गार्हपत्यमभिमंत्रयते पाग्नेग्निमोँज मा
ही ति निष्क्रव्याद्ँ सेधेति दक्षिणांगारं निरस्येदधान्यं कल्पयेदादेवयजं वहेति तेषु चरुस्थालीमधिश्रयेत् ध्रुवासि पृथिवीं दृंह
धुर्ई दृंह प्रजां दृंह सजातानस्मै यजमानाह पर्यूहेति अथैनां प्रदक्षिणमंगारैः परिचिनुयान्निर्दग्धं रक्षो निर्दग्धा अरातय इत्येव
मेव सर्वांश्चरुस्थालीरधिश्रयेदिति चरुमुखेष्विति ह स्माह बोधायनः औषधस्यो पांशुयाजं कुर्यादित्यादिना मंत्रभेदेन द्रव्यविशे २७
षविधेर्दर्शनात्।।न त्रयपरा उपांशुयाजस्याज्यं द्रव्यंतरा याज्यत्रकाणांविकृतिनामसा उपांशुयाजः प्रकृतिः यदि चरुपक्षस्तदा
x आदित एव धृष्टिमाददीत पुरोडाशादेवमक्षान्साधयेदिति एकचरोः एकस्य मुख्यस्य प्रकृतिभूतस्य चरोरिति यावत् उपांशुयाजस्य हि द्र
व्यमाज्यं चरुर्वा द्रुस्पांशुयाजानुष्ठानप्रकारेण द्वैधे उपांशुयाजस्य करद्दनि सूत्रं मोद्भुत्यास्यात्रोह स्माह बोधायन २
ण

विकृतीनां चरुयागादीनां चरुद्रव्यक उपांशुयाजः प्रकृतिः लभ्यंते हि धर्मा निर्वापादय आग्नेयादीनामिवोपदेशो नोपांशुयाजस्यापि प्र
कारणस्याविशेषात् एवं च एकचरोरुपांशुयाजचरोः धृष्टेरादानं धृष्टिमादत्ते धृष्टिरसि ब्रह्म यच्छेति विहितं न विद्यत्तेन कर्त्तव्यं भव
ति कुतः कपालसंबंधाद्धृष्टेः अंगारनिरसनाधिवर्त्तनादि धृष्टिरसि कार्यस्य कपालोपधानार्थत्वयात् तद्द्वारा दृष्टेरपि तादर्थ्यात् आ
हच शालीकिः कपालसंयोजने धनुदृष्टेरादानं भवति सकपालान्येवोपधास्यं धृष्टिमाददीतेति एवं च तदर्था मंत्राः धृष्टिरसि
त्यादयोपि न संति तत्रश्च बहुषु विकृतिषु धृष्ट्यादानं न विद्यते बहुत्व नियमाद्विकृतीनां विकृतिप्रत्ययनार्थं ॥ बहुषु विकृ
तं निर्वापादयस्त औषधं विकार त्वात् प्रवर्त्तते धृष्ट्यादानादेर्द्वारलोपान्निवृत्तिरिति शालीकेराशयः। तत्र बोधायन आह
अदितिआदिमे प्रकृत्तो उपांशुयाजचरौ धृष्टिमाददीतेवननु एवं प्रकृत्तावुपांशुयाजचरौ धृष्टेरादानं यत्नः पुरोडाशस्येपो धृष्टि
मंत्राश्च न छेषाद्धृष्टिरसि ब्रह्मयच्छेत्यादयइत्युक्तं उच्यते शाखांतरे चरुस्थाल्यामपि धृष्ट्यादानादेः समंत्रकस्य विधाना
त् शाखांतरीयश्च विधिप्रकारो दर्शितः एवस्त्वे धृष्टिमाददीत धृष्टिरसि ब्रह्म यच्छेत्यादिना न चायं चरुर्वौषधविकारत्

स्म०द कृतोतिदेशएवानुष्ठानसौकर्याय सूत्रकृतापठितइतिवाच्यं। अथैनांप्रदक्षिणमंगारैः परिचिनुयादिति सूत्रविहितस्यपरिचयस्यप्र
९८ कृतत्वेनातिदेशरूपत्वाभावात्॥ प्रकृतिभूतउपांशुयाजचरौधृष्ट्यादानादेरभावप्रसंगाच्च नचोपांशुयाजेचरुःफलार्थोगुणःसचै
षधविकारएवकाम्यत्वादितिवाच्यं॥ चरोःफलसंधानंवगमेनकाम्यत्वानुपपत्तेः प्रकृतावूहाभावेनस्थाल्यांश्रवासीत्यादेःशाखांत
रीयस्यैवमंत्रस्याम्नानाच्चेति एवंचप्रकृताउपांशुयाजचरौधृष्ट्यादानादेःसमंत्रस्यशाखांतरेविधानात्विकृतिचरुष्वपि एवमेवो
पांशुयाजचरुःसर्वाश्चरुस्थालीधृष्ट्यादानादिपूर्वकंमंत्रेणैवाधिश्रियेदितिएवंप्रकृतिविकृतिसाधारण्येनधृष्ट्यादानादिकंतत्प्र
सच्य निरूपितंइतःपरंचरुपुरोडाशगणेविचार्यतेचरुपुरोडाशगणाद्विविधाःचरुमुखापुरोडाशमुखाश्चतत्रचरुमुखेषुचरुप्र
थमेषु अयंप्रकारः सहस्माहबौधायनआदितएवारभ्यचरुप्रभृतिसर्वत्रापिधृष्टिकार्यायधृष्टिमाददीतमुख्यात् एवप्रथमाच्चरोरे
वभक्षान्प्राशित्रयजमानभागब्रह्मभागचतुर्धाकरणानिसाधयेत्॥ तेषांमुख्यधर्मत्वात् अत्रयद्यपि पुरोडाशस्यैवबर्हिषदोमी ९८
मांसेतियद्यमोजनभागंनिधायपुरोडाशंबर्हिषदंकरोतिइतिचआम्नणेतत्रपुरोडाशएवप्रसक्तःतथापिपुरोडाशएववस्तुत

स्त त्रप्रथमआसीदिति पुरोडाशस्यैवेत्यक्तं नैतावता पुरोडाशस्य धर्मा एते किं त्वोषधस्य यथाग्नये जुष्टं निर्वपामीत्यादयः। तथा चरु
तस्यापि पुरोडाशस्यैव एते न धर्माः किं तु मुख्य धर्मा इति बोधायनाशयः शालीकिस्त्वाह। कपालसंयोजने खलु कपालानामितरेतर
संस्पृष्टतया उपधाने खलु धृष्टेरादानं भवति कपालोपधानप्रायपाठात्। धृष्ट्यादानादेरपि कपालोपधानार्थत्वात्। तदीय मंत्राणाम
पि कपालोपधानार्थत्वोवित्यात् इदं कपालोपधानमेव कपालसंयोजनमित्युच्यते भवति हि कपालानां योगे द्वैधं। एतेरेवास्यैनामि
मंत्रैः युक्तानि ये रूपहितानि भवंतीति निर्वापादयस्तु साधारणत्वाच्चरावपि तस्मात् इत्थं विदध्वर्युः कपालान्युपधास्यन्नेव प्रथमं तस्य
रुस्थाल्यां तिरः पवित्रमप आनीय तत्र श्मीमधिश्रित्य ततः पुरोडाशार्थं कपालोपधान समय एव धृष्टिमादद्दीत धृष्ट्यादानादि कुर्यात्। भस्या
प्राशित्र यजमान भाग ब्रह्म भाग चतुर्धाकरणानि पुरोडाशस्यैवेत्ये वकारेण पुरोडाशे तेषां नियमितत्वात्। न हि पुरोडाशसंयोगे न च
रस्य एवकारार्थस्य प्रथमहविः। संयोगे प्रमाणमस्तीति गार्हपत्यमभिमंत्रयते पाग्ने ग्निमामादं जहीति निष्क्रव्यादं सेधेति दक्षिणं
गारं निरस्य स्यथान्यमावर्तयत्याद्देवयजं वहेतीति। गार्हपत्यं पश्यन् मंत्रं जपति अपाग्ने ग्नय इति हे अग्ने गार्हपत्य आमादमस्मिं यो

का॰द॰ ग्निरधिश्रितंहविरामभेवार्तिनश्चपयतियजमानानामपकारकस्तंअपजहिनाशयेतिमंत्रार्थः॥तदिदमुक्तंकर्मांतेअपाग्नेग्निमामादं
९९ जहीतिकोनखल्वामाद्भवतिअपकाराग्निरेवैषउक्तोभवतीति॥ध्रुस्यागार्हपत्यादंगारमपादायदक्षिणादक्षिणस्यांदिशिनिरस्य
तिनिष्क्रव्यादमितिहेअग्नेक्रव्यादंक्रव्यंअपक्वंमांसंशरीरमत्तियोग्निस्तंचितसाग्निंनिःसेध दूरतोगमयेतिमंत्रार्थः॥तदिदमुक्तं
कर्मांतेनिष्क्रव्यादंसेधेत्याहदहनाग्निरेवैषउक्तोभवतीतिआगत्यदहतिमृतानित्यादहनाग्निश्चितोग्निरेवअथअन्यंअंगा
रध्रुस्यैवगार्हपत्यादादायआवर्तयतिगार्हपत्यस्यपश्चात्दक्षिणतआनीयस्थापयतिआदेवयजमितिआदेवयजंवहेतिदक्षिण
मवस्थाप्येत्यापस्तंबः हेअग्नेअग्निंदेवयजनंदेवानांयष्टारंआहवनीयंआवह अत्रप्रापयेतिमंत्रार्थः॥तदुक्तंकर्मांते।आदे
वयजंवहेत्याहवनीयएवैषउक्तोभवतीतिएतेषामपकारचित्याहवनीयानांमंत्रलिंगादवगमेदृष्टांतार्थंउपात्तंकर्मांतेकउख
लुकव्यवाहनइतिअन्वाहार्यपचनइत्येवब्रूयात् विज्ञायतेयदग्नेकव्यवाहनपितॄन्यक्ष्यृतावृधइतीतिध्येयं।तंदक्षिणेषांकपा ९९
लानांमध्येमेनाभ्युपदधातिध्रुवमसिपृथिवींदृंहायुर्दृंहप्रजांदृंहसजातानस्मैयजमानायपर्यूहेतीति॥तमभिततस्यांगारस्याभि

मुख्येन तस्योपरीति याचत्कपालानां मध्ये मध्यमेन मध्यमं कपालं कर्मकारस्यापि हेतुत्वमादाय तृतीयाप्रयोगः उपदधाति ध्रुवम
सीतितत्तथा चापस्तंबः। ध्रुवमसीति तस्मिन्मध्यमपुरोडाशकपालमुपदधाति। अथांगारमधिवर्त्तयति निर्दग्धं रक्षो निर्दग्धा अरातय
इतीति। अथ तस्मिन्कपाले अन्यं अंगारं धृष्ट्या अधिवर्त्तयति उपरिस्थापयतीति तथा चापस्तंबः। कपालेंगारमध्यायेति अंगारावर्त्तना
धिवर्त्तने प्रथमस्यैवादृष्टार्थत्वात् इदमंगाराधिवर्त्तनमारभ्य उपहितेन तत्र कपाले सव्यां गुलिं अधिनिधाय कपालेंगारमधिवर्त्तयति
निर्दग्धं रक्षो निर्दग्धा अरातय इतीति ।। आपस्तंबात् कृष्णाजिनास्तरणाद्ध्वेसहस्माह बौधायनो विसर्जन्नेतत्कर्म कुर्यात्
इति प्रकृस एवं कपालस्योपधानाद्ययोगादिसक्तेः भारद्वाजोप्याह तत्सव्यां गुल्याभिनिधाय कपालेंगारमधिवर्त्तयति निर्दग्धं
रक्षो निर्दग्धा अरातय इतीति आपस्तंबश्च प्रतिकपालमंगुल्याभिनिधानमाह तस्य तत्स्यां गुल्याभिनिधानमंगाराधिवर्त्तनं च
वाजसनेयिनः समामनंतीति अभिनिहितमेव सव्यस्य पाणेरंगुल्या भवतीति हि वाजसनेयिनाम्नायः।। अथ पूर्वार्ध्यमुपदधा
ति धर्त्रमस्यंतरिक्षं दृꣳह प्राणं दृꣳहापानं दृꣳसैहे जातानस्मै यजमानाय पर्यूहेतीति।। पूर्वार्ध्यं पूर्वं अर्धभागे अर्ह इति यत्कपा

श्रौ०द लंतन्मध्यमेनसंस्पृष्टंउपदधातिधर्त्रमसीतिकपालानामुपधानस्यपुरोडाशश्रपणार्थनयापरस्परसंस्पर्शतयाउपहितानां
२०० मेवकपालानांश्रपणसामर्थ्यात्उक्तंचापस्तंबेनधर्त्रमसीतिपूर्वेद्वितीयंसंस्पृष्टमिति।।अथापरार्ध्यमुपदधातिधरुणमसि
दिवंदृꣳहचक्षुर्दृꣳश्रोत्रंदृꣳहसजातानस्मैयजमानायपर्यूहेतीति।।अपरार्धाहंकपालमुपदधातिधरुणमिति अथदक्षिणा प्रजांदृꣳह
र्ध्यमुपदधातिधर्मासिदिशोदृꣳहयोनिंदृꣳहप्रजांदृꣳहजातानस्मैयजमायपर्यूहेति।स्पृष्टं।अथपूर्वमुपधिमुपदधातिचि
तस्थप्रजामस्मैरयिमस्मैसजातानस्मैयजमानायपर्यूहेतीति।उपधिः उपसमीपेविधीयतेइत्युपधिःकोयाप्रदेशोपधानये उपधीयते
भ्यःकपालविशेषःसचद्विविधःपूर्वोपरश्चेतितयोर्मध्येयःपूर्वस्तमुपदधातिचितस्थेति।अथापरमेवमेवेति।उपधिमित्यनुव
र्तते।।अपरमुपधिमेवमेवचितस्थेतिमंत्रेणेवोपदधाति।द्वेउत्तरतःसंस्पृष्टेउपदधातीतिअत्रपूर्वसूत्रादेवमेवेत्यनुवृत्तंउत्तर
तःउपहितानांषण्णामपिकपालानांउत्तरतःद्वेकपालेसंस्पृष्टेषड्भिरपिकपालैःसंस्पृष्टेयथाभवतस्तथाउपदधातिसस्पर्शश्चमध्य १००
मानांसाक्षात्दक्षिणेषांपरंपरयाएनदपिलिंगंकपालानिपरस्परसंस्पृष्टान्युपधेयानि।तत्रएवमेवेत्यनुवर्तेर्मंत्रश्चितस्थेत्येवअत्रेदं

इतिवस्क गतिमनुरुध्यवस्कत्तस्कउपहितेभ्यः षड्भ्यः कपालेभ्यो यावं स्यति शिष्टानि कपालानितानि सर्वाण्युत्तरत्तएवोपधे
यानि अत्तएवएवमेवोत्तराणि स्यतिर्देशोपि संगच्छते अन्यथा अष्टानामेवकपालानामुपधानस्योक्तत्वेनातिदेशानुपपत्तेःअ
तिशिष्टमुत्तरत्तइतिवक्तव्येद्वे उत्तरत्तइति नियमेनद्वयोरुत्तरत्तउपधानार्थं।अथैनान्यंगारैरधिवासयति भृगूणांमंगिरसांत्तप
सात्तप्यध्वमितीत्तिएत्तानिउपहितानि अष्टावपि कपालानि अंगारैरधिवासयति अंगाराःकपालानियथाधिवसंतित्तथाकुर्यात्
अत्रापस्तंवः। भृगूणामंगिरसांत्तपसात्तप्यध्वमितीत्तिवेदेन।निउपहितानि अष्टावपिकपालानि अंगारैरधिवासयति अंगाराःक
पालेष्वंगारानध्यूहेति।अथैनानियोगेनयु नक्तियानि घर्मे कपालासुपचिन्वंतिवेधसः। पूष्णस्तान्यपि व्रत इंद्रवायू युंक्तामि
ति।एत्तानि अष्टावपि कपालानियोगेनयुज्यंतेनेनेतियागोयानि घर्मे कपालानीति मंत्रः।तेन युनक्ति एतस्य मंत्रस्यजपएव
कपालयोगः मंत्रश्चब्राह्मणान्तरीयः।अत्रेद्वैधं। कपालानामुपधानइतिसूत्रमाचार्ययोरत्रोहस्माहौपमन्यवोययाम्नायंरवल्वस्यै
वंकपालान्युपहितानि भवंति यएवेषांगाराधिवर्तने मंत्रस्तं प्रथमकपालोपधानंकुर्यादथतूष्णीमंगारमधिवर्तयेदित्येकक

सू० द० पालेद्विकपाल इतिसहस्माहबोधायनो यदिचैककपालो यदि चद्विकपालो सर्वैरेतत्कपालमंत्रैरुपदध्यादित्यत्रोहस्माह शालीकि
१०१ र्यथाधिकरणमेवकपालान्युपदध्यात्तन्नज्जुयोगाभ्युहोनमयेत् तपनमंत्रं चाग्न्यात्भृगूणामंगिरसांतपसातप्यस्वतप्येथांत
प्यध्वमितीति। कपालानामुपधाने प्रकारविशेषोवक्ष्यंतेस्त्रमाचार्ययोः तं दक्षिणेषांकपालानां मध्यमेनाभ्युपदधातिध्रु
वमसीतिअथांगारमधिवर्तयंति निर्दग्धमिति कल्पसूत्रमाचार्ययोर्मतं अंगाराधिवर्तनंस्वंगोरेर्हनंउपरिकपालानांरक्ष
सामितिमंत्रो लिंगात्अधिवर्तने विनियोक्तव्यः अधिवर्तनंच मध्यमकपालस्योपधानानंतरं कार्यं पुरोडाशश्रपणार्थे
त्वादितिमंत्रक्रमंवाधित्वा लिंगक्रम आहर्तयोमंत्रयोः अग्निहोत्रंजुहोतियवागूंपचतीति यत्पंचतयेनकल्पमवेक्षेतछंद
सेतिहि कर्मातउक्तमिति। औपमन्यवस्त्वाह। यथाम्नायंआम्नायक्रममनतिक्रम्यपाठक्रमानुसारेणकपालोपधानंकु
र्वतोस्ययजमानस्यएवंवक्ष्यमाणप्रकारेण खलुकपालान्युपहितानिउपधेयानिभवंतिउपधानप्रकारमेवदर्शयतिअं १०१
गाराधिवर्तनेकल्पसूत्रेविहितो यएषमंत्रोनिर्दग्धंरक्षोनिर्दग्धाअरातयइतितमेवप्रथमकपालस्योपधानेकरणम्

त्रंकुर्यात्तेनमंत्रेणप्रथमंकपालमुपदध्यात्।अंगाराणामुपरिकपालोपधानेद्विकपालोनुगतरक्षोनिर्दहनंभवतीतिनलिंगविरोधो
नाप्याम्नायक्रमविरोधः।अंगाराधिवर्तनंतूष्णीमेवकुर्यात्पूर्वोक्तादारभ्यात् ध्रुवमसीत्यादयोमंत्राःप्रयोज्याःएककपालोद्विकपालश्च
पुरोडाशोयत्रविहितस्तत्रकपालोपधान[illegible]स्तुध्यतेअत्रबोधायनोयदिचैककपालोयदिचद्विकपालःइदमुपलक्षणंयदित्रिकपा
लोयदिचतुष्कपालः[illegible]ःस्यात्तदासर्वैर्मंत्रैर्ध्रुवमसीत्यादिभिरेतत्एककपालादिसंबंधिकपालमुपदध्यात्।एककपालादीनाम
ष्टाकपालादिष्वज्ञानापत्त्यासर्वकपालमंत्रग्राहकत्वादितिशालीकिःस्वाहयथाधिकरणमेवयोनोपधानमंत्रेणसंस्कार्यमधिकरणंद्रवं
यत्कपालंतदनतिक्रम्यैवकपालान्येककपालादीन्युपदध्यात्।तद्यथाध्रुवमसीत्येकंकपालमुपदध्यात् धर्त्रमसीतिकपालानां
द्वितीयंधरुणमसीतितृतीयंधर्मासीतिचतुर्थंचितस्थेत्युत्तराणीतियोगाभ्यूहःयुज्यंतेकपालान्येभिरितियोगाःकपालोपधा
नमंत्राःतेषामभ्यूहःअभितःसर्वेष्वेककपालादिषूहःप्राप्तिःननुनमयेत्तत्तुभवेत् भृगूणामितिचयनिधर्मइतिचाविरुद्धावि
वत्तपनमंत्रंवाचकारोवाशब्दार्थे अत्रएककपालादिषूहेनब्रूयात् भृगूणामंगिरसांतपसातप्यस्वेत्येकस्मिन्कपालेतप्येथामिति

स्क०र० द्वयोः कपालयोः तप्यध्वमिति बहुषु कपालेष्विति। कपालानांयोगेनुद्देश्यं। कपालानां योग इति सूत्रमाचार्ययोरन्तरोहस्मो हेपम
१०२ न्यव एते रेवास्यैते मंत्रैर्युक्तानि ये रूपनिहितानि भवंति अथेतरो विमोचनमंत्रस्यादिति। सूत्रं अथैतानि योगेन युनक्ति यानि घर्मे
इत्यादि कल्पसूत्रमाचार्ययोर्मतं औपमन्यवस्त्वाहये ध्रुवमसीत्यादिभिर्मंत्रैः कपालान्युपहितानि भवंति एतैर्मंत्रैरस्य यजमा
नस्य एतानि कपालानि युक्तान्येव भवंति अथेतरः कपालोपधान मंत्रेभ्यो यइतरः यानि घर्म इत्यादिर्मंत्रः स विमोचनमंत्र एव लिंगात्
न तु विमोचनमंत्रस्य कपालोपधान प्रकरणे पाठः न्यथानुपपत्त्याः एष एव युक्तामिति पदयोगेन मपि बोधयतीति कल्प्यत इति चे
भ उपधानमंत्रैरिव कपालानां युक्तत्वेन लिंगादस्य मंत्रस्य विमोक एव विनियोगादिति ऐवमेवोत्तराणि कपालान्युपदधातीति।
यथा दक्षिणानि अष्टौ कपालान्युपहितानि एवमेवोत्तराणि एकादश कपालानि उपदधाति अत्र षट् कपालानि पूर्ववदुपधाय
अतिशिष्टानि पंच कपालानि तद्वदेवोत्तरत उपधेयानि द्वे उत्तरत इत्यत्रैव इत्यतिशिष्टकपालार्थकं अतिदेशानुरोधादित्यक्तं पं १०२
चानां मध्ये त्रीणि षड्भ्य उत्तरतस्तत उत्तरतो द्वे अतिशिष्टमुत्तरत इत्युक्ताद्वि शब्द ग्रहण सामर्थ्यादेतान्येकादश कपालानि पो

ध्रुष्यदानादिकमितिध्येयं॥ अग्नीधतेकपालानीति॥ कपालान्यग्नीधनेनतस्तानिकुर्युः बहुवचनंकर्तृनियमार्थं। उपेंधनेचरुस्थालीमिति॥
उपांशुयाजचरु

र्णमास्यामग्नीषोमीयार्थानि अमावास्यामसंनयन्तऐंद्राग्नार्थानिसन्नयतस्तुऐंद्रमाहेंद्रपुरोडाशार्थानीतिध्येयं। अथान्यमावर्त्त
यतीत्यारभ्ययोगमंत्रांतंप्रतिकपालगणमावर्त्ततेततःप्राक्तंत्रंसाधारणत्वात् उपांशुयाजस्यचरुपक्षेतुबोधायनमतेध्रुष्यादा
नादेराहृत्यविधानात्कर्तव्यमेवोपांशुयाजचरौपक्षद्वयंउपेंधनेनचरुस्थालीतमांकुर्युः। अध्यस्यंतिश्रपणानीति। श्रपयंतेकपालादी
नियैस्तानिकाष्ठानिअध्यस्यंतिअग्नौप्रक्षिपंति। तपंतिपिष्टसंयवनीयाआपइति। आपःपिष्टसंयवनीयाःपिष्टसंयवनार्हाः।वि
धेयमिदंविशेषणंतपनेनपिष्टसंयवनार्हाःकुर्वंतीत्यर्थः। तप्तानामेवापांपिष्टगतमृदुपाकहेतुतयासंयवनार्हत्वात् आपःप्रणीता
भ्योगृहीताभ्योगृहीत्वागार्हपत्येअभितपेयुःप्रणीताहिसंयवनद्वारापुरोडाशस्योपकुर्वत्योदृष्टार्था इतिन्यायविदः अतःपुरोडाश
तंत्रएवताःनान्यतंत्रेष्वितिकेचित् अन्यतुपाकार्थास्ताःपाकेचद्वारंसंयवनमन्यद्वायुक्तंस्यैतत् चरुतंत्रेषुप्रापणीयादिषुअपःप्र
णीयेत्याचार्यवचनात् अन्यथातत्रसंयवनाभावेनप्रणीताभावप्रसंगात् एवंचचरुतंत्रेषुपाकार्थानांअन्नाज्यपयआदीनांप्रणीता
कार्यपाकार्थत्वात्प्रणीताधर्मप्राप्तिःतथाचनेषांप्रणयनंकार्यंब्रह्मन्घृतंप्रणेष्यामीतिसंप्रेषःततोघृतादेवस्थाल्यांतिरःपवित्र

स्मा०द० मानीयतत्रचरुः कार्यः तिरः पवित्रमपजानीयेति चातुर्मास्येषु दर्शनात् आदित्येतु चरौ श्रृतेनेदीयसिवेति वचनात् पक्वे पक्व प्राये

१०३ वा घृतं निनयति अत एव सत्याषाढः प्रारुतौ यो प्रणीतामंत्रौ तयोर्विकृतौ श्रपणार्थे पयसि घृते चोहं दर्शयति यत्र पयः श्रपणा

र्थेन श्रूयते देवस्त्वा सवितोत्पुनात्विति सवनं सन्नमयन्ति पयो देवाग्रे घर्मे गुइति अभिमंत्रणमेव माज्य इति एतस्मिन्नपि पक्षे पशौ प्र

णीतान संति तस्य सान्नाय्यविकारत्वेन औषधपाकार्थानां प्रणीतानां तत्र प्राप्तेरभावात् यद्यपि सान्नाय्यस्यापि श्रपणमस्ति तथा

पि जलमंतरेणापि तत्सिद्धेर्न तादर्थ्यं प्रणीतानामिति वदंति वस्तुतस्तु ब्राह्मणे अपः प्रणयन्ति। आपो वै रक्षोघ्नीः रक्षसामपह

त्या इति रक्षः शांतिद्वारा यज्ञरक्षार्थत्वेऽभिधानात् पाकयज्ञेष्वपि तद्विधानाच्चादृष्टार्था एवापि च संवनीया आपश्च प्रणीतास्ये

न्या एव प्रणीताः पि च सेवनीया इत्स्यवचनात् पूर्णपात्रनंतर्वेदि निनयतीति वांते विनियोगवचनात् पाकार्थत्वे च कदाचित्तत् रु

त्त विनियोगेन प्रतिपत्तिवचनस्य पाक्षिकत्वप्रसंगान्नित्यवदाम्नानविरोधाच्च अन्यत्र विनियोगानुपपत्तेरदृष्टार्थत्वनियमात् १०३

नहि दृष्टार्थत्वे प्रणीताभ्यः स्रुवेणोपहत्येति संगच्छते न ह्येकेन स्रुवेण संयवनमुत्पद्यते न च प्रणीताभ्य एकस्मात् स्रुवाद

धिकं गृहीतं शक्यं उपादेयं गतस्यैकत्वस्य पशुनायजेतेत्यत्रैव विवक्षितत्वात् न च भूयः प्रणीताभ्यो ग्रहणे प्रमाणमस्ति अथानुप
रिप्लावयन्तीत्यत्र हि अनुपरिप्लावनं मदंतीभिः तासामानंतर्यात् पिष्टसंयवनीया इति संज्ञानुगुण्यात् सम्यक् पाठहेतुत्वाच्चेति त
स्मादृष्टार्थमेव पिष्टेषु स्रुव मात्रस्य प्रणीतोदकस्य निनयनं तत्तस्य प्रणीतानामदृष्टार्थत्वेन प्रयाजवद्द्वाराडुपकारकत्वात् सा
माप्य यागस्यापूर्वगमिति तद्विकारेषु पशुषु प्रणीता अतिदेशेन प्राप्नुवंति तथा च पशुबंधकर्मनिस्तत्रकारेणाप्येहेक आचा
र्याणामेकादशधर्मान् पशुबंध उत्सादयंति अग्न्यन्वाधानं व्रतोपायनं प्रणीयोतो जमान माज्यभागौ प्राशित्रं यजमानभा
गंब्रह्मभागो चतुर्धाकरणं विमुंचमानिति एकेषामाचार्याणां मते प्रणीतानां उत्सादनं वदता पशुबंधेष्वमते प्रणीताः संतीत्यु
क्तं न च अथायं पशु पुरोडाश इति पूर्वमुपक्रमात् एकादशधर्मोत्सादनं तद्विषयमिति वाच्यं अर्थांतर चाविनाथशब्देन संज्ञांतरे
ण पशुबंधशब्देन च दुर्बलस्य प्रकरणस्य विच्छेदात् । अन्यथा भाष्यविरोधः याजमानपदव्याकुर्वता भाष्यकृता वपाहविर्विष
यं याजमानामिति व्याख्यानात् न च पशुपुरोडाशे प्रोक्षणीशेषेण पुरोडाशीया । निसंतुयादेवं सवनीयानामिति सूत्रं व्याकुर्वता

~~भाष्यकृताऽप्यदृष्टार्थत्वविषयं याजमानमिति [illegible] पशुपुरोडाशे [illegible] पुरोडाशीयं~~ प्रणीताभावपक्षइदमितिव्या
ख्यानात् आग्रयणादिष्यचर्वादिषु पयसोदनस्य प्रणयनं वदन्ता प्रणीतानां दृष्टार्थत्वामाविकृतमिति वाच्यं येतु न्यायविन्मतानुसा
रेण दृष्टार्थत्वमभ्युपगच्छंति तेनेषां मते कर्तव्यप्रयोगानुक्रमणमात्रेतात्पर्यात् अन्यथा प्रकृतसूत्रव्याख्याभावसरे अदृष्टार्थत्वव्यव
स्थापनस्यासांगत्यापातात् ।आपस्तंबोपि इष्टिविधौ वा अन्यः पशुबंधः सोमविधौन्यः सयत्रेतदपः प्रणयति पूर्णपात्रं निनयति
इति सूत्रमान्क्रामतिसइष्टिविधौनोन्यः सोमविधइति वाजसनेयकमिति पशुबंधे विकल्पेन प्रणीताप्रणयनं वदन् प्रणीताना
मदृष्टार्थत्वमिति ।नहि पशुयागे प्रणीतानामदृष्ट उपयोगोस्तीति क्व सोमविधेपरोदृष्टप्रयोजनाभावकृतः प्रणीताविरहः त
स्य तत्र वाजसनेयकब्राह्मणे विहितत्वेनार्थलोपकृतत्वाभावात् ननु प्रणीताभिः संयौतीत्यक्तत्वात् प्रणीतानां संयवनरूपं दृ
ष्टं प्रयोजनं स्पष्टमभिहितमिति चेन्न अदृष्टार्थत्वेपि प्रणीतानां प्रभुत्वात् संनिहितपरित्यागे मानाभावेन च प्रणीताभिः संय
वनोपपत्तेः नेः प्रणीताभिः संयौति स्यस्य प्रयोगविधिपरेण स्रुवेण प्रणीताभ्य आनीय वेदेनोपयम्य समाप्तो अद्भिरामत्तेति पि १०४

शेषाणीयाज्ञ्यः परिप्रजाताइतित्ताभिरनुपरिष्ठाव्यजनयत्स्वेत्वा संयोमीति संयुत्येति सूत्रेण प्रणीताभ्यः स्रुवमात्रादानप्रतीतेः प्र
णीताभ्यस्त्ताभिरिति परस्परव्यावृत्तोरुकट्टयोदाहरणस्वारस्याच्च प्रणीतानामदृष्टार्थत्वस्यादिदृढत्वात् यत्तु सत्याषाढेन पाका
र्थयोः पयो धृत्तयोरुहेन प्रणीतामंत्रयोः सन्नयनमुक्तं तत्पाकार्थयोः शुध्यर्थौ पूर्वौ विधिरूपवनाभिमंत्रणयोः नन्वतिदेश
प्राप्तयोरूहप्रदर्शनं पूर्वोत्तरसंदर्भस्य परिभाषारूपतया प्रणीताभ्यामनधिकारात् तस्मात् प्रणीतानामदृष्टार्थत्वया सर्वतंत्रेष्व
पि प्रवृत्तिः तथाच भारद्वाजः सर्वसंस्था सु वा प्रणीता इति । आपस्तंबमते तु प्रणीतानां विकल्पः प्रकृतौ अन्यावा यजुषोत्पूपयि
प्रणीतानाधिगच्छेदित्युक्तत्वात् सत्याषाढमते तु नित्या एव यदि प्रणीतान् विधेरन् अन्या एव काश्वापोयजुषोत्पूयताभिः सन्न
येदिति यदि प्रणीतान विधेरन्नित्या पदार्थो वा रइति तद्वचनीया आग्रयणीयादिषु चरुतंत्रेष्वपः प्रणीयेति वचनं इष्टंते पूर्णपात्रानि
नयनार्थं शंख्यंतः आग्रयणीयः संतिष्ठते तेन पूर्णपात्रमंतर्वेदि निनयतीति सूत्रं तत्तश्च प्रणीतानामदृष्टार्थत्वात् पुरोडाशतंत्रेषु प्र
णीताभ्योन्याः मदंसः कार्याः प्रणीताभ्यः स्रुवमात्रस्य संयवनार्थं अंते पूर्णपात्रनिनयनं चरुतंत्रेषु प्रणीताः प्रणयेत् ताभ्योन्या

स्मा०द० एव अप आज्यं य स्रेवास्छात्त्वॉतिरः पवित्रमानीयतत्र चरुं श्रपयेत् अंते पूर्णपात्र निनयनं पत्नावधिप्रणीताः प्रणयेत्पशुपुरोडाश
१०५ स्य प्रोक्षणीशेषेण प्रणीताभिवासं यमनं अंते पूर्णपात्रस्य निनयनमितियुक्तमितिवयं पश्यामः। अत्रेदं ध्येयं। मदंतीनामधिश्रयण
इतितिरःपवित्रमप आनीयाधिश्रयेदिति बोधायनो यथोपपादमिति शालीकिरिति बोधायनमत्तेतिरः पवित्रमपामानयने
श्रयणमिति अदृष्टार्थं शालीकिमतेनुवचनाभावाद्यथेष्टमिति बोधायनसूत्रस्यासोरतिः सूत्रस्य सप्तमः। संपूर्णः पटलस्तत्र प्रीयतां
मे सदाशिवः। खंडः॥१३॥ अथोत्तरेण गार्हपत्यमुपविश्य वाचंयमस्तिरः पवित्रं पात्र्यां कृष्णाजिनात्पिशनि संवपति देवस्य
त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं संवपाम्यग्नीषोमाभ्याममुष्मा अमुष्मा इति यथादेवतमिति
उत्तरेण गार्हपत्यं गार्हपत्यस्योत्तरत उपविश्य वाचंयमो भूत्वा तिरः पवित्रं पात्र्यां कृष्णाजिनासि शनि संवपति निर्यगुदगग्रं
पवित्रं धारयन् पात्र्यां निरसायां पिशेद्धपन्यां कृष्णाजिनादेवपिशनि संवपति सहस्तिपतिदेवस्य त्वा सवितुर्दुत्याग्नये जुष्टं सं
वपाम्यग्नीषोमाभ्यामिति पौर्णमास्यां तथैवामावास्यायां यथादेवतं। अत्र यद्यपि पात्र्यामिति सामान्यत उक्तं तथापि निश १०५

स्नायामेवसंवपनंआचारात् अर्थाच्च कर्मांतेयो विदग्धः सनैर्ऋतोयो श्रृतः सरौद्रोयः श्रृतः ससदेवइति ब्राह्मणमुदाहृत्य साधुश्रृतत्वंश्र
पयतेस्येवेदमुक्तंभवतीति पुरोडाशस्याश्रृतविदग्धनिरासेन साधुश्रृतवचनेनसम्यक्पाकस्यकर्तव्यत्वात् पिष्टोद्वपन्यास्तापाभा
वेसम्यगंतः पाकानुपपत्तेः कर्मांत एव अर्थेमेपंचहविराकारा ओषधंपयः पशुः सोमआज्यमितितेषां पृथक्पृथक् धर्माः पृथग
धिकरणानियथाधिकरणं मंत्राद्दष्टास्ताभिमिथः संसाधयेत् अन्यादेशाद्येनयेनयद्धविः संसिध्येत् तेनतेन नकुर्यात् तत्त
स्याधिकरणसुक्तान्यधिकरणानीत्युक्तंतस्यायमर्थः चतुष्टयेनमंत्राः चर्यंतइति प्रक्रांतस्यमंत्रकरणस्यविच्छेदेनह
विराकारोपदेशोपक्रमार्थोप्यशब्दः इमेवक्ष्यमाणाः ओषधादयः पंचहविराकाराइत्यत आह ओषधंपयः पशुः सोमआज्य
मितिओषधसामान्यंपयःसामान्यंपशुसामान्यंसोमसामान्यमाज्यसामान्यमितिपंचहविःसामान्यरूपाणीत्यर्थः। एवंचप्र
कृतौ ओषधेषुचरुपुरोडाशेषुयेधर्माउपदिष्टानिर्वापावघातादयः तेविकृतिषुचरुपुरोडाशेषुओषधत्वसामान्यात्कर्तव्या
तसामान्यादितरेषुनधात्वमितिन्यायात् एवंपयसिवैकृतेप्राकृताः शाखाहरणवत्सापाकरणदोहनादयः एवंपशौवैकृते

का०द० प्राकृता उपाकरणादयः तथा वैकृते सोमे प्राकृताः क्रयाभिषवादयः तथैव वैकृते आज्ये प्राकृता विलापनोत्पवनादय इति तत्तुप्रकृ
१०६ तौ श्रुतानां अवघातादीनां दोहनादीनां विलापनादीनां च यागियद्रव्यसंस्कारत्वावगमात् चरुपुरोडाशपय आज्यानां च यागीयद्रव्य
त्वाविशेषात्सर्वैः सर्वेषां संस्कारकार्याः तथा ओषधादीनां पृथक् पृथक् धर्माः हविरुत्पमुक्ताः संस्काराः ओषधस्या निर्वाप
वघातादय एव न दोहनविलापनादयः पयसो दोहनादय एव नावघातविलापनादयः आज्यस्य विलापनादय एव नावघात
दोहनादयः पशोरुपाकरणादय एव नाभिषवादयः तथा सोमस्याभिषवादय एव नोपाकरणादयः प्रकरणाविशेषेपि दृष्टसंभ
वं न्यायादेवमेव कल्पयितव्यत्वात् पृथक् प्रत्येकमेव तेषामधिकरणानि अधिक्रियन्ते हविरेभिरत्यधिकरणानि हविःसाधने
पायविशेषाः संस्कारा हविःसाधनद्रव्याणि तंडुलकरणाण्ड् करणपिष्टसंवनीयानापपिशेडुपनीतापादयः उपायविशेषाउ
लूखलमुसलादिमिद्रव्याणि च पुरोडाशस्य एवं यथासंभवमन्येषामुदाहर्तव्यं यथाधिकरणं मंत्रा दृष्टा मंत्रा हविःसंस्का १०६
र प्रकाशका हविःसाधनद्रव्यप्रकाशकाश्च यथाधिकरणं अधिकरणस्य योग्यातस्यतस्य संस्कारस्य द्रव्यस्य च प्रकाशने

सनर्थादृष्टाः समाम्नाताः संस्कारेतावन्नृ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि सोमेन त्वा
तनच्मीद्रायरथीत्यादयः साधनद्रव्यविषयास्तावत् अधिषवणमसि वानस्पत्यं प्रति त्वादित्यास्त्वग्वेत्तिति उलूखलस्य प्रकाशकः ए
ता आचरंति मधुमद्दुहाना इति गोविषयः एवमन्यत्रापि संस्कारांतरे द्रव्यांतरे चोदाहर्तव्याः न योग्यामंत्रास्तान् हविरुत्पत्त्यनुकूल
संस्कारान् हविःसाधनद्रव्याणि एतदुभयविषयान्मंत्रांश्च मिथः परस्परं ओषधोत्पत्त्यनुकूलान् संस्कारद्रव्यमंत्रान् पयआदिषु
पयउत्पत्त्यनुकूलान् संस्कारद्रव्यमंत्रान् ओषधादिषु एवं पशुसोमाज्यविषयानपि न संसाधयेत् संकीर्यानुतिष्ठेत् अनादेशात्व न
चनाभावात् तेषां प्रतिनियतत्वप्रकाशनस्य सामर्थ्येन च असांकर्यस्यैव न्याय्यत्वात् एवं च प्रकृतौ धर्माणां व्यवस्थितत्वात् विकृत
वतिदेशोपि व्यवस्थयैव भवेदिति न किंचिदुक्तं बाधकत्वमिति भावः। ननु यावान् धर्म उपदिष्टो यस्य हविषस्तत्तावतान संसिध्यति पि
शेदूपनीतापमंतरेण पुरोडाशस्वरूपसंसिद्धेः वत्सानामुपसर्जनानंतरं चंधनाद्यभावे होमानुपपत्तेः तपन्यादिन्यो आज्यस्य पुनःपुनी
र्वलापनाभावे होमसाधनरूपानिष्पत्तेः सोमे पशौ च पैउतिरशादन्यस्य अधिषवविशेषस्य विशासनविशेषस्य च नादरे सोमरसस्य

स्मृ०द०
१०७

हृदयाद्यवदानस्यथासिद्धः। यादृशाभ्यावघातादिरूपदिष्टस्तादृशाएवचेदतिदिश्येत ततदानैवारश्यामाकमवादिषुतंडुलानसिध्येयुः
श्यामाकेषुविवेचनेनसमुषतुषरहितविभागानुपपत्तेः उदकसंपर्कविनायवानामवघातेनतंडुलाभावानुपपत्तेः अतः कथमेवविधे
षुहविर्निर्ष्पत्तिरित्यत आह येनयेनहविः संसिध्येत्तेनतेननकुर्यात्तत्स्याधिकरणमितिपद्धवि [illegible] चोदितंयत्पुरो
डाशादिस्वरूपंयेनयेनशास्त्रदृष्टेनतदविरुद्धेनउपायांतरेणवायेनयेनसंसिध्येत्तेनतेनोपायेनतत्पुरोडाशादिकुर्यात्यैर्येनचय न
द्धविः संसिध्यति विनाचनसिध्यतिशास्त्रीयमन्यद्वा आवघातादिकंतस्यशास्त्रविहितस्यपुरोडाशादेरधिकरणंशास्त्रानुमतः
संस्कारः नचायंसन्निपत्योपकारकसंस्कारानुष्ठानप्रकारोपूर्वतनयास्माभिरिदानींकल्पितः अपितर्हि न्यायविद्भिः पूर्वाचार्यै
रपिइत्थमेवकर्तव्यतयाउक्तान्यधिकरणानीतिएवंचयेनयेनन्यासेनयद्धविः संसिध्येत्तेनतेननकुर्यादितिवचनात्पिष्टेद्रूपन्या
स्तापोवश्यंकर्तव्यः उष्णोदकमात्रेणपुरोडाशरूपेस्यादकपाकासंभावात् अतएवप्राचीनाः प्रयोगकाराः संवापानंतरंयथास्प १०७
ष्टंभवतितथाकरोतीत्युक्त्वापरिकर्मिणमाहहरापआनयेतीतिवदंति। आपस्तंबोप्याह प्रक्षालितायांपात्र्यांनिष्टप्योप

वन्नायां पवित्रवत्सां पिष्टानि संवपतीत्तिनिष्टप्तो पवत्तायांनिष्टपनेनशफ्कायां अत्र प्राचीनाः प्रयोगकाराः निष्टपनेनउपवात्तस्यद्द
ष्टमेवप्रयोजनं पाकः संवापमात्रेण सर्वपिष्टानांपाककरणमवशक्यंनस्मात्तदर्जनमपि कृत्वापिष्टप्रवपणं कर्तव्यं श्रृते तत्ताभिः
परिप्लावनंमितियाज्ञिकाभवति दे इत्ति वदंतिनचपुनः पाकशंका पुरोडाशसिद्धेरूपायत्वात् अन्यथाउल्मोदकेनापिपुनः पाक
स्यात्त् अन्येतुप्रणीताभिः संयवनमेवात्र कार्यं नपात्र्यानिष्टपनंइहपात्र्याः संतापावचनादितिवदंति। यद्यपिमंत्रसमाम्नाये
संवपामीत्येतावानेवमंत्रोधीयतेतथापिब्राह्मणेदेवस्यत्वासवितुः प्रसवइत्याह प्रसूत्याइत्यादिनायथादेवतमेवेनानिसंवपती
त्तिविनियोगदर्शनादाचार्यैर्देवस्यत्वेत्तिइत्यादिर्मंत्रोविनियुक्तइत्तिमंतव्यं। अत्रकर्मांतं। कुतोनुखलुपिष्टानिसंवपतीत्तिकृ
ष्णाजिनादित्येवब्रूयात् संवपन्पिष्टानिवाचंयच्छातितामविदहंतश्रपयतेत्येववाचंविसृजतेयोविदग्धःसनैर्ऋतोयोश्रृतः
सरौद्रोयःश्रृतःसदेवइतिसाधुश्रृतंश्रपयतेत्येवेदमुक्तंभवतीत्ति। अत्रस्फुटोक्षरार्थःअयमाशयःकुतःपिष्टानिसंवपेदि
दिति प्रश्नस्योत्तरेकृष्णाजिनादीत्येवब्रूयादितिकृष्णाजिनस्यनियमनात् नानाबीजेषुक्रमेणपिष्टान्यन्यत्रनिहितान्यपिते

स्मृ॰र॰ नैवक्रमेणारुह्माजिने प्रक्षिप्य संवपतीति कल्पसूत्रे वाचंयमस्तिरःपवित्रमिति संवपने वाग्यमनं विहितं अविदहंत श्रपयते
१०९ ति वाचं विसृजत इति वाग्विसर्गो विविहितः अत्रापि तयोरेव वाग्यमनतद्विसर्गयोः संवपन् पिशनि वाचंयच्छतीति सूत्रेणात्र
पुनर्विधानं सिद्धे सत्यारंभो नियमार्थ इति न्यायेन वाङ्नियमविषये अंतर्हसन्येतेषु संपात्नेषु संभाषेत्ते तिवोधायनोविसृष्टवाग्मि
तिशालीकिरिति वचनेन प्राप्तस्य संभाषणस्य व्यवर्त्तनेनात्र विषये वाङ्नियमस्य दृढीकरणार्थं यो विदग्धः सैनैर्ऋत इत्यादिना
साधुश्रृत वचनं संवपनक्रमात् संवपन समभिव्याहाराच्चतत्परायांपिष्टोद्रूपन्योपिष्टपाकविध्यभिप्रायं न तु पुरोडाशपाकम
त्राभिप्रायं इति भाष्यकारादीनां मतिः। अथ परिकर्मिणं महाहराय आनयेतीति। आहरणं विप्रकृष्टस्य सस्य समीपे प्रापणं अ
नयनं तु पिष्टेषु सेवनं स्पष्टमन्यत्। आहरति आहरतीति प्रेषकारः प्रणीताभ्यः स्रुवेणोपहत्य वेदेनोपयम्य पाणितलं वांतर्धा
येवं मदंतीभ्यस्ता उभयीरानीयमानाः प्रतिमंत्रयते समापो अद्भिरग्मत समोषधयो रसेन सं रेवतीर्जगतीभिर्मधुमतीर्म १०९
धुमतीभिः सृज्यध्वमिनीति। प्रेषकारः प्रेषार्थं कुर्वाणः परिकर्मी प्रणीताभ्योऽद्भ्यः स्रुवेणोपहत्य अपो अवदायतो अयस्ता

वेदेनोपयम्य उपसंगृह्य अथवा पाणिमंतर्धाय सप्तम्यर्थे द्वितीया दक्षिणस्य पाणेः स्रुवेण प्रणीताग्रहणे व्यापृतत्वात् सव्येपाणौ स्रुवमं
तर्धायवेत्यर्थः। एवं गृहीत्वा प्रणी ताअपः आहरत्यध्वर्यु समीपं ताः प्रणीताअपो ध्वर्युसमीपे कस्मिंश्चित्पात्रे निधायमदंतीभ्योऽभ्य
एवं स्रुवेणोपहृत्य वेदेनोपयम्य पाणावंतर्धाय वा अप आहरति ताउभयीरेकदा पिष्टेषु सिंचति आहराप आनयेति प्रैषात्ताउभयीः
प्रणीतामदंतीश्चाप आनीयमानाः पिष्टेषु सिच्यमानाः प्रतिमंत्रयते समापो अद्भिरग्मतेति न तु पिष्टेषु सेचनात् पूर्वमेकीकरणम
पां आपः प्रणीता अद्भिर्मदंतीतिः समग्मत संगच्छंतां संयुक्ता भवंत्विति मंत्रलिंगेन पिष्टेषु आसेचनानंतरमेवा पां एकीभावावगमात्तत्
दिदमुक्तं द्वैधभाष्ये शालीकि मत्ते युगपदानयनमिति। अत्र द्वैधं। संवपन इति सूत्रं शालीकेरत्रोहस्माह बौधायनः प्रणीताभ्यः स्रु
वेणापहृत्याप आनयेदेवं मदंतीनां च युगपदानयनं सकृच्च मंत्र इति शालीकेर्मतं बौधायनस्त्वाह प्रथमं प्रणीताभ्योपः स्रुवेणोपहृत्य
हृत्य पिष्टेष्वानयेत् उभयत्रापि मंत्रं ब्रूयात् प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वादिति अथानु परिप्लावयत्यङ्गुः परि प्रजाता स्थ समद्भिः पृ
च्यध्वमिति। पूर्ववत्स्रुवमात्राभिः प्रणीताभिर्मदंतिभिश्च स्रुवेणानुपरिप्लावयति पुनः परितः सर्वतो ऽद्भिराद्रीकरोति इदं परिप्लावनं म

पिष्टानि

दंतीभिः त्वा सांपिष्टसंयवनीयाइति समाख्यावशेन पिष्टसंयवनार्थत्वावगमात् एवं मदंतीभ्य इति पूर्वत्र प्रकृतत्वात् अद्भः परि प्रजाताइति
त्तसाभिरनुपरिप्लाव्येतिकल्पांतराच्च। संयौतिजनयत्यै त्वासंयौमीतीतिपिष्टानिसंयौति मिश्रयतिजनयत्याइति संयुत्य व्यूह्याभि
मृशत्यग्नये त्वाग्नीषोमाभ्यां त्वामुष्मा अमुष्माइति यथादेवतमिति संयवनानंतरं व्यूह्यपिष्टानिविभज्याभिमृशति अग्नये त्वेत्ये
कं भागं अग्नीषोमाभ्यामित्यपरं एवं देवतानामानि चतुर्थ्यंतासुच्चायंइंद्राग्नीभ्यां त्वेंद्राय त्वा महेंद्राय त्वेति यथादेवतमभिमृशेत्
अत्र शाखांतरे संयवनानंतरं सर्वाणि पिष्टान्येकं पिंडं कृत्वा ततो यथाभागं व्यावर्तयेतामिति विभज्य समौ पिंडौ कृत्वेति विभाग पिंडकर
णे समाम्नाते तद्व्यावर्त्यर्थं संयुज्य व्यूह्याभिमृशतीति त्रयाणामानंतर्यमुक्तं युक्तं चैतत् मंत्राम्नाये संयवनमंत्राम्नानानंतरं व्यभिमर्श
मंत्राम्नानेन ब्राह्मणेपि जनयत्यै त्वा संयौमी त्याह प्रजा एवै[illegible] नेनदाधार अग्नये त्वाग्नीषोमाभ्यामित्याह व्यावृत्त्या इति तथैव विनियोज
नेन व्यभिमर्शनस्य अग्नये त्वाग्नीषोमाभ्यामित्याह व्यावृत्त्याइति व्यावृत्तिप्रयोजनत्वेनाभिहितस्य विभागमंतरेण कर्तुमशक्यतया व्यूह १०९
नस्यार्थात् संयवनव्यभिमर्शनयोर्मध्ये वश्यकर्तव्यत्वात् तस्य चार्थिकस्याचोदनार्थतया मंत्रापेक्षाविरहात् मंत्राभावोपीति दर्शय

त्ति। अत्र द्वैधं। व्यभिमर्शन इति सहस्माह बोधायनो व्यभिमृशेद्देवैकं हविरेवं नानाबीजानीत्यथो ह स्माह शालीकिः संसर्गान्न खलु व्यभि
मर्शो जायते नासंसृज्यमानानि हवींष्यभिमृशेन्नैकं हविः को हि नानाबीजानां व्यभिमर्शन इति। व्यभिमर्शो अभिमृशत्यग्नये त्वेति विहि
ताभिमर्शनविषये बोधायन आह एकमेव हविर्यदि निरुप्तं स्यात्तदापि यथा देवतं व्यभिमृशेद्देवमंत्रजन्यादृष्टलाभाय एवं नानाबीजान्य
पि व्यभिमृशेद्देवेति शालीकिस्त्वाह निरुप्तानां हविषामव घातादौ संसर्गात्सर्वदेवतासाधारण्ये जाते व्यभिमर्शः विभजनपूर्वको भिमर्शो
जायते कर्तव्यत्वेन देवतानामसाधारण्यापनहि दृष्टेः संभवत्यदृष्टं प्रयोजनमिति न्याय्यं एवं च नासंसृज्यमानानि हवींष्यभिमृशेन्नैकं ह
विरिति निश्चयः। एवं स्थिते नानाबीजानां व्यभिमर्शने को हेतुः न कोपीत्याशयः। पिंडं करोति मखस्य शिरोसीति। पिंडमित्येकत्वमविव
क्षितं उद्देश्यगतत्वात् ग्रहैकत्ववत् तथा चापस्तंबः समौ पिंडौ करोतीति। तं दक्षिणेषां कपालानां प्रसृत्यांगारांस्तेष्वधिपृणक्ति
घर्मोसि विश्वायुरितीति पिंडं तस्य निर्वापादौ प्राथम्येन प्रदर्शितक्रमात् एवमेवोत्तरं पुरोडाशमित्युत्तरत्राग्नीषोमीयस्य वक्ष्य
माणत्वात् च दक्षिणेषां कपालानामंगारान् प्रसृत्य तेष्वधिपृणक्ति अधिश्रयति घर्मोसीति आग्नेयं पुरोडाशमष्टासु कपा

क्र०द० लेष्वधिश्रयतीत्यापस्तंबः ॥ प्रथयस्व पुरु प्रथस्वोरु ते यज्ञपतिः प्रथतामितीति । प्रथयति विस्तारयति पुरोडाशं तत्कथमित्यत
११० आह । तं नन्वंतं कूर्मप्रकारं करोति सर्वाणि कपालान्यभिप्रथयतीति ब्राह्मणमिति तं कपालेषु प्रथितं पिंडं तनुः अंतो यस्य तं
तन्वंतं कूर्मस्येव प्रकार आकृतिविशेषो यस्य तं कूर्मप्रकारं सर्वाणि कपालानि यथा व्याप्नोति तथा प्रथयति विस्तारयतीति [illegible]
[illegible]मि[illegible] पालेषु प्रथितं [illegible] यस्य तं [illegible] कूर्मस्येव [illegible] सर्वाणि कपा
लानि [illegible] व्याप्नोति तथा प्रथयति विस्तार[illegible] ति ब्राह्मणं भव[illegible] त्ति अतस्तथा कर्तव्यमिति तिरःपवित्रमाज्यस्थाल्यामाज्यं
निर्वपति ॥ १८ ॥ महीनां पयोस्योषधीनाꣳ रसस्तस्य तेऽक्षीयमाणस्य निर्वपामि देवयज्याया इतीति । स्पष्टं । यद्यपि प्रोक्षणी
रासादयेध्मा बर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढि पत्नीꣳ सन्नह्याज्येनोदेहीति प्रैषान्महीनां पयोसीति मंत्रपाठक्रमात्
ब्राह्मणपाठक्रमाच्च प्रैषादूर्ध्वमानयनकाल एव निर्वापः कार्यः । उक्तं च तथैवापस्तंबेन तथापि शाखांतरे पुरोडाशमधि ११०
श्रित्याज्यं निर्वपतीति वचनात् आचार्यैः यत्र विहितं एवं चाधिश्रयणादिः संस्कारो भविष्यति तत्र आज्येनोदेहीति प्रैषस्य

पि इदानीं निरुप्तेनाज्येनेत्यर्थ इति। अत्र द्वैधं। हविर्निर्वापप्रकरणे आज्यस्य निर्वपण इति सूत्रं शालीकेरत्रोहस्माह बोधायन औषधस्यां
तं कृत्वाज्यस्य निर्वपेदेवमस्य सह हविर्भिः प्रोक्षणं लभत इतीति। सूत्रं आग्नेयाधिश्रयणानंतरं तिरःपवित्रमाज्यस्थाल्यामाज्यं नि
र्वपतीति सूत्रं शालीकेर्मतं बोधायनस्त्वाह औषधस्य निर्वापानंतरं आज्यस्य निर्वपेदेवं सति हविर्भिः सहास्याज्यस्यापि प्रोक्षणं लभ
ते यजमान इति। अत्र प्रकरणे द्वैधं। आज्यस्य निर्वपण इति सूत्रं शालीकेराख्यातं बोधायनस्यात्रोहस्माहौपमन्यवः सर्वाण्येव हवींषि
परिनिष्ठाप्याज्यं निर्वपेदिति। सूत्रं शालीकेरिति गतं बोधायनस्य मतं तु हविर्निर्वापप्रकरण एव व्याख्यातं औपमन्यवस्त्वाह सर्वाणि हवींषि
परिनिष्ठाप्यैव अधिश्रित्यैवाज्यं निर्वपेदिति तेषामयमाशयः शालीकेर्यागक्रमेण हविषां निष्पत्तिः कार्या आग्नेययागानंतरं चोपांशुया
ग इति तदीयस्याज्यस्याग्नेयाधिश्रयणानंतरं निर्वापो युक्तः पुरोडाशमधिश्रित्याज्यं निर्वपतीति शाखांतरीये वचने चैकत्वं विवक्षित
मिति बोधायनस्याशयस्तु एवमस्य सह हविर्भिः प्रोक्षणं लभत इति सूत्र एव स्फुटः औपमन्यवस्य तु नोपांशुयाजार्थत्वेन स्थाल्यामाज्यं विहि
तं किंतु सर्वस्मै वा एतद्यज्ञाय गृह्यते यत् ध्रुवायामाज्यमिति वचनेन द्रव्यापेक्षसर्वयज्ञार्थत्वेन विहितं आज्यमेवोपांशुयाजस्यापि स्था

वा

का०द० त्स्याज्यं तु सर्वार्थमेव भवति अतः सर्वार्थत्वात् सर्वेषां परिनिष्ठापनानंतरं निर्वापः कार्यः। पुरोडाशमधिश्रियेतिश्रुतौ च एकत्व
१११ मविवक्षितं ग्रहैकत्ववदिति उपांशुयाजस्य चरुपक्षे इदानीं तिरःपवित्रं चरव्यं स्थाल्यां तूष्णीं निर्वपेत्। अथोत्तरतो भस्ममिश्रानं
गारान्निरूह्य तेषु धिश्रयतीति गार्हपत्यस्योत्तरतः आज्यमित्यनुवर्तते स्पष्टमन्यत्। एवमेवोत्तरं पुरोडाशमधिपृणक्ती ति। उत्तरं
अग्नीषोमीयं पुरोडाशं एवमेवाधिश्रपणक्ति आग्नेयपुरोडाशवदेवांगारापोहनादारभ्य प्रागाज्यनिर्वापात्कुर्यात्। अथश्रुत्त मथदधी
ति। अथपणक्तीत्यनुषंगः। तूष्णीमेवानयोरधिश्रयणं एवमित्यनतिदेशात् प्रथनादेः समन्वयासंभवाच्च नानुषंगः दभ्रः अविरोधेना
धिश्रयणं कार्यं प्रधानार्थत्वात् संस्कार्यस्य। अथपात्र्यामपआनीय दक्षिणस्य पुरोडाशस्य त्वचं ग्राहयति त्वचं गृह्णीष्व त्वचं गृह्णीष्वेति
त्रिरथोत्तरस्येति। त्रिरित्यनुषज्यते स्पष्टोऽर्थः। अथपर्यग्निकरोत्यंतरितं रक्षोंतरिता अरातय इति त्रिरिति। स्पष्टं। इदं पर्यग्निकरणं
सर्वहविषां तंत्रं यद्यपि लक्षणे धर्मो वा एषो ग्रांतः अर्धमासेऽर्धमासे प्रवृज्यते। यत्पुरोडाशः। स ईश्वरो यजमानं शुचा प्रदहः। पर्य १११
ग्निकरोति। पशुमेवैनमकः। शांत्या अप्रदाहायेति पुरोडाशसंबंधेन श्रपणात् पर्यग्निकरणं पुरोडाशार्थमेव न तु नरार्थमितिगम्यते

तथापि पशौ आज्यं निरूप्याधिश्रित्य पर्यग्निकृत्वेति कर्मान्ते दर्शनात्। स सर्वार्थमेव न ह्यन्यथा विरुतावाज्येति देश उपपद्यते न च मन्त्रावाज्य
स्यापूर्वं अमंत्रकं पर्यग्निकरणं विधीयत इति वाच्यं अत्राथ पर्यग्निकरोतीत्यविशेषवचनात् पशौ चाज्य निर्वपणाधिश्रयणयोः प्राकृतत्वा
त् न तत्सहोच्चारणाच्च पर्यग्निकरणमपि प्राकृतमिति गम्यते। एवं च सर्वहविःसाधारणं पर्यग्निकरणमिति सिद्धं तथा चापस्तंबः अं
तरित्तं रक्षोऽन्तरिता अरातय इति सर्वाणि हवींषि त्रिः पर्यग्निकृत्वेति। अथ दक्षिणं पुरोडाशं श्रपति देवस्त्वा सविता श्रपयतु वर्षिष्ठे अ
धिनाके अग्निस्ते तनुवं मातिधागितीति। श्रपयति दर्भै रभिज्वलयतीनं तुपचति अविदहं तं श्रपयते स्फत्तरत्र श्रपणवचनात् आपस्त
यस्त्वाह देवस्त्वा सविता श्रपयत्वित्युल्मुकैः परितपत्यग्निस्ते तनुवं मन्ते धागितीति दर्भै रभिज्वलयन्तीति। अस्य मते अग्ने हव्यं रक्ष
स्वेत्यंतो मंत्र इति स्पष्टमन्यत्। गार्हपत्यमभिमंत्रयतेऽग्ने हव्यं रक्षस्वेतीति स्पष्टं। एवमेवोत्तरं पुरोडाशं श्रपतीति अग्ने हव्यं रक्षस्वेत्यं
तं कुर्यान्न स्पष्टमन्यत्। अथ दक्षिणं पुरोडाशं भस्मनाभिवास्य वेदेनाभिवासयति सं ब्रह्मणा पृच्यस्व सं ब्रह्मणा पृच्यस्वेति त्रिरिति दक्षि
णं पुरोडाशं भस्मनाभिवास्य आज्य पुनर्वेदेनाभिवासयति सांगारे [illegible] भिवासनं युक्तं पा [illegible] वेद [illegible] णभस्मना अत्र प्रथमं

सु०द भस्मनाभिवासनमदाह्यर्थंवेदेनसांगारेणभस्मनाभिवासनंतुपाकार्थंनचात्रशुद्धैरंगारैरेवाभिवासनंयुक्तंपाकार्थत्वादितिवाच्यंवेद
११२ स्यविनाशापत्तेः।आपस्तंबोप्याह।संब्रह्मणापृच्यस्वेतिवेदेनपुरोडाशंसांगारंभस्माभ्यूहतीतिसंब्रह्मणापृच्यस्वेतिमंत्रेणाभिवासनंचत्रिःअ
त्रकर्मांतं।संब्रह्मणापृच्यस्वेतिविज्ञायतेवाग्वैब्रह्मवाचैवैनमेनंसंपृणक्तीति।संब्रह्मणापृच्यस्वेतिमंत्रविषयेशाखांतरीयेब्राह्मणेइदं
विज्ञायतेनएतस्मिन्नुपात्तंयद्ब्रह्मतत्तुवाग्ग्येवाक्मंत्रःखलुतस्मात्अनेनमंत्रेणाभिवासयन्नीत्येतन्त्वाचासंब्रह्मणापृच्यस्वेतिमंत्रेण
एनंपुरोडाशंसंपृणक्त्येवसंपृक्तंकरोत्येतदेवेत्यर्थः।तथाचहेपुरोडाशमंत्रेणसंपृक्तोभवेतिमंत्रेणमंत्रसंबंधस्यानुष्ठेयत्तयाविधानात्
कदाचिन्मंत्रंविस्मृत्याभिवासनेकृतेस्मरणानंतरंपुनर्मंत्रेणाभिवासनंकार्यंतथाचब्राह्मणंपशवोवैप्रतिमापुरोडाशःसनायजुकमभि
वास्यः।रथेवस्यात्।ईश्वरायजमानस्यपशवःप्रमेतोः।संब्रह्मणापृच्यस्वेत्याहप्राणोवैब्रह्मप्राणाःपशवःप्राणैरेवपशूंसंपृणक्ति।नप्र
मायुकोभवतीति।अथोत्तरमितिभस्मनाभिवास्येत्यादेःपुरोडाशमित्यस्यानुषंगःपूर्वेणैतव्याख्यातं।अविदहंतश्रपयतेतिवाचंविसृज ११२
तइति।संवापकालेवाचंयमइतिवाङ्नियमितानांवाचइदानीमविदहंतश्रपयतेतिमंत्रमुच्चार्यवाचंविसृजेत्।श्रपयंतिपरिकर्मिणः।आ

पस्तंबस्त्वाह। आग्नीध्रोहवींषिसुश्रृत्ता निकरोतीति अत्रेतत्पात्रीसंक्षालनंगार्हपत्यादंगारेणाभितप्यहृत्वांतर्वेदिप्रतीचीनंत्रिस्फुले
खासुनिनयत्येकतायस्वाहा द्वितायस्वाहा त्रितायस्वाहेतीति। अत्रवाग्निसर्गानंतरं एतस्याः पात्र्याः पिष्टोद्वपन्याः संक्षालनंसम्यक्क्षा
लनेतिसंक्षालनमुदकं गार्हपत्यादंगारमाहृत्यतेनांगारेण भितप्यअंतर्वेदिहृत्वापौर्णमास्यामंतर्वेदी तिनिर्देशोभाविनींवृत्तिमाश्रित्य
तत्रतिस्त्रोलेखनाः प्राचीः प्रागपवर्गाः कृत्वातासु त्ति स्फुलेखासुप्रतीचीनंप्रत्यगपवर्गं निनयतिएकतायस्वाहेत्यादिभिर्मंत्रैः। अत्रेदंध्ये
आप्यस्य निनयनइतिजघनेनगार्हपत्यमाप्येभ्यो निनयेदितिबोधायनोग्रेणातिहायनिनयेदितिशालीकिरग्रेणवाजघनेनवेत्सो
मन्यवइति। जघनेनपश्चिमेनगार्हपत्यमाप्येभ्योनिनयेदितिवोधायनः अग्रेणतिहायनिनयेत् गार्हपत्यमतिहाय यजातिक्रम्यतम
ग्रेणाप्येभ्योनिनयेदितिशालीकिः गार्हपत्यमग्रेणजघनेनवेत्योप मन्यवइति। अत्रकर्मांतं। कउखलुहविः प्रतंश्रप्यतइतियद्देवेत
दाप्येभ्योनिनयत्येकतायस्वाहाद्वितायस्वाहात्रितायस्वाहेतिकोनुखल्वेकतः कोद्वितः कस्त्रितइतिपितापितामहः प्रपितामहः इत्ये
केपृथिव्यंतरिक्षंद्यौरित्येकेग्निआदित्योवेयुतइत्येके ग्नेरुल्लयोज्यायां सोभ्रातर आसन्नित्येतऋषय एतंनामधेयावभूवुरित्ये

सु०द० केत्ते देवा आप्येष्व मृजते सह्याप्यनामधेया देवा भवंति क उ खलु पौर्णमास्यां पितृभ्यो दीयत इति यद्देवे तद्दक्षिण्यां निनयत इतीति। हविः
११३ होतव्यत्वेन चोदितं द्रव्यं प्रत्तं प्रदानविषयीकृतं देवतोद्देशेन त्यक्तं त्यागोत्तरकालमिति यावत् कश्चयप्यते कस्मिन्कर्मणि श्रप्यत्ते प
च्यत इति प्रश्नार्थः। यत् आप्येभ्यो निनयति यत् आप्यसंप्रदानकं निनयनं आप्याननुद्दिश्य पात्रीसंक्षालनत्यागः। एकतायस्वा
हा द्वितायस्वाहा त्रितायस्वाहेति मंत्रैः एतदेव हविः प्रत्तं श्रप्यते दर्शपूर्णमासयोः अत्र नयतेः प्राप्त्यर्थत्वात् प्राप्तेश्च पूर्वसंबंधत्या
गपूर्वकान्यसंबंधावाप्तिरूपत्वतया निनयनमिह देवता उद्दिश्य पात्रीसंक्षालनस्य प्रक्षेपसहितस्त्यागः एवं सति सूत्रे आप्येभ्य इतिमं
त्रे च एकताय द्विताय त्रितायेति चतुर्थ्यः उपपद्यंते अन्यथा निनयत्यर्थस्य प्रक्षेपमात्ररूपत्वे देवतात्वबोधकचतुर्थ्यसमन्वयानु
पपत्तेः अत एवोक्तं भाष्यकल्पे पूर्वमुल्मुकेन श्रपणं पश्चात्द्दानं इह दत्वा पश्चादुल्मुकेनाभितपनमिति एवं चाभितपनं त्यागात्प्रा
गूर्ध्वं चेति विकल्पः ननु आप्येभ्यो निनयतीति निर्देशात् अस्मिन्यागे आप्यानां देवतात्वमवगतं एकतायस्वाहेति मंत्रैः एकता च ११३
दीनां देवतात्वमवगतं न चैकस्मिन्यागे देवताभेदः संघटत इत्याशंकायां एकतादीनामाप्याभेदान्न दोष इति परिहर्तुं पृच्छति

कोनुखल्वेकतः कोद्वितः कस्त्रित इति आप्त्या एव वा आहोस्विदेते अन्या एवेति प्रश्नार्थः तत्र केषांचिन्मतमुपन्यस्यति पितापिताम
हः प्रपितामह इत्येक इत्यादि एकतादयः क्रमेण पवित्रादय इत्यर्थः । इत्यमितरेष्वपि पक्षेषु योज्यं अग्नेस्त्रयो ज्यायांसो भ्रातर इत्यादि
ब्राह्मणे प्रतिपादिताये अग्नेस्त्रयो आर्यासोभ्रातरः त एव एतन्नामधेया ऋषयो बभूवुः ततः श्च एवैकतादय इत्येके इत्थं शाखाभेदेषु
समाम्नातान् पक्षानुपन्यस्य अस्मच्छाखायामाम्नातं अस्माकं अनुष्ठेयत्वेन व्यवस्थितं पक्षमाह ते देवा आप्त्येष्वित्यादि अस्मदीये ब्रा
ह्मणे हि देवा वै हविर्भृत्वाब्रुवन् कस्मिन्निदं म्रक्ष्यामह इति सोग्निरब्रवीत् । मयि तन्वः सन्निदध्वं । अहं वस्तं जनयिष्यामि यस्मिन्म्रक्ष्य
ध्व इति । ते देवा अग्नेस्तन्वः संन्यदधत । तस्मादाहुः । अग्निः सर्वा देवता इति । सोंगारेणापः । अभ्यपातयत् । तत एकतो जायत । स द्वि
तीयमभ्यपातयत् । ततो द्वितो जायत । स तृतीयमभ्यपातयत् । ततस्त्रितो जायत । यदद्भ्यो जायंत । तदाप्त्यानामाप्त्यत्वं । यदात्मभ्यो जायं
त । तदात्म्यानामात्म्यत्वं । ते देवा आप्त्येषु मृजत । आप्त्या अमृजत सूर्याभ्युदित इत्यत्र देवाः पूर्वं व्रीह्यवघातादिना हविः संपाद्य वीजवधादि
पापलेपः कस्मिन्मार्जनीय इति विचारात् अग्निवचनेन स्ववीर्यमग्नौ संनिधापि भवंतः ततः सोग्निः सर्वदेववीर्यधारिणा अंगारेण अपूदे

स्क०द वताअभिरक्षस्यनद्धीर्थमपादयत् नस्माउत्पन्नानामेकतादीनांदेवतानांविशेषाणां आपोमातरः देवास्मानःपिनरइति आप्यनाम
११९ कत्वं आप्त्यनामकत्वं चसंपन्नंतनस्ते देवाः पापलेपमाप्येषुदेवेषु मृजत आप्यनामकादेवाः सूर्याभ्युदितइत्येकतादीनामेवाप्य
नामधेयश्रवणात् आप्या एवैकतादयोनभिन्ना इतिभेदशंकाद्दूरतएवेतिभावः कउखलुपौर्णमास्यामिष्टियदेत्तद्गोण्यानिनयतेस्वधापि
तृभ्यइतितदेवामावास्यायांतुएतश्चपितृयज्ञश्चेतिभावः।अथवेदिकरणमारभ्यते अयवेदमादत्तइतिनतुमंत्रसमाम्नायेआददइतिस्फ्यादान
मंत्रस्याम्नानात् ब्राह्मणेनदेवस्यत्वासवितुः प्रसवइतिस्फ्यमादत्ते प्रसूत्याइतिस्फ्यादानप्रभृत्येववेदिसेवग्राह्यंयथास्यादित्येवमर्थंपृथक्
कृतमितिध्येयं।अथवेदमादत्ते अयंवेदः पृथिवीमन्वविंदद्गुहासतींगहनेगह्वरेषुसविंदत्तुयजमानायलोकमच्छिद्रंयज्ञंभूरिकर्माकरो
त्वितीति।स्पष्टं।वेदेनवेदिंत्रिःसंमार्ष्टिवेदेनवेदिंविविदुःपृथिवीं सापप्रथेपृथिवीपार्थिवानि।गर्भंबिभर्तिभुवनेष्वंतस्ततोयज्ञोजाय
तेविश्वदानिरिति।वेदेनवेदिंत्रिःसंमार्ष्टिउदगपवर्गआंतात्संमार्गआचारात्स्पष्टं।बौधायनकृतस्यासौरत्निःसूत्रस्यचाष्टमःपटल ११९
स्तत्रसंपूर्णः प्रीयतांमेसदाशिवः॥१५॥ अथजपनेनवेद्यैतिष्ठं स्फ्यमादत्तेदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाद

ह इतीति। वेद्यै वेद्या जघनेन पश्चिमेन यत्र वेदिं करिष्यति तत्र तः पश्चात्तिष्ठन् स्फ्यमादत्ते देवस्य त्वेति यद्यपि मंत्रसमाम्नाये आद द इति मं
त्रः पठितः तथापि देवस्य त्वा सवितुः प्रसव इति स्फ्यमादत्ते प्रसूत्या इति मंत्रविशिष्ट क्रियाविधायक ब्राह्मणानुसारेण। चार्येर्मंत्रः प
ठित इति ध्येयं स्फ्यादानादि स्तंवयजुर्हरणस्य हस्तद्वय साध्यत्वयार्थाद्दिदस्य निधानमवगम्यते तिष्ठन्निसधिकारान् स्तंवयजुर्हरणं
तिष्ठतैव कर्तव्यं न नु तिष्ठन्नासीनः प्रह्वो वायथान्यायमिति सूत्रेणैव तिष्ठता स्तंवयजुर्हरणं कार्यमिति सिद्धं तत्र तिष्ठन्निति वच
नमिति फले चेत् न स्फ्यादानाभिमंत्रणसंस्पर्शानामासीनेनापि कर्तुं शक्यतया आसीनेन कर्तव्यत्वया आसीनेन कर्तव्यत्व प्राप्तौ तद
पवादार्थत्वात् एवं च स्थानमासनं वा अविरोधेउ नरपदानुरूपमनुष्ठेममिस्फक्तं भवति। आदायाभिमंत्रयत इंद्रस्य वाहुरसि दक्षिणः
सहस्रभृष्टिः शततेजा इतीति देवस्य त्वेति दक्षिणेन गृहीतं स्फ्यं सव्येनादायतं दक्षिणेनाभिमंत्रयते अभिमंत्रणं हि प्रधानत्वाद्दक्षि
णेन धारणं तु गुणभूतत्वात् सव्येनेति ध्येयं। अथैनं बर्हिषा स ८ स्पृशयति वायुरसि तिग्मतेजाः शभ्रश्चिरसि वानस्य सोद्विषतो वध इती
ति। एनं स्फ्यं वर्हिषा दर्भेण अत्रैकत्वं विवक्षितं उपादेयगतत्वात् सं स्पृश्यति संमार्ष्टि नो तनूकरण इति धातुः उपसर्गवशादर्थांतर

पृथिव्या इति पृथिव्या अपघ्नन्। भ्रातृव्यो वा अररुः। अपहतो ररुः पृथिव्या इति यदाह। भ्रातृव्यमेव पृथिव्या अपहन्तीति ब्राह्मणे अ
ररोरसुरस्य पृथिव्यां तिरोहितत्वेन शायितस्य पृथिव्याः सकाशात् अपहननश्रवणात् मंत्रलिंगाच्च पृथिव्यामाच्छादनेनावस्थान
स्यावकाशप्रदानं किंचित्तन्निरसनीयमवगम्यते तच्च सूत्रे तृणस्य प्रहरणविच्छिन्नस्य तदनुनिष्पन्नपांसूनां च बुद्धिस्थत्वात्तेषां निर
सनयुक्तं तथा चापस्तंबः। स्फ्येन सतृणान् पांसूनपादायेति भारद्वाज आह स्फ्येन वै सर्वं वैदिकं कर्म क्रियत इति। व्रजं गच्छ गोस्थान
मिति हरतीति। उत्करमुद्दिश्य। वेदिं प्रत्यवेक्षते वर्षतु ते द्यौरितीति गतं। उत्करे निवपति वधान देव सवितः परमस्यां परावति
शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगितीति। निवपति संतृणान् पांसून् गतमन्यत्। द्वितीयं प्रहरति पृथिवि देव
यजन्योषध्यास्ते मूलं मा हिंसिषमित्यपहतो ररुः पृथिव्यै देवयजन्या इत्यादन्नेन व्रजं गच्छ गोस्थानमिति हरति वेदिं प्रत्यवेक्षते वर्ष
तु ते द्यौरिति हृत्वोत्करे निवपति वधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौ गि
ति तृतीयं प्रहरति पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषमित्यपहतो ररुः पृथिव्या अदेवयजन इत्यादन्नेन व्रजं गच्छ गो

स्क०द० स्थानमितिहरन्ति वेदिं प्रत्यवेक्षन्तेवर्षन्तुतेद्यौरितिहृत्वोत्करेनिवपतिवधानदेवसवितः परमस्यां परावति शतेनपाशैर्योस्मान्द्वेष्टि
११६ यंचवयंद्विष्मस्तमतोममोगरुस्तेदिवंमास्कानित्यत्रानुवर्त्तयन्तीति। प्रथमपर्यायवत्त एवपुनः पर्यायद्वयंकुर्यात्। आदानमंत्रे
तुविशेषः। द्वितीयेपर्यायेअपहतोररुः पृथिव्यैदेवयजन्या इतितृतीयेअपहतोररुः पृथिव्या अदेवयजन इति अत्रतृतीयेपर्या
यएवनिवपन्तेअररुस्तेदिवंमास्कानित्यधिकोमंत्रभागो वर्त्तते अवशिष्टं प्रागेवव्याख्यातं। द्वादशद्वंद्वानि दर्शपूर्णमासयोस्तानि
संपाद्यानीत्याकुरितिद्वंद्वसंपादनविधिब्राह्मणेस्तंवयजुर्हरस्यभिचगृह्णातीतिचिकीर्षि तवेदिस्थानेपृथिवीदेवयजनीत्यादि
भिर्मंत्रैः स्तंवयजुर्हरणमेकंवधानदेवसवितरितिमंत्रेणोत्करेस्युमान् सतृणपांसून् आग्नीध्रोंजलिनाभिगृह्णीयात्तदेकंअ
हत्यभिलिखत्येकंद्वंद्वं इत्येकस्यद्वंद्वस्यसंपाद्यत्वाभिधानात्सूत्रे उपसदिआग्नीध्रः अग्नीन्मदंतीरधिश्रयहविरधिश्रयेत्युप
व सीदेतिउपसीदनवचनप्रयोजनत्वायच प्रतिपर्यायमाग्नीध्र उत्करेस्युस्तान् सतृणपांसूनभिगृह्णातीतिनदिदमुक्तं भाष्येउ ११६
त्करदेशेअभिगृह्णात्याग्नीत् अभिचगृह्णातीतिवचनात् उपसद्येत्युपसीदेतिदर्शनादिति। आपस्तंवोप्याहत्युस्समाग्नीध्रोंज

ळिनाभिगृह्णातीति। तूष्णीं चतुर्थं हरतिसहबर्हिषेति। चतुर्थपर्याये तूष्णीं मंत्रं विनासहबर्हिषाबर्हिः सहितान्पांसून्हरति। इ
दमपि सहबर्हिषेतिवचनं बर्हिः सहितानां पूर्वमपिहरणेलिंगं। अथपूर्वं परिग्राहं परिगृह्णाति। खंडः॥३६॥ वसवस्त्वापरिग
ह्णंतु गायत्रेण छंदसेति दक्षिणतो रुद्रास्त्वा परिगृह्णंतु त्रैष्टुभेन छंदसेति पश्चादादित्यास्त्वा परिगृह्णंतु जागतेन छंदसेत्युत्तरत
इति। चिकीर्षितवेदिसंबंधिदेशस्यावधिपरिज्ञानाय आत्मीययज्ञोपयोगयोग्यत्वाय च विहितं श्रुतौ परिग्राहद्वयं तत्र पूर्वं कुर्या
दित्यर्थः। तमेवाह वसवस्त्वेति दक्षिणतः परिगृह्णाति दक्षिणायै श्रोणेरारभ्य आदक्षिणादंसाद्रेखां प्राचीं कुर्यात् रुद्रास्त्वेति
पश्चात् दक्षिणस्याः श्रोणेरारभ्य औत्तरस्याः श्रोणेरुदीचीं रेखां कुर्यात् आदित्यास्त्वेति उत्तरस्याः श्रोणेरारभ्य औत्तरादंसाद्रे
खां कुर्यादिति। अत्र द्वैधं। चेद्वेपरिग्रहणइतिसूत्रं शालीकेरत्राह स्माह बोधायनः श्रोणीं प्रथमां परिगृह्णीयादथ दक्षिणमं
समथोत्तरमिति पुरस्तादेवैनां प्रदक्षिणं परिगृह्णीयादित्यौपमन्यव इतीति। सूत्रं दक्षिणतः प्रागपवर्गं पश्चादुदगपवर्गं उत्तर
तः प्रागपवर्गमिति शालीकेर्मतं बोधायनस्त्वाह श्रोणिं श्रोणिसंबंधिनीं पश्चिमां दिशां प्रथमां प्रथमतः रुद्रास्त्वेति मंत्रः रु

स्क॰द॰ द्रास्त्वेतिपश्चादितिश्रुतेः अथदक्षिणमंसंतत्संबंधिनींदक्षिणांदिशंअथोत्तरेअंसमित्यत्राप्यन्वितंतत्संबंधिनीमुत्तरांदिशंअ
१२७ त्रापिब्राह्मणव्यवच्छिन्नावेतौमंत्रौ। तेवसवस्त्वेतिस्थितेपिक्रमविशेषवचनंद्रष्टव्यंपुरस्तादारभ्यएनांवेदिंवेदेर्देशंप्रदक्षि
णंपरिगृह्णीयाद्दक्षिणाद्देशादारभ्यप्रदक्षिणमित्यर्थः। अत्रप्रदक्षिणमुपचारइतिसामान्यवचनस्यप्रागपवर्गत्वाविरो
धेनैवोपपन्नोदक्षिणतःप्रागपवर्गत्वेवचनंद्रष्टव्यं। अत्रसत्याषाढःस्फ्येनवेदिंपरिगृह्णातिवसवस्त्वापरिगृह्णंत्वितिदक्षि
णतःप्राचींरेखांलिखतिरुद्रास्त्वेतिपश्चादुदीचींआदित्यास्त्वेत्युत्तरतःप्राचीमितिपरिगृह्णात्यर्थोरेखाकरणमित्याहेति
अथकरणंजपतीमांनराःकृणुतवेदिमेत्यवसुमतींघृतवतीमादित्यचत्वींवर्ष्मंदिवोनाभापृथिव्यायथायंयजमानोनरिष्ये
दितीति। क्रियतेअदृष्टद्वारावेदिरनेनेतिकरणोमंत्रस्तंजपतिनचायंप्रैषःवेदिकरणस्याध्वर्युकर्तृकतयाआत्मानंप्रति
प्रैषानुपपत्तेःअथप्राचींस्फ्येनवेदिमुद्धंतीत्यस्मिन्सूत्रेवेदिकरणस्याध्वर्युवत्वप्रतीतेः। अस्यसंप्रैषत्वेसोमेकारणंज १२७
पतीत्युक्तावेदिकारावेदिंकल्पयंतीतिसंप्रैषानर्थकस्यात्तस्माददृष्टार्थोयंजपइति। अथप्राचींस्फ्येनवेदिमुद्धंति

देवस्यसवितुःसवेकर्मकृण्वंत्तिवेधसइत्तीत्ति।अथपूर्वपरिग्राहेणपरिगृहीतेतस्मिंदेशेप्राचींप्रागपवर्गांवेदिंउद्धनेन
करोतीतिदेवस्यसवितुरित्ति।अत्रकर्तव्यायावेदेःप्रमाणंतस्याःकरणेप्रकरणेप्रकारश्चशुल्वेदर्शितंअपरेणाहवनीयंयज्ञ
मानमात्रीवेदिर्भवतीतिदर्शपूर्णमासिकायावेदेर्विज्ञायतेतेनतस्यास्त्रिभागोनंपश्चात्तिरश्चीतस्याएवार्धंपुरस्तात्तिरश्चीए
वमेवदीर्घचतुरस्रमेकश्रोणिमाद्दिहस्तन्त्रिषुशंकून्निहत्याथावतीपार्श्वमानीद्विःतावतींरज्जुमुभयतःपाशांकृत्वा
मध्येलक्षणंकरोतिदक्षिणयोःपाशौप्रतिमुच्यलक्षणेनदक्षिणापायम्यआकृष्यलक्षणेशंकुंनिहन्यात्तस्मिन्शंको
पाशौप्रतिमुच्यलग्नौकृत्वालक्षणेनदक्षिणंपार्श्वंपरिलिखेत्अपरस्माच्छंकोरारभ्यआपूर्वशंकुपरिलिखेत्एतेनदक्षि
णयोःपाशौप्रतिमुच्येत्यादिनादक्षिणपार्श्वव्याख्यानेनउत्तरंपार्श्वंव्याख्यातंदक्षिणपार्श्ववदुत्तरंपार्श्वंकुर्यात्पूर्वपा
र्श्वेस्वयंस्वीययामात्रयारज्जुंद्विरभ्यस्यद्विगुणितांकृत्वातयारज्वापरिलिखेत्।एवमपरमपिपार्श्वंपरिलिखेत्पूर्वयो
पाशौप्रतिमुच्यलक्षणेपुरस्तादायम्यलक्षणेनशंकुंनिहन्यादित्यादिऊहेनकुर्यादित्यर्थः।एवमत्रयजमानमात्रीवेदिरु

न

स्फ०र० क्ता। कर्मान्तेत्तुपरिमाणांतरमप्युक्तं अथेयंदार्शपूर्णमासिकीवेदिर्यजमानमात्रीभवत्यपरिमितावायथासन्नानिहवींषि
१३९ संभवेदेवंतिरश्चीप्रांचीवेद्यंसाद्युन्नयस्याहवनीयस्यपरिगृहीत्यैप्रतीचीश्रोणीनिरूहतिगार्हपत्यस्यपरिगृहीत्यैपुरस्तां
दंहीयसीपश्चात्प्रथीयसीमध्येसन्नततराभवत्येवमेवहियोषेतित्तस्यैवदत्तीयत्तींखनतिप्रजापतिनायज्ञमुखेनसंमितां।
आप्रतिष्ठायैखनतीति।त्र्यंगुलंखेयेत्येकेषांचतुरंगुलंखेयेत्येकेषांरथवर्त्ममात्रीत्येकेषांयावत्पार्ष्णिर्म्ग्वेत्तमित्येकेषांएत
देवत्तदन्यकेषामनुतिष्ठांतरंभवतिनेनामात्राअतिखनेत्दक्षिणतोवर्षीयसींकरोतिपुरीषवतींकरोतिप्राचीमुदीचीं
प्रवणांनिस्तिष्ठतेति।अथेयंदार्शपूर्णमासिकीवेदिर्यजमानमात्रीभवतीत्ति इयंदर्शपूर्णमासिकीवेदिर्यजमानमात्री
भवतिस्रुत्वेनेवव्याख्यातं अपरिमितावायजमानमात्रीत्युक्तपरिमाणापेक्षयाअधिकपरिमाणावेदिर्भवेत् अस्मि
न्पक्षेयथा।आसन्नानिहवींषिवेदिःसंभवेत्संगृह्णीयात्मध्येसंभावयेदेवंतिरश्चीतिर्यक्प्रमाणाकार्यवेद्यंसोआ १३९
हवनीयस्यपरिगृहीत्यैप्रांचोप्राचींदिशंगच्छंतोविवउन्नयतिउन्नतोकुर्यात् श्रोणीगार्हपत्यस्यपरिगृहीत्यैपरिग्रहा

यप्रतीची प्रतीचीं दिशं गच्छंत्याविव निरूह्त इति नितरां दीर्घेण कुर्यात् परस्तात् अंहीयसी न्यूनतरा पश्चात् प्रथीयसी पृथुत
रा मध्ये सन्नतत रा अतिशयेन स्वरूपपरिमाणा वेदिः कार्या कृत एवमित्यत आह एव हि योषेति हि पतः कारणात् योषास्त्री
एवमिव उक्तलक्षणे च भवति इति शब्दो परिमितपक्षसमाप्तिद्योतनार्थः। न चैतत्सर्वमपि पक्षद्वयसाधारणं भवत्विति
वाच्यं यजमानमात्री वेदिरिति पक्षे तस्यास्त्रिभागोनं पश्चात्तिरश्ची स्यादि सूत्रेण शब्द एव सर्वस्यापि सिद्धतया त्र वक्तव्यस्या
भावात् अपरिमितपक्ष एव इति कर्तव्यताकांक्षावशेन वक्तुमुचितत्वात् उभयसाधारणस्य खननादेरविशेषेण मध्येवा
क्य समाप्तिद्योतके तिशब्दप्रयोगस्वारस्याच्च इति परंतु वेद्यां दर्शे परिमितपरिमाणे स्वीकृते सर्वेषां हविषां उद्कसं
स्थुय आसन्नानां वेद्यामंतर्भावः संभवति तादृशमपरिमितं परिमाणमंगीकृत्य तदनुरोधेन तस्यास्त्रिभागोन मित्यादि
सूत्वोक्तं कर्तव्यं। एवं सति इदं सूत्रं स्वरसमिति ध्येयं तस्यैय जमानमात्र्यै अपरिमितायै च वेद्यै तस्याः खननं वदतीत्यर्थः
न देवदर्शयति इयती खनति। इदं यद्वस्यामस्तत्परिमाणौ स्यास्तां वक्ष्यमाणं परिमाणमस्याः खनने यथा भवति तथा खनती

म

का०द०
१९

त्यर्थः। परिमाणमेव दर्शयति प्रजापतिना यज्ञमुखेन संमितां प्रजापतिसंबंधिना यज्ञमुखेन प्रजापत्यात्मकस्य यज्ञस्य मुखेन
संमितां समं मासं यस्यास्तां प्रादेशमात्रीमिति यावत् आ प्रतिष्ठायै खनन्ति प्रकर्षेण अशुचिद्रव्यांतरसंकलनं विनातिष्ठ
तीति प्रतिष्ठा दृढा भूमिः। यद्युक्तवक्ष्यमाणेषु परिमाणेष्विति अन्यतमेन परिमाणेन खनने प्रतिष्ठा दृढा भूमिर्न लभ्येत
यदा दृढभूम्यवाप्तिपर्यंतं खनेत् अत्र इतिशब्दः प्रकारवचनः अयं प्रकारः सर्वपरिमाणेष्विति वक्तुं त्रयोऽगुलयः प्रमाणम
स्य त्र्यंगुलं यथा भवति तथा खेयेत्येकेषां मतं सीताफालकृष्टरेखा तन्मात्रीं खेयेत्येकेषां रथवर्त्ममात्रीं चक्रमार्गस्य विस्ता
रप्रमाणं खेयेत्येकेषां पार्ष्णिमात्रीं पार्ष्णिः पादस्य पश्चिमो भागः पार्ष्णिस्तस्या यावद्वृत्तं रूपं वर्तते तावत् खेयेत्येकेषां नन्वीयत्तीं
खनन्तीत्यपि भवतु परिमाणान्तरमित्यत आह एतदेव तदन्यकेषामित्यादि इयत्ताभिस्त्येतदेव इ[illegible]तीयेमिति वाक्ये इदंशब्दे
न सामान्यतः प्रतिपन्नं यदुद्दिष्टं तदेव तदन्यकेषां अन्यकेषामित्यकृज्जं तं इयत्तीं खनन्तीति वाक्यादन्यवाक्यावगतानां १९
परिमाणविशेषाणामनुनिष्क्रांततरं अतिशयेनानुनिष्क्रांतं अनुगतं भवति एताः प्रादेशादिरूपमात्रापरिमाणानि नानि

खनेत्स्नातिक्रम्य खनेत् दक्षिणतो वर्षीयसीं उक्तां करोति पुरीषवतीं पुरीषाः परिशुद्धाः पांसवः तद्वतीं करोति प्राचीमुदी
चीं ऐशानीं दिशं वेद्याप्रवणां निम्नानिस्तिष्ठते करोति। कर्मीतएवरुक्लांतरे अध्वगतस्य यजमानस्य वेदेः स्वरूपतमं परिमाण
मवगतं यावति रुरुमृग उपविशेनावदवराध्यो ध्वगतो ःविहार इति। यावति प्रदेशे रुरुसंज्ञको मृग उपविशेच्छेत्तेतावन्नूनतस
रिमाणकं गार्हपत्याहवनीययो रंतराले अध्वनि संचारकाले गतःप्राप्तः कर्तव्यत्वेनावराध्यः अवरश्चासावर्धश्चावरार्धः स
मांशादर्थान्यूनः। अर्धमर्हती त्यवराध्यः विहारः। विहियंतेग्नयो स्मिन्निति व्युत्पत्त्या यज्ञदेशः अयमेवापदि अत्यंतन्यूनः अत
ऊनो न कार्यः। इत्थं यद्यपि अग्निना सह प्रवासे आपदि विहारदेशस्य स्वरूपं। परिमाणं विहितं न वेदेः यद्यपिवाचं विहार आधा
नांगं न दर्शपूर्णमासयोः श्रुत्वे आग्न्याधेयिके विहारे इत्यधिकृत्याम्नानात्तथाहि। अग्न्याधेयिके विहारे गार्हपत्याद्दाहवनी
यस्यायतनं विज्ञायते शस्क प्रक्रमेषु ब्राह्मणोग्निमादधीत्ते कादशसु राजन्यो द्वादशसु वैश्य इत्यायामतृतीयेन त्रीणि चतुर
श्राण्यनूचीनानि कारयेदपरस्योत्तरस्यां श्रोण्यां गार्हपत्यस्तस्यैव दक्षिणे सेन्वाहार्यपचनः पूर्वस्योत्तरे स आहवनीयो पिवा

सु०र० गार्हपत्याहवनीययोरंतरालं पंचधा षोढा वा संभुज्य षष्ठं सप्तमं वा भागमागंतुकमुपसमस्य समं त्रेधं विभज्य पूर्वस्मादंतात् द्वयोर्ल
१२० क्षणं करोति गार्हपत्याहवनीययोरंतो नियम्य लक्षणेन दक्षिणापायम्य लक्षणे शंकुं निहंति तद्दक्षिणाग्नेरायतनं भवत्यपि वा
प्रमाणं पंमैचेनवर्धयेत् सर्वसाधारणं अस्मिन् पक्षे एतेन दक्षिणाग्निना उत्करो विपर्यस्य व्याख्यातः दक्षिणतो गार्हपत्यस्य
यावति दूरे दक्षिणाग्निः आहवनीयस्य तावति उत्कर इति एवं च प्रथमपक्षे आहवनीयशंकुं आग्नेयीं स्रक्तिं कृत्वा आयाम
तनीयेनैकं चतुरस्रं कारयेत् तस्योत्तरस्यां श्रोण्यामुत्कर इति। आधानकल्पे दक्षिणतो विषुवत्यन्वाहार्यपचनस्यापि वाय
थाद्वो भागो प्राक् स्यात्तामेकः पश्चादित्युक्तयोरपि पक्षयोरत्र विकल्पो बोध्यः अत्रापि पर्यस्य एतेनोत्करो व्याख्यात इति न्या
यस्तकल्प एवेति वदंति अत्राग्नीनामायतनकल्पनमित्यं वदंति याज्ञिकाः। आखरस्यापरस्याग्नेर्विष्कंभः सप्तविंशतिः अं
गुल्यरत्नस्तदर्धेन कार्यं तत्परिमंडलं संसर्गयोस्तयोस्यं चानियम्योत्तरमुत्सृजेत्। अरत्निचतुरस्रस्तु पूर्वाग्नेराखरो भवेत्। १२०
यावती मानतोरज्जुस्तावानेवागमो भवेत्। आगमार्धे तु शंकुः स्यात्मध्ये तस्य निरंछनमिति। वैखानससूत्रे तु अस्छिलोमके

त्रिंशद्दक्षि विष्कंभश्चत्वारिंशति त्रा: पुनः स्था नाहृदकू तिलात्री साकार्यं तु मंडलं। पार्श्वबाहुस्त रेतस्य ततोन्यत्परिमंडलं ॥२
पा परि

शांगारतुषकाष्ठाश्मलोष्ठपिपीलिकादीन्वर्जयित्वामृदाशुद्धया पश्चिमेभूरिति गार्हपत्यस्यायतनंकरोतिरज्वाशदशांगुल
यात्तंभ्रामयित्वाअष्टांगुलोन्नतंस्थंडिलंकृत्वापरितश्चतुरंगुलविस्तारंहित्वामध्येषडंगुलंनिम्नंखनतित्रिरष्टंतदूर्ध्वामे
खलास्यात्तत्परितश्चतुरंगुलविस्तारोन्नतामधोमेखलांकरोतीतिगार्हपत्यायतनप्रकारउक्तः।तथास्यपरिसाहवनी
यायतनंचतुरस्रंचतुर्दिक्षुद्वाविंशत्यंगुलायतनमष्टांगुलोन्नतंस्थंडिलंप्रकल्प्यपूर्ववत्परितोहित्वामेखलामूर्ध्वांमध्य
निम्नामधोमेखलांचकरोतीत्याहवनीयायतनप्रकारउक्तः तथावेद्यादक्षिणस्यापश्चिमेभागेभुवइत्यन्वाहार्यपचनंपंच
विंशत्यंगुलारत्नंभ्रामयित्वादक्षिणार्थेअर्धचंद्राकारंपूर्ववत्परितोहित्वामेखलामूर्ध्वांमध्यनिम्नामधोमेखलांचकरोतीतिअ
न्वाहार्यपचनायतनप्रकारउक्तः एतच्चसर्वंआधानमधिकृत्याधानप्रकरणेचोक्तमित्याधानांगंविहार इति तथापियानति
रुह्यमगउपविशेत्तावदध्वगतोविहारइत्यस्यसूत्रस्यदर्शपूर्णमासप्रकरणस्थात् अध्वन्याधानानुपपत्तेः आधानस्यच
संभृतदेशविशेषमधित्तस्याग्नेर्निधानरूपतयानस्यचसंगस्यकरिष्यमाणसर्वयज्ञार्थं तयादीयस्यविहारस्यापिसर्वा
त

सु०द०
१२१

र्थत्वेनदर्शपूर्णमासार्थत्वात् विहारस्यस्वल्पेपरिमाणेसतिवेदेस्ततोप्यल्पपरिमाणस्यार्थसिद्धत्वाच्चवेदिकरणंनसरेयु
क्तमितिध्येयं। अथाग्नीध्रमाहाग्नीदित्त्रिर्हरेतीति। आग्नीध्रंहेअग्नीत् इतोवेदेःपांसून्त्रिःत्रिवारंहरेतिप्रेषार्थः। आ
ग्नीध्रःप्रेषार्थमनुतिष्ठेत्। दक्षिणेनपाणिनासाधनांतराश्रवणात्। अत्रवेदिकरणंयद्यपिपौर्णमास्यमावास्यासाधारण्ये
नोक्तंतथाप्यत्रपौर्णमास्यांपूर्वेद्युरमावास्यायामितिनियमोयुक्तः अत्रपौर्णमास्यांवेदिंकरोतिपूर्वेद्युरमावास्यायामिति
सत्याषाढवचनात्। नतत्स्त्रिराग्निध्रोहरति। यदाग्नीध्रस्त्रिर्हरत्यथसंप्रेषमाहब्रह्मन्नुत्तरंपरिग्राहंपरिग्राहंपरिग्रहीष्या
मीति। अग्नीदित्त्रिर्हरेत्युक्तपांसुहरणात्। पूर्वमपिब्रह्मन्नुत्तरंपरिग्राहमित्यस्यवक्तुंशक्यत्वात्तत्त्रिरस्यर्थंय
दाग्नीध्रस्त्रिर्हरेत्युक्तंब्रह्मन्नुत्तरंपरिग्राहंपरिग्रहीष्यामितत्रप्रसुवेतितदर्थः। अतएवाहोत्तरत्रप्रसूतइतितथाचार्य
संप्रेषइतिभावः। प्रसूतउत्तरंपरिग्राहंपरिगृह्णात्यृतमसीतिदक्षिणतऋतसदनमसीतिपश्चाद्धृतश्रीरसीत्युत्तरतइति १२१
प्रसूतःॐपरिगृहाणेत्यनुज्ञातःवेदिकरणादुत्तरोयःपरिग्राहःकृतायावेदेर्यज्ञउपयोगायस्वीकारःतंपरिगृह्णाति

करोतिस्फ्येनरेखांऋतमसीतिदक्षिणतःप्रागपवर्गंऋतसदनमसीतिपश्चादुदगपवर्गंऋतश्रीरसीत्युत्तरतःप्रागपवर्गमिति।अ
थप्रतीचींस्फ्येनवेदिंयोयुप्यन्तेधाअसिस्वधाअस्युर्वीचासिवस्वीचासिपुराक्रूरस्यविसर्पोविरप्सिन्नुदादायपृथिवींजीरदानुया
मैरयंचंद्रमसिस्वधाभिस्तांधीरासोअनुदृश्ययजंतइतीतिवेदिंप्रतीचींप्रागारभ्यप्रसगपरता यथाभवति तादृशीं योयुप्यन्ते
स्फ्येनसमीकरोतिधाअसीति।अत्रद्वैधं।योयुप्यन्तइतिसूत्रंबोधायनस्यचतुर्थेनयोयुपित्वापंचमेनोद्धृहीयादितिशालीकिरि
ति।सूत्रंयोयुप्यन्तेधाअसीत्यादिकल्पसूत्रंबोधायनस्यमतंशालीकिस्त्वाहचतुर्थेनधाअसिस्वधाअस्युर्वीचासीतियजुर्मंत्र
त्रययुक्तेनवस्वीचासीतिचतुर्थेनयोयुपित्वापंचमेनपुराक्रूरस्येत्युद्रूपेणउत्तरगृह्णीयात्।अथांतर्वेदितिर्यंचंस्फ्यंस्तब्ध्वेतिसू
त्रविहितंस्फ्यस्यतिर्यक्स्तंभनंकर्तुयतूस्फ्यस्योद्यमनंतत्कुर्यात्पुराक्रूरस्येत्यादिरेकोमंत्रः।तथाचसत्याषाढः।पुराक्रूरस्ये
त्यभिमंत्रेतिवैखानससूत्रमपिपुराक्रूरस्येत्यभिमंत्र्येति।अथांतर्वेदितिर्यंचंस्फ्यंस्तब्ध्वासंप्रैषमाहप्रोक्षणीरासादयेध्माब
र्हिरुपसादयस्रुवंचस्रुचश्चसंमृड्ढिपत्नींसंनह्याज्येनोदेहीति।अत्रांतर्वेदीतिसामान्यतउक्तंयद्यपितथापिवेदेर्वित्तती

सु०द० यदेशोपश्चिमार्धे कार्यपश्चार्धे वेदेर्विन्नतीयदेशोस्फ्यं तिर्यंचं स्फ्यंस्तब्ध्वेति कस्मांनरात्तिर्यचंदक्षिणाग्रंवज्रेणेवयज्ञस्यद
१२२ क्षिणतो रक्षांऽस्यपहंती तिश्रुतेः दक्षिणाग्रत्वेर्नहवेदेर्दक्षिणंदिश्यवस्थितानिरक्षांस्यंपहतानिभवंतीतिस्तुतिरुपपद्यंतेइति
स्तब्ध्वास्फ्यस्यवर्मस्तादयतीतिवचनात् अंतर्वेदितिरश्चीरेखामालिख्यमध्येतिर्यचंस्फ्यंधारयन् संप्रेषमाह प्रेषः प्रेषार्थ
श्चाध्वर्योरेव यथात्तक्षास्तूत्रं पातयित्वातक्षत्ति तथा संप्रेषणमानुपूर्वस्मरणेनमनः समाधानार्थं अनुपूर्वतायाइतिवचनात्
आध्वर्यवेसमाम्नानाच्चेतिकेचित् न आत्मनिप्रैषस्यानर्थक्यात् आसादयेत्यादिमध्यमपुरुषानुपपत्तेश्च अनुपूर्वतायाइति
वचनमाध्वर्यवसमाख्यातंचान्यत्रेवाग्नीध्रेष्वुपपन्नंअध्वर्युरवेक्षतइत्यध्वर्युग्रहणं ज्ञापयतिततःप्राचःपदार्थाअन्येनकर्त
व्या इतितस्मादाग्नीध्रः कुर्यात् भारद्वाजस्त्वाह आग्नीध्र एतानिकर्माणिकुर्यादिति एकमध्वर्युरित्यपरमितिप्रोक्षणीध्माह
रणेतुबहुवचनादाग्नीध्रः। परिकर्मिणामन्यतमोवाकुर्यात् उपसादयंतीतिबहुवचनस्यकर्तृनियमार्थत्वात् द्विबहुपत्नीक
स्ययजमानस्यसर्वासुपत्नीषु धर्मप्रजारूपप्रयोजनसाम्यात् पत्नीप्रातिपतिपदिकार्थस्यसर्वत्रसाम्येनपत्नीं सन्नह्येति १२२

शास्त्रस्य प्रयत्ने उद्देश्यगतत्वेन एकत्वस्याविवक्षितत्वात् पत्नीसामान्याभिप्रायत्वेप्येकवचनस्योपपत्तेः। सर्वासां पत्नीनां स
न्नहनं कार्यं पत्नीः सन्नह्याज्येनेतित्तु नोहः प्रकृतित्वात् संस्थाया अविवक्षितत्वाच्चेति ध्येयं आहरंत्वेताः प्रोक्षणीरभिपूर्य
दक्षिणेनाध्वर्युं ताः स्फ्य उपनिनीय स्फ्यस्य वर्त्मन् सादयन्तीति। आहरंति आसादयंति आहरणं निक्षेपणे च वर्तत इति हि भाष्यं
एताः प्रोक्षणीरासादयेति संप्रेषोक्ताः प्रोक्षणीरासादनप्रकारमेव दर्शयति ताः पूर्वमन्त्रेण गार्हपत्यं निहिता अति शेषः
प्रोक्षणीरभिपूर्य अन्याभिरद्भिः पूरयित्वा वर्त्मनीरासाद्या इति वचनात् अध्वर्युं दक्षिणेनानायस्फ्य उपनिनीय स्फ्यस्य वर्त्मसा
दयन्ति आसादयन्ति आग्नीध्रएतानि कुर्यात् प्रोक्षणीरासादयेति प्रेषे प्रोक्षणीरासादयन्तीति त्वद्विधौ वर्त्मनीरासाद्या इति वा
दुल्यविधौ स्फ्यस्य वर्त्मसादयन्तीति देशविधौ च श्रुतस्यासादनपदार्थस्य एकतया तत्र च मध्यमपुरुषेणाध्वर्योरन्यस्य क
र्तृत्वावसायात् आसादनप्रकारस्यैवानेन सूत्रेणोपदेशादिति केचित्तु आग्नीध्रेणानीयासादित्वा स्वयमध्वर्युर्गृहीत्वा स्फ्येनि
नीय स्फ्यस्य वर्त्मसादयेदिति वदंति। अस्मिन्पक्षे एता इति पूर्वनिहितप्रोक्षणीपरामर्शार्थं अपूर्वामाविज्ञापयिषतेति

सु॰द दक्षिणेनाध्वर्युमित्यंतं आग्नीध्रकर्तृकं एकं वाक्यं आहरंति आहृत्य निक्षिपंतीत्यर्थः ॥ ताः स्फ्य इत्यादिकमेकं वाक्यमध्वर्युकर्तृक
१२३ मेकं वाक्यमिति द्रष्टव्यं । अत्र द्वैधं । प्रोक्षणीनामासादन इति स्फ्यस्य वर्त्मन्युपनिनीयासादयेदिति बोधायनेनुपनिनीयैवेति शा
लीकिरिति । स्फ्यस्य वर्त्म निस्थाने निनीय तत्रसादयेदिति बोधायनमतं । अत्र मते स्फ्येन रेखा न कार्या वर्त्मनीति हि स्फ्यस्य स्थान इ
त्युच्यते न रेखायामिति शालीकिस्त्वाह स्फ्यस्य परिवा स्फ्यस्य स्थाने वानुपनीये स्फ्यस्य स्थाने आसादयेत् स्फ्यस्य वर्त्मं त्सादयन्ति
निवचनेन हि तत्रासदनमेवोक्तं न निनयनमिति । अथोत्करे स्फ्यं निहंति यो माहृदा मनसा यश्च वाचा यो ब्राह्मणा कर्मणा द्वेष्टि
देवाः । यः श्रुतेन हृदयेन क्ष्मना च तस्येंद्र वज्रेण शिरश्छिनद्मीति नो उत्करे स्फ्यं निहंति उदरस्यस्य ध्वर्युः । न स्वयं संप्रेषविषयः ये
नाग्नीध्रः कुर्यात् स्फ्योदसदनकाले द्विषध्यानं कर्तव्यं स्फ्यमुदस्यन् यं द्विष्यात्तं ध्यायेज्जुहुचैवैनमर्पयन्तीति ब्राह्मण उक्तत्वा
त् पंचलिंगाच्च पंचतयेन करत्यमवेक्षेतनच्छंदसा ब्राह्मणेनेत्युक्तेरिति । अत्राहापस्तंबः । पुरस्तात्प्रत्यंच मुत्करे स्फ्यमुदस्यति १२३
द्वेष्यं मनसा ध्यायन्नानवर्तिज्यहस्तो पात्राणि पराहंतीति हस्तो प्रक्षाल्य स्फ्यं च प्रक्षालयन्तीति । स्पष्टं । अत्र वापस्तंबः । स्फ्यं प्रक्षाल

यस्याग्रमप्रतिमग्ना न्निति उपसादयंत्येत दिध्माबर्हिर्दक्षिण मि ध्ममुत्तरं बर्हिरिति। एतत्पूर्वस्मिन्नद्धमि ध्मा बर्हिः उपसादयंति प्रणीता
भ्य उत्तरतः समीपे सादयंति अत्र बहुवचनं कर्तृनियमार्थं स्पष्टमन्यत्। अत्र इध्मादव्यवहिते उत्तरदेशे बर्हिष आसादनमवगंतव्यं
स्य चाहरंत्येतद्बर्हिरंतरेण प्रणीताश्चाहवनीयं चेति सूत्रपर्यालोचनया प्रणीताभ्य उत्तरत आसादनमवगम्यत इति इध्म
स्यापि प्रणीताभ्य उत्तरत्रासादनं बोध्यं समान्येतानि कुर्यात्प्रणीता आहवनीयं च प्राणमिध्माबर्हिरिति यज्ञस्य शिर इत्येतदाच
क्षत इति अपां प्रणयने कर्मांत उक्तमवगंतव्यं। अत्रेदं ध्येयं। इध्माबर्हिषोरुपसादनइतिसूत्रं बोधायनस्योतरमिति शालीकि
रिति। सूत्रं कस्य सूत्रं बर्हिषउत्तरइध्ममासादयेदिति शालीकिः। अत्रशाखांतरमूलं। बोधायनकृतस्यासौ इति सूत्रस्यतत्रमु
नवमः। पटलोऽयं तः प्रीयतां मे सदाशिवः॥ खंडाः॥ १७॥ अथैताः स्रुचः समादत्ते दक्षिणेन स्रुचं जुहूपभृतौ सव्येन ध्रुवां प्राशित्र
हरणं वेदपरिवासनानीति। एताः या आधानप्रभृति धार्यंते एताः संनिहिताः स्रुचः समादत्ते अत्र स्रुक्शब्दस्य च्छविन्यायेन स्रुक्
स्रुवादिषु लक्षणा बोध्या। दक्षिणेन हस्तेन स्रुवं जुहूपभृतौ सव्येन ध्रुवां प्राशित्रहरणं वेदपरिवासनानि वेदाग्रा णिताः समादत्ते

सु०द०

त
१२९ त्त

इदमाग्नीध्रकर्तृकं उत्तरस्यानष्टपानादेः समंत्रकत्वात् समंत्रककर्मणश्च त्विक्कर्तृनियमात् आदानस्य च तत्समानकर्तृकत्वा
त् प्रोक्षण्यासादनेध्माबर्हिरासादनवदनियतकर्तृकत्वाद्यस्यर्थत्वात् आदत्त इत्यंतस्य सूत्रस्य अन्यथा दक्षिणेन स्रुवमित्या
दिनैव सामंजस्यादिति। गार्हपत्ये प्रतितपति प्रत्युष्टं रक्षः प्रत्युष्टा अरातयोग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामीति। गार्हपत्य
इति नियमार्थं तस्मादेतान्यत्राचैव प्रहरेत्। यत्तस्मिंसमृज्यादिति ब्राह्मणे सामान्यतोवगतस्य विशेषरूपसमर्पणेनेदं सर्वं
तव्यं। स्पष्टमन्यत्। अथ स्रुवं संमार्ष्टि गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहं संमार्ज्मीति निरंतरतस्त्रिर्बाह्यतस्त्रिरेवमू
लेदंडमिति। स्रुवमग्र इति श्रुतेः प्रथमं स्रुवं संमार्ष्टि गोष्ठं मा निर्मृक्षमिति मंत्रेण मंत्रः सकृत् वीप्साविरहात् संमार्जनस्य
प्रकारमाह त्रिरंतरतः अंतरतः बिलभागे त्रिः त्रिवारं संमृज्यात्। प्राचीमभ्याकारमग्रेरंतरत इति श्रुतेः अंतरतोग्रे प्राग
पवर्गः संमार्गः बाह्यतः बिलात्। बहिर्भागे त्रिः त्रिवारं अधस्तात्प्रतीचीमिति श्रुत्या सामान्यतो बिलदंडयोरधस्तात्संमार्ग १२९
स्य प्रत्यपवर्गत्व विधानात् अग्रत एवोपरिष्टात्संमृज्यादिति दंडउपरिभागे अग्रे संमार्जनविधानात् बिलस्याधस्तादग्रे:

प्रत्सगपवर्गः संमार्गः। दंडमूलैस्त्रिरेव त्रिवारमेव मूलतोधस्तादितिश्रुत्या अधस्तादितिदंडभागमुद्दिश्य मूलविधानात् अधस्तात्प्र
तीचीं दंडमुत्तमनइत्यत्रमूलेनमूलं प्रतिष्ठितस्याइतिवाक्यशेषेणउत्तमशब्दस्यमूलार्थकत्वनिश्चयाच्चदंडमूलैरधःप्रागारभ्यउपरि
प्रागपवर्गः संमार्गः तस्मादग्रैर्प्रांचमुपरिष्टाल्लोमानिं। प्रत्यंचमधस्तात्स्रुक्षु इतिवाक्यशेषे अग्रैर्स्तुल्कमारोप्यतंत्रलोम्ना
मधस्तात्प्रत्सगपवर्ग। लोपवर्णनस्यउपरिष्टात्प्रागपवर्गलोपवर्णनस्यवस्रुक्शब्दार्थत्वेन विवक्षितेषुस्रुवादिषुदंडभागेसंमा
र्गस्याधस्तात्प्रत्सगपवर्गस्यउपरिष्टात्प्रागपवर्गत्वस्यच विधानेतात्पर्यादिति। संमृज्याद्भिः सं ॅश्यप्रतितप्योत्प्रयच्छतीति ५९
संमार्गानंतरंस्रुवमद्भिः संस्पृश्यस्पर्शयित्वा गार्हपत्येप्रतितप्यअन्यहस्तउत्प्रयच्छतिउच्चैर्ददाति। अथजुहूं संमार्ष्टि वाचंप्रा
णंमा निर्मृक्षंवाजिनीत्वासपत्नसाही९ संमाज्र्मीति तथैव संमृज्याद्भिः संस्पृश्यप्रतितप्योत्प्रयच्छसथोपभृतंसंमार्ष्टि चक्षुः
श्रोत्रंमानिर्मृक्षंवाजिनीत्वासपत्नसाही९ संमाज्र्मीति तथैवसंमृज्याद्भिः संस्पृश्य प्रतितप्योत्प्रयच्छसथध्रुवा९ संमार्ष्टि प्र
जांयोनिंमानिर्मृक्षंवाजिनीत्वासपत्नसाही९ संमाज्र्मीति तथैवसंमृज्याद्भिः संस्पृश्यप्रतितप्योत्प्रयच्छतीति। अत्रमंत्रसमाम्ना

सु॰ द॰ येद्वितीयतृतीयमंत्रौ वाचंप्राणंचक्षुःश्रोत्रमित्येतावंतोसमाम्नातोमा निर्मृक्षमित्यादिस्तु अनुषंगोवाक्यसमाप्तिरितिन्यायेन
१२५ चतुर्थमंत्रास्वनुषंगेन पठितंसूत्रकारैरित्यवगंतव्यं प्राशित्रहरणस्यतु शाखांतरीयोमंत्रः क्रमोपि अथ जुहूं अथोपभृतं अथ
ध्रुवामितिश्रुसंगतः क्रमः आदृतः स्पष्टोक्षरार्थः । अत्र द्वैधं । वेदपरिवासनेषितिपंचधा विभज्य स्रुचः संमृज्यादिति बोधायनः स
मस्तैरेवाद्भिरभ्यवकारमितिशालीकिरिति । वेदपरिवासनेन संमार्जनार्थत्तयागृहीतानि समंस्याद्रुक्षुंतत्वादितिन्यायेनसमशः
पंचधाविभज्यस्रुचः स्रुवजुहूपभृत् । ध्रुवाप्राशित्रहरणानिसंमृज्यात् । अयातयामत्वायवेदस्याग्रंस्रुक्संमार्जनानीतिश्रुतौवे
दस्याग्रमिति परामर्शोविभक्तानामप्युपपद्यत इति बोधायनः । शालीकिस्त्वाह समस्तैरेव अविभज्यैवसर्वैर्वेदपरिवासैः अ
द्भिर्जलेन अभ्यवकारं अभ्यवकीर्य संमृज्यात् अयातयामत्वंच वचनात् भवति वेदस्याग्रमितितु समुदाये मुख्यो नावयवेष्विं
ति । अत्र द्वैधं । प्राशित्रहरणस्य संमार्जन इति सूत्रं बोधायनस्य तु स्मी संमृज्यादिति शालीकिर्न संमृज्यादित्यापमन्यव इति । सू
त्रं अथ प्राशित्रहरणं संमा ३ इत्यादि कल्पसूत्रे प्राशित्रहरणस्य शाखांतरीयेण मंत्रेण संमार्जनं कार्यं स्रुवादीनामिव ए १२५

तस्यापिशाखांतरीयमंत्रसंबंधानुइत्ति बोधायनस्य मतं। तूष्णींमंत्रं विनास्वशाखायामनाम्नानात् मंत्रस्यस्रुचःसंमार्ष्टीति विहितं
संस्कारमात्रंकर्तव्यमितिशालीकि औपमन्यवस्त्वाहनसंमृजेदिति कुतःस्रुवःसंमार्ष्टीतिहोमार्थानामेवसंस्कारविधेः मंत्रस्यचशा
खायामनाम्नानादिति। अथैतानिस्रुक्संमार्जनान्यद्भिःसंस्पृश्यगार्हपत्येनुप्रहरति॥खंडः॥१९॥ दिवःशिल्पमवतत्तंपृथिव्याः
ककुभिःश्रितं। तेनवयंसहस्रवल्शेनसपत्नंनाशयामसिस्वाहेति। स्रुवःसंमृज्यंते वैस्तान्येतानिस्रुक्संमार्जनानिगार्हपत्येनुप्रह
रेत्। तस्मादेतान्यग्नावेवप्रहरेदितिश्रुतेः दिवःशिल्पमितिमंत्रेणानत्रेहैधं। स्रुक्संमार्जनानामनुप्रहरणइतिसूत्रंशालीकेरत्रो
हस्माह बोधायनोद्भिरभ्युक्ष्यासंचरउदस्येदुत्करेचैवमिध्मसंनहनानीति। सूत्रेअद्भिःसंस्पृश्यगार्हपत्यइत्यादिकल्पसूत्रंशा
लीकेर्मतंतस्मादग्नावेवप्रहरेदितिवचनादीत्युक्तंबोधायनस्त्वाहस्रुक्संमार्जनान्यद्भिरभ्युक्ष्यन विद्यतेसंचारःपशूनांयत्रत
स्मिन्नसंचरेदेशेउदस्येत् निरस्येत् तान्येकेरथैवापास्यंतीतिश्रुतेः। नचात्रानिदपाऽसंग्रास्यलंनहिनिंदान्यायात् इतिउत्करेवा
द्भिरभ्युक्ष्योदस्येत् अद्भिर्मार्जयित्वोत्करेन्यस्येदितिवचनादितिइध्मसंनहना निइध्मसंनहनशुल्बतृणान्यपिएवंएभिः

सु०८० क्लृप्तैः प्रतिपादयेत्तेन ब्राह्मणेस्वस्थानमपहाय स्रुक् संमार्जनानुप्रहरणविधानस्य स्रुक् संमार्जनवदग्नावनुप्रहरणं चापस्तंनाम
१२६ संचरदेशो अद्भिरभ्युक्ष्योदसनं वा उत्करे द्भिरभ्युक्ष्योदसनं वेति प्रतिपत्तेः प्रकारत्रय समन्वयार्थत्वात्। अग्नावनुप्रहरणमाह
वनीये। यत्तरस्मिंसंमृज्यादिति वचनात्तद् इत्तरोत्तु पूर्ववदेवेत्ति। अथाग्रेणोत्करं तृणानि संस्तीर्य तेषु स्रुचः सादयित्वेत्ति। उत्क
रमग्रेण उत्करस्य पूर्वभागे तृणानि परिभोजनीयेभ्यो दर्भां संस्तीर्य तेषु स्रुचः सादयेत्। अथैतां पत्नीं मंत्तरेण वेदिस्रुत्करौ प्रपा
द्य जघनेन दक्षिणेन गार्हपत्यमुदीचीमुपवेश्य योक्त्रेणासन्नस्थलाशासना सौमनसं प्रजा ॐ सौभाग्यं तनूं। अग्नेरनुव्रता भू
त्वा संनह्ये सुकृताय कमितीत्ति। एतामितिसंनिहितार्थेन सर्वनाम्ना परामर्शादितः पूर्वमेव पत्न्याः पूर्वदेशो वस्थानमवगम्य
ते पत्नी क्रियमाणस्य यज्ञस्य पतिं स्त्रियं पत्युर्नो यज्ञसंयोग इति व्याकरणेन स्त्रियां वर्तमानस्य पतिशब्दस्य यज्ञसंबंधे ग
म्यनकारादेशेऽन्नेभ्यो ङी विति ङी पि च कृते पत्नीशब्दसिद्धिः एवं च पत्न्या अपि यज्ञफलभोक्तृतया सहैव यष्टव्यमित्यु १२६
क्तं भवति अंतरेण स्रुत्करौ वेदिस्रुत्करयोर्मध्यदेशेन धर्मप्रश्ने कृत्विक् यजमानपत्नीनामंतरेण चात्वालोत्करौ यज्ञस्य तीर्थम

चात्वालआहवनीयोत्करौकर्त्तारोयजमानःपत्नीचप्रतिपद्येरन्निति तिनीर्थेनप्रपदनंसमाम्नातंतच्चउत्पन्नेतीर्थेयेप्रपत्स्यंतेतेषाम
यंनियमस्तीर्थेनैवप्रपद्येरन्निति नह्यत्रचात्वालाहवनीयोत्करशब्दानांदेशविशेषेलक्षणा।आधानेनुत्पन्नेतीर्थेअध्वर्युप्रप
दनेवेस्युत्करावुद्देशेनप्रपद्येतिनियमवचनात्तस्मादनुत्पन्नेतीर्थेअनियमःअतएवसोमेदीक्षायांपत्न्यान्नदेशेनप्रपदननिय
मःआधानेध्वर्योरिववचनाभावात्तस्माडुत्पन्नेतीर्थेप्रपदनेसर्वेषांतीर्थेनैवइतिनियमोनुत्पन्नेत्वनियमइतिइमंनियमंस्त्रवयि
तुधर्मेसमाम्नातस्यापिपुनराम्नानमितिअपरेतुचात्वालाहवनीयोत्करशब्दानांदेशविशेषेलक्षणेवतथाचउत्पन्नेनुत्पन्ने
वातीर्थेयेप्रपत्स्यंतेतेषांसर्वेषामपिनियमश्चात्वालाहवनीयदेशंउत्करदेशंचांतरायपद्येरन्निति आधानेचाध्वर्योवेस्युत्क
रावुद्देशेनप्रपद्येतिचवचनंलिंगमेतस्यनियम॰॰स्येत्याकुःअत्रयद्यपिअंतरेणाहवनीयोत्करावितिनोक्तंतथाप्यस्यानुवा
दतयापुरोवादनुसारेणवेदिशब्दस्याहवनीयेलक्षणाअथवावेद्याहवनीययोरन्यतरग्रहणेनुष्ठानेविशेषाभावादिमुक्त
जघनेनदक्षिणेनगार्हपत्यंजघनेनदक्षिणेनेतिशब्दद्वयेनदक्षिणाप्रत्यच्योरंतरालमुच्यतेउदीचीउदङ्मुखीअनेनवेदक

सु०द० र्माणि प्रयोजयेत् प्राङ्मुखइत्युक्तं प्राङ्मुखत्वमपोदितं ब्राह्मणे यत्पश्चात् प्राच्यन्वासीत् । अनयासमदं दधीत् । देवानांपत्नी
१२७ या समदं दधीत । देशाद्दक्षिणत उदीच्यन्वास्ते । आत्मने गोपीथायेति पत्न्या उदङ्मुखत्वविधानात् अयं प्राङ्मुखत्वापवादः
:पत्न्यां इहैव न तथा च पंचचोडा स्वन्दितं तस्मात्पश्चात् । प्राची पत्न्यन्वास्त इति अनुवादस्य प्रयोजनमन्यत्र प्राङ्मुख्युप
विशन्तीति उपवेश्य विशीर्णत्वात् । त्कायां त्स्यउपवेशं कारयित्वा ऊर्ध्वज्ञुमुपवेशयेत् अपरेणगार्हपत्यमुर्ध्वज्ञुमासीनां पत्नीं
संनह्यतीति छंतीं वा वाचयतीत्येक इति कल्पांतराद्धिरोधाभावात् योक्त्रेण योजयतीति योक्त्रं दामतच्छान्यतरतः पाशंमुं
जमयं त्रिरत्वकार्यमौंजेन दाम्नान्यतरतः पाशेन योक्त्रेण वेत्यापस्तंबे सूत्रे योक्त्रं अनोवाहबंधनरज्जुरिति व्याख्यातारः
अत्र कात्यायनः पत्नीं संनह्यति प्रसकृद्दक्षिणत उपविष्टां गार्हपत्यस्य मुंजैयोक्त्रेण त्रिरत्वेति संनह्यति सन्नाहयति अंतर्भा
वितण्यर्थोयं परस्त्रीसंस्पर्शनस्य प्रतिषिद्धत्वात् केचित्तु मुख्याभावे लक्षणान्याय्या संभवति वात्र मुख्योर्थः न वात्र परस्त्री १२७
स्पर्शनमात्रेण सत्यपि वचने दोषः उद्दिष्टवत् गुरुत्वाच्च । उक्तं हि कर्मान्ते कोनुखलु कृत्स्नेषु धर्म इत्तियआचार्य इति । अत्रैहे

वचनात् आपस्तंबे

धं। पत्नीनां संनहनमिति इहस्माह बोधायन एकैकामेवासां सन्नह्येदेकैकां गार्हपत्यमीक्षयेदेकैकामाज्यमवेक्षयेत् अत्रोहस्माह
शालीकिः सकृदेवैताः सर्वाः सन्नह्येदेकैकां गार्हपत्यमीक्षयेदेकैकामाज्यमवेक्षयेदित्यत्रोहस्माहौपमन्यवः सकृदेवैनाः स
र्वाः सन्नह्येत् सकृत् गार्हपत्यमीक्षयेदेकैकामाज्यमवेक्षयेदित्येकैकामेवासां सर्वेण सर्वेण कर्मणा परिनिस्तिष्ठेदित्यौपम
न्यवीपुत्र इति द्विबहुपत्नीकस्य यागे सर्वासां पत्नीनां सन्नहनाद्यवश्यं कार्यमित्यवगम्यते बहुवचनस्वारस्यात् सर्वासांप
त्नीशब्दार्थत्वाविशेषात् युक्तं चैतत् तथा अर्धो वा एतस्य यज्ञस्य मीयते यज्ञस्य रसेहन् पत्न्यनालंभुका भवतीति ब्राह्मणेन पत्न्याः
सन्नहनपूर्वकव्रतग्रहणयुक्ते कर्मणि मलवद्वासस्त्वादिना नालंभुकात्वे सति सन्नहनाद्यभावे प्रवृत्तस्य यज्ञस्यार्धहिंसाप्रति
पादनात् तामपरुध्य यजेतेत्यादिना तत्र प्रायश्चित्तविधानाच्चेति पत्नीनां संनहनविषये बोधायन आह आसां पत्नीनां म
ध्ये एकैकामेव सन्नह्यतीति तत एकैकामेव गार्हपत्यमीक्षयेत् तत एकैकामेवाज्यमप्यवेक्षयेत् आग्नीध्रः खलु सन्नह्यति
न सन्नाह पतिलक्षणाया अयुक्तत्वादित्युक्तं एकेन च बहूनां संनहनं युगपत्कर्तुमशक्यमित्येकैकस्याः सन्नहनादरः। त

सु०द० स्वारूप्यापद्यतरयोरप्येकैकामिस्कन्त अस्मिन्पक्षेपिस्वयमेवपत्नीमंत्रंब्रूते आशासानासन्नह्यइति मंत्रलिंगाद्दर्सं पदार्थानु
१२९ समयश्चयथोक्तानांत्रयाणांपदार्थानांभेदादितिशालीकिस्त्वाहसकृदेवसर्वाएताःपत्नीसन्नह्येत्मंत्रेहिसन्नह्यइतिपत्न्यासन्न
हनेकर्तृत्वंगम्यतेपत्नीसंन्नह्येतिप्रैषेत्वाग्नीध्रस्यअतोग्नीध्रःप्रयोजककर्तृत्वंलक्षणापिनदुष्यतिप्रामाणिकत्वात्साक्षा
त्कर्तृत्वंतुपत्न्याएवएवंचबर्हीनांसन्नहनंयुगपदेवाग्नीध्रःप्रेरयेत्सन्नह्येयुश्चसर्वाःपत्न्यइतिततोभेदेनगार्हपत्यमा
ज्यंवावेक्षयेत्इदंद्वयमपियद्यपियुगपदेवकर्तुंशक्यंतथापिशाखाविशेषेइत्थंविभागमस्तीत्यवगंतव्यंएवमुत्तरस्मिन्नपि
औपमन्यवस्येक्षणंतुप्रत्येकमेवकारयेदितिऔपमन्यवीपुत्रस्त्वाहएकैकांसर्वेणसर्वेणकर्मणासन्नहनगार्हपत्यावेक्ष
णमाज्याचेक्षणरूपत्रितयेनापिकुर्यात्एकस्याःसंस्कारसमाप्तोनह्यन्यस्याःसंस्काराारंभोयुक्तइतिअत्रमतत्त्वचतुष्ट्येपिआ
चमनादिनोक्तंतस्यसंन्नहनानंतरंकल्पेपाठात्परस्परसंबंधत्वात्सिद्धमेवानुष्ठानमितिअपरेतुआचमनसमिधोदानादि १२९
नास्त्येवेतन्मतचतुष्टयेपिकुतःसन्नहनमंत्रेणहिप्रनंप्रासंतथाचब्राह्मणंअग्नेरनुव्रतभूत्वासन्नह्येसुकृतायकमित्याह
औपमन्यवस्यपक्षेसन्नहनंगार्हपत्यावेक्षणंचयुगपदेवकारयेत्प्रयोगप्राशुभावायआज्यावेक्षणंविशेषइतिविधा
नमस्तीत्यवगंतव्यंएवमुत्तरस्मिन्नपि २

एतद्धेपत्न्यैयेव्रतोपनयनं। तेनैवैनांव्रतमुपनयतीतिवदंती तिपत्नीसनहन एवयोक्त्रस्यग्रंथिकरणे द्वैधं। ग्रंथिकरणइत्यवाचीनपा
शमूर्ध्वनिर्मोचनमित्याचार्ययोरूर्ध्वपाशमवाचीननिर्मोचनमितिदीर्घवात्स्यएवमिवहिप्रजाः प्रजायंतइतीति। सनहन
एवयोक्त्रस्यग्रंथिकरणेइदमुच्यते अवाचीनः अवागतः पाशोयस्मिंस्तदवाचीनं पाशंऊर्ध्वपाशादुपरिगतं निर्मोचनं ग्रंथितम
ग्रंयस्मिंस्तदूर्ध्वनिर्मोचनंउभयमपिक्रियाविशेषणंइत्थंग्रंथिंकुर्यादित्याचार्ययोर्मतं अथवाऊर्ध्वनिर्मोचनादुपरिपाशोय
स्मिंनवाचीनं अर्वाङ्निर्मोचनं निर्ग्रंथितमग्रंयस्मिन्पूर्ववदेवक्रियाविशेषणंइत्थमेवहिग्रंथिकरणमुपपन्नंहियतःकारणा
त्। लोके जायमानाः प्रजाएवमिवअवाङ्मुखाएवप्रजायंतइतिदीर्घवात्स्यइति। पत्नीसनहनएवपत्न्यामविद्यमानायां द्वैधं। प
त्न्यामविद्यमानइतिसह माह बोधायनोयजमानायतनआसीनोयजमानएवैतान्मंत्रान्निगदेदित्यत्रोह स्माह शालीकिः पत्नी
संयोजकाः खल्वेतेमंत्राद्दशाभवंतितस्यामविद्यमानायांनैवाद्रियेतेति। अत्रपत्न्यामविद्यमानायांनश्यामितिनार्थःमृता
यांपत्न्यामेकस्यानधिकारात्। अग्नीनांपित्रमेधेन कर्मणाप्रतिपाद्यत्वेनपत्नीसंस्कारार्थमवश्यदातव्यत्वात्। पत्न्यैपूर्वमारि

सु०द० ण्येदत्वाग्नी नित्यग्नीनांनार्थस्मरणात्।अग्नीहोत्रदर्शपूर्णमासादेीयावज्जीववचनस्य जायापति अग्निमादधीयाता मितिवचनेन
१२९ समेनाधिकारादितितस्मात्पत्न्या मविद्यमानायामिति तुप्रायश्चित्तसूत्रोक्तानालंभुकाविषयइतियुक्तंतत्रहियस्यव्रत्येहन्
पत्न्यानालंभुकाभवतितामपरुध्य यजेतेति तामपरुध्येव यजेत्सर्वेणैवयज्ञेनयजेतनामिष्ट्वोपह्वयेतामूहमस्मीत्वतुकालप
गमनमंत्रोग्न्याधानप्रभृत्यपरुध्येवयजेत्तथैकाहानामपिअथयदिदीक्षोपसत्सुतथाहगेणिषन्येषहः सुचेतिअनालंभुक
विषयेप्रायश्चित्तमाम्नातं।अयमर्थः।यस्ययजमानस्यव्रत्येहन्व्रतशब्दःकर्मवाचीयथाशिक्षतिव्रतेनेत्यादेीव्रताहम
हर्व्रत्समहः व्रतपति नियतमहरितियावत्।यस्मिन्काले यदक्रियायां प्रस्तावःप्रायश्चित्तंवाभृत्येच्चमुख्यःकालःसकालः
तस्यव्रत्समहः तस्मिन्पत्नीस्वकर्तृकयज्ञफलभोक्त्रीजायाअनालंभुकाभवतिरजसाप्रसवेनव्याध्यादिनावाहविषांस्पर्श
स्यानर्हाविज्ञायतेव्रत्सहस्यायैस्येषावर्णप्रतिमुच्यास्तइतितस्माद्विनोन्वीक्षेतनस्पृशेदितितन्निषेधात्तांव्रत्येहन्यैलं ना १२९
भुकांअपरुध्यविहाययजेतकर्मकुर्यात्।अग्निहोत्राधानादिषयागेष्वपरोयस्यएतद्वचनमवरुध्यैवान्येषहःसुवेतिवि

धास्यमानत्वात् अत्र चन्द्रस्येह न्निति वचनात् यन्नूकर्म येन काले वा प्रतिनियतं न तत्रानारब्धभुक्तायां क्रियते तथा च काम्येष्टयः
अग्न्याधेयं आग्रयणं पशवः सोमाश्चैव यस्मिन् काले नारब्धभुक्तानं तत्र क्रियंते क्रियंत एव तस्मिन् यदा प्रक्रांता भवंति प्रक्रांतस्य
कर्मणस्तत्काल प्रतिनियतत्वात् इतिशब्दो ब्राह्मणप्रतीकसमाप्त्यर्थः। इति खलु ब्राह्मणं भवतीति इयमेवार्थं स्वयं सप्रपंचं विवृणोति
अत्र सेहन्यनारब्धभुक्ता अपरुध्येव यजेत ननु अपरुध्य यागे पत्न्याः किमारभ्यापरोधः कार्य इत्यत आह सर्वेणैव यज्ञेन यजेतेति स
र्वेण यज्ञस्य सर्वतासर्वागो येन तत्तान्तथा च यत्प्रातिस्विकविधिविहितमंगं अन्वाधानादि यच्च साधारणं स्नानपवनमंत्राचमनं मंत्र
प्रोक्षणोपव्याहरणादि उभयविधेनाप्यंगजातेनोपेतो यो यज्ञः तेनापरुध्यैव यजेत। उपव्याहरणापूर्वा पूर्वमनारब्धभुक्ता चेत्
उपव्याहरण प्रभृत्यपरुध्यैव कुर्यादित्यर्थः। प्रक्रांतमग्निहोत्रादि यत्कर्म श्रुति चोदितं आर्तवाभिप्लुतां पत्नीं विहाय कुरुते द्वि
ज इति कात्यायनस्मृतिरप्यत्र मानं अत्राग्निहोत्रादियावज्जीवाधिकारं स्वकाले वश्यं कर्तव्यं नियतकालत्वात्। कर्मश्रुति
चोदितं। आर्तवाभिप्लुतां पत्नीं विहाय कुरुते द्विज इत्या चोदितं प्रारब्धं चेत् अग्निहोत्रमारप्स्ये तेन यावज्जीवं होष्यामीति

मपरुध्यक्रियत एव प्रथमे तु प्रयोगे संकल्पादूर्ध्वं प्रथमपदार्थानुष्ठानानंतरमनालंबुकायो आरंभ्य
त्वो रूपरुध्येव कर्तव्यं ततः पूर्वमनालंभुका [illegible] २
सु०द० संकल्प्य तस्य प्रथमे प्रयोगे प्रथमः पदार्थः कृतश्चेत् तदनंतरं तत्कर्म आर्तवाभिप्लुतां पत्नीं विहाय कुर्वीत द्विज इति विहितं तत्तस्य
१३० प्रथमप्रयोगारंभस्यैव यावज्जीवकसर्वप्रयोगारंभरूपत्वात् द्वितीयादिः प्रयोगः सर्वोपि संकल्पात् पूर्वमनालंभुकायां तु आ
भा रंभाभावात् विरम्य कालांतरे समारंभ इति नहि संकल्प एवारंभः तस्यारंभपूर्वकर्तव्यत्वेनारंभशब्दार्थत्वाभावात् । तदिदमुक्त
मपि व्याहरणमाप्येप्रारीप्सितस्य कर्मण आरंभसमीपवचनमुपव्याहरणमिति नामिष्टौपव्हयेनामूहमस्मीति अपरुध्यय
गंतो रूतामपरुध्य चतुर्थेहनि शुद्धां उपव्हयेत पुनः कर्मावरणे साहायार्थं माव्हयेत नात्संतमपरोधः । कार्यः अमूहः मस्मी
त्पत्तु कालउपगमनमंत्रः अमूहमस्मीति मंत्रेण ऋतुस्नातां पत्नीमुपेयात् एतच्च कर्माणि समासे कर्ममध्ये तु सोमादौ कर्मार्थमा
व्हानमेव मंत्रेण एतावदत्र प्रायश्चित्तं ब्राह्मणे । तामपरुध्य यजेत्तेसा यक्त्कोसेवतनः प्रायश्चित्ति रिति निगमनात् । नन्वेवं सति
प्रथमेपि प्रयोगे संकल्पात्पूर्वमनालंभुकायां अपरुध्य यज्ञेनेवृत्त आपि पौर्णमास्यादेः तत्कालप्रति नियतत्वादित्यत आह अ १३०
ग्न्यन्वाधानप्रभृत्यस्य परुध्येव यजेतेति अग्न्यन्वाधानप्रभृतिः प्रक्रम आरंभो यस्य अन्वाधानादुत्तरस्य पदार्थजातस्य तदग्न्य

न्वाधानप्रभृतिअतद्गुणसंविज्ञानोबहुव्रीहिः अनेकमन्यपदार्थइतितस्यैवानुशासनात्प्रक्रांतमग्निहोत्रादीतिस्मृत्यानु
गुण्याच्चेतिअग्न्यान्वाधानपरंचलक्षणकंयस्मिन्ननुष्ठितेसमारब्धंकर्मभवति। नस्यतथैकाहानापीत्सादावपिअस्यानुवर्त्ति
नीयत्रयालक्षणयाआवश्यकत्वात् यजेतेतिमुख्यत्वंयागादन्यस्यअन्येषहः स्वेचेस त्रपरामर्शात् एवंचायमर्थः॥संपन्नः अ
परुध्ययजेतेतियत्तदन्वाधानप्रभृत्यैवआरंभादनंतरमेवापरुध्ययागइतिएतदुक्तंभवतियस्तयावज्जीवन्नियमेनप्रतिनिय
तेकालेनुष्ठेयोयागः सआरंभानंतरमनाभुक्तायामपरुध्यैवकर्त्तव्यइतिसंचारंभोदर्शपूर्णमासावारप्स्येताभ्यांयावज्जीवंयक्ष्य
इति।अथपूर्णमासेनयक्ष्यइतिचसंकल्पप्रभृत्यपरुध्ययागः सर्वत्रापिप्रथमेतुप्रयोगेनुप्रयोगेन्वाधानमेवारंभइतिअन्वाधा
नानंतरमपरोधइतिफलतोभेदोभवतीतिइत्थमपरुध्यया गोदर्शपूर्णमासयोरभिहितः अन्वारभ्याधीतानांप्रकृतिभोगा
मित्वानियमात्।अयमेवापरोधनियमस्तद्विकारेष्वतिदेशेनप्राप्नोतितथाचनित्यनैमित्तिककाम्यानामिष्टीनांपशूनांचारंभे
सत्यपरुध्ययागःआरंभाभावेकृतेपिसंकल्पेविरम्यकालांतरेनुष्ठानमितिएकरूपोनिर्णयः।तथैकाहानामपि।एकं

सु०द० सुत्यमहस्तेषामेकाहानां ज्योतिष्टोमादीनां तथारंभे सत्यपरुध्येव यजेत अप्सुदीक्षा च सोमयागारंभः संकल्पादूर्ध्वमारंभात्। पूर्वम
१३१ नालंभुकायां तु विरम्य त्रिरात्रादूर्ध्वं शुद्धायां कुर्यात्। अथ यदि दीक्षोपसत्सु अनालंभुका तदा अपरुध्य यजेतैव तथाहर्गणेषु
द्विरात्रादिषु सत्रेषु च तथा अपरुध्य यजेत अन्येष्वहःसु चाद्विशेन्नद्धि कोरेकाहाहर्गणेभ्यो अन्येषु कर्मस्वाधानाग्निहोत्रादिषु
आरंभप्रभृत्यपरुध्येव कुर्यात् सोमे पत्न्या रजस्वलायां कर्तव्यमुक्तं त्र्यहे पर्यवेते गोमूत्रेणोदकमिश्रेण स्नापयित्वा च स्थेत्यके
तिस्रक्षास्यदर्भपुञ्जीलैः पवयन्तीति विज्ञायत आपो वै दर्भा इति तेन स्नाता भवंतीति अथ सूतिकाविषयेपि अथ सूतिकायां दश
हे पर्यवेते यथाम्नातं शौचं कृत्वा पत्नी कर्म सुयोजयेदिति। कात्यायनस्त्वाह पत्न्युदक्यादीक्षारूपाणि निधाय सिकतास्वासीतो
पस्रवणात्तिष्ठेत्। संधिवेलयोर्मार्जालीयसमीपे सुप्त्वा त्रिरात्रांते गोमूत्रमिश्रेणोदकेन स्नापयित्वा परिधानादि करोतीति सान्नि
पादिकं प्रज्ञातायाश्च दशरात्रादूर्ध्वं स्नानादिति। दीक्षारूपाणि योक्त्रवस्त्रलाजादीनि ओपस्रवणात् रजस उपस्रवणपर्यंतं सान्नि
पातिकं कर्मार्हत्वापारकं सूतिकापादशाहादूर्ध्वं स्नानादि कृत्वा कर्म सुयोजयेदित्यर्थः। अवशिष्टं चानालंभुकाविषयं प्रायश्चि १३१

त्तं अथ सोमाधानमारभ्येत्ति प्रायश्चित्तं सूत्रे वर्गं तव्यं रजस्वला प्रसूतिकयोः कर्मकेन कर्त्तव्यमित्यत्रोक्तं प्रायश्चित्तसूत्र एव तत्
त्कर्म तत्पुत्रो ब्रह्मचारी वा कुर्यात्। तत्पुत्रो गृहस्थः तदभावे ब्रह्मचारी वा कुर्यात् तदभावे त्वन्यः मंत्रं तु यजमानो जपेदिति प्र
रूतिमनुसरामः। इत्थं पत्न्या अनालंभुकायाः पुत्रादिस्तत्कर्म कुर्यात् यजमानस्तु मंत्रं जपेदित्ति नित्यत्वेन विहितं प्रायश्चित
सूत्रेऽद्धेयं तु मतभेदेन विकल्पो वगम्यते पत्न्याम विद्यमानायां रजसा प्रसवेन वा व्याधिना वा अनालंभुकात्वेन विहारदेशे अविद्य
मानायां कर्तव्यः प्रकार उच्यते यजमानायतन एवासीनो यजमानो मंत्रानेता निगदेनूत्तद्विषयाणामाशिषाणां संग्रास्यत्वादि
ति इत्तरत्तु पुत्रः संस्कृतः कुर्यादिति बोधायनः आलीकि स्वाहपत्नी संयोजकाः पत्न्याः सन्नहन पूर्वका चमन व्रतग्रहसमिदाधा
नादिषु कर्म सुसंयोजकाः स्वस्त्वे तेथाशासाने स्यादयोमत्राः दृष्टाः समाम्नाता भवंति तस्यामविद्यमानायां कर्मणि पत्नीसंयोजन
लक्षणा प्रयोजनासंभवात् अर्थलोपादेनान्मंत्रान्नेवाद्रियेत न च तद्विषयाणामसंग्रहापत्तिः। तामिष्टोपक्रयेत्ने त्वनेनैव प्राय
श्चित्तेन सिद्धेरित्ति युक्तं क्रियाता आशीः कामेयुज्याताइति ऊनेति रिक्तं धीयाताइत्ति न मंत्रो मंत्रसमाम्नाये अभावात्। ब्राह्म

सु०द० णेसूत्रेचाविनियोगवचनाभावाच्च किंत्वर्थवादो केचित्तु प्रयोगकारा एतयोर्मंत्रत्वं मत्वा विनियोगमाहुः। तथाच गोपालः। ये
१३२ क्रैण सन्नह्यस्य यज्ञुः स एव युक्तं क्रियाता इति वाचयीत। ऊनेनेति रिक्तं यजुरत्र लिंगात् पत्नी पुरस्तात् ज्वलनेक्षणाच्चेति अयै
नांतिरः पवित्रमप आचामयति पयस्वतीरोषधयः पयस्वद्वीरुधां पयः। अपां पयसो यत्पयस्तेन मामिंद्र संसृजेतीति। एनां पत्नी
मप आचामय स्याग्नीध्रः पत्न्या चामति मंत्रेण। अथैनां गार्हपत्ये समिधमाधापयत्यग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे
राध्यतांस्वाहा। वायो व्रतपते आदित्य व्रतपते व्रतानां व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां स्वाहेतीति। अथैनां पत्नी
गार्हपत्ये च तस्त्रः समिध आधापयस्याग्नीध्रः पत्नी आदधाति तत्र द्वितीय तृतीय मंत्रयोर्व्रतं चरिष्यामीत्यादेरनुषंग
इति आचमन समिदाधानयोः। प्रकारो यजमानस्येव। अथ जघनेन गार्हपत्यमुपसीदति सुप्रजसस्त्वा वयं सुपत्नीरुपसेदि स०१
म। अग्ने सपत्नदंभन मदब्धासो अदाभ्यं। इंद्राणीवाविधवा भूयासमदितिरिव सुपुत्रा। अस्थूरित्वा गार्हपत्योपनिषदेसु
प्रजास्त्वाय। मम पुत्राः शत्रुहणोथो मे दुहिता विराट्। उताहमस्मि संजया पत्यौ मे श्लोक उत्तम इतीति। जघनेन गार्हपत्यं गा १३२

पं॰ ति

र्हपत्यस्य पश्चात् उपसीदति उपविशति पत्नी स्वयमेव प्राङ्मुखी मंत्रं पत्नी स्वयमेव वदेत्। नह्यत्र वाचनं वचनाभावात्। अथैनां गार्हप
त्यमीक्षयस्यग्ने गृहपत उपमाह्वयस्व देवानां पत्नीरुपमाह्वयध्वं पत्न्येषतेलोको नमस्ते अस्तु मा मा हिंसीरिति। स्पष्टं॥ ईक्षणं
तु अग्नेर्देवानां पत्नीनां चोपह्वायमंत्रलिंगात्। अथैनामाज्यमवेक्षयति॥ खंडः॥ १९॥ महीनां पयोस्योषधीनां रसोदब्धेन त्वा
चक्षुषावेक्षे सुप्रजास्त्वायेनीति। आज्यमवेक्षयस्याग्नीध्रः बह्वृषु पत्नीषु सर्वा आज्यमवेक्षयेदिति दर्शितं पत्नी सन्नहनेद्वैधे। अत्र
द्वैधं। अथैनामाज्यमवेक्षयतीति सूत्रं शालीकेरत्रोहस्माह बोधायनः पत्न्यावेक्षितमुपयच्छेत तेजोसीत्यथैन च्छकलेनोप
यत्यहरेत् तेजोनु प्रेहीत्यथैन दाहवनीये धिश्रपयेत्। अग्निस्तेतेजो मा विनैदिति अथैनत् उत्तरेण प्रोक्षणीः सादयित्वा
वेक्षेत उत्पुनीयादाज्यवतीभ्यां प्रोक्षणीरिनीति अथैनामाज्यमवेक्षयतीत्यादिना समाम्नानं कल्पसूत्रं शालीकेर्मतं बोधा
यनस्त्वाह पत्न्या वेक्षितं महीनां पयासीत्यादि मंत्रेण क्षितंतनदाज्यं तेजोसीति मंत्रेणोपयच्छेत्। उपयच्छेत् अधिश्रपणे तु न
मंत्र इति भावः॥ अथ तद्दर्भी मधिश्रित्य एनत् आज्यं शकलेन समिधा सह उपयत्य अधस्तात् संयोज्यते जोनुप्रेहीति हरेत् अ

सु०द०
१३३

थेनदाहवनीयेधिश्रयेत् अग्निस्तेजइति मंत्रेण अथेनत्सम्प्राद्धत्वोत्तरेणैव प्रोक्षणीः सादयित्वा यजमानो ध्वर्युश्च उभावपि
ईक्षत्ते ईक्षे यात्तांउत्पुनीयात् आज्यं प्रकृतत्वात् तूष्णीं मिस्यवचनात् मंत्रेणैवोत्पवनं आज्यवतीभ्यां यापाभ्यां पवित्राभ्यामा
ज्यमुत्पूतं ताभ्यामेवाज्यलिप्ताभ्यां प्रोक्षणीरपउत्पुनीयात् व्यत्ययेन स्त्रीलिंगत्वं अथाज्यवतीभ्यामपइति श्रुतिगतोयमाज्य
वतीशब्दइति बोध्यं अथेनत्गार्हपत्येधिश्रयतीति जोसीति। गतं। समिधमुपपत्य प्राङ्हरति तेजोनुप्रेहीतीति। उपयत्य
अधस्तात्संयोज्य स्पष्टमन्यत्। अथेनदाहवनीयेधिश्रयत्यग्निस्तेतेजोमाविनेदितीति। गतं। अत्रैनांसमिधं मध्यत आहव
नीयस्याभ्यादधानीति। आहवनीयस्य मध्यतोयत्राज्यमधिश्रितं। तत्र एतां उपयमिनां समिधं अभ्यादधाति। अथेनदग्रेण
प्रोक्षणीः पर्याहृत्य दक्षिणार्धे वेद्येनिधाय यजमानमाज्यमवेक्षयति निमीत्यावेक्षत इति ब्राह्मणमिति एतदाज्यं अग्रेण
ई प्रोक्षणीः प्रोक्षणीनामग्रतो वेद्ये वेद्या दक्षिणो पर्याहृत्य निधाय इत्थं निधानमेव स्फ्यस्य वर्त्मसादयतीति ब्राह्मणस्यार्थइ १३३
तिभावः। आज्यंयजमानमवेक्षयत्वाग्नीध्रः। उत्तरस्मिंसूत्रे अध्वर्युग्रहणं ततः प्राक्संमार्गारभ्य अन्यः कर्तेति ज्ञापयति

निधायेचक्षुःप्रत्ययेनाज्यमवेक्षमाणस्ययजमानस्यप्रेरणं तस्याज्यनिधानेन समानकर्तृकत्वंप्रतीयतेनिधानेचाग्नीध्रः
कर्त्तेतिस एवाज्यमवेक्षयतीतियुक्तंइदंचाज्यावेक्षणंनिमील्यपश्चात्कर्त्तव्यंतथाचब्राह्मणंनिमील्यावेक्षेतेति आपस्तंबस्त्वा
ह।अध्वर्युर्यजमानश्च निमील्यवीक्ष्यानुच्छ्वसंनावाज्यमवेक्षेतेइति।अत्रकर्मोक्तं।किमभिघारितंनुखलयाज्यंभवतीतिस
त्याभिघारितमित्येवब्रूयाद्विज्ञायतेसत्येनत्वाभिघारयामितस्यतेभक्षीयेतीति।आज्यंकिमभिघारितंअभितःप्रकाशितं
अंतरुपरिभागेचनिष्फलकमिदमाज्यमितिकेनप्रकाशितमितिप्रश्नःउत्तरंसत्येनचक्षुषाअभिघारितमित्येवब्रूयात्इतिप्र
माणांतरावगतेर्थेसंशयविपर्यययोर्दर्शनात्चक्षुषावगतेचकदाचिच्छुक्तिः।रजतादिभ्रांतेर्दोषाधीनस्यात्चक्षुस्वभा
वतःसत्यंशोधकमपितथाचब्राह्मणंब्रह्मवादिनोवदंति।यदाज्येनान्यानिहवींष्यभिघारयति।अथकेनाज्यमिति।सत्येने
तिब्रूयात्।चक्षुर्वैसत्यं।सत्येनैवैनदभिघारयतीति।अनृतंवैवाचावदति।अमृतंमनसाध्यायति।चक्षुर्वैसत्यमितिच
अत्रमंत्रलिंगंप्रमाणमित्याह विज्ञायतेसत्येनत्वाभिघारयामीतीति।अस्यसूत्रस्यप्रयोजनमाज्यमवेक्षमाणोयजमानस्वयमाः

ज्यं निर्दुष्यंश्चैति। शोधयेदिति। अथैनद्यथाहृतं पर्याहृत्य उत्तरार्धे नैध्रैर्निधायाध्वर्युरवेक्षते ऽग्नेर्जिह्वासीति अध्वर्युग्रहण
मित्तः प्रागन्यः कर्तेति द्योतनार्थमिस्फक्तं। अथैनत्पुरीचीनाग्राभ्यां पवित्राभ्यां पुनराहारं त्रिरुत्पुनाति शुक्रमसि ज्योतिर
सि तेजोसीति तिएनत् आज्यं उदीचीनाग्राभ्यां पवित्राभ्यां पुनराहारं पुनराहृत्य त्रिरुत्पुनाति प्रथमं शुक्रमसीत्यात्मनः सका
शादारभ्य पुरस्तान्नीत्वानुक्रमेव प्रत्याकर्षेत्। इत्थं ज्योतिरसीति इत्थमेव तेजोसीति अत्र यद्यपि मंत्रभेदेन प्रतीयते तेजोसी
त्यंतः प्रतिमंत्रमिति अनभिधानात्। तथापि पुनराहारं त्रिरुत्पुनाति शुक्रमसीति प्रथमं ज्योतिरसीति द्वितीयं तेजोसीति
तृतीयं कल्पांतरमनुसृत्य मंत्रभेदो गीकृतविरोधाभावादिति। अत्रेद्वैधं। आज्यस्यावेक्षण इति सूत्रं बोधायनस्य सर्वेराज्य
मवेक्षित्त मुत्पुनीयादिति शालीकिरिति। सूत्र अध्वर्युरवेक्षते ऽग्नेर्जिह्वासीति पुनराहारं त्रिरुत्पुनाति शुक्रमसि ज्योतिर
सि तेजोसीति च कल्पसूत्रं बोधायनस्य मतं भिन्नाग्नेर्मंत्राः भिन्नवाक्यत्वात् क्रियापरभेदाच्च एकतिङ् वाक्यमिति हि १३४
वाक्यभेद इति भावः। शालीकिस्त्वाह एकस्मिन्नभिधेयवत्तेः सर्वोप्येको मंत्रः अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागस्या

दितिन्यात्। तथाचाग्नेर्जिह्वासीतिमंत्रेणशुक्रमसीतित्रिभिर्मंत्रैश्चाज्यमवेक्षितंकृत्वातूष्णीमुत्पुनीयात् अथवासर्वैरेवैस्य
सर्वैरेवोत्पुनीयात् एतस्मिन्व्याख्यानेउत्पवनब्राह्मणेत्रिर्यजुषा। त्रयइमेलोकाः। एषांलोकानामाप्त्यैत्रिः। त्र्यावृद्धियज्ञःअ
थोमेध्यत्वायेतिविहितंयजुषात्रिरुत्पवनमनुष्ठितंभवतीति। अथप्रोक्षणीरुत्पुनातिदेवोवःसवितोत्पुनात्वच्छिद्रेणपवि
त्रेणवसोःसूर्यस्यरश्मिभिरितिपच्छइति। अथताभ्यामेवपवित्राभ्यांप्रोक्षणीरुत्पुनाति। अथाज्यवतीभ्यामपइतिश्रुतेःपच्छः
प्रतिपादकमुत्पुनातिपच्छोगायत्र्यात्रिःषमृद्धत्वायेतिहिब्राह्मणं। प्रोक्षणीषुपवित्रेअवधायादत्तेदक्षिणेनस्रुवंसव्येनजुहूमि
ति। स्पष्टं। वेदेप्रतिष्ठाप्यतस्यांगृह्णातिशुक्रंत्वाशुक्रायांधाम्नेधाम्नेदेवेभ्योयजुषेयजुषेगृह्णामीत्येतेनयजुषाचतुर्गृहीतं
है गृहीत्वासंमृश्योत्प्रयच्छतीतिसव्येनजुहूमित्यनुवर्ततेवेदेजुहूंसव्येनप्रतिष्ठाप्यतस्यांजुह्वांशुक्रंत्वेतिमंत्रेणचतुर्गृहीतंचत्वारि
गृहीतानिग्रहणानियस्मिन्कर्मणितच्चतुर्गृहीतंतद्यथाभवतितथाआज्यंगृह्णीयात्। गृहीत्वाचजुहूंदक्षिणेनहस्तेनसंमृश्य
उत्प्रयच्छतिउत्प्रदानमन्यस्यहस्तेइदइदमुत्प्रदानमासादनपर्यंतमुपरिधारणार्थमित्तिगम्यतेआपस्तंबसूत्रवत्नोक्तरआ

सु०द० ज्यानिसादयंतीतिनिषेदेनार्थाद्वासत्याषाढसूत्रवत् अन्यत्रोत्करादाज्यानिसादयितेतिवचनेनवाक्चिदासादनस्यास्मत्सूत्रे
१३५ प्रतिपादनाभावादिति। अथोपभृतिगृहीतेज्योतिस्त्वाज्योतिषिधाम्नेधाम्नेदेवेभ्यो यजुषेयजुषेगृह्णीमीत्येतेनयजुषाष्टगृ
हीतंगृहीत्वाभूयसोग्रहान्गृह्णानःकनीयआज्यंगृह्णीतेतथैवसंभृत्स्योत्प्रयच्छतीति। विदेसव्येनप्रतिष्ठाप्येसनुवर्तनी
यंउपभृतिज्योतिस्त्वेतिमंत्रेणाष्टगृहीतंअष्टगृहीतानियस्मिन्कर्मणितद्यथाभवतितथाज्यंगृह्णीतेगृहीत्वाचतथैवजौहृ
वाज्यवदेवसंभरत्योत्प्रयच्छतिउपभृतिआज्यस्यग्रहान्भूयसोष्टसंख्यान्गृह्णानःअध्वर्युःआज्यंऔपभृतंकनीयःस्वल्प
तरंगृह्णीतेयत्परिमाणेषुस्रुवेषुगृहीतेषुजौहवाज्यंचतुर्गृहीताद्न्यूनमष्टगृहीतंभवतितथागृहीतव्यंएवंचऔपभृतमष्ट
भिर्ग्रहणैःसंस्कृतंएकमाज्यंनभवतिकिंतुचतुर्गृहीतमाज्यद्वयंसंयुक्तंचेनन्तत्रएकंचतुर्गृहीतंचतुर्थपंचमप्रयाजार्थंअ
परमनुयाजार्थंचतुर्थयस्यत्तर्धर्मोपभृतस्याज्यस्यजुह्वांसमानयतइतिअत्रेत्तदौपभृतमाज्यंसर्वशएवजुह्वांसमानयत १३५
इत्यौपभृतस्यावशिष्टस्यजुह्वामानीतस्यअथजुहूपभृताबाराययास्याक्रम्याश्राव्याहदेवान्यजेतिचसूत्रेणतस्यप्रयाजा

नुयाजार्थत्वावगमात् यदुपभृति प्रयाजानुयाजेभ्यस्तदिति ब्राह्मणाच्च ननु अष्टगृहीतमेकमेवाज्यं उदाहृतेन सूत्रद्वयेन अ
नेन ब्राह्मणेन च विनियुज्यतामिति चेन्न आतिथ्यायां प्रसिद्धं चतुर्गृहीतानीति सूत्रेण चोदकप्राप्तानां जौहवोपभृतध्रौवा
ज्यानां चतुर्गृहीतत्वानुवादविरोधात् एवं च यत्रानुयाजस्य द्रव्यान्तरं धीयते पृषदाज्येनानूयाजेष्वरन्तीति तत्र पशौ प्रसिद्ध
माज्यानिर्गृहीत्वेति चोदकप्राप्तानामाज्यानां सामान्यतोनुवादेपि उपभृति प्रयाजार्थं चतुर्गृहीतमेव ग्राह्यं तथा च चतुर्गृहीतमा
ज्यद्वयमेवोपभृतमाज्यं न त्वष्टगृहीतं तथा च कात्यायनः अष्टावुपभृत्यस्त्रीयोनुयाजाश्चेच्चतुरन्यत्र प्रतिविभागात् पश्वा
तिथ्यादर्शनात् इत्यस्यमर्थः ॥ अष्टगृहीतं उपभृति गृहीतव्यं जौहवादन्यत्तरं यद्यनुयाजाः संति इह अनुयाजानामेव कल्पिक
त्वात् ॥ विरुतश्चेच्छब्दः अनुयाजवत् कर्मणोन्यत्र अन्यद्रव्यकानूयाजे वा कर्मणि चतुर्गृहीतमुपभृति ग्राह्यं कुत एतत् प्र
तिविभागेन ह्युपयोगः ॥ औपभृतस्य द्रव्यस्य प्रयाजेषु चानुयाजेषु च तेनोपभृतस्य उभयार्थता अध्यवसीयते तेन पश्वानूयाजा
भावे प्रयाजार्थं यच्चतुर्गृहीतं तदेव ग्राह्यं भवति किं च पशौ तावदन्यद्रव्यकेष्वनुयाजेषु उपभृति चतुर्गृहीतं दर्शयति श्रु

सु०६० त्तिः॥अथोत्पूयाज्यंजुह्वांचोपभृत्तिचतुर्गृह्णातिपंचगृहीत्तंपृषदाज्यंमित्तिअननूयाजकेकर्मण्यातिथ्यायां॥अथोत्पूयस
१३६ र्वाण्येचचतुर्गृहीत्तान्याज्यानिगृह्णातिनह्यत्रानुयाज्याभवंतीत्तिनत्रानुयाजार्थेनद्रव्येणनार्थइतिप्रयाजार्थमेवचतुर्गृही
तंदर्शयत्ति।एवंचातिथ्यायांनह्यत्रानुयाजाभवंतीत्तिहेतूपन्यासोपिसमंजसस्यादित्तितस्मादौपभृतंचतुर्गृहीताज्यद्व
ति यमिर्न्यायविसंमत्तनित्तिसिद्धं॥अथध्रुवायांगृह्णीतेनिस्त्वा।र्विर्षिधाम्नेदेवेभ्योयजुषेयजुषेगृह्णामीत्येतेनयजुषा धाम्ने
चतुर्गृहीत्तंगृहीत्वाभिपूर्यसंमृश्योत्प्रयच्छत्तीत्ति॥सव्येनवेदेप्रतिष्ठाप्येत्यनुवर्त्तं॥अभिपूर्यचतुर्गृहीतग्रहणोत्तरंस्त्रु न
च्योज्येनध्रुवामभिपूर्यअभिपूरणंविभवनार्थंगत्तमन्यत्॥अत्रेद्वैधं॥आज्यग्रहणंग्रहणइतिसहस्माहबोधायनोध्वर्युरे
वैतैर्गृहीयात्पौरोरोडाशिकेश्चयाजमानैर्यजमानोनुमंत्रयेदित्तिआत्रेयोहस्माहशालीकिरध्वर्युरेवोभयैर्मंत्रैर्गृह्णीयात् त्
पौरोडाशिकेश्चयाजमानेश्चनयाजमानैर्यजमानोनुमंत्रयेदित्यत्रेयोहस्माहौपमन्यवोयथापौरोडाशिकामंत्रानाभिनि
वर्तंतएवमेवापियाजमानाभिन्निवर्त्तंतइत्तीत्ति॥ग्रहाणांग्रहणंतइतिग्रहाःआज्यानितेषांग्रहणेअथवाग्रहाः आज्य १३६

मिति चतुर्थ इत्थं जुह्वां एकमुपभृति ध्रुवायां च मंत्राणां समुच्चयो वगंतव्यः। यजमानश्च याजमाने मंत्रै रनु
मंत्रयेदिति कुतएतत् यजमानाना

ग्रहाः तेषां ग्रहणे गृह्यते तेनेनेति ग्रहणः शुक्रं त्वा शुक्रायामि त्यादय आज्यग्रहणे करणमंत्राः सामान्यपेक्षमेकवचनं तस्मिन्विषये इदमुच्यते वोधा
यन आह॥ अध्वर्युरुभयै रेव एवकारो प्यर्थः॥ उभयैरपि मंत्रै गृह्णीयात्॥ आज्यं केकभयैरित्यत आह पोरोडाशिकैश्च याजमानैश्चेति पोरो
डाशिके इषे त्वोर्जे त्वेति प्रश्ने ः समाम्नाते ः शुक्रं त्वां ज्योतिस्त्वार्चिस्त्वेति मंत्रेश्च याजमाने ः यजमान पठितैः पंचानामित्यादिभिः षोडशभि
र्मंत्रैश्च परस्परं समुच्चितैराज्यं गृह्णीयात्। तद्यथा शुक्रं त्वेति पचानां त्वावातानामिति च मंत्रानुच्चार्य प्रथमग्रहणं शुक्रं त्वेति पंचा
नां त्वर्तूनामिति द्वितीयं शुक्रं त्वेति पंचानां त्वादिशामिति तृतीयं शुक्रं त्वा पंचानां त्वा पंचजनानामुभयत्र के पांचिक्षा स्विनामाम्नात् ग
ह्णामीति च मंत्रलिंगारित्तिशालीकि स्वाह अध्वर्युरेव पोरोडाशिके याजमानैश्चाज्यं गृह्णीयात्। यजमानस्तु याजमानैर्नानुमंत्रयेदि
ति। कुत एतत् लिंगाद्धि ग्रहणे करणं मंत्राः नैनै रनुमंत्रणमपि प्रकरणस्य लिंगेन बाधादिति औपमन्यवस्त्वाह। यथा पोरोडाशिका मं
त्राः प्रकरणादाध्वर्यवा एव यजमानं प्रति तु नाभिमुख्येन नितरां वर्त्तन्ते एवं याजमाना अपि प्रकरणो यजमानस्यैव नाध्वर्युं प्रत्याभिमुख्ये
न नितरां वर्त्तन्ते लिंगं तु प्रयोजकत्वेनापि यजमानस्योपपन्नं अतो यथाकल्पसूत्रमेव कर्तुं युक्तमिति अत्र कर्मान्तं पंचानां त्वावातानां यंत्रा

सु०र० य धर्त्राय गृह्णामीति अनुदिशंवाताविष्वग्वान्त एवैषांपंचलोभवतीपंचानांत्वर्त्तूनांयंत्रायधर्त्रायगृह्णामीतिहेमंतशिशिरावेकत्रस
१३७ मासंगच्छंत:पंचानांत्वादिशांयंत्रायधर्त्रायगृह्णामीतिअनुदिशंवाताविष्वग्वान्त एवैषांपंचलोभवतीपंचानांत्वर्त्तूनांयंत्रायधर्त्रायगृ
ह्णामीति इयमेवासामूर्ध्वादिक्पंचमीभवतिपंचानांत्वापंचजनानांयंत्रायधर्त्रायगृह्णामीतिदेवामनुष्याअसुराराक्षसागंधर्वाए
वैषांपंचमाभवंतिचरोस्त्वापंचविलस्ययंत्रायधर्त्रायगृह्णामीति।।अयमेवैषआकाशश्चरुःपंचविलोभवतिदिशोस्यविला
निभवंति।।वायुमेक्षणइत्यथास्युदाहरंतिसंवत्सरएवापिचरुःपंचविलोभवत्यृतवोवाविलानिभवंतिवायुर्मेक्षणइतीति।।पं
चानांत्वावातानामित्यादयआज्यग्रहणानुमंत्रणमंत्राःयाजमानास्तेषामर्थविज्ञानाय अत्यंतापूर्वार्थानिपदानिव्याचष्टेचतसृभ्यो
दिग्भ्यःप्रवर्तमानाश्चत्वारोवाताःपंचमस्तुवातोनज्ञायतइत्यतआह।पंचानांत्वावातानामित्यादिविष्वग्वान्त:ऊर्ध्वायादिशोधोव
र्तमानोवातावर्तोवापंचानांत्वर्तूनामित्यादिसमासएकीभावंपंचमीदिशमूर्ध्वापंचमीजनानामितिसमस्तंपदंदेवामनुष्याअ १३७
सुराराक्षसाएषांपंचमागंधर्वाएवभवंतीतिपंचजनशब्दोदेवमनुष्यासुरराक्षसगंधर्वेषुरूढइतिकेचित्चरोस्त्वापंचविलस्ये

त्तिअत्रचरुशब्दः पाकार्थस्थालीमाचष्टे पंचबिलस्येति विशेषणावगतेः स्थालीचक्कचित्पंचभिर्बिलैर्युज्यते तथाच पुरुषमेधावसा
नेकस्यसूत्रं पंचबिलस्य चरोर्विज्ञायते आज्यआग्नेयः पूर्वस्मिन्बिलेदधिन्यैंद्रो दक्षिणे शृत्तेप्रतिदुहीनीत्तमिश्रोवावैश्वदेवः पश्चि
मेस्मैत्रावरुणाउत्तरे पयसिर्बार्हस्पत्योमध्यम इतितस्य पंचबिलस्य चरोरितिव्याचक्षते केचित् आचार्यस्त्वाह ।। अयमाकाशः सर्व
प्रत्यक्ष एव एषएवचरुः चरुस्थालीअपंचबिलः पंचबिलानिस्वगतकार्योत्पत्तिस्थानानियस्यसपंचबिलः दिशोस्यबिलानिभवंति
वायुमेक्षणः तत्तदिक्परिच्छिन्नेआकाशेशब्दोत्पत्तौकारणं अनुकूलवायुनाहितत्रतत्रदिक्षु शब्दाउत्पद्यंत इतिवस्तुस्वभावइ
ति ।। अथापिप्रकरणांतरेणाप्युदाहरंति संवत्सरएवचरुः चरुस्थाली सपंचबिलोपिभवतितस्यबिलानिपंचर्तवः वायुर्मेक्षणइति
एवंकचित्छायांव्याख्यातोयंमंत्रोभवतीतिध्येयं ।। बोधायनीयसूत्रस्यवृत्तिः सम्यक्प्रतीयते । संपूर्णोदशमस्तत्रपटलः श्रीय
लांद्विवः । खंडः ।। २० ।। अथैतामाज्यस्थालींसस्रुवांउपनेनवेद्येनिधायप्रोक्षणीरुन्महयत्नुपोतिष्ठति ।। आपोदेवग्नेपुवोयरु
तित्रिरिति ।। एतांप्ररुतांइदंचविशेषणंकदाचित्कार्यार्थमन्यास्थालीयथास्यादितिगत्तमन्यत् ।। अथेध्मंविस्रस्यप्रोक्षतिरुक्मे

सु०२० स्याखरो ञ्छोग्नयेस्वाहेत्नी त्तिगतंवेदिंप्रोक्षन्तिवेदिरसिबर्हिषेत्वास्वाहेत्नी त्तिगत्तं॥ बर्हिःप्रोक्षन्तिबर्हिरसिस्रुग्भ्यस्त्वास्वाहेत्नीत्ति
१३८ गत्तं॥अत्रेदंद्वैधं॥इध्माबर्हिःप्रोक्षणइत्तित्रिस्त्रिरेकैकांप्रोक्षयेदित्तिबोधायनःसकृत्सकृदित्तिशालीकिरित्ति।सूत्रार्थस्पष्टःत्रि
रेवानामित्तिश्रुतेरित्तिबोधायनस्याशयः॥सकृत्कृतेपिकृत्नएवेत्ति शास्त्रार्थइत्तिशालीकिरित्ति॥आहरंत्येतद्बर्हिरंत्तरेणप्रणीत्ताआ
हवनीयंचेत्ति॥अग्रेणेध्मंनीत्वाप्रणीताहवनीययोर्मध्येनाहरंत्ती त्तिवेद्यां॥तदंत्तर्वेदिपुरोग्रंथ्यासाद्यप्रोक्षत्तिदिवेत्वेत्यग्राण्यं
तरिक्षायत्वेत्तिमध्यानिपृथिव्यैत्वेत्तिमूलानीत्ति॥तद्वेद्यामाहृत्तंबर्हिःपुरोग्रंथिऊर्ध्वाग्रंगतमन्यत्तूत्तिष्ठंत्येवाग्रमध्यमूलानीत्ति
भाष्यकाराः।तत्रमूलंविचारणीयं॥अथतत्तःसहस्रुचापुरस्तात्प्रसंचंग्रंथिंप्रस्रुस्रत्तिशिष्टाःप्रोक्षणीभिर्नयन्तिदक्षिणायश्रो
णेत्तरायेश्रोणेःस्वधापितृभ्यऊर्ग्भवबर्हिषद्भ्यऊर्जापृथिवींगच्छतेत्ति॥अथबर्हिःप्रोक्षणानंतरंतत्तःप्रोक्षितात्बर्हिषःपुर
स्तात्पूर्वभागेगतेनसहस्रुचासहितेनपाणिनास्रुक्पाणिभ्यामित्तियावत्प्रसंचंस्रुचःप्रसंचं संतंग्रंथिंप्रस्रुस्यअतिशिष्टाःप्रो १३८
क्षणीर्निनयत्तिदक्षिणायेश्रोणेःस्वधापितृभ्यऊर्ग्भवबर्हिषद्भ्यऊर्जापृथिवींगच्छतेत्तीत्ति॥सूत्रंतदंत्तर्वेदिपुरोग्रंथ्यासाद्ये
दक्षिणायेपंचम्यर्थेचतुर्थीएवमुत्तरायाइत्तिदक्षिणांश्रोणिमारभ्यओत्तरायेश्रोणेःउत्तरश्रोणिपर्यंतंनिनयत्तिस्वधापितृभ्यइत्ति
मंत्रेण।अत्रद्वैधं।बर्हिषःप्रोक्षणइत्तिसत्रंशालीकेरत्रोहस्माहबोधायनस्तिछंदिवेत्वेत्यग्राणिप्रक्रांतरिक्षायत्वेत्तिमध्यानिउपरि

स्यादिकल्पस्तत्रंशालीकेर्मतं अत्र मन्नेतिष्ठन्नेव प्रोक्षणमितिभाष्यकारमतिरिक्तं सहस्रुचेस्यादेः परस्य प्रयोजनमासीन एव ए
न कुर्यादिति।। इदं प्रोक्षणीर्निनयनमेव पौर्णमास्यां पित्र्यं।। नत्वाप्येभ्यो निनयनमयी त्युक्तं।। आप्य निनयनकर्मातेदंतु प्राचीनावी
तिना कर्तव्यं।। पितृसंबंधा प्राचीनावीती पित्र्याणीतिवचनात्।। द्वैधे च कल्पे समाम्नातस्यापि कृतस्य पुनर्वचनं पित्र्यत्वात्। प्राची
नावीतं कार्यमिति ज्ञापनार्थमिति केचित्तु स्वाध्याय ब्राह्मणे यज्ञोपवीती स्वाधीयीत याजयेद्यजेत वेति यज्ञोपवीतिना स्वाध्या
य यजनयाजन वचनात्।। सर्वत्र सिद्धे यज्ञोपवीते दर्शपूर्णमासयोरुपव्ययत इति पुनर्वचनं यत्राप्राप्तिरस्ति तत्र प्राप्त्यर्थं अप्राप्ति
श्च पित्र्ये पित्र्यं च प्रोक्षणीशेषनिनयनमेव दर्शपूर्णमासयोरिस्त्रयज्ञोपवीतमेवयुक्तं दर्शपूर्णमासविकारेष्वपि यत्र तु विशि
ष्य प्राचीनावीतस्य वचनमस्ति तत्र तत्कर्तव्यमिति वदंति।। उद्गृह्य प्रोक्षणीधानं बर्हिर्विस्रस्य पुरस्तात्।। प्रस्तरं गृह्णाति विष्णो
स्तूपोसीतीति।। उद्गृह्य निरस्य प्रोक्षणीधानं प्रोक्षण्याधीयंतेस्मिन्निति प्रोक्षणीधानं प्रोक्षणपात्रं बर्हिर्विस्रस्य पुरस्तात् प्रथमं
प्रस्तरं गृह्णाति विष्णोस्तूपोसीति।। अत्र द्वैधं।। स्रुचउद्गृहनइत्यग्रेणात्मानमुदीचीनमुद्गृह्णीयादिति बोधायनो जघनेनात्मानमु

सु०द० दीचीनमुद्दहेदितिशालीकिरिति।।अग्रेणात्मानंपूर्वेणात्मानंपश्चिमभागेणात्मानंगतमन्यत्त्।।तस्मिन्पवित्रेअपिसृजतियजमाने

१३९ प्राणापानौदंधामीतिवात्तूष्णींवेति।तस्मिन्प्रस्तरेपवित्रेपूर्वंप्रोक्षणीषुनिहितेप्रोक्षणीशेषनिनयानानंतरंगृहीत्वाप्रस्तरेअ

पिसृजेदित्यर्थः।।गतमन्यत्त्।।अत्रद्वैधं।।प्रस्तरेपवित्रेअपिसृजतियजमानेप्राणापानौदधामीतिवात्तूष्णींवेतिपूर्वःक

ल्पोबौधायनस्योत्तरःशालीकेरिति।।स्पष्टं।।आचार्यपरिग्रहप्रदर्शनार्थंसूत्रं।।तंयजमानायवाब्रह्मणेवाप्रयच्छतीति।।तंप्र

स्तरंगतमन्यत्त्।।इदंप्रदानमापरिधीपरिधानाद्धारणार्थंतथाचापस्तंबः ब्रह्माप्रस्तरंधारयतियजमानोवेति।।अत्रद्वैधं।।तंय

जमानायवाब्रह्मणेवाप्रयच्छतीतिपूर्वःकल्पःशालीकेरुत्तरेबौधायनस्येति।।स्पष्टं।।इदमप्याचार्यपरिग्रहप्रदर्शनार्थंअथै

तानिबर्हिःसन्नहनान्यायातयतिदक्षिणायैश्रोणेरोत्तरादंसादिति।।एतानिविस्रंसितान्यस्यबर्हिषोधस्तात्तविद्यमानानि

बर्हिःसन्नहनानियद्यप्येकमेवबर्हिःसन्नहनंतथापिव।।बहुवचनंअवयवाभिप्रायंतथाचशुल्वंविस्रस्यशुल्वतृणानिदक्षि १३९

णायाःश्रोणेरारभ्यउत्तरांसपर्यंतंआयातयतिस्तृणाति।।अत्रद्वैधं।।शुल्वस्यायतनइतिसूत्रंबौधायनस्यशुल्वंविस्रस्यब

र्हिर्मुष्टिं स्तृणाति देवबर्हिः देवेभ्य इति तां बहुलां पुरस्तात्प्रतीचीं त्रिवृतमनति दृश्यं स्तृणातीति ॥ दक्षिणे वेद्यंते अथ स्तृणी
यादिति शालीकि रिति सूत्रं दक्षिणाये श्रोणेरोत्तरार्दं सादितिक स्य सूत्रं बोधायनस्य मतं शालीके स्तु अत एव प्रतीच्या एवा
रभ्य एनां प्राचीं प्रागपवर्गो धातुशः प्रतिधातु प्रतिपर्यायां स्तृणीयादित्यमितिभावः बर्हिषा वेदिं स्तृणाति च बहुलमनति दृश्यं प्र
गपवर्गं प्रसगपवर्गं चात्रिधातु पंचधातु वाग्रै मूलान्यभिच्छादयत्ति धानो धातौ मंत्रमावर्तयन्नीति सापस्तंबः ॥ अथ प्रस्तरपा
णिः प्राङ्भिस्य परिधीन् परिदधातीति स्पष्टं ॥ प्रस्तरं ब्रह्मणो यजमानाद्वा समादाये स्यर्थादवनं गेधारयन्नू प्रस्तरं परिधीन्
परिदधातीति हि ब्राह्मणं परिधानस्य प्रकारमेवाह ॥ गंधर्वो सि विश्वावसुर्विश्वस्मादीषतो यजमानस्य परिधीरिडई डित
इति मध्यममिंद्रस्य बाहुरसि दक्षिणो यजमानस्य परिधीरिडईडित इति दक्षिणं मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मण
यजमानस्य परिधीरिडईडित इत्युत्तरमिनीति मध्यममुदग्रं गे दक्षिणमुत्तरं च प्रागग्रं मध्यमसंस्पृष्टं च ॥ अत्रे द्वैधं ॥ परि
धिनां परिदान इति स ह स्माह बोधायनो ध्यस्ये दक्षिणमुपोहेदुत्तरमिति अनीकसंस्पृशनेवे नात्परिदध्यात् इति शालीकिरि

ति अध्वस्योद्दक्षिणं मध्यमस्योपरिस्थापयेत् उपोहेदुत्तरं मध्यमस्याधस्तात्कुर्यादिति बोधायन मः ॥शालीकिस्त्वाह॥अनीकसंस्पर्शने
नैनात् ॥अंतसंस्पर्शनेवनोत्तराधर्मेण विपरिधानस्य उभयथा विशेषाभावादिति॥आपस्तंबस्त्वाह॥ ॥प्रस्तरपाणिपाणिः
संस्पर्शान्परिधीन् [illegible] परिदधाति गंधर्वोसि विश्वावसुरित्येतैः प्रतिमंत्रमुरग्रं मध्यमं प्रागग्रवितरावाहवनी
यमध्यग्रं दक्षिणमेवाग्रमुत्तरमिति॥अथसूर्येणपुरस्तादुपदधाति सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्या इतीति॥हे आ
हवनीय पुरस्तात्पूर्वस्यां दिशि स्थितः सूर्यः कस्याश्चिदभिशस्त्याः सर्वस्या अपि हिंसाया त्वाः पातुकस्याश्चिदभिशस्त्या इत्याह
अपरिमितादेवैनं पातीति हि ब्राह्मणमिति मंत्रार्थं मनसा चिंतयन्सूर्येण पुरस्तात्परिदधातीति सूत्रं बोधाय हवनीयस्याह
वनीयमेवैतेन यजुषोपतिष्ठेतेति शालीकिरिति सूत्रं॥सूर्योत्रपरिहित इति सूर्याभिप्रायं कस्य सूत्रं बोधायनस्य मतं स्पर्शम
न्यत्र॥आपस्तंबोप्याह॥सूर्यस्त्वा पुरस्तात्पात्व साहवनीयमभिमंत्र्येति॥ऊर्ध्वे समिधावादधाति वीतिहोत्रं त्वा कवेद्युमंतं स
मिधीमह्यग्नेबृहंतमध्वर इति दक्षिणां तूष्णीमुत्तरामिति॥ऊर्ध्वा ऊर्ध्वाग्रे मन्यत्र॥अत्रेद्धं॥ऊर्ध्वे समिधावादधातीति सू १५०

त्रंबौधायनस्यसूत्रेऐवेने अन्याधायानुनिपातयेदितिशालीकिरिति॥ सूत्रंऊर्ध्वाग्रेएवआदधातीतिबौधायनस्यमतंशाली
केस्तुऊर्ध्वाग्रेप्रथमंनिधायअनुपश्चान्निपातयेत्। प्रागग्रेइति। अत्रभारद्वाजः। मध्येमेरूर्ध्वेआघारसमिधावादधातीति। अ
भ्याधायाथांतर्वेखुदीचीनाग्रेविधृती तिरश्चीसादयतिवेशोयंत्रेस्तुइति॥ आघारसमिधौअभ्याधायअंतर्वेदिवेद्यांविधृती
समावनंतर्गर्भौदर्भौविधृतीकुरुतइत्यापस्तंबः॥ तेचपरिभोजनीयेभ्योगृहीत्वा तिरश्चीउदीचीनाग्रेसादय। अत्रद्वैधं॥ वि
धृत्योःकरणइतिसूत्रमाचार्ययोरत्रोहस्माहदक्षिणाकारोराथीतरउभेऐवेतेव्यतिषज्येयातामितिमध्यमाङ्गातोरनंतर्गर्भे
दर्भेस्यातामितिऔपमन्यवइति। सूत्रअंतर्वेखुदीचीनाग्रेविधृतीतिरश्चीसादयतीतिकल्पसूत्रंआचार्ययोर्मतंअत्रमतेविधृ
तीपरिभोजनीयेभ्योग्राह्येअन्यत्रापिनियोगास्फक्तंदक्षिणाकारोराथीतरस्त्वाहएतेअंतर्वेदिरिश्चीसाद्यमानेउभेव्यतिष तिं
ज्येयातांव्यतिषक्तेदक्षिणोत्तराग्रेएवभवेतांएतस्मिन्मतेयत्तःकुतश्चिदाहरणंविधृत्योःऔपमन्यवस्तुमध्यमाङ्गातोर्वेद्यां
स्तीर्णानांबर्हिपर्यायाणांमध्येयोमध्यमोधातुर्मध्यमःपर्यायःतस्माद्देतेग्राह्येअनंतरगर्भेदर्भेअंतर्वेद्यमानोगर्भःअंतर्ग

र्भः नविद्यते अन्तर्गर्भो दर्भो दर्भयोस्ते अनंतर्गर्भ दर्भे स्यात्तां गर्भ दर्भे विधस्यर्थेन्न गृहीयादिति ॥ अत्र राथीतर मतेउदीचीनाग्रे
निदधाति प्रति छ्त्तिस्या इति ब्राह्मण विरोधः ॥ तथापि तत्रापि स्मुत्यं नर मूलमिति विकल्पोवगंतव्यः । विधृत्योः प्रस्तरं वस्त्न
ऽरुद्राणा मादित्यानाऽ सदसि सीदेतीति । विधृत्योः प्रस्तरं सादयती त्यनुषज्यते स्पष्टमन्यत् ॥ अत्रापस्तंबः ॥ अभिहृतत
राणि प्रस्तर मूलानि बर्हि र्मूलेभ्य इत्यापस्तंबः । प्रस्तरे जुहुं जुहूरसी घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीदेतीति ।
गतं । अत्र तस्मिन्देहे जुहोमि स्येवसिद्धे प्रस्तर इत्यधिकाक्षरग्रहणं प्रकर्षेण स्तीर्यत इति प्रस्तर इति यौगिकार्थ स्वीकारेण
शाखापवित्रसहिते सादना र्थं शाखा पवित्र सहितो हि प्रस्तरः प्रस्तीर्णतरो भवतीति ॥ अत्रेदं बोध्यं ॥ दोदन पवित्रस्य सादन इति
विस्त्रस्य प्रस्तर आसादयेदिति बोधायनो अविस्त्रस्य वेति शालीकिरिति । स्पष्टं । सशाखा पवित्रे प्रस्तरे जुहोमि तिकल्प
सूत्रेणार्था छाखा पवित्रस्य प्रस्तरे सादने सिद्धे अत्र विस्त्रस्या विस्त्रस्य वेति विकल्पो विहित इति बोध्यं । उत्तरा मुपभृ
सुपभृदसि घृताचीनाम्ना प्रियेण नाम्ना प्रिये सदसि सीदेति । उत्तरां ध्रुवां ध्रुवासि घृताचीनाम्ना प्रियेण नाम्ना प्रिये सदसि

सीदेतीति॥अत्रसूत्रद्वयेपिप्रस्तरइत्यनुवृत्तंप्रस्तरएवजुह्वाउत्तरामुपभृतंतत्रउपभृतउत्तरांध्रुवांतथाचापस्तंबः।जुहूर
सिघृताचीत्येतैर्मंत्रैरसमंस्पृष्टास्रुचःप्रस्तरेसादयतीति॥अथवाप्रस्तराउत्तराउत्तरामुपभृतंततउत्तरांध्रुवांप्रस्तरस्यव्यव
हितत्वेपितस्योत्तरशब्दापेक्षितत्वावधित्वोपपत्तेः।एवमेवखलुपक्षांतरमपिदृष्टं॥कल्पांतरेअपिवाजुहूमेवप्रस्तरेसमं
मूलेजुह्वादंडंकरोत्युत्तरेणजुहूमुपभृतंप्रतिरूपमुत्तरामिवाधस्ताद्धिधस्योरुत्तरेणोपभृतंध्रुवांप्रतिरूपतरामिरोपरिष्टाद्धि
धस्योरिति।अत्रजुहूरुपभृत्ध्रुवासीत्यादिमंत्रसमाम्नायतःतत्रासिघृताचीत्यादिमंत्रानुषंगेणमंत्रभेदोबोध्यः।अत्रद्वैधंस्रु
चांसादनइतिसहस्माहबोधायनईषत्प्रत्यवहृतानिवोपभृतंसादयेत्विधृतीभ्यांवैवैनामवगृह्णीयादित्यत्रोहस्माहशालीकि
रनुपूर्वाएवैनाःसादयेत्।नवोपभृतंविधृतीभ्यामवगृह्णीयादिति।ईषत्प्रत्यवहृतांईषत्प्रत्यगवरूढमिवउपभृतंसादये
त्।एनामेवविधृतीभ्यामवगृह्णीयाच्चेतिबोधायनःशालीकिस्तुएताअनुपूर्वाःसमानशिरस्काएवसादयेत्।नवविधृतीभ्या
मवगृह्णीयादिति।अथस्रुचःसन्नाअभिमृशसेताअसदन्सुकृतस्यलोकेताविष्णोपाहिपाहियज्ञंपाहियज्ञपतिंपाहिमांयज्ञ

सु॰ द॰ नियमितीति। स्रुचः सन्ना आसन्ना अभिमृशति एता असदन्निति। अत्र यद्यपि प्रतिप्रधानं गुणावृत्तिन्यायेन प्रति स्रुचं मंत्रावृत्ति प्राप्ता भ
१४२ वितव्यं तथापि मंत्रे एता असदन्निति बहुवचनेन सर्वासामपि स्रुचां युगपदेव प्रकाशनादेकैकाभिमर्शने च मंत्रलिंगविरोधात् सकृ
देव मंत्रमुक्त्वा सन्नाः सर्वा अपि स्रुचो अभिमृशेत्। अथ विष्णूनि स्थ वैष्णवानि धामानि स्थ प्राजापत्यानीत्याज्यान्यभिमंत्रय
त इति। अत्र मंत्रे बहुवचनाद्युगपदेव सर्वेषां स्थाल्याज्यसहितानामाज्यानामभिमंत्रणं। इत्थं बोधायनकृतसूत्रव्याख्या प्रद
र्शिता एकादशो त्रपटलः पूर्णोभूत् प्रयतां शिवः॥ अथाहृते दक्षिणेनाज्यस्थालीसस्रुवां सव्येन पात्रीं वेदमितीति। अथाहृत आ
ज्यस्थालीसस्रुवामिति कन्काववपि दक्षिणाचारेण कर्तव्यमिति सामान्यशास्त्रेणैव दक्षिणेनेति सिध्यति यद्यपि तथापि पात्री
वेदयोः सव्येन ग्रहणार्थं सव्येनेति कर्तव्यं एवं च सत्यत्र दक्षिणेनेत्युक्तौ सव्येनेत्याज्यस्थालीस्रुवयो रप्यन्वय आपद्येत त
न्मा भूदित्येतदर्थं दक्षिणेनेत्युक्तं। एतत्समादाय प्रदक्षिणमावृत्य प्रत्यङ्ङुदङ्ङुत्य जघनेन गार्हपत्यमुपविश्य पात्र्यां देधोपस्त १४२
णीनेस्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इती।

त्ति। एतत् आज्यस्थाल्यादिचतुष्टयसमादाय प्रदक्षिणमावृत्य प्रत्यङ्मुखो गत्वा प्रत्यक् गार्हपत्यस्योपविश्य गार्हपत्यमुत्तरेण प
श्चिमेन कपालानि वा पात्रीं निधाय तस्याः समीपे आज्यस्थाल्यादिकं निधाय पात्र्यां द्वेधोपस्तृणीते द्विविधमुपस्तरणं करोति स्योन
मिति। इदमुपस्तरणद्वयं पौर्णमास्यामाग्नेयाग्नीषोमीयार्थं सोमयाजिनः इंद्राय वैमृधाय चेति निर्वापे दर्शनेन वैमृधसद्भावे तु त्रे
धोपस्तृणीते अनिष्टो हि वैमृधः शाखांतरे वैमृध विधौ यदि निर्वपेत् त्वेव निर्वपेदिति यथ्कपबंधात् । अन्ने वस्तुत्रैद्वैधे स नित्यत्वा
पनाच्च पौर्णमासं वैमृधाभ्यां यजत इति प्रथमे प्रयोगे सूत्रेण संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपेदित्ति। शाखांतरेण च विभिन्नतं
त्रत्वे तु वैधे वोपस्तरणं अग्नीषोमीयस्याप्यभावे सकृदेवामावास्यायां द्वेधोपस्तरणं इदमुपस्तरणं सदनकरणमित्युच्यते सदनं क
रोमीति मंत्रलिंगात् । स्योनमिति कार्यं तस्मिन्सीदेत्यादिनोत्तरार्धेन तु प्रतिष्ठापनं कार्यं तस्यामृते प्रतितिष्ठेति प्रतिष्ठापन प्रकाश
कत्वात् । नर्च तस्य तस्मिंत्सीदेतित्तच्छब्दावगते सदनकरणमंत्रेकवाक्यताभंगः । लिंगविरोधे वाक्यबाधस्य युक्तत्वादिति न्याय
विदः । अयं त्वाचार्याणामाम्नायः सदनकरण एव कृत्स्नो विनियोक्तव्यः एकवाक्यत्वात् न चैवं वाक्येन लिंगबाधापत्तिः वाक्यस

सु०र०
१४३

हिनयानस्मिन्निति सर्वनामश्रुत्या लिंगबाधस्याभिप्रेतत्वात् अव्यवहितपूर्वशब्दोपात्तं हि सर्वनामश्रुत्याभिदधाति सदनकरणमंत्रै
कवाक्यतायां च तस्मिन्निति कृतं सदनमभिधातुं शक्यं प्रकृतत्वात् अतः सर्वनामश्रुत्यनुगुण्याद्वाक्यमंगीकृत्य श्रुतिविरुद्धं
लिंगं बाध्यत इति युक्तं नहि प्रतिष्ठापने विनियोगे सति कृतं सदनं प्रकाशयितुं शक्यं तस्य धृष्ट्यादानांगारापोहनादिबहुपदार्थ
प्रकाशकमंत्रव्यवहितत्वेन सर्वनामश्रुतिपथानारोहात् व्यवहितस्यापि तस्य परामर्शे लक्षणापत्त्या सर्वनामश्रुतिर्बाध्ये
ननच्चायुक्तं लिंगस्य तु नान्यं त्त बाधः कथं नाम त्वमस्मिं सीद त्वां तथा सदनं करोमीत्येवमर्थत्वात्। व्रीहीणां यवानां न नु कथं
व्रीहियवयोर्मंत्र इत्युच्यते यद्यपि मंत्रसमाम्नाये व्रीहीणां मेधेत्येव मंत्रः समाम्नातः तथापि शाखांतरे यवानां मेधेति स
माम्नानात् मंत्रद्वयस्यापि प्रकृत्यंस्य सर्वप्रयोगेषु सामर्थ्याभावात् व्रीहियवप्रयोगयोर्व्यवस्थया विकल्पेन प्रयोगार्थं उभा
वपि मंत्रौ दर्शयितुं व्रीहीणां यवानां मेधेति च प्रयोग इति। अथ धृष्टिमादाय दक्षिणस्य पुरोडाशस्यांगारानपोहतीदमहं
सेनाया अभीत्वर्यै मुखमपोहामीतीति। धृष्टिं उपवेषं तदभावे अन्यद्वा काष्ठमादाय तेन दक्षिणस्य पुरोडाशस्याग्नेयस्य १४३

द्वेनाभिवासयतीति विहितानंगारानपोहती [illegible]ति : अथैनं विदर्शयति सूर्यज्योतिर्वि
भाहि महते न इंद्रियायेतीति । अथ अंगारापोहनानंतरं एनं पुरोडाशं विदर्शयति दक्षिणं पुरोडाशं भस्मनाभिवास्येति विहितभ
स्मापोहनेन यथा प्रेक्षकाणां सम्यक्दर्शनं भविष्यति तथा करोति । वेदेन विराजसं कृत्वाभिघारयत्याप्यायतां घृतयोनिरग्नि
र्हव्यानुमन्यतां । खमंक्ष्व त्वचमंक्ष्व सुरूपं त्वा वसुविदं पशूनां तेजसाग्नये जुष्टमभिघारयामीति यद्देवत्यो वा भवतीति वे
देन विरजसं विगतं रजः धूलिः यस्मात्तथाभूतं भस्माच्छादनकृततरजःसंबंधरहितं शुद्धं कृत्वा अभिघारयत्याप्यायता
मिति यद्देवत्यो वा भवति यस्यै देवतायै निरुप्तः यद्देवत्यः देवता तादर्थ्ये यत् यत्प्रत्यया देवता यस्य पुरोडाशस्य भवति तां
देवतां तत्र चतुर्थ्यंतत्वेनोच्चार्याभिघारयति । अत्र हि वा शब्दो व्याप्त्यर्थे पुरोडाशो यद्देवत्यो वा भवतु तस्य सर्वस्याप्याग्नेय
पुरोडाशवद्देयान्वर्थे अभिघारणं यथा निर्वापे प्रतिपुरोडाशं मंत्रावृत्तिस्तद्वदत्रापीति ।। अथैनमुद्वासयति ।। शृतं उह्ला
ति जनिता मतीनामितीति एनं आग्नेयं पुरोडाशमुद्वासयति गृहीत्वा पात्र्यामभिघारिते प्रदेशे पुरोडाशमुद्वासयति स्थाप

मुं०द० यत्तिअभिदन्नपर्यावर्तयान्नत्तिसत्याषाढः॥अत्रैद्वैधं॥हविषामुद्वासनउत्सग्रेणानुद्वासीत्तानिजघ्यनेनोद्वासित्तानीत्तिबोधाय
१४४ नोजघनेनानुद्वासितान्यग्रेणोद्वासितानीत्तिशालीकिरपच्छेदमिस्रोपमन्यवइत्ति।अग्रेणानुद्वासित्तानिएनपायोगेद्वितीयाए
कंजघनेनोद्वासित्तानीत्यत्रापिगार्हपत्यादुत्तरतःपात्रींनिधायदक्षिणंपुरोडाशंअनुद्वासितानांहविषांपुरस्तान्नीत्वापात्र्यां
दक्षिणत्तो निरध्यात् ततोद्वितीयमपिअनुद्वासितानांपश्चान्नीत्वा पात्र्यांनिहित्तथात्तितत्तो द्वितीयंपुरोडाशंतदतिरिक्तंपु
रोडाशनामग्रत्तोनीत्वापात्र्यांस्थितस्यपश्चांनीत्वाउत्तरतस्तस्यासादनं एवमांतादितिबोधायनःशालीकिस्त्वाह।दक्षिण
पुरोडाशमनुद्वासितानांपश्चादुत्तरत्तोनीत्वापात्र्यांदक्षिणत्तो निरध्यात्तत्तो द्वितीयमपिअनुद्वासित्तानांपश्चान्नीत्वाप
त्र्यांनिहितस्याग्रेणनीत्वात्तस्योत्तरतोनिरध्यादेवमांता दिति।औपमन्यवस्तु अपच्छेदंपरस्परपूर्वापरसंबंधरहितंउद्वा
सिनमितिपश्चादनुगार्हपत्यस्यपात्रीं निधायततोयथाक्रमंयथास्थितान्येवप्रसगपरुष्यसादयत्तीत्ति।आज्येनसुसंत १४५
र्पयत्याद्ईः प्रथस्तुर्भुवनस्यगोपाइत्तीत्ति।आज्येनस्रुवगृहीतेनपुरोडाशमुपरिष्टात्स्रुसंतर्पयतिस्वक्तं करोति।अत्रापस्तंबः।

स्रुवेण पुरोडाशमनक्ति स्वक्तमकूर्मपृषंतमपरिवर्गमनतिकाषमिति। उपरिष्टादभ्यज्याधस्तादुपानक्ति यस्त आत्मा पशुषु प्रविष्टस्तमं
ध्रुवेतीति। उपरिष्टात्पुरोडाशमभ्यज्य सुसंन्नसंकृत्वा अधस्तात्पुरोडाशमुपानक्ति हस्तेन अधस्तात् पुरोडाशमुमानक्ति हस्तेन अध
स्तात् स्रुवेणोपांजनासंभवात्। अपर्यावर्तयन् पुरोडाशमुद्वासयतीतिकल्पांतरे पर्यावर्तननिषेधाच्च आह च सत्याषाढः उपरिष्टा
दभ्यज्य स्रुवेण हस्तेनाधस्तादुपानक्तीति। एवमेवोत्तरं पुरोडाशमुद्वासयतीति। अथ धृष्टिमादायेत्यादिना उक्तेनैव प्रकारेणोत्तरं पुरो
डाशं पौर्णमास्यामग्नीषोमीयं सोमयाजिनः अमावास्यायामैंद्रं सन्नयतो महेंद्रं वा यदि महेंद्रयाजी भवति ऐंद्राग्नमसन्नयत उद्वास
यति अत्र एवमेवेत्यतिदेशेन मंत्रस्याप्यतिदेशो सिद्धेपि अभिघारणे यद्देवसो वा भवतीति मंत्रस्थमग्नय इति पदं अग्नीषोमीयादीनामु
त पलक्षकमिति प्रदर्शनार्थमिति द्रष्टव्यं। अथ शृतं मथरधाति। अत्र एवं शृतमेवं दधीत्यनतिदेशात् दधिशृतयोस्तूष्णीमुद्वासनं अ
र्थेस्यारंभात् यथाप्राप्तमभिघार्य उद्वासयति पुनरभिघारयति च। अथ सान्नाय्ये अलंकरोति यस्त आत्मा पशुषु प्रविष्टो देवानां वि
ष्ठामनुयो वितस्थे। आत्मन्वांत्सोम घृतवान्हि भूत्वा देवान् गच्छ सुवर्विंदयजमानाय मह्यमितीति। सान्नाय्ये दधिशृते अलंकरोति
नू

सु०द०
१८५

स्यसत्त्वआन्यस्रुवेणाभिघारयतियस्त्वआत्मेतिप्रतिसान्नाय्यंमंत्रावृत्तिः।प्रत्यङ्यकपालान्युद्वासयतीराभूतिःपृथिव्येरसोमोक्रमीरिति
संख्यापोद्वासयतियजमानस्यगोपीथायेतिब्राह्मणमिति।कपालानिप्रत्यञ्च्याङ्येनाकाउद्वासयतिकपालोपधानस्थानादुद्वासान्य
त्रस्थापयतिइराभूतिरितिएकंद्वेत्रीणीत्येवंसंख्यायाउद्वासयेत्तु।यद्येकंकपालंनश्येदेकोमासःसंवत्सरस्यानवेतस्यादथयजमानः
प्रमीयेतइत्यादिनाप्रोक्षितस्यकपालस्यनाशेप्रत्यवायंप्रतिपाद्याप्रमादार्थंसंख्यायोद्वासयतियजमानस्यगोपीथायेतिहिब्राह्म
णंवदतीतिप्रागुद्वासनात्प्रोक्षणादूर्ध्वंनाशेविहितप्रायश्चित्तस्मरणार्थंब्राह्मणग्रहणंअत्रप्रत्यङ्यकपालमित्येकवचनप्रयोगेपि
ग्रहैकत्वाधिकरणन्यायेनकपालैकत्वस्याविवक्षितत्वेनसर्वेषांकपालानामेजनंसिध्यतितथापिसर्वेषांयुगपदेजनार्थंयुगप
देवोद्वासनार्थंचबहुवचनंउद्वासनेमंत्रःआनंतर्यात्प्राधान्याच्चप्रतिगणमावर्तेतमंत्रःप्रतिप्रधानंगुणावृत्तेःकेचित्तुप्रत्येकंक
पालानामेजनंयुगपदशक्यत्वात्मंत्रस्यैजनेप्राथम्यात्आवर्तनेचमंत्रइत्याहुः।तथाचसत्याषाढः।इराभूतिःपृथिव्येरसो॰॰मो १८५
क्रमीदितिएकैकशःकपालान्यभिघार्यसंख्यायोद्वासयतीति।अत्रेदंध्येयं।प्रत्यंजनइतिसहस्माहबोधायनउभयानिप्रत्यञ्च्यान्व

रूणामाशयान् कपालानि वेति कपालान्येवेति शालीकिरिति। प्रसंजनविषये प्रकारं बोधायन आह उभयानि प्रत्यज्यात् कानि तानि त्य
न आह चरूणामित्यादि चरूणां चरुस्थालीनां तासामेवोद्वासनात् आशयान् अधिकारणानि पाकस्थानानि चरूणामेवाशयान् चरुस्थाली
रित्यन्ये। ततो हविष उद्वासनाभावेपि अदृष्टार्थत्वाविशेषेण कपालेष्विव तत्राप्यभिघारणस्य युक्तत्वादिति कपालान्येवेति शालीकिरि
ति। कपालोद्वासने द्वैधं। कपालानामाध्वर्यवे विमोक इति उद्वास्य हवींष्यत्राचार्यो विमुंचतो भक्षयन्नेव भक्षाणां पारे कपालानि विमुंचे
दित्यौपमन्यव इति। कपालानां विमोको यजमाने नापि कर्तव्यो विहितोस्ति काले कपालानि मुंचती तियदाध्वर्युः कपालानि विमुंचति
तदा कर्तव्यः। तथा च तत्र आध्वर्यव इति पक्षत्वाध्वर्यवः कपालानां विमोकस्तस्य काले विकल्प उच्यते उद्वास्य हवींषि हविषामुद्वासनानं
तरं अत्र हविरुद्वासनानंतरमेव यद्यप्ययमर्थ उद्वास्य हवींष्येनावेतेव सिध्यति तथापि अस्यदीये ब्राह्मणे अभिघार्योद्वासयतीति ह
विरुद्वासनविध्यनंतरमेव यच्चैकं कपालं मध्ये इत्यादिना उपक्षिप्य संख्यायोद्वासयतीति विहितं कपालोद्वासनमत इदमेव युक्तमि
ति सूचयितुं अत्रेति सर्वनाम्ना निर्दिष्टं आचार्यो शालीकिर्बोधायनो विमुंचतः कपालानी त्यौपमन्यवस्त्वाह भक्षयन्नेव कपालानि वि

सु॰द॰ मुच्यं यजमानभक्षयेदिति अथवा भक्षणांसर्वेषांपारे अनंतरं यजमानभागप्राशनानंतरमितियावत् वाशब्दाभावेपिविरोधमाशङ्क्याह कल्पः॥
१८५ अथैनं स्रुवमाज्यस्य पूरयित्वांतरेण पुरोडाशाववदधातीति। आज्यस्य आज्येन स्फुटमन्यत्। अथैनानि संपरिगृह्योत्तरवेद्यामासादयति भूर्भुवः सु
वरित्येताभिर्व्याहृतिभिरिति। एतानि पात्र्यां निहितानि सस्रुवाणि दधि शृतं च सम्यक् यथास्कंदनादिदोषो न भविष्यति तथा परिगृह्य पात्रीं
सान्नाय्यस्थाल्यौ च परितो गृहीत्वा अंतर्वेदि वेद्यामासादयति स्थापयति भूर्भुवः सुवरिति व्याहृतिभिः हविरासादनस्य हि दर्शपूर्णमासौ चा
तुर्मास्यान्यालभमान एताभिर्व्याहृतिभिर्हवींष्यासादयेदिति संवत्सरे पर्यागत एताभिरेवासादयेदिति च ब्राह्मणं मूलं तस्य च याजमा
नसूत्रे आचार्यैरर्थो दर्शितः॥ अथ वै भवति दर्शपूर्णमासावालभमान एताभिर्व्याहृतिभिर्हवींष्यासादयेद्यज्ञमुखं वै दर्शपूर्णमासौ त्र
य्येता व्याहृतयो यज्ञमुख एव ब्रह्म कुरुते संवत्सरे पर्यागत एताभिरेवासादयेत् ब्राह्मणेवोभयतः संवत्सरं परिगृह्णातीति ब्राह्मणमि
ति एवं च इदं व्याहृतिभिर्हविरासादनं दर्शपूर्णमासयोरारंभे पुनः संवत्सरे पर्यागते च नान्तरालेन ततऊर्ध्वं अथ वा संवत्सरादौ संव
त्सरांते न तु नित्यं व्याहृत्यासादनमिति केचित् अन्ये तु अध्वर्यवं हविरासादनं व्याहृतिभिः शाखांतरे समाम्नातं न तु याजमान १८५

॥कांडे तत्रतु ब्राह्मणे सूत्रे च याजमानमेव विहितं तस्य च प्रागुक्तः प्रकारः अध्वर्यवं तु नित्यमेवानुष्ठेयं आरंभे संवत्सरादौ च अपिवासं
वत्सरादौ संवत्सरादौ अध्वर्युयजमानौ सह कुर्यातामिति। अत्र भारद्वाजः। चतुर्होत्रा पौर्णमास्यां हवींष्यासादयेत् पंचहोत्रामावास्यायां
भूर्भुवः सुवरिति प्रथमायां पौर्णमास्यां संवत्सरे पर्यागत एताभिरेवासादयेत्। प्रथम एव संवत्सर इत्याश्मरथ्यः संवत्सरे संवत्स
र इत्यालेखन इति। आसादनप्रकारमेवाह मध्यतः पुरोडाशावासादयति दक्षिणतः शृतमुत्तरतो दधीति मध्यतः पुरोडाशावासादय
ति स्रुवां पश्चात् तथाचापस्तंबः। अपरेण स्रुचः पुरोडाशावासादयति दक्षिणमाग्नेयमुत्तरमितरं मध्ये वेदेः सान्नाय्यकुंभौ संधाय
न्यूहति दक्षिणस्यां श्रोण्यां शृतमुत्तरस्यां दधीति। अथैनं स्रुचमग्रेण स्रुचः पर्याहृत्य दक्षिणेन जुहूं प्रस्तरे सादयति स्योनो मे सीद सुषदः
पृथिव्यां प्रथयि प्रजया पशुभिः सुवर्गे लोके दिवि सीद पृथिव्यामंतरिक्षे हमुत्तरो भूयासम धरे मत्सपत्ना इतीति। गतं। अथैनं यथाहृतं
प्रतिपर्याहृत्य ध्रुवायामवदधाति एष भोमिशाकरो धत्ताचीनां स्रुनुः प्रियेण नाम्ना प्रिये सरसि सीदेतीति। स्पष्टं। बोधायनरुद्रदत्तस्यासो
वृत्तिः सूत्रस्य तायते। द्वादशः पटलो दृष्टः प्रीयतां मे सदाशिवः॥ खंडः॥ ३४॥ अथेध्मा समिधमादधान आहाग्नये समिध्यमानायानु

सुं०द०
१८७

ब्रूहीति।अथहोत्रामंत्रणप्रपदनानंतरंअत्रयद्यपिअथशब्दस्यकृतवायांश्चव्यवधानानंतर्यमर्थइतिवक्तुंयुक्तंतथापिहोतुरामंत्रणप्रपद
नाभ्यांपूर्वमपिकदाचित्तुचावधानानंतरमेवसंप्रेषआपद्येततच्चानिष्टंहोत्रप्रकरणेहवींष्यासाद्यहोतारमामंत्रयतइतिसूत्रितत्वात्तया
कर्मांतेअथाध्वर्योश्चहोतुश्चप्रपदनमंतरेणावेद्युत्करौभवतिप्राङ्गवृत्तोध्वर्युःप्रत्यगावृत्तोहोताध्वर्युरंतरोग्नेःस्यादितिसूत्रेणहोतृप्र
पदनानंतरंअयंसंप्रेषइत्सवगमाच्चकर्मांतेहिसूत्रेअथहोतुरामंत्रणानंतरमध्वर्योश्चहोतुश्चप्रपदनंप्रवेशःकार्यःअंतरेणवेद्युत्करौहो
तुःप्रवेशकालेसमिदाधानार्थंप्राङ्वृत्तोध्वर्युराहवनीयमभिगच्छतितस्येदानींतदेवस्वस्थानंप्रतिप्रपदनंहोतानुप्रागावृत्तेःस्वस्थानंप्र
पद्यतेनदाध्वर्युरंतरोग्नेर्होत्रपेक्षयास्यादित्युक्तंएवंचहोतुरध्वर्योश्चयुगपत्प्रपदनविधानात्आहवनीयसमीपप्राप्त्यनंतरभावि
त्वात्समिधमादधानआहेतिविहितस्यसंप्रेषस्यआर्थाद्धोतृप्रपदनानंतर्यंसिध्यतीतिएवंचात्रहोत्रामंत्रणप्रपदनानंतरमेवाथश
ब्दार्थोइतिप्रसंगभंगार्थमितिवक्तव्यमितिइध्मात्इध्मकलापात्एकविंशतिमिध्मदारूणीत्यत्रइध्मांश्चदारूणिचतानिइध्म १८७
दारूणीतिविग्रहेणप्रत्येकंसमिधीध्मशब्दस्यमुख्यावृत्तिःतथाचयजमानेइध्ममभ्याधीयमानमनुमंत्रयतइतिसमिध्येवेध्मश

ब्दः प्रयुक्त आचार्येण यद्यपि न तथापि समिधः समिदादानासंभवात् कल्पाप इह लक्ष्यते आदधानः इध्ममभ्यादधानइत्युपदेशः आ
ह संप्रेष्यन्ति अग्नये समिध्यमानायेति अस्य संप्रैषस्य मध्यमस्वरः सामिधेन्यंगत्वात् प्रैषस्य तासां चयदंतरा तत्सदेवमिति ब्राह्म
णेनांतरा स्वरविधानात् होतृप्रत्ययेन मंद्रस्वरो वा। अथ यत्र होतुरभिजानाति नो प्रचो वाजा अभियवइति तत्प्रथमामभ्यादधा
ति प्रणवे प्रणवेभ्यादधात् अथ यत्र होतुरभिजानाति समिद्धो अग्न आहुतेति तदंततोभ्यादधाति परि समिधं ज्ञिनष्टीति। यत्र हो
तुः सकाशादभिजानाति प्रवो वाजा अभियवइति तत्प्रथमां सा होत्राउच्चार्यमाणा प्रवो वाजा अभियवइत्ति ऋक् प्रथमाइध्मा धान
स्याविशेषारंभः यस्याः सा तत्प्रथमा समित् तां तत् प्रथमां विधेयमिदं विशेषणं समिधमभ्यादधातीति यत् तत् तत्प्रथमां
अभ्यादधातीति तत आरभ्येति यावत्तनाम्न चमारम्पकदा समिधमादध्यादित्यत्त आह अथे सादि यत्र यदा होतुरभिजानाति
समिद्धो अग्न आहुतेति तदंततः तस्या अंतः प्रणव एवांतो यस्याः सा तदंता समित् तां तदंतां मिसर्थः द्वितीयार्थेत्तसिः इदमपि वि
धेयविशेषण समिद्वत्साः प्रणवेन शिष्टां समिधमादध्यात् समिधं एकां समिधं नु परिशिनष्टि परिशेषयेत् एवं च प्रथमायां नि

सु०र० स्त्रः समिधः ततोऽष्टस्वेकैकाः ततः समिधवत्यां चतस्र आदध्यात् अथमेवपं चदशेध्म दारूण्यभ्यादधातीति अनूयाजेभ्यः समिध
१८९ मतिशिनष्टीति च ब्राह्मणस्यार्थ इति केचित् प्रणवे प्रणवे प्रणवेभ्यादधातीत्यनेनैव सिद्धेत्तप्रथमामिति अर्थर्चेपि प्रथमायांस
मिदाधानार्थमिति वदंतितेषां मते प्रथमायां षट् प्रणवेन समित्स्थवत्यामंततः समापनमिति अपरे तु अथ यत्र होतुः प्रवो वाजा अ
भिद्यवइति शृणोति ततदा प्रथमां समिधमभ्यादधाति अथ प्रणवे प्रणवेभ्यादधाति अत्र यत्र होतुर्मुखात्समिध्यो अग्न आहुतेति
शृणोति ततदातिस्त्रः समिधोंततो भ्यादधाति परिसमिधं शिनष्टि प्रयोग मात्रम तेनअयं प्रयोगो भाष्ये केशवस्वामि कृतेषु प्रयो
गेषु नदृश्यत इति। समिदाधानांगं सामिधेन्यः लिंगात्समाख्यावशाच्च समिधामाधाने रेण्यण् इति व्याकरणेन समिदाधानो मं
त्रः सामिधेनीति सामिधेनी शब्दनिष्पत्तेः इध्म संख्यानुसारेण सामिधेनी संख्या यान्याय्यत्वेपि अस्तु सामिधेनी ध्मं कुर्यादिति
बोधायनो परिमितमिति शालीकिरिति सूत्रे या सामिधेनी संख्यानुरोधेनैव इध्म संख्याकरणमिति। अथ यत्र होतुरभिजाना १८९
ति आजुहोताउवस्यतेति तिनदा एतेन पुरोडाशं विरजसीकृत्स्थापितेन वेदेन दर्भमुष्टिना आहवनीयं त्रिः त्रिवारं उपवाजयति प्र

गपवर्गवेदेनेतित्तृतीययावीजनंप्रतिगुणभावोवगम्यत्तेएतेनेतिसर्वमाम्नायतंत्रत्वंवेदस्यावगतंअत्रप्रणवइतिरतंआजुहोतेसा
रंभकालएववीजनंअनूक्तास्विसाधारेकालोपलक्षणाययत्नकरणात्प्रणवेप्रणवइसनुवृत्तोनुउपवाजयत्वथध्रुवाज्यादित्य
वक्ष्यत्त्नखलुआजुहोतेत्यंतिमप्रणवेउपवाजनानंतरंविलंवोस्याधारस्ययेनानूक्तास्वितियत्नंकुर्यात्कालोपलक्षणायेति।।
अनूक्तासुसामिधेनीषुध्रुवाज्यात्स्रुवेणोपहस्तवेदेनोपयम्यप्राजापत्यंतिर्यचमाधारयतिप्रजापतयेस्वाहेतितूष्णीमिति।
सामिधेनीषुसमिदाधानेकरणीभूतास्रक्षहोत्रानुक्तासुसामिधेन्यंतिमप्रणवानंतरंध्रौवाज्यात्ध्रुवायांभवंध्रौवंतच्चाज्यमि
तिध्रौवात्स्रुवेणेत्येवसिद्धेआज्यग्रहणंआज्यस्यसर्वार्थत्वेस्फोरणार्थंसर्वार्थत्वाज्यंअत्तएवप्रजापतिर्देवेभ्योयज्ञान्यादिश
न्सआत्मन्नाज्यमधत्तरंदेवाअब्रुवन्नेषवावयज्ञोयदाज्यमप्येवनोत्रास्त्विवितिब्राह्मणेएषवावयज्ञइतिसाक्षात्परंपरयाचा
ज्यस्ययज्ञसाधनत्वमवगम्यत्तेअत्तएवचाज्यंजुहुयादविशेषोनादेशइतिकल्पांतरंजुहोतीतिचोद्यमानेसर्पिराज्यंप्रतीयादिति
चआज्यात्स्रुवेणेत्येतावत्युक्तेस्रुशल्याज्यादपिकदाचिदाधारायग्रहेत्ततन्माभूदितिध्रौवग्रहणंएतच्चज्ञापकंसर्वार्थध्रौ

वमित्यस्य सर्वस्मै वा एतद्यज्ञाय गृह्यते यत् ध्रुवायामाज्यमिति ननु प्रजापतिर्देवेभ्यो यज्ञान्व्यादि॰ शदिति ब्राह्मणे अप्येवं नो त्रास्त्विति
देवाना मुक्त्यनंतरं सोत्रवाद्यज्ञान्व आज्यभागावुपस्तृणा नभिधारयानिति प्रजापतिवाक्य पर्यालोचनया आज्यभागोपस्तरणाभि
धारण मात्रार्थत्वावगमात् एषवाव यज्ञ इत्यस्यापि आज्यस्याज्यभागोपस्तरणाभिघारण मात्रार्थत्वेतात्पर्यमिति चेन्नयज्ञान्व आ
ज्यभागा वित्यादेः आज्यभागौ यजेत् उपस्तृणीयात् अभिघारयेत् अन्यच्च यद्द्रव्यापेक्षं यज्ञकार्यं न सर्वं आज्येन साधयेदित्येवं प्रद
र्शनार्थत्वात् एवं च उपांशुयाजादिषु ध्रौवमेवाज्यमिति सिद्धं भवति सं आत्मन्नाज्यमधत्तेति ब्राह्मणे आज्यशब्दस्योपांशुयाजदे
नाप्रजापतिपरत्वात् ध्रौवाज्यमुपांशुयाजार्थमेव तदर्थादेव ध्रौवात्सर्वयज्ञार्थमाज्यग्रहणं अयमेव सर्वस्मै वा एतद्यज्ञायेति
श्रुत्यर्थः एवं स्थितेपत्नीसंयाजादिषु स्थाल्याज्यग्रहणे मूलं श्रुत्यंतरं द्रष्टव्यं स्रुवेणोपहत्याघारयतीत्यन्वयः तेन जुह्वानिवृत्तिः
अन्यथा आघारस्यापि यागत्वान्यत्रेव जुहूरेव प्रसज्येत उपहत्याज्यं गृहीत्वेदेनोपयम्य वेदेनाधस्ताद्योजयित्वा आघारमाघा | १८९
र यत्ति आघारनामकेन कर्मणा इष्टं भावयेत् ननुतमाघारकथं कुर्यादित्यत्त आहतिर्यंचमिति दक्षिणस्य परिधेर्मध्यदेशमुपलक्ष्य

त्वा

आहवनीयेतिर्यंचंआंताद्उत्तरस्य परिधेर्मध्यदेशाभिमुख्येनकुर्यात्। तूष्णीमिति करणव्यापारनिरस्यर्थं मंत्रस्त्कमानसः तस्मान्म
नसाप्रजापतयइतिवचनादिति भावः देवता परिज्ञानार्थमाह प्राजापत्यमितिन थाचप्रजापतिमुद्दिश्यद्रव्यसागोत्रकर्तव्यइति ध्येयं।
आसीनआघारयत्। आसीनो न्यमाघारमाघारयतितिष्ठन्नाज्यमिति ब्राह्मणेस्तौवाघारेआसन विधानात्। आपस्तंबस्त्वाह स्रुवेणध्रु
वाया आज्यमादायवेदेनोपयम्यासीनउत्तरंपरिसंधिमन्ववहृत्य प्रजापतिंमनसाध्यायन्दक्षिणाप्रांचमृजुंसंततंज्योतिष्मत्याघारमा
घारयन् सर्वाणीध्मकाष्ठानिसंस्पर्शयसाघारयोर्वरत्सज्जू प्रांचौ होतव्यौ तिर्यंचौवाप्रतिषक्तावव्यतिषक्तौ वेतिब्राह्मणे अयो
सामिधेनीरेवाभ्यनक्तीतिसामिधेनीकाष्ठानामभ्यंजनं विहितं सूत्रितं चापस्तंबेनआघारमाघारयन्सर्वाणीध्मकाष्ठानिसंस्पर्शय
नीति ध्येयं। अत्रद्वैधं। आघाराविति सूत्रं बोधायनस्याभिषूव्यतिषक्तौस्यातामितिशालीकिरिति। आघारौकथंकर्तव्याविसत्राच्य
ते सूत्रेतिर्यंचमाघारमाघारयतीति। अन्वारब्धेयजमानेमध्यमेपरिधौ संस्पृश्यऋजुमाघारमाघारयतिसंततंप्रांचमव्यवच्छिंदन्निति
चकल्पसूत्रं बोधायनस्यमतं शालीकिस्त्वाह। अभिषूद्वव्यतिषक्तौ अभिषूव्यतिषक्तौ कोणयोरारभ्य कोणांतो अभिमुख्येन स्रुवाते

स

सु०र० प्रवर्त्तते इत्यभिषूरत्मी तद्वदित्यर्थः। अथ संप्रेषमाहाग्नीदग्नीं स्त्रिस्त्रिः संमृड्ढीति। हे अग्नीन् अत्र संमार्जनीयस्याग्नेरेकत्वेपि बहुव
१५० चनं परिध्युपसंग्रहार्थं अग्निमाहवनीयं परिधींश्चेत्यर्थः उपरिसूत्रे तेषामेव संमार्गविधानात्। गतमन्यत्। अत्रेद्वैधं। संप्रेषइत्य
ग्नीदग्नीनिति बोधायनोग्निमग्नीदिति शालीकिरग्निं परिधींश्चाग्निंचेत्यौपमन्यवइति। स्पष्टं। अग्निमग्नीदित्यस्य मूलमस्म
दीयाशाखाइतरयोः शाखांतरमिति। अथैष आग्नीध्र इध्मासंनहनानि स्फ्य उपसंगृह्य परिधीं संमार्ष्टि त्रिर्मध्यमं त्रिर्दक्षिणा
र्ध्यं त्रिराहवनीयमुपवाजयत्यग्ने वाजजित्वा जंत्वाग्ने सरिष्यंतं वाजं जेष्यंतं वाजिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निमन्नादम
न्नाद्यायेतीति। एष संप्रेषेण संबोधित अग्नीध्रः इध्मः संनहनैः स्त्वानि स्फ्य उपसंगृह्य उपश्लिष्य परिधीं संमार्ष्टि संमा
र्जनस्य प्रकारमाह त्रिर्मध्यमं त्रिः संमृज्यात् ततो दक्षिणं त्रिः संमृज्यात् ततउत्तरं त्रिः संमृज्यात् ततस्त्वाहवनीयं त्रिरुपवाजयति अ
ग्ने वाजजिदिति इदमुपवाजनमेवाग्नेः संमार्जनं आपस्तंबस्त्वाह। अग्नीत्परिधींश्चाग्निंच त्रिस्त्रिः संमृड्ढीति संप्रेष्यत्तीध्मसंन १५०
हनैः सहस्फ्ये कृत्ते स्फ्येर्वाग्नीध्रोतु परिक्रामं परिधीन् यथापरिधित्तमन्वग्रं त्रिस्त्रिः संमृज्येति त्रिरग्नीं प्रांचमिति च मध्य

मं परिधिसंमार्जनेउदगपवर्गत्वस्यदक्षिणोत्तरपरिध्यग्नीनांच संमार्गे प्रागपवर्गत्वस्यचउत्सर्गसिद्धतयानुस्मृत्रितमाचार्ये
रिति। अथाग्रेणजुहूपभृतौप्रांचमंजलिं करोतिभुवनमसिविप्रथस्वाग्नेयष्टरिदंनमइतीति। जुहूपभृतौअग्रेणप्रांचंप्राग
ग्रंअंजलिंसंपुटंनमस्कारांजलिंमंत्रलिंगात्। अग्नेयष्टरिदंनमइत्साह। अग्निर्वैदेवानांयष्टा। यएवदेवानांयष्टा। तस्माएव
नमस्करोतीतिब्राह्मणाच्चनतावदत्राको ग्रोंजलिः अंजलिनाजुहोतीत्यादावेवतस्योपादेयत्वात् गत्तमन्वत्। अथादत्तेदक्षि
णेनजुहूं जुह्वे ह्यग्निस्त्वाह्वयतिदेवयज्यायाइतीति। सव्येनोपभृतमुपभृदेहिदेवस्त्वासविताह्वयतिदेवयज्यायाइतीति।
स्पष्टं। सव्येनात्साक्रामंजपत्यस्मान्विष्णूमावामवक्रमिषंविजिहाथांमामासंतासंलोकंमेलोककृतौकृणुतमितीति। स
व्येनवामेनपादेनदक्षिणेनप्रसाक्रमणंगत्तमन्यत्। अत्रेदृधं। असाक्रमणइतिसव्येनप्रदास्यन्नसाक्रामेत्कुत्वामुत्तो
दक्षिणेनेतिवोधायनोदक्षिणेनेतिप्रदास्यन्नस्याक्रामेत्कुत्वामुत्तःसव्येनेतिशालीकिरिति। प्रदास्यन्होमंकरिष्यन्
सव्येनवामपादेनासाक्रामेत्। गच्छेत्कुत्वाहोमानंतरंअमुत्तःहोमस्थानादागच्छन्दक्षिणेनपादेनासाक्रामेत्। आ

सु०द० गच्छेदितिबौधायनःइदंगार्हपत्यंहवींषिचप्रत्यग्व्यावृत्त्यर्थंएतत्अत्याक्रमणंप्रत्याक्रमणंचसर्वत्रइत्थमेवकुर्यात्तृतीयप्रका
१५१ राभावात्।स्थानंकल्पयतिविष्णोःस्थानमसीतीतिआहवनीयस्यदक्षिणतोहोमार्थंस्थानंकल्पयतीतिसंप्रदायः।अन्वारब्धे
यजमानेपरिधौसंस्पृश्यजुह्वामाघारमाघारयतिसंततंप्राञ्चमव्यवच्छिंदन्निति।इंद्रोअरुणोद्वीर्याणिसमारभ्योर्ध्वोअध्वरोदिवि
स्पृशमह्रुतोयज्ञोयज्ञपतेरिंद्रावान्त्स्वाहेतीतिअन्वारब्धेयजमानेकर्त्तरिक्तः।यजमानेजुहूमन्वारभमाणेयजमानेमध्यमेपरिधौ
जुहूंसम्यक्स्पर्शयित्वाऋजुंअवक्रंसंततंछेदरहितंसंततमित्यनेननैवाविच्छेदेसिद्धेपिअविच्छिंदन्नितियदिमध्येकश्चिच्छेदस्या
त्तदोततआरभ्यैवपुनराघारणेपिसांततंसिद्धंतन्माभूत्आदितआरभ्यैवाविच्छेदोयथास्यादित्येवमर्थंअविच्छिंदन्संन्प्राचं
प्रागपवर्गंअग्नेर्ज्योतिष्मतीतिकल्पांतरं।आघारंद्वितीयेनाघारनामकेनकर्मणाइष्टंकुर्यात्इ।तौइति।रहद्वाइतिस्रुचमुद्गृह्य रं द्र
नीतिःयत्तत्र्हद्वाइति।अथासंस्पर्शयन्स्रुचावुदङ्ङुत्साक्रामंजपतिपाहिमाग्नेदुश्चरितादामासुचरितेभजेतीति।स्रुचौ १५१
जुहूपभृतौअसंस्पर्शयन्उदङ्ङुत्साक्रामंजपतिपाहिमाग्नइति।अत्रासंस्पर्शयन्निस्यक्तेःअत्याक्रमणेआघारदन्यत्रप्रत्याक्रमणे

चस्रुचोः सोकर्यार्थसंस्पर्शे दोषोनास्तीतिगम्यतेत्तत्रकल्पांतरे प्रकारउक्तः मुखतो भिहृत्य मुखतपोउे वहरतिसर्वत्रैवमत्याधानेौ
पावहरणेभवातइति । अथजुह्वाध्रुवांसमनक्तिमखस्यशिरोसिसंज्योतिरिं त्वामितित्रिरिति । जुह्वाजुहूपभृत्तेनाज्येन ध्रुवांध्रौ
यमाज्यंसंज्योतिषाज्योतिरंत्वामितिलिंगात्तज्योतिः शब्दवेदेअज्येप्रयोगत्रा चुर्यात्तसमनक्तिसमंजनेनसंस्करोतिसकृन्मंत्रेण
द्विस्तूष्णीमिति । अथयथायतनंस्रुचोसादयित्वाप्रवरंप्रवृणीतउत्करइध्मसन्नहनानिस्यउपसंगृह्यपृष्ठमाग्नीध्रोनुपश्लिष्य
त्यधाश्रावयत्योश्रावयास्तुश्रोषउग्निर्देवोहोतादेवान्यक्षद्विद्वांश्चिकितन्मनुष्वद्भरतवदमुवदमुवद्ब्रह्मण्वदेहवक्षतब्राह्मणाअ
रंप्रव्रियत्तेक्रियत्तेदर्शपूर्णमासादिषितिप्रवरः ऋषिगणः पंचार्षेयत्र्यार्षेयद्यार्षेयैकार्षेयरूपः तंप्रवृणीत्तेअथातःप्रवरानूव्या
ख्यास्यामइतिसूत्रोक्तप्रकारेणगोत्रर्षित्वेनोपाख्यानंमंत्रकृतामृषीणांनामनिकीर्तयत्तीत्यर्थः । यथार्षेयोयजमानस्त्रीनूयर्षिमं
त्रकृतोवृणीतेपिवेकंद्वौत्रीन्पंचमचतुरोवृणीतेनपंचातिवृणीतइतिकल्पांतरं । प्रवरप्रवरणप्रकारमेवप्रपंचयत्तिउत्करइध्मे

सु०द० त्यादिनाइध्मसन्नहनानितृणानिस्फ्यउपसंगृह्यउपसंश्लिष्यउत्करेप्राङ्मुखोध्वर्युस्तिष्ठेत्तद्विमुक्तोध्वर्युरुपविशन्नीत्कृत्तरउपवेशन
१५२ विधानात्स्पष्टंअध्वर्योःपृष्ठभागंआग्नीध्रःअनूपश्लिष्यतिअनुश्लिष्यन्निवतिष्ठतिअथततोध्वर्युराश्रावयतिओश्रावयास्तुश्रौ
षट्उत्तरत्रश्रूयमाणस्यइतिशब्दस्यापितत्रापिसंबंधः।ततश्चओश्रावयास्तुश्रौषडित्याश्रावयतिशृण्वतोदेवान्होतर्याज्यापुरोनु
वाक्यावचनेनआसमंतात्श्रावयअस्तुश्रौषट्श्रुतमस्तुदेवानामत्रक्रियमाणंहविर्दानमित्येवमर्थकमाश्रावणंकुर्यात्उक्तो
ह्यमर्थोब्राह्मणेआश्रावयस्तुश्रौषडित्यनयोःप्रतीकग्रहणेनआश्रावयेतीदंदेवाःशृणुतेतिवावत्तदब्रवीदितिअस्यचब्राह्म
णस्यायमर्थः।अध्वर्युराश्रावयेसब्रवीदितियत्इदमुपलक्षणंअस्तुश्रौषडितिचयदब्रवीत्तदित्यपिद्रष्टव्यंएतत्तब्राह्मणा
र्थप्रतिपादनरूपत्वात्प्रकृतस्यकल्पसूत्रस्येतितत्तश्चाध्वर्युराश्रावयस्तुश्रौषडित्यब्रवीदितियदस्तितत्होतारंप्रत्यध्वर्युःहो
तःत्वंदेवान् प्रतियाज्यापुरोनुवाक्यापठनेनहेदेवाइदंप्रक्रांतंदेवत्तोद्देश्यकंहविर्दत्तंशृणुतेतिवावइतिश्रुतमेवास्तुदेवानामि
त्यब्रवीदितिअत्रयद्यपिआश्रावणंप्रत्याश्रावणंचअध्वर्युरेवकुर्यादितिप्रतीयतेतथापिहौत्रप्रकरणेआचार्यैर्यत्सुवेस्त्वयं १५२

प्रत्याश्रावयेदित्यार्थेयप्रवरणेयद्युपवंधेनाध्वर्योः प्रत्याश्रावणकर्तृत्वस्यपाक्षिकत्वावगमात्ततोन्योपिप्रत्याश्रावयितापक्षेस्मीत्यव
गम्यतेसचइहास्मत्सूत्रेविशिष्यानुक्तोपिकल्पांतरेष्वपिस्फुटमवगतत्वादाग्नीध्रएवएवंचप्रवरेध्वर्युराग्नीध्रोवाप्रत्याश्रावयेत्अयं
चाध्वर्योःप्रत्याश्रावणेविकल्पः प्रवरएवअन्यत्रत्वाग्नीध्रएवप्रत्याश्रावयेत्इध्मासन्नहनानिस्फ्यउपश्लिष्यदक्षिणामुखउत्करेतिष्ठन्
वा अस्मत्सूत्रेविशिष्यानुक्तावपिकल्पांतरेष्वेकैकंयेनतथाप्रतिपादनात्आचाराच्चतथाचापस्तंबः आश्रावमोश्रावयश्रावयोमाश्राव
येतिश्रावयस्तस्तुश्रौषडित्याग्नीध्रोपरेणोत्करंदक्षिणामुखस्तिष्ठन्स्फ्यंसंध्मसन्नहनमूर्ध्वं मार्गोश्व धारयन्प्रत्याश्रावत्याग्नीध्रेसो
मेसोर्द्वैविमाश्रुतप्रत्याश्रुतेभवतइतिभारद्वाजस्त्वाहयच्चकचाध्वर्युराश्रावयेन्नित्यमेदाग्नीध्रोपरेणोत्करंदक्षिणामुखस्तिष्ठ
न्स्फ्यंसेध्मसन्नहनमूर्ध्वंधारयमाणःप्रत्याश्रावयत्याग्नीध्रागारेसोमइतिआश्व लायनआह प्रत्याश्रावयेदाग्नीध्रउत्करेदक्षोतिष्ठन्
स्फ्यमिध्मसन्नहनान्वीत्यादायदक्षिणामुखइतिशाट्यायनकमस्तुश्रौषळिसोकारंप्लावयन्निति अस्तुश्रौषडितिप्रत्याश्रावणेऔका य
रःप्लुतोवक्तव्यःवाक्यस्पटेःप्लुतउदात्तइत्यधिकारेब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेरितिव्याकरणात्एवमाश्रावणेआदेस्ततःपर

सु·र· स्यश्रा इत्यस्य च प्लुतो वक्तव्यः अग्नीत्प्रेषणे परस्य चेति व्याकरणात् ननु व्याकरणे आश्रावणस्य ब्राह्मणकल्पाद्यनुसारेण होतृप्रै
१९२ षे विनतोन्यत्राश्रावणस्याग्नीत्प्रेषणरूपत्वानपायात् अत एव हविःप्रचारसमये आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षर
मिति ब्राह्मणविहितस्याश्रावयेत्यस्य व्याख्यातृभिरग्नीत्प्रेषणे परत्वेनैव व्याख्यातमित्यनवद्यमिति। एवमाश्राव्य अग्निर्देवो र
होतेत्यादिमंत्रं वरेत् अमुवदमुवदित्यस्य स्थाने प्रवरकांडे यस्य यजमानस्य यावदार्षेयो यदार्षेयश्च मन्त्रो विहितस्तावन्तां तेषां ना
मानि भरद्वाजवत् बृहस्पतिवदंगिरोवदिति प्रवरकांडोक्तप्रकारेणैव गृह्णीयात् असौ मानुष इत्यत्र असौशब्दस्थाने होतुर्नाम गृ
ह्णाति शंकरशर्मा मानुष इति अयमपि मंत्रभागः प्रवरानुप्रविष्ट एवास्य यज्ञस्य प्रावित्रो हे ब्राह्मणा ऋत्विजः विष्णुशर्मा मानुषोसौ
होता अग्निर्देवः अग्निरिव दीप्यमानः मनुवद्भरतवत् प्रक्रियमाण ऋषिवत्त्वब्रह्मवच्च विद्वान् चिकित्सन् विरिचानः इहया ता
ज्यावस्मते देवान् यस्यत्नीति प्रवरमंत्रे वाक्यत्वात् अत एव द्वैधे होतुर्वरणं इत्युक्तं आपस्तंबोप्याह ऊर्ध्वस्तु मासीनं होतारं वृ ३५३
णीत इति अत्र कर्मान्तं। आर्षेयमसंप्रज्ञानानस्य प्रवरं गृह्णाति मनुष्वद्भरतवन्मनुवदिति वा ब्रूयात् विज्ञायते मानव्यो प्रजा इति

हिब्राह्मणंपुरोहितप्रवरोवाराज्ञोयाप्रज्ञातबंधुराचार्यामुष्यायणमनुब्रवीताचार्यप्रवरमनुवेवरणीताथहोतारंप्रवरयेदिति।आर्षे
यंप्रवरंप्रवरणीयमृषिगणमसंप्रज्ञानानस्यकर्त्तव्यंप्रवरंब्रूहीतिप्रश्नःउत्तरंमनुषद्धरत्तवन्मनुवदित्येवब्रूयाद्धियस्मान्मानव्योहिप्रजाइति
हिब्राह्मणंविज्ञायतेधीयतइतिराज्ञांविशेषमाहपुरोहितप्रवरोवामनुषद्धरत्तवन्मनुवदितिवाराज्ञःप्रवरंब्रूयात्‌अथाप्रज्ञातबंधोर्विशेष
माहअथाप्रज्ञातेत्यादिअप्रज्ञाताःबंधवःपित्रादयःआर्षेयश्चयस्यसोप्रज्ञातबंधुःसआचार्यमुष्यायणंआचार्यस्यवंशमनुब्रवीत्‌आचार्य
पितृस्थानीयंकृत्वापितरंपितामहंचपितामहप्रपितामहोचकृत्वामुष्यपुत्रोमुष्यपौत्रोमुष्यनप्तेतिदीक्षितावेदनसुब्रह्मण्याह्वाननामग्र
हणादिषुचावश्यवक्तव्येषुब्रूयात्प्रवरमपिअप्रज्ञाताबंधुःआचार्यप्रवरमेववापूर्वोक्तप्रकारेणमनुषद्धरत्तवन्मनुवदितिवाप्रव
णीतअथहोतारंप्रवरयेत्‌होतुर्नामगृह्णीतअत्रेद्वैधं।ओश्रावयेदितिबोधायनआश्रावयेदितिशालीकिःश्रावयेत्सोपमन्यवइति।स्प
ष्टं।अयंपक्षेमूलंओमित्येतदनुकृतिहस्मवाअप्योश्रावयेत्साश्रावयेतिचतुरक्षरमितितृतीयेतुश्रुत्यंतरंदृश्यं।प्रवरेद्वैधं।।प्रवरइ
तिसूत्रंशालीकेरत्राहस्माहबोधायनऊर्ध्वाग्नेस्पर्शंनिहत्यप्रवरेप्रवृणीयात्‌अत्रचैवस्पर्शसुरस्येडुपरिष्टाच्चोंउपस्पर्शोदिति।सूत्रंअथयथा

सु०२० यत्तनंस्त्रुचौ सादयित्वा प्रवरं प्रवृणीतइत्यादिकं कल्पसूत्रं शालीकिर्मतं तंस्य हस्तस्तिष्ठन् अध्वर्युः प्रवृणीते स्रुचं बोधायनस्त्वाह उत्त
१५८ र ऊर्ध्वाग्रंस्फ्यं निहस्त धारयन् अध्वर्युः प्रवृणुयात् अनंतरं अत्रे वस्फ्यमुद्दस्येद प्रक्षिपेत् अस्य स्फ्यस्योपरिष्टॐ दॆस्पृशेच्चेति।होतुर्नाम पे पं
गृह्णातीत्यस्य द्वेधं होतुर्वरणइति स हस्माह बोधायनो यस्य स्य पित्ता वा चार्यो वाऽध्याया न्वा होता स्याद् उपांश्वेव तेषां गुरूणां नामानि गृह्णी
यादिति उच्चैरेव नामानि गृह्णीयादिति शालीकिरिति।होतुर्वरणे नामग्रहणविषये बोधायन आह अस्य नाम गृह्णतो ध्वर्योः पितावा आ
चार्योवाऽपायान्वाऽज्ये छन्नानावा होतायदिस्यात्तदा तेषां गुरूणां नामानि उपांशु नामानि गृह्णीयात् गुरूणां नामग्रहणस्य प्रतिषिद्धत्वादिति
शालीकिस्त्वाह उच्चैरेव तेषां नामानि गृह्णीयात् इहहि वाचनिकं होतुर्नामग्रहणं अतस्तत्सामान्यनिषेधस्य बाधकमिति।उपोत्थाय
होता विमुंचति विमुक्तोध्वर्युरुपविशति प्रसवमाकांक्षन्नास्त इति।होतुर्वरणानंतरं होता उपोत्थाय होत्रप्रकरणे अथोपोत्थाय दक्षिणे
न हस्तेन दक्षिणेंसेध्वर्युमन्वारमेत सव्येन दक्षिणेंस आग्नीध्रमिति सूत्रविहितं रुत्वा विमुंचति होता विमुक्तो ध्वर्युरुपविशति उपवि १५८
श्यश्च प्रसवं अनुज्ञां प्रतिवत्तीम ध्वर्यो स्रुचमास्यस्वेति होत्रं मंत्रभागमाकांक्षन्नास्ते।बोधायन रुतस्यासो रतिः सूत्रस्य तायत्ते त्रयोदश

स्त्रुपटलः ५ गोभृद्धिउषांमुदे ॥ खंडाः ॥ २६ ॥ अथयत्रहोतुरभिजानानिघृतवतीमध्वर्योस्रुचमास्यस्वेतिजुहूपभृत्तावादायात्य
क्रम्याश्राव्याहसमिधोजैयेतिवषट्कृतेजुहोतियजयजेतिचतुर्थ्येयक्षन्नर्धमोपभृतयाज्यस्यजुह्वांसमानयते पंचप्रयाजानि
ष्ट्वोदङुःत्याक्रम्यसंस्रावेणानुपूर्वंहवींष्यभिघारयतिध्रुवामेवाग्रेथदक्षिणंपुरोडाशमथध्रुवामथोत्तरंपुरोडाशमथश्रृतमथद
ध्युपभृतमंननइति। अथयत्रहोतुःसकाशादभिजानातिघृतवतीमध्वर्योस्रुचमास्यस्वेतिततदाजुहूपभृतावादायदक्षिणात्य
क्रम्यआश्राव्यआश्रावणप्रत्याश्रावणेत्वेनसामान्यरूपेणनिर्दिश्येते। अतएवकचित्कचित्आश्राव्येतिवक्तव्येआश्रावयसोश्र
वयास्तुश्रौषडित्याचार्योब्रवीतितत्तश्चउभयोःकरणमाश्राव्येत्यस्यार्थः परंतुआश्रावणेकर्तृत्वमध्वर्योःसाक्षादेवप्रत्याश्रावणे
तुप्रयोजकत्वेनिध्येयं। अध्वर्युणाहेअग्नीत्‌देवानामिदंहविर्दानंश्रावयेतिसंप्रेषितोग्नीत्‌हेदेवाःअस्तुश्रौषट्युष्माकंश्रुतम
स्त्विदंहविर्दानमित्यब्रवीदितिउभयमपिदेवानांहविर्दानविषयमाश्रावणमेवभवतीतिआहसंप्रेष्यतिसमिधोयजेतिहोतःसमिधोव
संतमृतुयजयाज्यापठनेनइदंहविस्तुभ्यंदीयतइतिविज्ञापयेतिसंप्रेष्यतीत्यर्थः। समिधोयजेतिप्रथमंसंप्रेष्यतियजयजेतीतदोर

सु॰र॰ नित्यापस्तंबः।वषट्कृते वौषडिति वषट्कार इत्याश्वलायनः स एव वौषडिति शाब्दो वषडित्यधीयते तस्मिन् होत्रा कृते सति जुहो
१५५ ति अध्वर्युर्हविरग्नौ प्रक्षिपेत् यज यजेति उत्तरेभ्यः प्रयाजेभ्यः संप्रेष्यतीति शेषः।तथा च भारद्वाजः।आश्राव्याश्राव्य यज यजे
त्येवोत्तरेभ्यः संप्रेष्यतीति चतुर्थं प्रयाजं यक्ष्यन् करिष्यन् यज यजेत्यनंतरमेतदभिधानेपि समानीया श्रावणादिकार्यं कृते ला
श्रावणे यागारंभणे यक्ष्यन्निति निर्देशायोगात् औपभृतस्याज्यस्य चतुर्गृहीतस्य यस्यार्धं जुह्वां समानयते यत्तु जौहवं चतुर्गृहीतं
तेन त्रयः प्रयाजाः कार्याः यज्ञ जुह्वां गृह्णाति प्रयाजेभ्यस्तदिति श्रवणस्य तद्विषयत्वात् उपभृति चतुर्गृहीत द्वयेए
कं चतुर्गृहीतमनुयाजार्थं स्थापयित्वा अपरं चतुर्गृहीतं जुह्वामानेयं यदुपभृति प्रयाजानुयाजेभ्यस्तदिति श्रुतेरिति इत्थं समि
न धो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति श्रुतिविहितान् पंच प्रयाजान् प्रयाजसंज्ञकान् यागानि
ष्ट्वानेतर्याजयित्वा उद्दुत्य आक्रम्य अत्र पंचानामपि प्रयाजानां करणानंतरमुद्दुत्याक्रमणस्याभिधानात् हविरवदानलक्षणप्र
योजनाभावाच्च न प्रति प्रयाज प्रत्याक्राम प्रत्याक्रामो भवतः।तथा चापस्तंबः।घ्नन्वतिशब्देषु रूपभृतावाशयदक्षिणा सरूदि १५५

र्मांतोपरेणाघारसंभेदं पंचप्रयाजाननूयाजांश्चोयजतीतिसंस्रावेणजुहोत्यनेन प्रयाजशेषसंस्रावेणहवींषिउपयोक्ष्यमाणानिअनु
पूर्वयेनक्रमेणआज्यभागादयोयागाःकरिष्यंतेतेनक्रमेणएवक्ष्यनिहिअग्नियजसोमंयजअग्निंयजप्रजापतिमित्युपांशुयजेत्यंचे
रित्यादिअभिघारयतिअभिघारणेनसंस्करोतिआनुपूर्व्यमेवाभिइत्यादिआज्यभागार्थअग्रेप्रधानयागीयहविर्भ्यःपूर्वंअथध्रुवा
मितितुउपांशुयाजस्यध्रौवाज्यंद्रव्यमितिपक्षेऔषधपक्षेतुऔषधमेवाभिघारयेदितिध्येयंअनूयाजार्थंउपभृत्तंअत्रकर्मांतरं
तुदेवताउखलुप्रयाजाभवंतीति। ऋतवोदेवतापेक्षांते ऋतुदेवताएवप्रयाजाभवंतिअत्रयद्यपिआचार्यैःसामान्येनऋतुत्वेनेवऋ
तूनांदेवतात्वमुक्तंऋतवोवैप्रयाजाऋतूनेवप्रीणातीतितथाब्राह्मणमपितथापिवसंतमृतूनांप्रीणामिग्रीष्ममृतूनांप्रीणामिव
र्षाऋतूनांप्रीणामिशरदमृतूनांप्रीणामिहेमंतशिशिरावृतूनांप्रीणामीतिमंत्रवर्णात्समिधोयजतिवसंतमेव ऋतूनामवरुंधेतनू
नपातंयजतिग्रीष्ममेवावरुंधइडोयजतिवर्षाएवावरुंधेस्वाहाकारंयजतिहेमंतमेवावरुंधइतिचब्राह्मणाच्चपंचस्वपिप्रयाजेषुव
संतादयःक्रमेणदेवताःपंचमेतुप्रयाजेहेमंतशिशिरोअयंनऋतूनांवसंतादिविशेषरूपाध्यवसायश्छागस्यवपायाइतिमंत्रवर्णेन
वर्हिर्यजति शरदमेवावरुंधे

सु०द० छागत्वाध्यवसायात्तत्रत्रश्चवसंताद्दय एवक्रतुविशेषाद्देवताइति सिद्धं देवतानिरूपणस्य प्रयोजनं वसंतायेदंनममेत्यादित्तत्त्यागात्तु
१५६ स्य ध्यानंयजमानंहोतुस्कयस्यैदेवतायेहविर्गृहीतंस्यात्तांध्यायेद्वषट्करिष्यन्निति एवमादिकमन्यदपि यथासंभवंद्रष्टव्यं। ननुदाशतयी
षुश्रूयते देवान्प्रतिअग्नेर्वचनं अग्निंप्रतिदेवानांप्रतिवचनं चेत्पकृद्दयंतथाहि प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वंतंहविषोदत्त
भागं। घृतंचापांपुरुषंचौषधीनामग्नेश्च दीर्घमायुरस्तदेवाः। तव प्रयाजा अनुयाजाश्च केवलऊर्जस्वंतोहविषः संतुभागाः। तवाग्नेय
ज्ञो ३ यमस्तुसर्वस्तुभ्यंनमंतांप्रदिशश्चतस्रइति। अत्रप्रयाजानुयाजानांकेवलंअसाधारण्येनाग्निदेवत्यत्वमवगम्यते। तथाइदमक्
च द्वयमुदाहृत्यनेरुक्ताश्चवदंति आग्नेयावैप्रयाजाआग्नेयाअनुयाजाइतिब्राह्मणं द्दो देवताइत्यपरंछंदांसिवै प्रयाजाश्छंदांस्यनुया छ
जाइतिचब्राह्मणमृतुदेवताइत्यपरमृतवोवै प्रयाजाऋतवोनुया२जाइतिचब्राह्मणं पशुदेवताइत्यपरंपशवोवैप्रयाजाः पशवोनुया
जाइतिचब्राह्मणं प्राणदेवताइत्यपरंप्राणावैप्रयाजाः प्राणावाअनुयाजाइतिचब्राह्मणमात्मदेवताइत्यपरमात्मावैप्रयाजाआ
त्मावाअनुयाजाइतिचब्राह्मणमाग्नेयाइतितुस्थितिरिति तत्रअनयोर्न्त्रचोः प्रयाजानुयाजार्थअग्निदेवत्याइति अत्रतात्पर्यात्तु अग्नि १५६

रेव प्रयाजानां देवत्वेतिचेत्सत्यमग्निर्देवत्वेत्येकं मतं वसंतादय ऋतवो देवतेति पक्षस्तु आचार्याणां वस्तुतस्तु अत्राग्निदेवत्यत्ववसंतादि
देवत्यत्वयोर्न विरोधः तथाहि प्रयाजान्मे अनुयाजांश्च केवलानित्याभ्यामृग्भ्यां तन्निरुक्तेन चरवल्व ग्निर्देवता प्रयाजानामि स्फुटात्
आभ्यामृग्भ्यां प्रकाशितस्यार्थस्य विधायकं कौषीतकं ब्राह्मणमित्थमाम्नायते देवासुरा एषु लोकेषु संयत्ता आसुस्तेभ्योग्निरपाक्राम व।
त् स ऋतून् प्राविशत् ते देवा हत्वासुरान्विजित्याग्निमन्वैच्छंस्तं यमश्च वरुणश्चान्वपश्यतां तमुपामंत्रयत तमज्ञपयंस्तस्मै वरं ददुः स
हैतं वरं वव्रे प्रयाजान्मे अनुयाजांश्च केवलान् घृतं चापां पुरुषं चौषधीनामिति तस्मादाग्नेयाः प्रयाजानुयाजा आग्नेयमाज्यमि
ति ततो देवा अभवन् परासुराः पराप्य द्वेष्यो भवति य एवं वेदेति अत्रापक्रांतस्याग्नेः ऋतुष्वनुप्रवेशनप्रतिपादनं वसंताद्यृतुस्वरूपाप
रित्यागेनाग्नेर्देवतात्वाभिप्रायं अत एव प्रयाजप्रकरणे कौषीतकं ब्राह्मणमामनंति प्रयाजान्यजत्यृतवो वै प्रयाजा ऋतूनेव प्री
णातीति ते वै पंच भवंतीत्यैर्यत्किंच पंचविधमधिदैवतमध्यात्मं तत्सर्वमाप्नोति स मिथो यजति वसंतमेव वसंतेन वा इदं सर्वं समिध्यते
तनूनपातं यजति ग्रीष्ममेव ग्रीष्मो हि तन्वं तपति इडो यजति वर्षा एव वर्षाभिरीडितमन्नाद्यमुत्तिष्ठति बर्हिर्यजति शरदमेव शार

सु०द० दिबर्हिष्ठा ओषधयोभवंतिस्वाहाकृतिमंत्रंयजतिहेमंतमेवहेमंत्रेवाइदंसर्वस्वाहाकृतंतदाकुर्यसंचप्रयाजाःषडृतवःकेत्तंषष्ठमृतुंयजतो
१५७ तिपदेवचुर्थेप्रयाजेसमानयतित्तदेनमित्तरेष्वनुविभजतिअथयउत्तमेप्रयाजेएवंतदग्नेर्भागेदेवताभागिनीःकरोत्तीत्यग्निभागत्व
कीर्तनमवगमयतिपूर्ववसंतादिरूपेणेवाग्नेःप्रयाजान्प्रतिदेवतात्वमुक्तमितिएतत्सर्वपर्यालोच्ययद्त्रयुक्तंतदंगीकार्यम
भिज्ञैरिति॥नन्वस्तुवसंतादानामृतूनांदेवतात्वंप्रयाजेषुएवमपिवसंतायेदंनममेतीवसर्वेषुयागेषुहोमेषुचदेवतोद्देशेनद्र
व्यत्यागोयजमानेनकार्यइत्यत्रकिंमानमितिचेन्नयागानांहोमानांचविधयएवदेवतामुद्दिश्यद्रव्यत्यागोहियागःतत्रक्व
ब चिद्यागेषुचतुरवत्तंजुहोतीतिविधैर्हितोसत्यग्नोप्रक्षेपःसंहविःसंस्कारेणयजत्यर्थःजुहोतिचोदनासुतुदेवतामुद्दिश्य
द्रव्यत्यागःअग्नौप्रक्षेपोपिजुहोत्यर्थःतथाचाध्वरमिमांसायांचतुर्थाध्यायस्यद्वितीयपादेसूत्रं।यजतिचोदनाद्रव्यदेवता
क्रियंसमुदायेकृतार्थत्वात्तदुक्तेश्रणोवेज्जुहोतिरासेचनाधिकस्यात्तदुँति।अत्रशाबरभाष्यं।किंतत्प्रधानंयस्यैतेशेषा १५७
इतिउच्यतेयजतिजुहोतिददातीत्येवंलक्षणकंकिंलक्षणकोयजतिर्ददातिर्जुहोतिश्चयजतिचोदनाद्रव्यदेवताक्रियंद्रव्यं

वदेवताचद्रव्यदेवतंतच्चक्रियाचययाक्रिययातयोः संबंधोभवतितस्मिन्समुदायेसमुदितेष्वेतेषुयजतिशब्दोभवतिलोकइ
शेनेनपशुरितितेनमन्यामहेद्रव्यदेवतक्रियस्यार्थस्ययजतिशब्देनप्रख्यापनंक्रियतइतिलक्षणकर्मणिप्रयोजनंनवक्तव्यंज्ञा
नमेवहिप्रयोजनमितितदुक्तेश्रवणाज्जुहोतिरासेचनाधिकस्यात्अथकिंलक्षणोजुहोतिरितितदुक्तेयजस्कन्देजुहोतिश्रू
यतेआसेचनाधिकेतस्माद्यजत्यर्थएवआसेचनाधिकेजुहोतिकुतमनेनेत्येवजातीयकेवक्तारोभवंतिलोकेवेदेपियजतिचोदि
तंजुहोतिनानुवदतिसांग्रामिणंचतुर्होत्रायाजयेच्चतुर्गृहीतमाज्यंगृहीत्वाचतुर्होतारंव्याचक्षीतपूर्वेणसंग्रहेणार्धंजुहुयादुत्त
रेणार्धमितिअथददातिकिंलक्षणइतिआत्मनस्वत्वव्यावृत्तिःपरस्यचस्वत्वेनसंबंधःयजतिर्ददातिर्जुहोतिषुसर्वेषूत्सर्गसमा
नःतत्रयजतिर्देवतामुद्दिश्योत्सर्गमात्रंजुहोतिरासेचनाधिकःददातिरुत्सर्गपूर्वकःपरस्यस्वत्वेनसंबंधइत्येषांविशेषइतितथा
कात्यायनसूत्रमपियज्ञंव्याख्यास्यामोद्रव्यंदेवतात्यागइति॥अत्रतस्यभाष्यं॥यज्ञंव्याख्यास्यामःयज्ञशब्दोव्याख्यास्यतइत्यर्थः
प्रतिज्ञानार्थमाहद्रव्यंदेवतात्यागःव्रीहियवपश्वादिद्रव्यंदेवताशब्दस्यचोदनालक्षणःयायत्रचोद्यतेसातत्रदेवतानहिजात्याका

सु०द० चिद्देवतास्तिवैदिके व्यवहारे न ह्यत्तेन द्रव्यं प्रतिदेवतात्वं गम्यते चतुर्थ्यंतेनवा तस्य द्रव्यस्य देवतां प्रति यो सर्गक्रिया स यागः यज्ञो य
१५९ ग इति चानर्थान्तरं अस्मिन्नेव लोके यज्ञः प्रसिद्धोपि सन्नुच्यते प्रधानविवेकनिरूपणायेति। एतस्य च स्वत्व परित्यागरूप वि
शेषस्य यागस्य होमस्य च कर्ता यजमान एव नहि यजमानस्य द्रव्यं यजमानस्यन भवेदिति केन चित्संकल्पितेयजमानस्य द्रव्यस्य न
स्वस्वामिभावसंबंधो गच्छति अत एव प्रवासे स्थो यजमानः प्रोषित एव तत्पुत्रो वा विहारस्थस्तदाज्ञया याजमानं कुर्यादिति सू
तस्मात्त्यजमान एव कुर्यात् तथा च कात्यायनः कर्मणि पुरुषायामधिकारः परिक्रयाम्नानात्तु प्रधानं स्वामी फलसंयोगादिति
अत्र तदीयं भाष्यं दर्शपूर्णमासादिषु चिंत्यते। किं सर्वं कर्म स्वयमेव कर्तव्यं उत किंचित्परकर्तृकमपि इति फलार्थिनः कर्मचो
दितं अतस्तेनैव कर्तव्यमित्यत आह कर्मणि पुरुषामधिकारः कुत एतत्परिक्रयाम्नानात् दृश्यते हि परिक्रयः गौर्देया हिरण्यं
देयमित्येवमादि एवं सर्वत्र प्राप्त आह प्रधानं स्वामी फलसंयोगात्स्व द्रव्यपरित्यागं परस्वत्वोत्पादनरूपं यत्र तत्स्वामी करो १५९
ति फलसंयुक्तं हि न दिनित कुर्वन् फले हि युज्यत इति तस्माद्देवतोद्देश्यकद्रव्यत्यागो यागः। स च यजमानेन कर्तव्य इति सिद्धं अत्र

ह्मणे प्रयाजविधौ अभिक्रामन्जुहोतीति श्रुत्तं नदर्थस्य दर्शपूर्णमासयोरनुष्ठानाय तत्तद्ब्राह्मणं मतभेदेन व्याख्यातं द्वे धे अभिक्रा
मन्जुहोत्तीतिसह स्माह बोधायनः सर्वं पाभिक्रमे पञ्चामाहुतिभिः स्वरेणोत्तरामुत्तरामाहुतिं ज्यायसीं कुर्यादितिपञ्चामे वाभिक्रामं
समान त्राहुतिर्जुहुयादिति शालीकिः समानत्रतिष्ठन्नाहुतिभिरभिक्रामेदित्यौपमन्यवः समानत्रैवतिष्ठन्प्रदक्षिणमनुदिशं कुत्लाम
ध्ये स्वाहाकारं जुहुयादित्यांजीगविरिति। अभिक्रामंन्जुहोतीतिब्राह्मणे अभिक्राममितिणमुलं तेनाभिक्रम्याभिक्रम्येसविशेष
वचनात्तल्लोके ग्रामम भिक्रांतः शास्त्रमभिक्रांतो भिक्रांतमर्यादइत्यादौ सर्वविषयोत्तरोत्तरोत्कर्षे अभि पूर्वस्यक्रमेप्रयोगदर्शनात्
इहापि सर्वविषयमभिक्रमणमितियुक्तं तत्तश्च सर्वेणापि साधनेनाभिक्रामेत् उत्तरोत्तरमुत्कर्षेण कुर्यात् तद्यथा पञ्चांसमीपेस
मीपे गत्वा आहुतीभिः हूयंत आभिरिति आहुतयः होमसाधनीभूत्तान्याज्यानित्ताभिः पूर्वस्मात्पूर्वस्माद्द्राज्यादुत्तरमुत्तरंद्रस्थ
नरं कुर्यात् तथा स्वरेणामंद्रे मध्यमतार तारतमरूपेण उत्तरामुत्तरामाहुतिंज्यायसीं कुर्यात् ब्राह्मणे प्राचीनानीत्सुक्तेरत्र प्रागप
र्गत्वं कार्यमिति बोधायनः शालीकिस्त्वाह अभिक्रमः पदविक्षेप विषय एव प्रसिद्धः तत्तश्च पञ्चामेवाभिक्रम्याभिक्रम्य समानत्र

सु॰द॰ सर्वनाम्नश्छांदसस्त्वल् अग्नावेकस्मिन्नेव प्रदेशे जुहुयात् शाखांतरे सह प्राचीनानीति वचनात् न चात्र प्रागपवर्गत्वादरः तथा चांजीगवि
१५९ मत्त व्याख्यानावसरे भाष्यं प्राचीनत्वमिह नादृतं तथा सति द्विती येपि न दोष इति औपमन्यवस्त्वाह अभिक्राममिति क्रियाविशेषणं यथा
साधु पचतीति तत्तश्च समानत्र तिष्ठन् आहुतिभिः क्रियाभिः अभिक्रामेत् अग्नेः पश्चादारभ्य प्रागभिक्रामं नाकुती र्जुहुयात् त
था चापस्तंबः अपरेणाघारं संभेदं पंच प्रयाजान्प्राचो यजतीति । आंजीगविस्त्वाह क्रियाविशेषणमेवाभिक्रमणं परं तु प्रदक्षिण
मेवाभिक्राममिस्य च्यतेन तश्च समानत्रैव तिष्ठन् अग्नेः प्रागादि प्रदक्षिणमनुदिशं कुत्वा मध्ये स्वाहाकारं जुहुयादिति यज्ञभागे
ष्वसर्वत्र स्वरविशेषव्यवस्थोक्तापस्तंबेः अंतरा समिधेनीषनूच्यं मंद्रेण प्रागाज्यभागाभ्यां प्रातःसवने च मध्यमेन प्राक् स्विष्टकृ
तो माध्यंदिने च क्रुष्टेन शेषे तृतीयसवने च वा क्रुसंद्रवश्च न द्वादित्ति सर्वत्र हविः प्रचारे नियमविशेषमाहापस्तंबः अनपव्याहरंतः
प्रचरंत्याश्रावयिष्यन्नान्यदाश्रावणात् ब्रूयादाश्राविते नान्यदाग्नीध्रः प्रत्याश्रावणात् प्रत्याश्राविते नान्यदध्वर्युर्यजेति वचना १५९
द्यजे त्यक्ते होतानान्यद्वषट्कारात् यद्यन्य द्ब्रूयात् पुनराश्रावयेद्याहृती र्वा जपेत् इति । अथ चतुराज्यस्य गृण्हान आहाग्नयेनुब्रू

सु० द०
तंत्र मयमावापइतिअग्न्यन्वाधानप्रभृतित्तंत्रमाज्यभागाभ्यामन्यत्रौषधात्तस्मिंस्तंत्रेसत्यावापस्थानानिभवंतियथैतत्स्येन्द्रनांदोहनंकप
१६० लानामुपधानंस्तंब ।यजुषोहरणमाज्यग्रहाइतियच्चकिंचाभिनिवपत्यूर्ध्वमाज्यभागाभ्यामेषमध्यत आवापोभवतियस्मिन्नेतद्
वींष्योप्यंतेतस्मिन्नावापजानित्तंत्रस्थानंपंचभंजंतेयथैतत्प्राशित्रहरणंयजमानभागंब्रह्मभागोस्विष्टकृच्चेडाचेत्स्यवदानत्तआव
पोभवतित्तंत्रंतुप्रदानतः ककखलुतंत्रमावापभूयंगच्छत्यावापोवात्तंत्रभूयमितितिमैत्राबार्हस्पत्येप्यन्यस्मिंस्तंत्रमुहनिर्वपण
तोभवत्यावापउप्रदानतोथवारुणेषुचसंज्ञान्येष्वांचावापोनिर्वपणत्तोभवतितंत्रंतुप्रदानतोनूयाजप्रभृतित्तंत्रंआसमि
ष्टयजुषोहोमादितिनि।दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्यधिकारविधिनाफलेचोदित्तानांयागानांअमावास्यायाममावा
स्यायायजेतपौर्णमास्यांपौर्णमास्यायजेतेतिप्रयोगविधिनाअमावास्यासंज्ञानाममावास्यायांपौर्णमासीसंज्ञानांचपौर्ण
मास्यांपृथक्प्रयोगद्वयविधानात्तत्रप्रयोगयोः कर्त्तव्यत्वेस्थितेतयोर्दर्शपूर्णमासयोरन्वाधानप्रभृतीनामंगानांप्रधानेर्मध्ये प १६०
यानुष्ठीयमानानांमध्येकिंतंत्रंकिंचावापइतिपृच्छतिकथमुखल्वित्यादि३इतंत्रमयमावापइत्येतत्कथमुखलुजानीयात्

भवगच्छेदितिपदान्वयः तंत्रं साधारणं सकृदनुष्ठानेन सर्वेषां प्रधानानामुपकरोति यत्तत्तंत्रं आवापः प्रति धानमावर्त्तमानमे वनस्यतस्योपकरोति नान्यथा यत् स आवाप इत्यर्थः उत्तरमाह अग्न्यन्वाधानप्रभृतीत्यादि अग्न्यन्वाधानादारभ्य आ आज्यभागा भ्यां आज्यभागमभिव्याप्य सर्वमंगजातं तंत्रं औषधान् औषधधर्मादन्यत्र विषये अयं निर्णयः। औषधधर्मास्तु निर्वापादयः प्रति धानं प्रत्येकमेव कार्याः अत्र केषांचित्तंत्रत्वमपवदति तस्मिंस्तंत्रे सतीत्यादि तस्मिन्नन्वाधानप्रभृत्यंगकलापे तंत्रे सति सकृदनुष्ठा नेनोपकारकत्वेनोक्ते आवापस्थानानि आवापस्य प्रतिप्रधानमनुष्ठानस्य स्थानानि कानिचिद्भवंति उदाहृत्य दर्शयति यथेत्यादि धेनूनां दोहनं दध्यर्थं शृतार्थं चावर्त्तनीयं कपालानामुपधानमपि प्रतिपुरोडाशं कार्यं कपालोपधानस्य औषधधर्मत्वेपि साक्षादौ षधान्वयाभावादनौषधधर्मत्वमिति पुनः सकृद्ग्रहणं स्तंबयजुर्हरणं हि त्रिभ्यो लोकेभ्यो भिमत्ता सर्वस्मात्प्रदेशाच्चर रुनाकभ्रात् व्यनिर्हरणायेति श्रुतं ब्राह्मणे स्तंबयजुर्हरति पृथिव्या एव भ्रातृव्यमपहंति द्वितीयं हरति। अंतरिक्षादेवैनमपहंति। तृतीयं हरति। दिव एवैनमपहंति। तूष्णीं चतुर्थं हरति अपरिमितादेवैनमपहंतीति। तदपि वचनादावाप एवाज्यग्रहाः जौहवोपभृत ध्रौवाणामाज्यानां

सु॰द॰ ग्रहाः प्रत्येकं कार्या इति यच्च किंचाभिनिर्वपति अपि च यत्किंचाभिवपति यद्यत् आवश्याकर्तव्यमिति विहितं आभिमुख्येनावर्तते प्रोक्षणी
१६१ स्रवनादि तत्सर्वमावापस्थानं इत्थमाज्यभागौ तस्य सामान्यतन्त्रं तदपवादत्वेन क्वचिदावापश्चेत्कर्तं इदानीं तत ऊर्ध्वस्यांगजातस्य उत्सर्ग
तश्चावापस्तदपवादत्वेन क्वचित् तंत्रमित्याह ऊर्ध्वमाज्यभागाभ्यामित्यादि अनूयाजप्रभृति तंत्रमिति वचनात् ऊर्ध्वमाज्यभागाभ्यां प्राग
नूयाजेभ्यो मध्यतो यदनुष्ठीयते हविर् वदानानुवाक्या संप्रेषास्याक्रमणाश्रावणप्रत्याश्रावणयाज्याप्रेषयाज्यापठनं हविःप्रक्षेपादि
एष आवापो भवति प्रतिप्रधानं प्रत्येकं कार्यो भवति एवमुत्सर्गेण आवापं विधाय क्वचिदपवदति यस्मिन्नेतस्थवींषि स्यादि यस्मिन्ने तत्र। यो
गे एकस्मिन्पात्रे होमार्थं एतद्धवींषि संप्रतिपन्नरेवतानि बहूनि हवींषि ओप्यंते एकीकृस तत्र प्रयोगे तस्मिन्पात्रे आवापजानि प्रतिहविर्भे
देन कर्तव्यानि उपस्तरणाभिघारणादीनि तंत्रस्थानं सकृदनुष्ठानं प्रतिपद्यंते अगृह्यमाणविशेषत्वात् तेषां सर्वहविरूपकारकत्वसिद्धेस्तत
यथा सान्नाय्ययोः पुरोडाशस्य एकत्रावदाने सकृदेवोपस्तरणमभिघारणं च तथा वाजपेयादौ प्राजापत्यादिषु च यस्मिन्नेतत्स्थवींषी १६१
स्यादेर्भ जइत्यंतस्य सूत्रस्यार्थस्तात्पर्यं संगीकृत्यार्थान्तरमप्युक्तं भाष्येन उच्यते यस्मिन् यत्र प्राशित्रपात्रादौ एतत्स्थवींषि एतानि

तस्यैतस्यै देवतायै भक्तानि हवींषि ॐप्यंते अवदायस्थाप्यंते प्रदानायनस्मिन् प्राशित्रपात्रादौ आवापजानि आवापेन प्रतिहविर्भेदेन
य जातानि अवत्तानि तंत्रस्थानप्रदानैर्यौगपद्येन भज्यंते एतदेवोदाहृत्य दर्शयति यथैतदितिसादि एतत्पूर्वोक्तं यथोदाहरणरूपं भवति तथा
क्रियते प्राशित्रं प्राशित्रं हि यथौत्तनं स्रुचौ सादयित्वा प्रच्छिन्नमवद्यति दक्षिणस्य पुरोडाशस्योत्तरार्धाद्यवमात्रं अज्यायो यवमात्रादादि
तिसूत्रे प्राशित्रं दक्षिणस्यैव तस्याविध्यमित्येकवचनप्रक्रमात् अन्ये दक्षिणस्यदेशनियमः। अन्येषामनियमः। सर्वेभ्यो यवमात्रमिति
व्याख्याद्वयेन सर्वेभ्योपि हविर्भ्योवदेयमित्येकः पक्षः अत एव सान्नाय्यविकृतौ यशावपि प्राशित्र सुक्तं भाष्यकृता तेन पक्षेणेदं सर्वे
भ्योहविर्भ्यः प्राशित्रमवदेयमिति कृत्वा यजमानभागब्रह्मभागौ कल्पसूत्रे अथ दक्षिणस्यैव पुरोडाशस्य पूर्वार्धात् व्यंगुलं वा चतुरंगु
लं चाज्येन सुसंत्तक्षसंतर्प्याग्रेण चतुर्धाकृतस्य दक्षिणस्यैव पुरोडाशस्यान्यतमोंऽशो ब्रह्मभाग इति यद्यपि तथापि दीक्षणीया कल्प
क मीतयोर्न यजमानभागं करोति न ब्रह्मभागं न बर्हिषदं पुरोडाशं करोतीति चतुर्धाकरणान्निषिध्य पुनश्चतुर्धाकरणात् पृथक्
ब्रह्मभागस्य प्रतिषेधात् चतुर्धाकृतैकदेशब्रह्मभागातिरेकेण ब्रह्मभागोस्तीति ज्ञाप्यते स च यत्र यत्र यजमानभागो वदीयते तत्र सर्वं

सु॰द॰ त्राप्यवदेयः नत्रैवसंयुक्तौहोतौयजमानभागब्रह्मभागाविति वचनात्तस्यचविकल्पः इहज्ञापितस्यापिकल्पेविध्यभावात्यजमान
१६२ भागस्यचरुमुखेष्विनिसहस्मात्बोधायनआदित्तएवध्रष्टिमादर्शीतमुख्यादेवभक्षान्साधयेदितिद्वैधेशालीकिमतेप्राशित्रयजमान
भागचतुर्धाकरणानांपुरोडाशधर्मत्वनिर्णयात् आग्नेयाग्नीषोमीयैवैमृधेंद्राग्नेंद्रमहेंद्रपुरोडाशेषुप्राप्तइतितत्संयुक्तश्चब्रह्मभा
गोपितत्रप्राप्तोभवतिअतएवद्वैधभाष्येभक्षान्प्राशित्रयजमानभागब्रह्मभागचतुर्धाकरणानीतिव्याख्यातमितितदिदमभि
प्रेत्ययजमानभागब्रह्मभागाविस्फुटंउक्तेनैवप्रकारेणप्रतिपुरोडाशंयजमानभागब्रह्मभागोभेदेनावदेयावितिननुयद्दिपुरो
डाशधर्माएतेप्राशित्रयजमानभागब्रह्मभागचतुर्धाकरणानिनर्हिपशुबंधेएकादशधर्मोत्साहनपक्षेप्राशित्रयजमानभागब्र
ह्मभागानांग्रहणंनस्यात् अप्राप्तानांतेषांनिषेधानुपपत्तेरितिचेन्नमुख्यादेवभक्षान्साधयेदितिबोधायनमतेनहृदयावद्य
नेतेषांप्राप्तत्वात्नचेडायांकृत्स्नावदानात्तत्रतेषामप्राप्तिः प्राशित्रयजमानभागब्रह्मभागचतुर्धाकरणानांपाक्षिकनिषेधान्य १६२
थानुपपत्त्यासम्भवतधान्यांषडाद्यानिडामवद्यतिषडभ्योवेत्यापस्तंबमतेनतत् अस्माकमपिहृदयाद्येकदेशावदानेसूत्रस्यतात्पर्यप

रिकल्पनात्तन्न एकादशधर्मानुसादनपक्षेहृदयेप्राशित्रादिनियमः प्राशित्रादिर्मुख्यइतिधर्मइतिबोधायनपक्षस्यहृदयाद्येकदेशाव
दानस्यचैवैकल्पिकतयाप्राशित्रादीनांमैथ्यस्यासिद्धेः वस्तुतस्तु दीक्षणीयायांविष्णुक्रमचतुर्धाकरणनिषेधवत्प्राशित्रादिविषयेपि
नित्यनुवादत्वेनापिसूत्रसंगतेः नप्राशित्रयजमानभागब्रह्मभागयोर्ग्रहणात्प्रतिहविर्यजमानभागब्रह्मभागयोरवदानमस्ति
तिवाच्यंनहीदंविधानंकिंतुयस्मिन्नैतत्स्थवीष्योप्यंतेतस्मिन्नावापजानितंत्रस्थानंभजंत इतिवाक्यविहितस्योदाहरणप्रदर्श
नपरंतच्चयथाप्रमाणमुदाहरणीयंनतुस्वयंविषयविशेषस्यकल्पंभविष्यतीति। स्विष्टकृच्चेडाचेति। स्विष्टकृत्तावत् अथोप
स्तीर्यदक्षिणयापुरोडाशस्यउत्तरार्धादवद्यन्नाहाग्नयेस्विष्टकृतेनुब्रूहीति सकृद्दक्षिणस्यपुरोडाशस्योत्तरार्धादवद्यतिसकृ
कृवाज्यात्सकृदुत्तरस्यपुरोडाशस्यसकृच्छृतस्यसकृद्ध्रौद्विरभिघारयतिनप्रत्यनक्तीतिसूत्रेणस्फुटमेवप्रतिहविः प्रत्ये
कमवदानंविहितंतथाइडायामपिअथकंसेनाचमसेवेडोपहवनंयाचतीतिसूत्रेप्रतिहविरवदानमुक्तं अत्रइतिशब्दउदाहर
णसमाप्त्यइमानिप्राशित्रादीनिभेदेनकृतानि तंत्रस्थानंभजंत इतिसामान्यउक्तेकभेदेनकरणंकतंत्रस्थानंभजंतइत्यते

सु०द० विशिष्यदर्शयत्तिअवदानत्त आवापः आदतिर्भवति उपपादितमेतदुदाहरणविवेचनावसरेतंत्रंयोगपद्यंतु प्रदानतः प्रदानत्तोभवति
१६३ पृच्छति कडरंखलुतंत्रमित्यादि ककुत्र अंगानुष्ठानंतंत्रं प्रक्रमेसकृदनुष्ठानेनोपकारकभावंगच्छतीत्तिप्रश्नः उत्तरमाहमैत्राबार्हस्पत्य
इत्यादि कतंत्रमावापभूयंगच्छतीत्यस्योत्तरंमैत्राबार्हस्पत्येचरोराजसूयेहिमैत्राबार्हस्पत्येशेनिर्वपणंतंत्रंमैत्राबार्हस्पत्संभ
वतीतिसहचोदितत्वात्मैत्राबार्हस्पत्यस्यनिर्वपणइतिसमानचतुर्मुष्टीस्यात्तामितिबोधायनौनाचतुर्मुष्टीस्यात्तामितिशा
ली किरितिद्वैधोक्तसमानचतुर्मुष्टिनिर्वापपक्षइदं असमानचतुर्मुष्टिपक्षेतुरुक्माजिनास्तरणावघातादितंत्रंतंत्रंनथाआ ना
प्यन्यस्मिन्एवमिवयत्रवचनमस्तिउभयदोषएंद्राग्नंपंचशरावमोदनंनयोःपृथक्प्रचर्येत्यादौअतंत्रेणारंभेपिप्रदान
तआवापोभवतिसंस्रुवेण बार्हस्पत्यमभिघार्यमैत्रमभिघारयतिबार्हस्पत्येनपूर्वेणप्रचरत्यथमैत्रेणेत्यादिवचनात्आवा
पोवातंत्रभूयमित्यस्योत्तरमाहअथवारुणेषु चेत्यादिवारुणेषष्ठप्रतिग्रहेष्टिषुचसंज्ञान्येष्टिचयः समानेमिथोविप्रियःस्यात्तमे
तयासंज्ञान्यायाजयेदग्नयेवसुमतेपुरोडाशमष्टाकपालंनिर्वपेत्सोमायरुद्रवतेचरुमिंद्रायमरुत्वतेपुरोडाशमेकादशकपालंवरु १६३

णायदित्यवनेचरुमितिविहितानांहविषांचतंत्रभूयंसहप्रदानंभवतिवारुणेषुसंप्रतिपन्नदेवताकानांसहप्रक्षेपस्यन्याय्यत्वा
त्संज्ञान्येसाएकयाज्यापुरोनुवाक्यत्वाच्च अनूयाजप्रभृतितंत्रमासमिष्टयजुषोहोमादिति।स्पष्टं।अत्रद्वैधं।आज्यभागयोर्होम
इतिप्रतिमुखंप्रथाकुरुकुर्यादिति बौधायनः पूर्वार्धएवप्रबाकुगितिशालीकिरिति।आज्यभागयोर्होमो आहवनीये पूर्वार्धे प्र
तिमुखंप्रबाकुकुक्रियाविशेषणंपरस्पराभिमुखेवास्थानतोप्यवक्रौकुर्यादितिबौधायनः शालीकिस्त्वाह पूर्वार्धेप्रबाकुगेवनप्र
तिमुखमिति। अथोपस्तीर्यदक्षिणस्यपुरोडाशस्यपूर्वार्धादवद्यन्नाहाग्नयेनुब्रूहीतीति। उपस्तीर्यउपस्तरणंसर्वत्रध्रौवाज्या
त् उपस्तृणानभिघारयानितिध्रौवाज्यमधिकृत्यब्राह्मणवचनात् अवद्यन् अवदास्यन् अभिमर्शनानंतरंअवदानवचनात् गत
मन्यत्।अथैनमुपतिष्ठते।माभेर्मासंविक्थामात्वाहिंसिषंमानेतेजोपक्रमीदितिसएनंआग्नेयंपुरोडाशमुपतिष्ठतेसमीपेस्थि
त्वामंत्रेणाभिध्यात् गतमन्यत्।अथैनमभिमृशतिभरतमुध्धरेमनुषिंचावदानानितेप्रस्येवदास्यामिनमस्तेअस्तुमामाहिंसीरि
तीति।स्पष्टं।पूर्वार्धादवदायापरार्धावद्यतीति गतं।अत्रस्वधितेत्यवदभावात्स्रुवेणवदानाशक्तौहस्तेनावदातुंशक्यत्वात्स्तेनावदा

हीतीति। आज्यस्य ध्रौवस्य चतुरो ग्रहान् तस्यैव प्रथमम भिघारणात्त् अनुपूर्व्यं हवींष्यभिघारयतीत्यत्रयजनानुपूर्व्येणाभिघा
रणविधानात् इति गृण्हान आह संप्रेष्यति अग्नयेनुब्रूहीति। अत्याक्रम्याश्राव्याहाग्निं यजेति। गतं। वषट्कृते उत्तरार्धपूर्वार्धे प्रति
मुखं प्रबाहुक् जुहोतीति। उत्तरार्धपूर्वार्धे आहवनीये प्रति मुखं सोम्यस्याज्यभागहोमस्याभिमुखं दक्षिणाबिलयेतियावत् सबा
हुक् समानस्थाने गतमन्यत्। यजिप्रचारे सर्वत्र प्रकार उक्तं आपस्तंबेन सर्वत्राव यन्नमुष्मा अनुब्रूहीति पुरोनुवाक्यां संप्रेष्यत्सवदा
यावदायस्रुवेण प्रस्तरबर्हिः समज्य जुहूपभृतावादाय दक्षिणातिक्रम्याश्राव्य प्रत्याश्राविते। मुं यजेति याज्यामिति सार्वत्रिकमिदं
पूर्वमाज्यभागं प्रति स्रुचावात्तेन निदध्यात् आस्विष्टकृत इति च अत्र प्रतियागमत्याक्रामणे जुहूवदुपभृतोपि नियमेन धारणमुक्तमि
निध्येयं। अथोदङ्ङत्याक्रम्य चतुर आज्यस्य गृण्हान आह सोमायानुब्रूहीतीति। गतं। अत्याक्रम्याश्राव्याह सोमं यजेतीति। गतं
वषट्कृते दक्षिणार्धपूर्वार्धे प्रति मुखं प्रबाहुक् जुहोतीति। प्रति मुखं आग्नेयस्याज्यभागहोमस्याभिमुखं उत्तरबिलयास्रुचा प्रबाहु
क् समानस्थाने समं पूर्वेणेत्यापस्तंबः गतमन्यत्। आज्यभागान्तं तंत्रमित्युक्तं कर्मान्ते तथाहि कर्मान्तं कथमुखत्वेतज्ज्ञानीयात् इदं

सु०८०
१६७ नं।व्यतिषंज्येवांगुली अवद्येदंगुष्ठपर्वमात्राणीदेवत्तानि अवदाना निज्यायांसिसौविष्टकृतान्यैडानि चेत्तिकर्मांतं स्पष्टं।अत्रेदंय
हविषामवदानं तइतिसहस्माह बोधायनः पूर्वार्धादेवाग्रे प्रथमं मुख्यस्य हविषोवद्येदथापरार्धादेवमस्य प्रदक्षिणं हविषामव
त्तंभवदित्यत्रोहस्माहशालीकि रपरार्धादेवाग्रे प्रथमं मुख्यस्य हविषोवद्येदथ पूर्वार्धादेवमस्य प्राक्संस्थानि हवींषि भवंतीति
मध्यात्पूर्वार्धादपरार्धात्पंचावत्तिनामित्योपमन्यवइति।मुख्यस्य प्रथमस्य हविष अग्नेरुपरिभागो पूर्वार्धात्तु प्रथममवद्येत्
द्वितीयंत्ववदानमर्थात्तु अपरार्धादित्युक्तं भवति अथ मुख्यादितरस्य द्वितीयादेर्हविषः पूर्वोक्तेन प्रकारेणो अपरार्धात् अपरार्धा
देवाग्रे प्रथममवद्येदित्यर्थः द्वितीयं त्ववदानमर्थात्पूर्वार्धादित्युक्तं एवमस्याव्यत्तोहविषामवत्तं प्रदक्षिणं भवतीति बोधायन
शालीकिस्त्वाह मुख्यस्य हविषोपरार्धादेवाग्रे प्रथममवद्येत्ततः पूर्वार्धात्तु एवमितरेषां तथा सत्यस्य एवमवद्यतः प्राक्सं
स्थानि हवींषि भवंति अवदानानि भवंतीति पंचावत्तिनां तु बोधायनमते मुख्यस्य हविषः पूर्वार्धान्मध्याद्परार्धादिति क्रमः द्वि
तीयस्य तु अपरार्धान्मध्यात्पूर्वार्धादित्यवदानं एवमस्य प्रदक्षिणं हविषामवत्तं भवतीत्युक्तेः शालीकिमते तु अपरार्धान्मध्या १६७

रिकल्पनात्तून च एकादशधर्मानुसादनपक्षे हृदयेप्राशित्रादिनियमः प्राशित्रादिर्मुख्यइतिधर्मइतिबोधायनपक्षस्यहृदयाद्येकदेशाव
दानस्यचैवैकल्पिकतयाप्राशित्रादीनांनैयसासिद्धेः वस्तुतस्तु दीक्षणीयायांविष्णुक्रमचतुर्धाकरणनिषेधवत्प्राशित्रादिविषयेपि
नित्यनुवादत्वेनापिसूत्रसंगतेः नप्राशित्रयजमानभागब्रह्मभागयोर्ग्रहणात् प्रतिहविर्यजमानभागब्रह्मभागयोरवदानमस्ति
तिवाच्यं नहीदंविधानंकिंतुयस्मिन्नेतत्थवींष्योप्यंतेतस्मिन्नावापजानितंत्रस्थानंभजंत इतिवाक्यविहितस्योदाहरणप्रदर्श
नपरंतच्चयथाप्रमाणमुदाहरणीयंनतुस्वयंविषयविशेषस्यकल्पंभविष्यतीति। स्विष्टकृच्चेडाचेति। स्विष्टकृदितावत् अथोप
स्तीर्यदक्षिणयापुरोडाशस्यउत्तराधादवद्यन्नाहाग्नयेस्विष्टकृतेनुब्रूहीतिसकृद्दक्षिणस्यपुरोडाशस्योत्तरार्धादवद्यतिसकृ
द्वाज्यात् सकृदुत्तरस्यपुरोडाशस्यसकृच्छृतस्यसकृद्भ्यो द्विरभिघारयतिनप्रत्यनक्तीतिसूत्रेणस्फुटमेवप्रतिहविःप्रत्ये
कमवदानंविहितंतथाइडायामपिअथकंसेनाचमसंवेडोपहवनंयाचतीतिसूत्रेप्रतिहविरवदानमुक्तंअत्रइतिशब्दउदाहर
णसमाप्त्यइमानिप्राशित्रादीनिभेदेनकृतानि तंत्रस्थानंभजंत इतिसामान्यउक्ते चभेदेनकरणंक तंत्रस्थानंभजंतइत्यते

सु०द०
विशिष्यदर्शयन्तिअवदानतआवापःआवृत्तिर्भवतिउपपादितमेतदुदाहरणविवेचनावसरेतंत्रंयोगपद्यंनुप्रदानतःप्रसक्तोभवति
१६३ पृच्छतिकउखलुतंत्रमित्यादिकुत्रअंगानुष्ठानंतंत्रंप्रक्रमेसरुद्दनुष्ठानेनोपकारकभावंगच्छतीतिप्रश्नःउत्तरमाहमैत्राबार्हस्पत्य
इत्यादिकृतंत्रमावापभूयंगच्छतीत्यस्योत्तरंमैत्रावार्हस्पत्येचरौराजसूयेहिमैत्रावार्हस्पत्येशेनिर्वपणंतंत्रंमैत्राबार्हस्पत्येसंभ
वतीतिसहचोदितत्वात्मैत्राबार्हस्पत्यस्यनिर्वपणइतिसमानचतुर्मुष्टीस्यात्तामितिबोधायनोनाचतुर्मुष्टीस्यात्तामितिशा ना
लीकिरितिद्वेधोक्तसमानचतुर्मुष्टिनिर्वापपक्षइदंअसमानचतुर्मुष्टिपक्षेतुकृष्णाजिनास्तरणावघातादितंत्रंतंत्रंतथाअ
प्यन्यस्मिन्एवमिवयत्रवचनमस्तिउभयदोषेऐंद्राग्नंपंचशरावमोदनंनयोःपृथक्प्रचर्येत्यादौअवदानंतंत्रेणारंभेपिप्रदान
तआवापोभवतिसंस्रुवेण बार्हस्पत्यमभिघार्यमैत्रमभिघारयतिबार्हस्पत्येनपूर्वेणप्रचरत्यथमैत्रेणेत्यादिवचनात्आवा
पोयानंत्रभूयमित्यस्योत्तरमाहअथवारुणेषुचेत्यादिवारुणेष्वप्रतिग्रहेष्टिषुचसंज्ञान्येष्टिंचयःसमानोमिथोविप्रियःस्यात्तमे १६३
तयासंज्ञान्यायाजयेदग्नयेवसुमतेपुरोडाशमष्टाकपालंनिर्वपेत्सोमायरुद्रवतेचरुमिंद्रायमरुत्वतेपुरोडाशमेकादशकपालंवरु

पूर्वार्धादिति सर्वेषां प्राक् संस्थावचनात् औपमन्यवस्त्वाह मध्यात्पूर्वार्धाच्च चतुरवत्तिनामिति शेषः पंचावत्तिनो विशेषमाह अपरा
र्धात्पंचावत्तिनामिति अत्र मन्ते नु उपपत्ति वचनाभावात् वचनमेव मूलं द्रष्टव्यं तथा चकस्यांतरमपि आग्नेयस्य पुरोडाशस्य मध्या
द् अंगुष्ठपर्वमात्रमवदानं तिरीचीनमवद्यति पूर्वार्धाद् द्वितीयमनूचीनं चतुरवत्तिनः पश्चार्धात् तृतीयं पंचावत्तिन इति ॥ अभिघा
रयतीति । सर्वत्र ध्रौवाज्यादभिघारणं उपस्तरणानभिघारयानिति ध्रौवाज्यमधिकृत्य ब्राह्मणवचनात् प्रस्यनक्ति यवदानानिते
ष्वघ्नन्विलोमाकार्षमात्मनः ॥ आज्येन प्रस्यनज्मे नत्तत्त आप्यायतां पुनरितीति । गतं । इदं प्रस्यंजनं ध्रौवाज्यान्न कार्यं अपि तु स्थाल्या
आदिति वदंति । सर्वत्रावदानेषु हूयमानेषु पुरस्तादत्याक्रमणात्प्रत्याक्रमणात् उपरिष्टाच्च ध्रौवाज्यात् स्रुवाकुर्वीतं तूष्णीं जुहुय
त् तथाहि प्रायश्चित्तसूत्रं ॥ इह हि हविः एषयआज्यं पुरस्ताद्धुत्वाथावदानानि जुहोत्याज्येनोपरिष्टादभिघारयति ते षां संद
स्थानां न देवतास्तर्प्यंति न यजमानोऽथेहे नान्येष संतर्पयति य आज्यं पुरस्ताद्धुत्वाथावदानानि जुहोत्याज्येनोपरिष्टादभिघार
यति तेषां संस्थानां देवतास्तर्प्यंति अथ यजमान इति गतं ॥ अत्याक्रम्याश्राव्याहाग्निं यजेतीति वषट्कृते जुहोतीति ।

सु०द० गतं अत्रेदं ध्येयं। आहुती नामायतने इति सहस्माह बोधायनस्त्रीण्येवैतान्यादिष्टस्थानानि भवंत्याज्यभागौ स्विष्टकृद् यथेतराय
१६५ थावकाशं जुहुयादिति पृष्ठीरेवाहुतिर्जुहूर्त्तु पूर्वार्धे स्विष्टकृतं जुहुयादिति। शालीकिस्स्रुच्यमाघारप्रथममभिजुहुयादि
स्योपमन्यव इति मध्ये प्रदक्षिणं मंडलाकारमिति गार्थीतर इति। आहुतीनामायतने अध्वर्योराहुतिविषयके प्रयत्ने इदमु
च्यते बोधायन आह आज्यभागौ स्विष्टकृदिति त्रीण्येव प्रदानानि आदिष्टस्थानानि आदिष्टं स्थानं येषां तानि आदेशश्च तेषां स्थानेन्य
स्य। नाक्रांतये तेषामपि स्थानांतरानाक्रांतये भवति अन्यथा वैकल्पात् तस्मादितराहुतयो यथावकाशं आहुत्यंतरानाक्रांते स्थले
ग्नौ होतव्या इति शालीकिस्त्वाह पृष्ठीः द्वे द्वे समस्थाने एव कृत्वा प्रागपवर्गाः सर्वाः आहुतिर्जुहूरध्वर्युः पूर्वार्धे स्विष्टकृतं जुहुया
त् अत्र पूर्वार्धे होमेष्वसुस्वंतरं मूलं औपमन्यवस्त्वाह स्रुच्यमाघारपथमभिजुहुयात् स्रुच्यघारपथस्योपरि जुहुयात् अत्र मते
अग्निमध्ये स्विष्टकृत् प्रागुदीच्यामिति द्रष्टव्यं इति मध्ये प्रदक्षिणं मंडलाकारं यथा भवति तथा होतव्यमिति गार्थीतर इति। अथोदङ्ङ्सा १६५
क्रम्य चतुर आज्यस्य गृण्हान आह प्रजापतये इन्द्रूपां स्वनुब्रूहीत्युच्चैरिति। आज्यस्य ध्रौवस्य ध्रौवाज्यमुपांशुयाजार्थमि

स्येतत्त्रयं चित्तंस्तोवा धारनिरूपणेउच्चैरितिमंद्रस्वरः यत्रतत्र मुपांशुलत्रसर्वत्रापिउच्चैर्वचनेमंद्रत्वं बोध्यं। गतमन्यत्। अस्य
कस्याम्नाव्याह प्रजापतिमित्युपांशु यजेत्स्यच्चैरिति। गतं। वषट्कृते जुहोतीति। गतं। अत्रेदं धं उपांशुयाजस्य करणेइति
सूत्रंमौद्गल्यस्यात्रोह स्माह बोधायनो ओषधस्योपांशु याजं कुर्यादग्नीषोमी। यंपौणमास्यांवैष्णवममावास्यायामि त्यत्रोहस्म
ह शाली कि राज्यस्योपांशु याजं कुर्यात् सौम्यंपौर्णमास्यांवैष्णवममावास्यायामित्यत्रोहस्माहोपमन्यवः औषधस्योपांशुया
२ जं कुर्यात् सॅस्वतः पौर्णमास्यां सरस्वत्या अमावास्यायामुभयत्राज्यस्यैवेष्णवइति राथीतरो त्रोहस्माह कोणपतश्वरुश्वस्योद्धे
ष्मवश्च स्यात् स्वयंचैनं यजमानः प्राश्नीयादिति। सूत्रं चतुर आज्यस्य गृह्णान आह प्रजापतय इत्युपांश्विस्याद्दिक ल्पसूत्रं मौ
द्गल्यस्य मतं प्रजापतिमाज्येनोभयत्रापियजेदिति अत्र मते जामिवा एतद्यज्ञस्य क्रियते यदन्वचौ पुरोडाशावुपांशुयाजम्
तरायजतीति वचनेन नैरंतर्येण पुरोडाशद्वयानुष्ठानप्रसक्त जामितापरिहाराय विहितस्य विजातीयाज्यद्रव्यत्वमुचितं
तथाचाज्यस्यैवनात्युपांश्विति वचनेनापि दृश्यते तथा प्रजापतिरेव देवता आवाहनयाज्यानुवाक्यास्विष्टकृत्सूक्तवाकनि

सु॰द॰ गद्देषस्यच्छाखायां प्रज्ञापत्तेः प्रकाशनादित्यभिप्रायः बोधायनस्त्वाह औषधस्य चरोः संबंधिनं उपांशुयाजं कुर्यात् चरावपि
१६६ स्यज्ञाभिभवति अग्नीषोमौ पौर्णमास्यां देवता अमावास्यायां तु विष्णुरिति व्यवस्थायुक्ता शाखांतरे उपांशुयाजकर्मैव वैष्णवं प्रजा
पत्याग्नीषोमीययाज्यापुरोनुवाक्यायुगलानां आम्नानेन नतिरूपां विकल्पाभ्युपगमेपि अनयोर्देवतयोः होत्रे उक्तयोः काल
यो र्व्यवस्थाम्नानात् तथा चाश्वलायनः अग्नीषोमीय पौर्णमास्यां वैष्णवममावास्यायामेक इति शालीकिस्त्वाह आज्येनो
पांशुयाजं कुर्यात् देवतांतु सोमः पौर्णमास्यां विष्णुरमावास्यायां अत्र शाखांतरीयं वचनं मूलं औपमन्यवस्त्वाह औषधस्य
चरोः संबंधिनं चरुणोपांशुयाजं कुर्यात् देवतांतु सरस्वान् पौर्णमास्यां सरस्वत्यमावास्यायामिति अत्रापि मूलं शाखांतरी
मेव वचनं उभयत्र पर्यद्वये आज्येन वैष्णव उपांशुयाज इति राथीतरस्य मतं होत्रे समाम्नानात् तथा चाश्वलायनः अंतरेणाह
विषी विष्णुमुपांश्वेतरेयिण इति कौणपतस्त्वाह चरुश्चरमात् उपांशुयाजस्य चरुरेव द्रव्यं भवेत् शाखांतरे उपांशुयाजेवपि
रसिद्धस्यच्छेसारीनां मंत्राणां विधानात् पिषंति पुरोडाशीयानि चरव्यां दधति यदि चरुं करिष्यन् भवतीति चरव्याणां तं १६६

डुलानां प्रकृतौ विभज्य निधानवचनात् कपालोपधानानंतरं मुपेंधने चरुस्थालीमध्यस्यंति श्रपणानीत्ति स्थाल्युपेंधनं
श्रपणाध्यसनविधानात्तु जामिदोषनिराससंभवाच्च चरुपक्षस्य युक्ततरत्वात् तथा चेक्ष्मवो विष्णुदेवत्यश्चस्यात्तं होत्रेपर्व
द्वयेप्युपांशुयाजस्य विष्णुदेवतापिधानात् एतन्मते एनं चरुं प्राश्नीयादिति यत्तूक्तं यजमानस्त्वयमेव प्राश्नीयात् न त्वेनं प्र
श्नीयादित्यकदशानुपपत्तिः रुस्त्वचरुप्राशनस्यत्ताप्य विहितत्वेनानुवादायोगादिति वाच्यं एतच्छब्देन सर्वनाम्नबुधि
स्थुपरामर्शो समर्थेन यथाप्राप्त्यनुवाद इति न्यायेन इडावदानेन यावानंशो भक्षणीयत्वेन वचनावगतस्तावत् एवानुवादोचिं
स्यात्तु उद्देशसंभवाच्च न च यजमाना प्राश्नीयादित्येव सिद्धे स्वयमिति व्यर्थमिति वाच्यं ।। प्रवासे शेस्वाज्ञया पुत्रादेो यजम
तं कुर्वंति मध्ये स्वयमागत्ने यजमानपुत्राभ्यां हविर्भक्षणस्य विभज्येन कर्तव्यनयात्त्र यजमानांशो चरुभागरूस्त्वविधा
नपरतया साफल्यात्तु अन्यथा विशिष्टविध्यादिगौरवादिति । आपस्तंबस्त्वाह । आज्यहविरुपांशुयाजः पौर्णमास्यामेव
भवति वेक्ष्मवोऽग्नीषोमीयः प्राजापत्यो वेत्ति । आश्वलायनस्तु पर्वद्वयेपि नोपांशुयाज इति पक्षमप्याह नैकैकं चनेति । अ

थोद्दुःस्याक्रम्योत्तरस्य पुरोडाशस्यापरार्धाद्दव घ्यहाग्नीषोमाभ्याम नुब्रूहीतिपौर्णमास्यामिंद्रायवैमृधायत्तैंद्रचैंद्राग्निभ्यामितिसमाव
स्यायामसंन्नयंत्तइंद्रायेतिसन्नय त्तो महेंद्रायेति प्रावायदि महेंद्रयाजीभवतीति। अथउपांशुयाजानुष्ठानानंत्तरमुद्दुःसाक्रम्यउ
त्तरस्याग्नेयापुरोडाशाउत्तरस्यअग्नीषोमीयादेवपुरोडाशस्यापराधीत् प्रदक्षिणार्थंप्रागयवर्गार्थंवाअवद्यन्नाहाग्नीषोमाभ्यामनुब्रू
हीति। अत्रउत्तरस्येतिपदेनाग्नेयाउत्तरंपुरोडाशंनिर्दिश्यतस्यापरार्धादवद्यन्नाहाग्नीषोमाभ्यामनुब्रूहींद्रायवैमृधायेति चेति अग्नी
षोमीयवैमृधयोःप्रचारोविहितःन ह्यग्नीषोमीयसद्भावे वैमृधस्याग्नेयाउत्तरत्वंसंघटते अथचब्रवीति अतो ज्ञापयति। पौर्णमास्या
मनित्योग्नीषोमीयइति एवंच ब्राह्मणस्य सोमयागात्पूर्वंनाग्नीषोमीयःपुरोडाशःक्षत्रियवैश्ययोस्तु ततःपूर्वमप्यस्त्यग्नीषोमीयइ
त्यत्र तात्पर्यमवगम्यत इत्युक्तं निर्वापनिरूपणावसरे इंद्राग्निभ्यामित्यादिगतं। ननु अथोपस्तीर्यद्विःपुरोडाशस्यावद्यन्नाहेंद्राय
नुब्रूहीत्यादिवक्ष्यतितथाचात्रइंद्रायेति सन्नयत्तोमहेंद्रायेतिवायदिमहेंद्रोयाजीभवतिद्विःपुरोडाशस्यावद्यतिद्विःश्रृतस्य
द्विर्दध्नोभिघारयतिप्रत्यनत्त्यस्याक्रम्याश्राव्याहेंद्रंयजेतिमहेंद्रमितिवायदिमहेंद्रयाजीभवतीति अथउपांशुयाजयागानं १६७

तरं प्रसनक्ति तूष्णीं श्रुत्तदध्नो: यद्यपि पूर्वमेवैं द्रपुरोडाशस्य प्रचारो विहितः कुतः पुनरभिधीयत इति तथापि सान्नाय्येन सह प्र
दानार्थं पुनर्वचने अवचने हि पुरोडाशस्य पूर्वमुक्तत्वात् सान्नाय्य पृथक् प्रदान शंका स्यादिति। गतमन्यत्। अत्र कर्मान्तं पयसा दैवत्त
मभिवर्धयेदध्ना स्विष्टकृत मिति दैवत्तं देवताया इन्द्रस्य महेन्द्रस्य वा संबंधि। वदानं पयसा अभिवर्धयेत् अवदान प्रमाणादंगुष्ठपर्वमा
त्रात् दध्ना स्विष्टकृतं स्विष्टकृदवदान प्रमाणाद्वर्धयेत् इति। पंचमस्यावदानस्याभिवृद्धौ द्वैधं ।। पंचमस्यावदानस्याभिवर्धयेदिति
बौधायन आज्यस्येवेति शालीकिरिति। पंचमस्यावदानस्याभिवृध्या अयं विचारः ओषधस्याभिवर्धयेदिति बौधायनः प्राधान्यात्
आज्यस्येवेति शालीकिः द्विरभिघारयति चतुरवत्तस्यापत्त्या इति हि पूरणमाज्येनान्यत्र दृष्टमिति। अथोपस्तीर्य दक्षिणस्य पुरोडाशस्योत्त
रार्धाद्ववद्यति सकृत् अंगाज्ञात्सकृ उत्तरस्य पुरोडाशस्य सकृत्छ्नस्य सकृद्दध्नो द्विरभिघारयति न प्रत्यनक्तीति अथ प्रधानयागप्र
चारानंतरं स्पष्टमन्यत्। ननु शेषात्स्विष्टकृतं यजतीति वचनेन स्विष्टकृतः प्रधानयागीय हविः शेषादवदानमवगम्यते तेन चोपांशुयाजी
यं हविः किंचन प्रसिद्धं येन तस्मादप्यवदीयेत न च ध्रौवमाज्यमुपांशुयाजस्य द्रव्यं तत आदायोपांशुयाजानुष्ठानात् अतस्ततोपि प्र

सु॰द॰ सं।स्विष्टकृत इति वाच्यं सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति वचनेन तस्य द्रव्यापेक्षसर्वयज्ञार्थोत्पन्नत्वेनाग्नेयादेरिव साधा
१६८ रणोत्पन्नद्रव्याभावात् तथा च कथमाचार्येणोक्तं स कृत्स्नं ध्रुवाज्यादिति चेत्सत्यं ध्रौवाज्यं सर्वयज्ञार्थं सर्वदेवतार्थं च तथापि उत्पत्तिस्तस्योपां
शुयाजार्थत्वेन तथा हि दर्शपूर्णमासप्रकरणे प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशदित्यनुवाके प्रतिपाद्यमानः प्रजापतिरुपांशुयाजदेवता
कत्वे प्रजापतय इत्युपांश्विति वचनात् आवाहनोत्तमप्रयाजयाज्यापुरोनुवाक्यो वा स्विष्टकृन्निगदसूक्तवाकेषु च उपांशुयाजक्रमे तस्य
प्रकाशनात् तथा च स आत्मन्नाज्यमाधत्तेति वचनात्।तस्मात् उपांशुयाजार्थं ध्रौवाज्यं स्थापितमिति गम्यते न तस्य प्रजापतिं प्रति एष
वाव यज्ञो यदाज्यमप्येव नो ऽत्रास्त्विति वचनेन यदाज्यं ध्रौवमाज्यं एषः यज्ञो वाव सर्वयज्ञार्थ एव अतः अत्रैव उपांशुयाजार्थे तदीय एव नः अस्
त्यमपि भागोस्तिति देवैः प्रार्थने कृते देवान्प्रति यज्वान आज्यभागाउपस्तरणाभिघारयानीति इत्याज्यभागोपस्तरणाभिघारणादिप्रका
रैः सर्वयज्ञार्थं सर्वदेवतार्थं च उपयुज्यतां मदीयं ध्रौवाज्यमिति प्रजापतेर्वचनेन च उपांशुयाजार्थं प्राजापत्यमाज्यं तस्मादेवाज्यात्सर्वे द्रव्यो १६८
त्पादयागाः कार्याः सर्वं च यज्ञार्थं कार्यं साधनीयमित्यवगमात् एवं च सर्वस्मै वा एतद्यज्ञाय गृह्यत इत्यनेनाप्ययमेवार्थो ऽनूद्य।तदुक्तं सुबूत्त

माचार्येणसकृत् ध्रुवाज्यादिति। अतएवप्रायणीयायामष्टावत्तः स्विष्टकृदितिलिंगमुपपन्नं उपांशुयाजार्थध्रौवाज्यंतत एवोपस्तरणादि
क्रमिस्यत्र ध्रौवमुपांशुयाजशेषोयदिनस्यात्तद्विकारेष्वतिदेशाभावाच्चन्नप्रवृत्तिः स्यात् तथासतिकुतोष्टावत्तानि स्विष्टकृति अत्रेवतत्रा
पि ध्रौवात्स्विष्टकृतोवदानायोगेनपंचानामवदानानांलोपप्रसंगात् उपांशुयाजशेषत्वेतु तंतंयागंप्रत्यतिदेशेनशेषत्तयातत्त्यागार्थतया
पृथगवदानेसति संभवंत्यष्टाववदानानि स्विष्टकृतीति सर्वसमंजसं॥ अवत्तेस्विष्टकृतिस्रुवेणपार्वणोहोमोजुहोतिवृषभंवाजिनंवयंपूर्ण
मासंयजामहे॥ सनोदोहतां सुवीर्यं रायस्पोषं सहस्रिणंप्राणायसुराधसेपौर्णमासायस्वाहेतिपौर्णमास्यामामावास्यासुभगासुशेवा
धेनुरिवभूयआप्यायमाना सानोदोहतां सुवीर्यं रायस्पोषं सहस्रिणमपानायसुराधसेमावास्यायैस्वाहेत्यमावास्यायामित्तीति अ
वत्तेस्विष्टकृतिस्विष्टकृत्संबंधिनि द्रव्ये अवदानेनसंस्कृतेसति पार्वणोपर्वणीपौर्णमासीसमुदायोयागः अमावास्यायागसमुदाय
श्चक्रमेणदेवता अनयोस्तौपार्वणोहोमौस्रुवेणजुहोति ध्रौवाज्यात्जुह्वांसौस्विष्टकृतेअवदानेनव्याप्तत्वात् अत्रनप्रत्यन्तत्वपथस्तु
वेणपार्वणोहोमाविस्येवप्रकृतसिद्धेस्विष्टकृतीति नवाच्यं अथचवदति। अतोज्ञापयतिप्राक्स्विष्टकृदवदानादपि पार्वणोहोमौकर्त्तव्या

सु०द० विद्यस्तिपक्षइतिअवत्तेस्त्रुवेणहोमः प्राकुस्त्रुचाअनादिष्टेसर्वत्रस्त्रुचाहोमस्यकर्मानोक्तेः॥अत्रकर्मोक्तं।अयात्तआदेशकारित्तानिव्याख्या
१६९ स्यामः आदिश्यतेनेनेत्स्यादेशः सामान्यशास्त्रं अथवाआदिश्यत्तइत्यादेशउत्सर्गः तस्यकारित्तानिरुहिंसा यामितिधातोरुत्पन्नः कारि
शब्दः बाधकानीत्यर्थः अपवादानीतियावत्तान्याख्यास्यामइत्यधिकृत्यआहवनीयस्यअध्वर्योश्चापवादंदर्शयित्वाइदमाह अना
दिष्टंपात्रं अपित्तुयथैतत्तद्भवतिअंजलिनाजुहोतिशूर्पेणजुहोतिरुक्माजिनपुटेनजुहोतिमध्यमेनपर्णेण जुहोतिअंतिमेनपर्णेन
जुहोतिअर्कपर्णेन जुहोतिपर्णमय्येनस्त्रुवेणजुहोतिऔदुंबरेणस्त्रुवेणजुहोति अंगुष्ठाभ्यांजुहोति विस्रंसिकाकांडाभ्यांजुहोतिगोमृग
कंठेनजुहोतिअश्वशफेनजुहोतिअयस्मयेनकमंडलुनाजुहोतीत्यनादिष्टेस्त्रुचैवहोतव्यमिति पात्रंजुहूलक्षणं अनादिष्टं अविद्यमानमा
दिष्टंविधानमस्यअनादिष्टंविहितंवक्ष्यमाणेषुहोमविशेषेषुत्तयाहि होमसामान्येजुहूविधिनाविशेषिसामान्यरूपंपुरस्कृत्ययदाजुहूर्नि
विशत्तेततः प्रागेवविशेषविहितेमंजल्यादिकं झटित्यभिनिविशत्तेपश्चादुत्सर्गः कल्पनामूलकांक्षोच्छेदात्तूअपवादविषयं तउत्सृज्यान्य
त्राभिनिविशत्तइतिनादिष्टेपात्रजुहूअपित्तुष्टतद्वक्ष्यमाणविशेषविधिरूपंब्राह्मणं यथायद्विशेषविषयकंतदेवविहितंभवतिविधि
मेयोदाहृत्सदर्शयतिअं। जलिनेत्यादिअनादिष्टेसाधनविशेषविधि

रहितेस्तु चैव जुहोतव्यं न उक्तमापस्तंबेन जुहोतीति चोद्यमाना सर्पिराज्यं प्रत्नीयादध्वर्युकर्तारं जुहूं पात्रमिति पार्वणयोः समुदायांगत्वान्नमं
त्रलिंगात् क्रियमाणसमुदायदेवस्वत्वाश्चविकृताव प्रवृत्तिः। अस्माकमप्याश्वाव्याहाग्निं स्विष्टकृतं यजेति वषट्कृत उत्तरार्धेतिहाय पूर्वा
आदु तीर्जुहोतीति। गतं। अत्रै तन्मेक्षणमाहवनीयेनुप्रहरन्तीति। अत्र स्विष्टकृतो होमानंतरं एतत्सान्नाय्यार्थे उपांशुयाजचरुपक्षे उपां
शुयाजार्थं च मेक्षणमाहवनीयेनुप्रहरेन्न तु संयनार्थं तद्विधार्यत एव अंते प्रतिपत्तिदर्शनात्। अत्रैवं ध्यं। मेक्षणस्यानुप्रहरणइति सूत्रं
शालीके रत्नोहस्माह बौधायनोन मेक्षणन्यायेन वपाश्रपणी अनुप्रहरेदितीति। मेक्षणस्यानुप्रहरणविषये इदमुच्यते सूत्रं अत्रैतन्मेक्ष
णं मनुप्रहरन्तीति कल्पसूत्रं शालीकेर्मतं बौधायनस्त्वाह मेक्षणन्यायेन नियमेन न कुर्यात् न प्रहरेत् वचनाभावात् नन्वेवं वपाश्रपण्या
अनुप्रहरणं न स्यात् मेक्षणन्यायादिति अत आहवनीयाश्रपणी अनुप्रहरेदिति वाचनिकं हि तद्वपाश्रपणी प्रहरति विषूची प्रहरन्तीति श्र
वणात् यदि तु वपाश्रपण्योस्तु शालीस्थानापन्नेन मेक्षणस्थानापन्नेइति मतांतरं मेक्षणन्यायानवतारात् न वपाश्रपण्योरनुप्रहरणशं
कापीति। अथेन त्वं संस्रावेणाभिजुहोतीति। एतनन्तु अनुप्रहृतं मेक्षणमभि मेक्षणस्योपरि संस्रावेण स्विष्टकृद्धोमानंतरं जुहूसंश्लि

सु०द० वेनाज्यशेषेण जुहो ॰ तिसंस्रावयति अथोदं इ्‌ स्याक्रम्य जुह्वामप आनीय संक्षालनमंत्तः परिधिनिनयति
१७० मिसाहरू सुसं॰ं शत्तधारमेत्तं। सनः पितरंपितामहं प्रपितामहंस्वर्गे लोके गच्छतु पिन्वमानंस्वधानम इति॥३९॥ वैश्वानरे हविरिदंजुहो
क्षालनंसंक्षाल्यतेनेनेतिसंक्षालनमुदकं अत्रमंत्रे वैश्वानरेएनद्रूपा यां पृथिव्यां इदं हविर्जुहोमि सवैश्वानरः स्वर्गेलोके विद्यमानंपित
रंपितामहंप्रपितामहंपिन्वमानः प्रीणयन्‌ गच्छतु इदंहविर्गमयत्वितिहविषः पितृसंबंधावगमात्‌ मंत्रांतेस्वधानम इति श्रवणाच्च
पितृपितामहप्रपितामहदेवत्योहोमः। अतएव वैश्वानरे हविरिति प्राचीनावी। ती हिरण्यकेशिमत्ता दितिधूर्तस्वामी। मत्तांतरे वैश्वा
नरोदेवता। अत्रकर्मातं कुत्वास्विष्टकृतं स्रुचमद्भिः पूरयित्वातः परिधिनिनयेद्वैश्वानरे हविरिदंजुहोमीतीति। गत्तं। अत्र यद्यपि
यथाकल्पमेव निनयनाम्नानात्‌ विशेषोनदृश्यते तथापिइहपुनर्वचनंस्यांतः परिधिनियनमेववैश्वानर इतिकार्यं नवहिः परिधिनिन
यनमिमं समुद्रमित्यर्थः नतस्वकल्पोक्तेन विकल्पः फलतीति अतएव वहिः परिधिनिनयनंनोक्तमापस्तंबेरिति। निर्णिज्यस्रुचं
निषद्याद्भिः पूरयित्वाबहिः परिधिनिनयतीमं॰ समुद्रं॰ शतधारमुत्संव्यच्यमानंभुवनस्य मध्ये घृतंदुहानामदितिंजनायाग्ने १७०

माहि॒ꣳसीः परमेव्यामन्निति। स्रुचं जुहूं निर्णिज्य प्रक्षाल्य आहवनीये निष्टप्य तां अद्भिः पूरयित्वा बहिः परिधिवेद्यां निनयति इमं स
द्र मिति। अत्रेन उपभृत्तमाज्यं सर्वश एव जुह्वां समानयत्ते अथ यथायतनं स्रुचौ सादयित्वा प्राशित्रमवद्यति दक्षिणस्य पुरोडाशस्योत्तरार्धात्
व मात्रमज्ञायोयवमात्रादाव्याधात्कृत्य तामिदं मारूरु पाम यज्ञस्य शुद्धं स्विष्टमिदं हविरस्तीति। अत्र बहिः परिधि निनयनानन्तरं एतत्
अथाहत्ते दक्षिणेन जुहूं जुह्वे ह्यग्निस्त्वा ह्वयति देवयज्याया इति सव्येनोपभृतमिति विहितं जुहूपभृदादानमारभ्य हस्ताभ्यां ध्रियमा
णमोपभृतमाज्यं सर्वश एव कृत्स्नमेपि जुह्वां समानयत्ते अथ यथायतनं स्रुचे जुहूपभृतौ सादयित्वा जुहूपभृतो रत्रासादनवचनात्
आदानप्रभृत्येतावत्पर्यन्तं न सादयेनी जुहूपभृताविति गम्यत्ते प्राशित्रमवद्यति अवदानेन प्राशित्रं करोति कुतोवदेयमित्यत आह
दक्षिणस्य पुरोडाशस्योत्तरार्धादिति कुत एतत् तस्याविद्धं निरं कृतं निति ब्राह्मणादिति गम्यत्ते तत्र हि देवा वै यज्ञाद्रुद्र मंतरायसय
इमविध्यदिति यज्ञादंतरित्तेन रुद्रेण यज्ञसाधनस्य पुरोडाशस्य वेधमुक्ता तद्देवा अअभिभवनं इदं भविष्यति यदि राधयिष्याम इति
न स्विष्टकृत् स्विष्टकृत्वमिति देवानां इमं रुद्रं पश्यदिति स्विष्टकृद्यागेनाराधयिष्यामः तदो अस्माकं इदं पुरोडाशरूपं हविः अवशिष्टका

सु०द०
१७१

र्यसाधनसमर्थंभविष्यतीतिपरस्परसंवादं स्विष्टकृन्नाम निर्वचनंप्रदर्श्यतस्याविद्भिरकृन्तन् यवेनसंमि।नमितित्तस्यपुरोडाशस्यरुद्रेण
कोपात् आविद्धंउतरायवमात्रमकृन्तन् अवशिष्टयज्ञानुष्ठानार्थंदेवा निष्कृष्यछिन्नवंतइतितेषांपुरोडाशात्। प्राशित्रावदानंप्रतिपाद्य
विहितंतस्माद्यवमात्रमवद्येदितितत्रतस्येतिपुरोडाशस्यैकस्यपरामर्शात् दक्षिणार्द्धेकस्मादेवपुरोडाशात्प्राशित्रमितिगम्यतेतथा
पियत्कमाचार्यैर्दक्षिणस्योत्तरार्धादितिकेचित्। अन्येतुदेवादेवायज्ञाउद्रमंतरान्तिस्यदाहृत्यब्राह्मणेपुरोडाशस्यप्रकाशकंपदंनश्रूयते
प्रत्कृतइदमितिनपुंसकलिंगेनहविर्मात्रंपरामृश्यतेतस्येतिचहविष्यएवपरामर्शाएकवचनंचहविःसामान्याभिप्रायंअतसर्वेभ्योहवि
र्भ्योवदेयंदक्षिणपुरोडाशेतुदेशनियम। क्रियतेदक्षिणस्येत्यादिनायवमात्रमितिद्रव्यद्रव्येसान्नाय्येष्वुपपन्नमेवांगुष्ठपर्वमात्रवत्
अन्यथातस्याप्राप्तौपयसादैवतमभिवर्धयेदितितत्तोभिदध्नि विधानंगोपपद्येतअतएवचसान्नाय्यविकारेपशावपिप्राशित्रमि
तिवदंतियदत्रयुक्तंतत्सरिभ्यास्यंविद्भिरिति।। परिमाणंविध्यतेयवमात्रमितियवमात्राद्धिक्येदोषश्श्रूयते। यत्तज्ज्यायोवद्ये
द्गोपपत्तेयघज्ञस्येति।। मंत्रवर्णश्च अज्यायोयवमात्रादितिअथैनत्स्रुवदंडेनाभिघार्यजघनेनप्रणीताःसादयित्वाद्भिःस्कवदंडंसंस् १७१

वाअज्यायोयवमात्रा

स्यावद्यानीति ॥ एतत्प्राशित्रं स्रुवस्य दण्डेन मूलभागेन प्रणीताः पश्चिमेन सादयित्वा स्रुवदण्डमद्भिः संस्पृश्यावद्यानीति । एतत्प्राशित्रं स्रु
वस्य दण्डेन मूलभागेन प्रणीताः पश्चिमेन । अत्र द्वैधं ॥ प्राशित्रस्यावदान इति सूत्रं बौधायनस्य परिहरिष्यन्नेव प्राशित्रमवद्येदिति बौ
धायनः शालीकिस्त्वाह ॥ परिहरिष्यन्नेव प्राशित्रं यदा परिहरिष्यन्भवति इडावदानात्पूर्वं वा इडाभक्षणात्पश्चाद्वा तदैव प्राशित्रमवद्ये
दिति तथा चापस्तंबः ॥ इडामेके पूर्वं समामनन्ति प्राशित्रमेके आग्नेयं पुरोडाशं प्राञ्चं मधुतिर्यञ्चं वा विरुज्यांगुष्ठेनोपमध्यमया चांगुल्यां व्यू
मध्यात् ॥ प्राशित्रमवद्यति यवमात्रं पिप्पलमात्रं वा द्व्याधात्कुस्तामिदं ॥ मारूरूपामयज्ञस्य शुद्धं स्विष्टमिदं हविरित्येव मुत्तरस्यावद्य
स्रुपस्तीर्य नाभिघारयत्येतद्वा विपरीतमदिवोपस्तृणात्याभिघारयत्यत्रैवास्य परिहरण प्राशित्रमेके समामनन्तीति । बौधायनकृतं कल्पं
व्याख्यास्याम्यधुनाबुधाः ॥ तुष्यन्तु पूर्णं तत्रासीत् पटलं चतुर्दश ॥ खंडः ॥ ३१ ॥ अथ कंसं वा चमसं वेडोपहवनं याचतीति ॥ इडाअ
नं पुरोडाशो दिभ्यो हविर्भ्यो वत्तं उपहूयते स्मिन्निति इडोपहवनं इडापात्रं कंसं वा चमसं वा याचति यद्यपीडापात्रं पात्रासादनकाल एव
प्राशित्रहरणं चेडापात्रं चेति सूत्रेणासादनीयत्वेन विधानादासादितं प्रोक्षितं च वर्तते तथा च तदेवात्र याच्यं आसादनप्रोक्षण्योः साफ

सु॰द॰
१७२
धा

स्याय तत्कथमिदानीमुच्यते कंसं वाचमसं वेतीति तथापि उ।सादनकाल एवानयोरन्यतरदासादनीयमित्याशया याचतीत्यनेनाध्वर्युः
स्वयमासीन एव अग्रेण गार्हपत्यं विद्यमानं परिकर्मिणो हस्तादानाप्य गृह्णातीति गम्यते एवं याचतीति यत्र वदति तत्र सर्वत्रापि योज्यं.
तमंतर्वेदि विधाय तस्मिन्नुपस्तीर्य दक्षिणपुरोडाशस्य दक्षिणार्धात् अरुज्यावद्यति मनुनादृष्टं घृतपदीं मित्रावरुणसमीरितां। द
क्षिणार्द्धाद संभिदन्नव म्येकतोमुखामितीति।। तं कंसं चमसं वा अंतर्वेदि निधाय तस्मिन्नुपस्तीर्य इदमुपस्तरणमाज्यस्थाल्याः
इडाभक्षणस्यायज्ञतया तदर्थस्येतस्य यज्ञार्थत्वाभावात्। दक्षिणार्द्धात् अरुज्यभंक्त्वा अवद्यति मनुनेति। अत्रेदमापस्तंबसूत्रं आ
ग्नेयस्य पुरोडाशस्य दक्षिणार्द्धात् प्रथममवदानमवद्यतीति।। द्वितीयमवदानानि संभिद्यावद्यतीति अवदीयंते एभ्य इत्यवदानान्य
दानस्थानानि संभिद्य मिश्रीकृत्य यथा मिश्राणि भवंति।। तथा गृहीत्वा द्वितीयमवदानमवद्यति मध्ये गृहीते सर्वाणि स्थानानि गृ
हीतानि भवंति तस्मान्मध्ये गृह्णीयात्।। अथ दक्षिणस्यैव पुरोडाशस्य पूर्वार्धात् त्र्यंगुलं वा चतुरंगुलं वाज्येन सुसंतत संसक्त पश्चाग्रेणाध्र
वा यजमानभागं निदधातीति।। आज्येन स्थाल्याज्येन गतमन्यत्।। अत्रेदमवगंतव्यं इदमामनंति। अथवा एतर्ह्यर्कः पद्भूतायामीडायां पु १७२

रोडाशस्यैवबर्हिषदोमीमांसा॥ यजमानंदेवा अब्रुवन्॥ नाहमभागोनिवर्त्स्यामीत्यब्रवीत्॥ नमयाभागयानुवक्ष्यथेतिवागब्रवीत्॥ नाह
मभागापुरोनुवाक्याभविष्यतीतिपुरोनुवाक्या॥ नाहमभागायाज्याभविष्यामीतियाज्या॥ नमयाभागेनवषट्करिष्यथेतिवषट्
कारः॥ यद्यजमानंभागंनिधायपुरोडाशंबर्हिषदंकरोति॥ तानेवतद्भागिनःकरोति॥ चतुरस्रोदिशः दिक्ष्वेवप्रतितिष्ठति॥ बर्हिषदं
करोति॥ यजमानोवैपुरोडाशः॥ प्रजाबर्हिः॥ यजमानमेवप्रजासुप्रतिष्ठापयति॥ तस्मादस्थन्याः प्रजाः प्रतितिष्ठन्ति॥ मांसेनान्याः
अथोखल्वाहुः॥ दक्षिणावाएताहविर्यज्ञस्यान्तर्वेद्यवरुंध्यन्ते॥ यत्पुरोडाशंबर्हिषदंकरोतीति॥ चतुर्धाकरोति॥ चत्वारोह्येतेहविर्यज्ञ
स्यर्त्विजः॥ ब्रह्माहोताध्वर्युरग्नीत्॥ तमभिमृशेत्॥ इदंब्रह्मणः॥ इदंहोतुः॥ इदमध्वर्योः॥ इदमग्नीध्रइति॥ यथैवादः सौम्येध्वरे॥ आदे
शमृत्विग्भ्योदक्षिणानीयन्ते॥ तादृगेवतत्॥ अग्नीधेप्रथमायाददाति॥ अग्निमुखाह्यृद्धिः॥ अग्निमुखामेवर्द्धिंयजमानऋध्नोति॥
सकृदुपस्तीर्यद्विराददत्॥ उपस्तीर्यद्विरभिघारयति॥ षट्संपद्यन्ते॥ षड्वाऋतवः॥ ऋतूनेवप्रीणाति॥ वेदेनब्राह्मणेब्रह्मभागंपरिहर
ति॥ प्राजापत्योवैवेदः॥ प्राजापत्योब्रह्मा॥ सवितायज्ञस्यप्रसूत्यै॥ अथकाममन्येन॥ ततोहोत्रे॥ मध्यंवाएतद्यज्ञस्य॥ यदध्वर्युः॥ तस्माद्द्वि

सु०र०
१७३

र्यजस्यैतामेवावृतमनु। अन्याद्दक्षिणानीयंते॥ यजमानस्य प्रतिष्ठित्या इति। अयमर्थः॥ अथवै इडावदानानंतरं खलु एतर्हि इडोपह्वा
नसमये यत्र होतुरभिज्ञानात्तिरैव्या अध्वर्यव उपहूता। उपहूता मनुष्या इति तदा अथवा उपहूता यामिडायां इडापह्वाने सेतिकर्त
व्यताके समासिमनो ज्योतिर्जुषतामित्यद्भिरंतर्वेदि प्रस्तरे मार्जयित्वा कृतशिष्टस्य पुरोडाशस्य बर्हिषद एव बर्हिःस्थापनवि
षयादनवधारणात्। पुरोडाशो बर्हिषि स्थापनीयो वा नवेति संशयात् तद्विषया भवति मीमांसा तत्र बर्हिषत्करणचतुर्धाकर
णयोर्विचारे श्रुतस्य पुरोडाशस्वरूपस्य सर्वपुरोडाशसाधारण्येपि सुख्यधर्मत्वात् प्रथम एव पुरोडाशे बर्हिषत्करणे तथा चकल्पः।
दक्षिणं पुरोडाशं चतुर्धाकृत्वा बर्हिषदं करोतीति आपस्तंबश्च आग्नेयं पुरोडाशं चतुर्धाकृत्वा बर्हिषदं करोति बर्हिषदं वा कृत्वा चतु
र्धा करोतीति अथवा पुरोडाशोत्र हविरिति कृत्वा पुरोडाशं पदसुमांतं न तु पुरोडाशस्वरूपमपि विवक्षितं एवं च चरुमुखेषु हविःषु प्रा
थमिके चरावेव प्राप्नोति तत्र च तुर्धाकरणयजमानभागब्रह्मभागब्रह्मभागान् कुर्यात् तथा चैंद्रं धं चरुमुखेष्विति सहस्माह बोधायन
आदित एव धर्मिमादद्दीत मुख्यादे भक्षात्साधयेदिति यद्वा पुरोडाशपदं श्रुत्वा पुरोडाशसामान्यमवगमयति न हि तस्याविवक्षायां १७३

त्वात्पुरोडाश सामान्यरूपस्य विवक्षितत्वात्तन्मुख्यधर्मत्वपरित्यागाच्च सर्वपुरोडाशाच्च पुरोडाशेषु च प्राशित्रयजमानभा
गब्रह्मभागचतुर्धाकरणानि कार्या
काएव चरुमुखेष्वपि पुरोडाशादेवभक्षान् प्राशित्रयजमानभागब्रह्मभागचतुर्धाकरणानि कार्याणीतियुक्तं तथा चेद्वैधं ।। अत्रोहस्म
ह शालीकिः ।। कपालसंयोजनेन खलु धर्षेरादानं भवति स कपालान्येवोपधास्यं धर्षिमादहीन पुरोडाशाभक्षांस्साधयेदिति । प्रकृत
मनुसरामः ।। तत्र प्रयोजनाभावात् बर्हिषि न स्थापनीयः आह यजमानं देवा इत्यादिनानेव तन्द्राग्निः करोतीत्यंतं अत्र यजमा
नवागाद्यभिमानि देवताभागरहितास्स्वस्वव्यापारं न कुर्वन्तीति तोयजमानस्य एकं पुरोडाशभागं पृथक् निधाय अवशिष्टं पुरो
डाशं बर्हिषि स्थापयेत् तेन स्थापनमात्रेण वयमपि भागिन्य इति देवतानां तु ष्टिर्भवति ।। अथ यजमानप्रागाद्यभिमानि देव
तानां स्वस्वभागराहित्येन स्वस्वव्यापारनिषेधस्य यजमानभागं निधाय पुरोडाशं बर्हिषदं करोतीत्यादि समाधानस्य च सर्वपु
रोडाशेषु साम्येन सर्वेष्वपि पुरोडाशेषु यजमानभागग्रहणं युक्तं तथा च लिंगं कर्ता ते यजमानभागस्य भेदेनावदाने यस्मिन्नेतद
र्शपूर्णमासयोः प्रवृत्ते तस्मिन्नाथापजानिनं तत्र स्थापनं भजन्ते यथैतत्प्राशित्रहरणं यजमानभागब्रह्मभागो स्विष्टकृच्चेडा चेति द्वैधेषु
दाश्यं तेशालीकि मत्ते यजमानभागब्रह्मभागो स्विष्टस्यापि मुख्यधर्मत्वपरित्यागो लिंगकल्पे तु प्रथम एव पुरोडाश उक्तमितिवि

सु॰द॰ कल्पः।इत्थंयजमानवागाद्युभिमानिदेवतातुष्ट्यर्थंबर्हिषत्करणात्पूर्वंय।जमानभागस्यावधानपूर्वकनिधानंविधायइदानीं
१७४ तुर्धारणंततोबर्हिषत्करणंचविधत्तेचतुर्धाकरोतीत्यादिमासेनान्याइत्यंतेअथचतुर्थाकृत्वाबर्हिषत्कृतस्यपुरोडाशस्य
हविर्यज्ञदक्षिणात्वंविधत्ते अथोखल्वाहुरित्यानाबर्हिषदंकरोतीत्यंतेनतथाचकर्मांतेकिंदक्षिणमग्निहोत्रंदर्शपूर्णमा
सौकाम्याइष्टयःपशुबंधाइतिप्रश्नमवतार्यअथदर्शपूर्णमासयोरन्वाहार्यश्चपुरोडाशस्यचतुर्धाकरणंचविज्ञायतेदक्षि
णस्येवास्येयथोयज्ञस्येवछिद्रमपिदधातीतियथापिसोम्येध्वरेआदेशामृत्विग्भ्योदक्षिणानीयंतएवमेवापिदक्षिणंपु
रोडाशंचतुर्धाकृत्वाबर्हिषदंकरोतीतिदर्शपूर्णमासप्रकरणेदीक्षणीयाकर्मांतेपिनबर्हिषदंपुरोडाशंकरोतितनान्वाह
र्ययाचतोदक्षिणोदक्षिणोक्तावेवेतोभवतोन्याउखल्विहदक्षिणाःप्रतिख्यातामवंतीतिअथचतुर्धाकृतस्यपुरोडाश
स्यचतुर्णांभागानांइदंब्रह्मणइत्यादिनिर्देशपूर्वकमभिमर्शनंविधत्तेचतुर्धाकरोतीत्यादिनाद्दोचलदित्यंतेनअथ १७८
चतुर्णांभागानांमध्येअग्नीध्रोभागस्यप्रथमंदानंविधत्तेअग्नीधइत्यादिअग्नौतीत्यंतेनत्रप्रकारंविधत्तेसकृदुपस्ती

र्येत्यादिरूत्रनेचप्रीणातीत्यंतं एवमस्यच वाक्यस्यतात्पर्यमुक्तं ॥ आपस्तंबेन सकृदुपस्तीर्य द्विरादध उपस्तीर्य द्विरभिघारयन्ति
अपिवाद्विरुपस्तरणानिद्विरादधातिद्विरभिघारयतीति अथब्रह्मणेदानंविधत्ते वेदेनब्रह्मभागमित्यादिप्रसस्त्याइत्यंतं अथ
वेदव्यतिरिक्तेन येनकेनापिपात्रेणभागांतरंदेयमित्याह । अथकाममन्येनेति अथहोत्रेदानंविधत्ते तेनहोत्रइत्यादिप्रीणातीत्यं
तं अथाध्वर्युवेदानंविदधाति अथाध्वर्यवेप्रतिष्ठावाएषायज्ञस्ययदध्वर्युरिति अथाग्नीध्रमारभ्याध्वर्युपर्यंतंन तत्क्रमानु
सारेणान्वाहार्यदक्षिणादेयाइत्याह तस्मादित्यादिप्रतिष्ठित्याइत्यंतं अत्रपटले ब्राह्मणोक्तंबद्धचानुक्तमितिकर्तव्यमितिब्राह्म
णंव्याख्यातमिति । अत्रयजमानभागावदानानंतरं तत एकपुरोडाशात्ब्रह्मभागमवदाय यजमानभागसमीपेनिदधातिवैक
ल्पिकश्चायंब्रह्मभागश्चतुर्धाकरणीकादन्यः दीक्षणीयाकर्मातेनबर्हिषदंपुरोडाशंकरोतीतिकतुर्धाकरणान्तिविध्यत्ततः
पृथगेवनयजमानभागंकरोतिनब्रह्मभागमितिब्रह्मभागस्यनिषेधान्नह्यसतिप्रकृतौचतुर्धाकरणीकादन्यस्मिन्ब्रह्म
भागेदीक्षणीयायांनिषेधोर्थवान्भवतिअतिदेशायोगात् अन्तःप्रकृतावयंब्रह्मभागेनुमीयतेसचसंयुक्तोहेतौ यजमानभाग

सु०र०
१७५
ब्रह्मभागावितिवचनात् ननु तोयत्तोयजमानभागोवदीयते ततः सर्वत्तोपिग्राह्य एवं चैकल्पिकत्वं चास्य कल्पे वचनाभावादिति
॥ यजमानभागस्तु कल्पमते दक्षिणस्यैव पुरोडाशस्य ब्रह्मभागे चतुर्धाकरणे च चरुमुखेष्विति द्वैधोक्तेश्च बौधायनमते मु
ख्यादेव भक्षात्सादयेदिति वचनात्॥ प्राशित्रयजमानभागब्रह्मभागचतुर्धाकरणानि मुख्यहविर्धर्मः अत एव पशुबंधेक
र्मान्ते हृदये मुख्यहविर्धर्मत्वेन प्राप्तानां प्राशित्रयजमानभागब्रह्मभागानां एकादशधर्मोत्सादनपक्षे निषेध उपपद्यते न
च हृदयस्येडायां कृत्स्नावदानात्॥ यजमानभागाद्यप्रसक्तिः एतन्निषेधान्यथानुपपत्त्यैव समवत्तधान्यां शूलाद्यानिडामवद्यति
षड्योर्वेस्यापस्तंबमते वदत्रापीडायामेकदेशावदानस्य पाक्षिकस्याभ्युपगमादिति नैवमेकादशधर्मानुत्सादनपक्षे यजमानभा
गादेरवदानं स्यादिति वाच्यं कल्पमते हृदयस्य कृत्स्नावदानेन एकदेशावदानस्य कल्पनयाऽयं तद्दुर्बलत्वादिति। चरुमुखेष्विस
त्रे चेद्वैधे शालीकिमते पुरोडाशस्यैव भक्षात्सादयेदिति वचनात् पुरोडाशसामान्यरूपस्य विवक्षितत्वान्मुख्यधर्मत्वपरित्याग १७५
श्च सर्वपुरोडाशानां धर्मः प्राशित्रयजमानभागब्रह्मभागचतुर्धाकरणानि अत एव प्रतिपुरोडाशं प्राशित्राद्यवदानसत्त्वात् य

स्मिन्नेतद्वीथ्योऽप्यं नेत्त स्मिन्नावापजानि तत्र स्थानं भजंत्तेयथैतत्प्राशित्रं यजमानभाग ब्रह्मभागो स्विष्टकृच्चेडा चेति अव

दानत्त आवापो भवति तंत्रं तु प्रदानत्त इति कर्मांते प्राशित्रादीनामवदानं आवृत्ति विधौ उदाहरणमुपपन्नमिति ॥ द्विर्भुर्वाज्या

द्द्वद्यति द्विरुक्तस्य पुरोडाशस्य अवद्यत्ती त्यनुषज्यते एवमुत्तरयोरपि अभिघारयत्यस्य ज्ञार्थत्वात्तु स्थाल्याज्यादेव ॥ अथहो

तुर्द्विरंगुलावनक्तीति होतुरंगुले प्रदेशिन्यां द्विः वारं अनक्ति मध्यमो नमपर्वणी स्थाल्याज्येन स्रुवेण अत्राश्वलायनः प्रदे

शिन्याः पर्वणी उत्तमे अंजयित्वेति ॥ आपस्तंबोऽप्याह स्रुवेण होतुरंगुलि पर्वणी अनक्त्यपरं मंत्रपूर्वमेतद्वा विपरीतमिति

पश्चात्प्राङासीनो होतुरंगुलि पर्वणी अनक्तीति सत्याषाढभारद्वाजे वजिघ्रेण भक्षयित्वा चतुरवत्तरेडामवद्यत्युपस्तृणीति

द्विरादधात्यभिघारयतीति ॥ जिघ्रेण अवघ्राणेन भक्षयित्वा हित्तु कर्तरि अत्र होतुरित्यनुवर्तनत्त्वावघ्राणेन होतुर्भक्षणं

कारयित्वेत्यर्थः । हौत्रप्रकरणे अथ होतुर्द्विरंगुलावनक्ति यत्पूर्वोर्ध्वं तदुत्तरोष्ठे प्रोहति वाचस्पतये त्वा हुतम्प्राश्नाम्यूर्जे पाना

येत्यधरोष्ठे प्रोहत्यत्र प्राश्नामीति मंत्रलिंगात्कल्पे जिघ्रेण भक्षयित्वेति वचनाच्च होतुरवघ्राणरूपं भक्षणमस्तीति तगम्य

सु॰द॰ तेनतोहोतुर्हस्त इडामाहरेत्। इडामाह्रियमाणामनुमंत्रयत इतियजमानं कांडे दर्शितात्‌ ततश्चतुरः चतुःसंख्यान् अवांतरेडांइडै
१७६ करेशान् इडायाअवद्यतिहोतातु अथापउपस्पृश्यचतुरवांतरेडामवदापयत इतिहोत्र प्रकरणाम्नानात्। अवांतरेडावदाने अने
अध्वर्युप्रेरयत्येच यदातु आश्वलायनहोत्रं क्रियते तदापर्वांजनानां तरओष्ठयोरन्यात्मं निमार्ष्टि वाचस्पतिनाते कुतस्यैषे प्राणा
यप्राश्नामीत्युत्तरमुत्तरे मनस्पस्यतिनातेऊतस्योर्जे पानायप्राश्नामीत्यधरमधरेस्पृष्ट्वोदकमित्याश्वलायनविहितक्रियाक
लापेहोतारं प्रेरयित्वा ततस्तस्य हस्ते इडांप्रदाय चतुरवांतरेडामवद्यतितेत्र प्रकारमाह उपस्तृणातिद्विरादधातिअवद्यति
आपस्तंबः अध्वर्युः प्रथममवदानमादधातिस्वयंहोतोत्तरमिति आश्वलायनश्चाह अंजलिनेडां प्रतिगृहीतसव्ये पाणौ रु
त्वापश्चादस्याउदगंगुलिंपाणिमुपधायावांतरेडामवदापयीतांतरेणांगुष्ठमंगुलीश्चस्वयंद्वितीयमादधीतेति अभिघारय
निइदमुपस्तरणमभिघारणं चइडालेपादेव चतुरोवांतरेडामिति वचनात् लेपादुस्तरणा रणेभवतोद्विरभिघारयेत्तं १७६
चावत्तिनइतिकरस्यांतरं समन्वारभंते ध्वर्युश्च यजमानश्चतत्रसाचाग्नीध्रश्चेति। ततः अथयत्रहोतुरभिजानातिदैव्या

अध्वर्यवउपहूताउपहूतामनुष्याइतितद्दक्षिणंपुरोडाशंचतुर्धाकृत्वाबर्हिषदंकरोतीति।गतं।ब्राह्मणेएतस्यपहूता
यामिडायाइसत्रएतर्हिइतिइडोपह्वानकाले चतुर्धाकरणबर्हिषत्वविधानादितिभावः।।अत्रयत्रहोतुरभिजानासि
पहूतोयंयजमानइतितर्हियजमानोहोतारमीक्षमाणोवायुंममसाध्यायेपात्रेवत्सदितितिवायुंइडायाधेनोर्वत्सस्तेन
ध्यायेत् वायुवत्सोपर्हिहोतेसमुपकयेन तर्हियजमानोहोतारमीक्षमाणोवायुंमनसाध्यायेन्मात्रेवत्समुपावसृजतीति श्रुते
इतिशब्दः प्रकारवचनः ब्राह्मणोक्तमन्यदपिकुर्यादित्येवमर्थः।।तच्चउपहूतायांइडायामुपहूतःपशुमानसानीतिमंत्रम
ध्वर्युर्यजमानश्चाब्रूयादिति।उपहूतःपशुमानसीनीत्याह।।उपहूतोह्वयतेहोता।इडोयैदेवतानामुपह्वे।उपहूतःप
शुमान्भवतीतिब्राह्मणात्।तथाचापस्तंबः।दैव्याअध्वर्यवउपहूताइत्यभिज्ञायोपहूतःपशुमानसानीत्याध्वर्युर्जपस्क
पहूतोयंयजमानइत्यभिज्ञायैतमेवमंत्रंयजमानइति।।उपहूतायामिडायामग्नीध्रेआदधातिषडवत्तमुपस्तरणास्यादधं
स्याभिघारयत्युपस्तरणास्यादधातिभिघारयतीति।।इडयाउपहूतायांइडायांदेवाहविषाजुषंतामितितस्मिन्नुपहूतइतिहोत्रा

सु०द०
१७७ इडोपह्वाने कृते अग्नीध आग्नीध्रस्य समंस्यं दशत्त्वादि त्ति न्यायप्राप्तां इडायाः पंचमं भागं षडवत्तं षट् अवत्तानि यस्मिंस्ता मा द
धात्ति अवद्यात्ति कस्मिंश्चित्पात्रे तस्य प्रकारं दर्शयति उपस्तृणात्तीत्यादि अत्रायं प्रकारः आज्यस्थान्या उपस्तीर्य इडायाः पंचम
भागस्य द्विधा कृतस्यैकमाधाय स्थाल्या आज्येनाभिघार्य पुनरप्येवमेव कुर्यादिति। अत्र यद्यपि करणे चतुर्धाकरोति बर्हिषदं क
रोत्ति तमभिमृशेत् इदं ब्राह्मणः इदं ब्रह्मणस्पत्ते इदं होतुः। इदमध्वर्योः। इदमग्नीध इति। यथैवादः सौम्येध्वरे। आदिशमृति
ग्भ्यो दक्षिणानीयं ते। ताद्रगेव तत्। आग्नीध्रे प्रथमायादधात्ति॥ सकृदुपस्तीर्य द्विरादधत्॥ उपस्तीर्य द्विरभिघारयति॥ षट् सं
पद्यंत इति विधिवाक्यक्रमपर्यालोचनया आग्नीध्रे षडवत्तं संपादनं चतुकरणीकाग्नीध्रभागविषयमवगम्यते तथा चापस्तंबेन इड
प्राशनानंतरं चतुर्धाकरणीकाग्नीध्रभाग एव षडवत्तसंपादनमुक्तं स्थविष्ठमग्नीधे षडवत्तं संपादयतीति अस्मदीयमपि सूत्रं च
तुर्धाकरणीकाग्नीध्रभागविषयं नेतुं शक्यं प्राशित्रस्यैव इडाप्राशनात्पूर्वमेवेअवदाय स्थापनस्य मार्जनानंतरं माग्नीध्रादिभाग
दानस्य चकरणेन तात्पर्यस्य उपवर्णयितुं शक्यत्वात् तथापि पशौ उपहूतायामिडायामग्नीध आदधाति षडवत्तमर्धवनिष्ठुमया १७७

र्थं चनिष्णुमितीडायां षडवत्तदर्शनात् प्रकृतावपीदं स्वमिडाभाग एव षडवत्तसंपादनपरमवगम्यते तेन हविःशावपि च चतुर्धाकरणम
स्तितस्य कल्पमत्ते प्रथमपुरोडाशधर्मत्वात् मुख्यहविर्धर्म इतिद्वैधोक्ते बौधायनमतेपि दक्षिणात्मकस्य गोदक्षिणः पशुबंधइ
ति विहितयागवाद्दक्षिणायाबाधात् नित्योन्वाहार्य इत्यन्वाहार्यस्यैव प्रतिप्रसवाभावात् अपि च सवनीयपुरोडाशे संप्रसप्तान्वि
हिताध्वर्युः सवनीयान्पुरोडाशान् याचन्नीति प्रक्रम्य वषट्कृतउत्तरार्धपूर्वार्धेतिहः पपूर्वा आकुतिर्जुहोतीत्यं तेन सवनीयानां
पुरोडाशानां प्रचारं विधायाथोरङ्कुसाक्रम्य यथायतनं स्रुचौ सादयित्वा पात्र्यामिडां समवधाय प्रत्नीचः पुरोडाशान्गृह्णीणो
स्वनुहेके संयंतिपशवइ इडेति वदंति इति इडाया अवदानं सदसि होतुः समर्पि प्रापयं च विधायाथ प्राडाया आह्वाय वइ इ नाय
स्यामनुगृहीत्यादिना तद्धोतायथायतनं सादयतीत्यं तेन हविर्द्वे वस्य ग्रह प्रचारं सभक्षणं विधायाउपस्पृश्य होत्रा इडामुपोपपह्वतं
उपहूयमानायामिडायामुपप्रगृह्णति चमसानुपहूतायामिडाया मन्ताहितनमधैग्नो भवतीति चोदकप्राप्तं अग्नीध्रोभागविडोप
कानां नंतरं काले निषिध्ये अथैतानि द्विदेवस्यपात्राण्यरिक्ती करोतीत्यादिना ताभ्यां तृतीयसवनान्यरिशोर इत्यं तेनारिक्तीक

रूत्वातयोरेकमुपस्तीर्णेवधायपुनस्तस्मिन्नेवपात्रेन्यत्रोपस्तीर्यतत्रभागांतरमवधायउभयोर्भागयोर्विभागेनद्विरभिघारयेत्तए
वंसन्तियथाब्राह्मणंषट्संपत्तिरुपपद्यत्ते तथाचगोपालः अभिमृश्यपृथक्भागानग्नीधेप्रथमंहरेत्।उपस्तीर्यद्विधाभागं
कृत्वातस्यैकमारध्येउपस्तीर्यान्यमाधायतदाद्विरभिघारयेदितितत्तोवेदेनब्रह्मणे ब्रह्मभागंददातित त्तोयेनकेनविसात्रे
पहोतुरध्वर्योस्तयजमानोददात्ति।।अध्वर्युर्वास्वयंगृह्णीयात्।इति।।एतस्मिन्कालेयजमानभागमपिएतेनैवन्यायेनाध्व
र्युर्यजमानायप्रयच्छेत् वेदेनब्रह्मयजमानभागोपरिहरतीत्यापस्तंबः।।तंब्रह्मभागस्यपश्चिमभागेकुशेषुनिदध्यात्।पश्चा
कुशेषुयजमानभागमित्ति।।अथान्वाहार्ययाचतीत्ति।।अथचतुर्धाकरणरूपदक्षिणाद्दक्षिणादानानंतरंअन्वाहार्यंअन्वाहा
र्यरूपांदक्षिणांयाचतिदातुंचतुर्धाकरणाचाहार्ययोदक्षिणात्वंकर्मानंउक्तंतथाहिदक्षिणमग्निहोत्रौदर्शपूर्णमासौका
म्याइष्टयःपशुबंधइति।उपरोहदक्षिणमग्निहोत्रमित्येकेएरावंदक्षिणमग्निहोत्रमित्येकेयत्सायंजुहोतिरात्रिमेवतेन
दक्षिण्यांकुरुतेयत्प्रातरहरेवतेनदक्षिण्यांकुरुतेयत्तत्तोददातिसाहदक्षिण्येनतियदहोरात्रयोर्ददात्तीत्येवनउक्तंभवत्यथ १७९

विच्छिन्नं यज्ञं समिमं दधातु ॥ बृहस्पतिस्तनुतामिमं नो विश्वेदेवा इह मादयंतामिति बर्हिषदं पुरोडाशमनुमंत्रयते ब्रह्मपिन्वस्व ददतो
मे मा क्षायि कुर्वतो मे मोपदसदिति इति सूत्रविहिते कृते सत्यनंतरकर्तव्यमाह ॥ अनुवेदेन ब्रह्मभागमिति ॥ अनु पश्चादत्र ब्राह्मण
विहितान्नमभिमृश्योत्तु इदं ब्रह्मण इदं होतुरिदमध्वर्योरिदमग्नीध इत्यनुमंत्रणः पूर्वकाष्ठादेर्यादनंतरं वेदेन ब्रह्मभागं परिह
रति रदाति इदं हि दानमुपलक्षणं ब्राह्मणविहितस्य यथे वादः सोम्येधरे । आदेश मृत्विग्भ्यो दक्षिणानीयंते । तादृगेव तदिति
ब्राह्मणविहितप्रकारस्य वेदेन ब्रह्मणे ब्रह्मभागं परिहरति अथ काममन्येन ॥ ततो होत्रे । अथाध्वर्यव इति विहितस्य क्रमस्य सा
धनविशेषस्य च छत्रिन्यायात् तदिदं पुक्क भाष्ये प्राश्य मार्जनोत्तरकाले अभिमंत्र विभागेन निर्दिष्टे आग्नीधे भागं षडवत्तं द
धातित ततो ब्राह्मणे न मउत्तरयो येन केन चित्पात्रेणेति । अत्रायमनुष्ठेयार्थः इडां प्राश्य अंतर्वेदि प्रस्तरे मार्जयित्वा यजमा
नो ब्रह्मपिन्वस्वेत्यादिभिर्मंत्रैर्या अभिमंत्रणं कृत्वा चतुर्धा कृतस्य बर्हिषदः पुरोडाशस्य भागान् इदं ब्रह्मण इदं होतुरिदमध्वर्यो
रिदमग्नीध इति निर्दिशेत् ॥ ततोध्वर्युरग्नीधे भागं प्रथमं षडवत्तमवदधातीति तस्यायं प्रकारः सकृदुपस्तीर्याग्नीधो भागं द्विधा

सु०द० रणादिकं विधाय विधत्ते अथाग्नीध्र आदधाति षडवत्तं प्राश्नंति मार्जयंत इति न स्वत्रापि चतुर्धाकरणमस्ति आनाम्नानात् सोमद
१७८ क्षिणायेव दक्षिणावत्त्वात् पृथक् दक्षिणाविरहाच्च दीक्षणीयावत्। तस्मादत्र इडाभागविषयमेव षडवत्तसंपादनमिति युक्तमा
श्नंति मार्जयंत इति। योयमिडा हविर्भ्यो वत्ता उपहूवाच तां प्राश्नंति ऋत्विजो यजमानश्च चतुरवत्तं भवतीति अवांतरेडया श्च
तुरवत्तं विधाय यद्धोता प्राश्नीयादित्यादिना अवांतरेडाप्राशनं च विधाय प्राश्नंति तीर्थ एव प्राश्नंतीति ब्राह्मणविहितस्य प्रा
शस्य इडाविषयत्वौचित्यात् बहुवचनस्य प्रकृतकर्मकर्तृत्विग्भ्य यजमानविषयस्य चौचित्यात् तथा चापस्तंबः यजमा
नपंचमा इडां प्राश्येति मार्जयंते अंतर्वेदि प्रस्तरे हस्तं निधाय हस्ते जलं सिंचेत् तथा चापस्तंबः।। अद्भिरंतर्वेदि प्रस्तरे मार्ज
यित्वेति आश्वलायनोप्याह परिस्तरणेरंजलिमंतर्धायाप आसेचयते तन्मार्जनमिति।। अथाह ब्रह्मणे प्राशित्रं हरतीति
गतं। परि प्राशित्रं हरस्य नव प इति प्राशित्र ब्रह्मणे अग्रेणाहवनीयं परिहरंति।। तथा चापस्तंबः अग्रेणाहवनीयं ब्रह्मणे प्रा १७८
शित्रं परिहरतीति।। प्राशित्रं हरंतः अपोनु हरं सैकेन पात्रेण यजमाने अथांतर्वेद्यद्भिर्मार्जयते मनो ज्योतिर्जुषतामाज्यं

दर्शपूर्णमासयोरन्वाहार्यश्च पुरोडाशस्य चतुर्धाकरणं च विज्ञायते दक्षिणे वास्येयाथोयज्ञस्यैव छिद्रमपिदधातीतिय
थापि सौम्येध्वर आदेशमत्विग्भ्यो दक्षिणानीयं तएव मेवापि दक्षिणं पुरोडाशं चतुर्धाकृत्वा बर्हिषदं करोतीति वासोः दक्षि
णाः काम्या इष्टयः किं दक्षिणाः गोदक्षिणाः पशुबंधो नित्यो न्वाहार्य इति का दक्षिणा यस्य नतत्। किं दक्षिणमग्निहोत्रं किं दक्षि
णो दर्शपूर्णमासौ किं दक्षिणाः काम्या इष्टयः पशुबंध इति यथाविशेष्यं लिंगवचनविपरिणामः कार्यः। उपदोह अग्निहोत्रा
र्थं स्थाल्यां यावदपेक्षितं तावदुग्ध्वा पुनरप्यत्र दक्षिणार्थं दुग्धं उपदोहं सा दक्षिणा दक्षिणो के अथाग्निहोत्रदक्षिणाविषय
मेव पक्षांतरं ब्राह्मणोदाहरणमुखेन दर्शयति।। यत्सायंजुहोतीत्यादि सायंहोमेन रात्रिं तदग्निहोत्रदक्षिणा वा अर्हा उचित
मधिकरणं करोति प्रातर्होमेन च आह प्रातर्होमदक्षिणा अर्हका लं करोति अत्तो यत्तयोः कालयोर्ददाति अत्तीत्यादिनाग्नि
होत्रदक्षिणेत्येवं प्रकारेण ब्राह्मणेन यदहोरात्रयोर्दक्षिणात्वं तस्याग्निहोत्रदक्षिणात्वमुक्तं तस्मादहोरात्रावहनि च नियमेन किंचि
द्दानव्यमग्निहोत्रस्य दक्षिणासिध्यर्थमिस्फुटं दर्शपूर्णमासयोरन्वाहार्यश्च चतुर्धाकरणं च दक्षिणा उभयत्रापि ब्राह्मणं प्र

सु०द० माणंयतिविज्ञायतेनन्वाहार्यमधिकृत्य ब्राह्मणं दर्शपूर्णमासनामकस्ययागसमुदायस्य एषा अन्वाहार्यरूपादक्षिणे । दक्षिणात्वेन
१८० दानव्यैवे अथो तथा सति ऋत्विजामुत्साहोयजननेनावच्छिद्यशनांयज्ञानांगाना मनुष्ठानेनयज्ञस्य छिद्रं विच्छिद्रं विलंबे अपिदधा
ति आच्छादयतिनिवारयतीति । अन्वाहार्यं अन्वाहार्यपचनेश्रपयित्वायावताचतुर्णांपर्याप्तिस्तावदस्मिन्काले सिद्धमभिघार्यदक्षिण
ग्र । स्यांश्रोण्यां मासादयति । तथाचापस्तंबः । दक्षिणा ऽन्वाहार्यमहांतमपरिमितमोदनंपचतिक्षीरेभवतीत्येकेतमभिघार्यानभिघा
र्य वोदास्यां वेद्यामासाद्य दक्षिणसद्भ्य पहर्तवाइति संप्रेष्यतियेब्राह्मणा उत्तरतस्तान् यजमान आह । दक्षिणत एकेतिनेभ्योन्वा
हार्यं ददाति ब्राह्मणा अयं वं ओदन इतीति अथान्वाहार्यस्य दक्षिणत्वेब्राह्मणंप्रमाणयित्वा चतुर्धाकरणस्यापि दक्षिणात्वे प्रमाणंब्रा
ह्मणमाह यथापीसादि बर्हिषदं करोति । यत्तं अस्मच्छाखायामेतद्दर्शानुपूर्व्यं ब्राह्मणस्यानाम्नानात् । शाखांतरीयमिदं अथवा अस्म
दीयमेवब्राह्मणं अर्थतोनूनं दित्तं भविष्यति तस्मायमर्थः यद्यापि यथा किल सोमयागे आर्त्विज्याद्दिश्य ऋत्विग्भ्यो दक्षिणादीयंते
एवमेतात्रापिहविर्यज्ञे दक्षिणां पुरोडाशं चतुर्धाकृत्वा बर्हिषदं करोति इदं ब्राह्मण इत्यादिव्यादेशेन दक्षिणां ददातीत्याभनादिष्टा का १८०

स्यादृष्टयः तावासोरक्षिणाः गोदक्षिणः पशुबंधः ननु इष्टिपशुबंधयोर्विशेषदक्षिणायाप्राकृतदक्षिणा बाधा चतुर्धाकरणवद
न्वाहार्यस्यापि निवृत्तिः स्यादित्यत आह नित्यो न्वाहार्य इति इष्टिपशुबंधयोर्योरन्वाहार्यो नित्यः नैव कृत्स्नादक्षिणया निवर्तत इति। ननु
यदाग्नेयोष्टाकपाल इत्यादिविधिपर्यालोचनायां कृत्स्नस्यापि पुरोडाशस्य देवतासंबंधोवगम्यते ततश्च देवतामुद्दिश्य सर्वोपि जु
हुयात्स्रोर्विद्यमानोवतानवत्तसमुदायः पुरोडाशस्य त्यक्तव्यो भवति आगमिकोह्यर्थो यथागमं प्रतिवक्तव्या इति न्यायात् अन्यथाजु
ह्वां विद्यमानस्य चतुरवत्तमात्रस्य देवतामुद्दिश्य त्यागे पुरोडाशे तद्धितावगतस्य देवतासंबंधस्याननुष्ठाने विध्यप्रामाण्यप्रसंगा
त् तथा च कृत्स्नस्यापि पुरोडाशस्य देवतोद्देशेन त्यागात्॥ कथं चतुर्धाकरणस्य दक्षिणात्वं परित्यक्तस्य स्वत्वाभावेन दानानुपपत्तेः
न च पुनस्तस्य स्वत्वेन परिग्रहः संघटते परित्यक्तस्वीकारस्य शिष्टगर्हितत्वादिति चेत् उच्यते कृत्स्नस्यापि पुरोडाशस्य पुनः परि
ग्रहे स्वीकारे वा स्वत्वसंभवात् उक्तं हि गौतमेन रिक्थक्रयसंविभागपरिग्रहाधिगमेषु इति नव परित्यक्तस्वीकारे शिष्टगर्हा स्यादि
ति॥ वाच्यं॥ वचनबलेन परित्यक्तग्रहेपि शिष्टगर्हाभावात् न परित्यक्तस्य दक्षिणात्ववचनमेवान्याय्यमिति वाच्यं। किं हि वचनं नकु

सु॰र॰ र्था न्नास्तिवचनस्याभार इति न्यायायोवा अस्य पशुमंनीत्यादि चसंर्वउक्तस्वीकारस्य शास्त्रमूलत्तयाउपपन्नंनचवचनमेवपरित्य
१८१ क्तं कथंदक्षिणात्वेनविदधातिस्वत्वाभावादितिवाच्यं आगमस्यह्यर्थं वक्तुंप्रभवामो नह्यागमंपर्यनुयोक्तुं अर्थश्चोक्त एवपरि
ग्रहेणस्वत्वसंभवान्नदक्षिणात्वविधिरुपपन्नइत्यलंविस्तरेण एवंच इदंब्रह्मणइत्यादिव्याहृतेरकृते चतुर्थीकरणस्य मंत्रेणप्र
तिग्रहः कार्यः। तथा अन्वाहार्यस्य ब्राह्मणा अयंव ओदनोयथाभागंप्रतिगृह्णीध्वमित्युक्ते प्रतिग्रहः कार्यः मंत्रेणाग्रहेणोक्त
आचार्येणाब्राह्मणेनोक्त इतिछंदसाब्राह्मणे नेतिपरिभाषासिद्धत्वात्। दक्षिणां प्रतिग्रहीष्यंत्सप्तदशरुत्वोपान्यादितिवच
नात्स दशावारंप्राणवायोरंतर्नयनरूपमपाननं कार्यंततोदक्षिणाप्रतिग्रहमंत्रानुवापठितमंत्रे। प्रतिग्रहः कार्यः मंत्राश्च
इत्थंसमाम्नातादेवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामि॥ राजात्वावरुणोनयतुदेविदक्षिणे
॥ अग्नयेहिरण्यं॥ तेनामृतत्वमश्यां। वयोदात्रे। मयोमह्यमस्त्वप्रतिग्रहीत्रेकइदंकस्माअदात्। कामः कामायकामोदा
ताकामः प्रतिग्रहीता। कामंसमुद्रमाविश। कामेनत्वाप्रतिगृह्णामि। कामैतत्ते। एषातेकामदक्षिणा। उत्तानस्त्वांगीरसः १८१

प्रतिगृह्णातु। सोमाय वासः। रुद्राय गां। सोमाय अश्वां। प्रजापतये पुरुषं। मनवे तल्पं। त्वष्ट्रे अजां। पूष्णे अविं। निर्ऋत्या अश्वतरगर्दभौ।
हिमवतो हस्तिनं। गंधर्वाप्सराभ्यः स्रगलंकरणे। विश्वेभ्यो देवेभ्यो धान्यं। वाचे अन्नं। ब्रह्मण ओदनं। समुद्रायापः। उत्तानायां
गिरसायान॥ वैश्वानराय रथं। वैश्वानरः प्रत्नथा नाकमारुहत्। दिवः पृष्ठं मंदमानः सुमन्मभिः। स पूर्ववज्जनयज्जंतवे धनं॥ स
मानमज्मापरियाति जागृविः। राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथं। तेनामृतत्वमश्यां वयो०। उत्तानस्त्वांगिरसः प्रति
गृह्णात्विति॥ एतैर्मंत्रैर्दक्षिणाप्रतिग्रहः स्वब्राह्मणे विहितः॥ तथा चेमान्मंत्रान्सूत्रे पठितवान् आपस्तंबः॥ तइमे तां त्रीणां दक्षि
णानां प्रतिग्रहणास्यु विज्ञायते च देवा वै वरुणमयाजयन्। यस्यै यस्यै देवतायै दक्षिणामनयन्। तामक्लीनात्। तेऽब्रुवन्। व्यावृ
त्य प्रतिगृह्णति गृह्णाम। तथा नो दक्षिणा न कुर्ष्यतीति। ते व्यावृत्य प्रतिगृह्णन्॥ ततो वै तां दक्षिणा नाक्लीनात्। य एवं विद्वान् व्यावृ
त्य दक्षिणां प्रतिगृह्णाति नैनं दक्षिणा क्लिनातीति नांत्रिरेवाधिकुरुतइति। अस्यार्थः संकल्पप्रभृतिब्राह्मणभोजनपर्यंतं संक
लं गोपेनो यागस्तत्रं स्वस्वसंबंधिनीनां दक्षिणानां प्रतिग्रहणाः प्रतिगृह्यंते एभिरिति प्रतिग्रहणाः प्रतिग्रहे करणीभूताः अत्र

सु०द० तांत्रीणामिंतिदक्षिणायाविशेषात्॥सांगस्यप्रधानस्यदक्षिणाप्रतिग्रहएवमंत्राःनांगदक्षिणापरिग्रहेअतस्तत्रस्वरूपेणपरिग्र
१९२ हः कु[illegible]नइदमवगम्यतइत्यत आह।विज्ञायतेत्वेस्यादि।अत्र चकारेणमंत्रमलिंगंसमुच्चीयतेवक्ष्यमाणेनब्राह्मणेनलिंगंहिमंत्र
सामान्येनरूपेणायज्ञदक्षिणाप्रतिग्रहेविनियोजयति।ब्राह्मणं।नुविशिष्ययज्ञतंत्रएवविनियोजकंविज्ञायतेनथाहिदे
वाःखलुवरुणंराजानमयाजयन्।सवरुणोयस्यैयस्यैदेवतायैऋत्विजेभूतायस्मैयस्मैदेवायदक्षिणांयाजनेननिमित्तेन
दानव्यादक्षिणामनयत्।विभज्यप्रादात्।अत्रनयतिर्दानार्थःनतुतस्मात्रिष्टुभोलोकेमाध्यंदिनंसवनेदक्षिणानीयंत
तिविहितःनयनार्थःयेनैवपर्णमयत्वेनलिंगेनजुहुरदर्शपूर्णमासयोरिवदक्षिणानयनेनलिंगेनमंत्राःसोमयागएवनि
विशेयुः।दक्षिणानांनयनकालेप्रत्येकमृत्विक्संबंधासंभवेनमीमांसानुपपत्तेः।विभागोत्तरकालंप्रत्येकसंबंधविषयेवं
सासंभवात्नयतिर्दानार्थएवसच्चविभज्यप्रत्येकंदक्षिणासंबंधइष्टिपशुसोमेषुसाधारणइतिसामर्थ्याच्चात्रविशेष १९२
णप्रतिग्रहमंत्राइतिसिद्धं।तांयस्यैयस्यैदेवतायैदक्षिणासंबंधोभवत्तांदेवतांदक्षिणाअक्षिनात्स्वस्पामममाराच

नित्यवकाशंलब्धा अस्यंतंविषयलंपटांकृत्वाहिंसामकरोत्तेनेदेवादक्षिणाकृत्तामिमांबाधांमसहमानाअब्रुवन्समयंबंधमकुर्व
न्स्वार्थहिप्रतिग्रहेकृतेभयअस्मदागावानिसर्वकालेलब्धाबाधिष्यतेअतोव्यास्यआत्मनोन्यांयायस्यदक्षिणाद्रव्यस्यदेवतानांत
स्यप्रतिग्रहित्रीमपदिश्येप्रतिगृह्णीमः॥यथालोकेस्वस्यसत्यपिकालेवालेवद्धयोरर्थेइदंग्रहीष्यामीतिप्रतिगृह्णंतितद्वत्त
थासतितेनोदक्षिणानक्षेष्यतीतितेइत्थंसमयंकृत्वाव्यास्यप्रत्यगृह्णन्ततोवैतांदक्षिणानाकिनीत्अतोन्योपिऋत्विकआ
त्मनोन्यांदक्षिणाद्रव्यस्यदेवतांप्रतिग्रहीत्रीमपदिश्यप्रतिग्रहेविषयैकपराङ्मुखरूपानाधानाभविष्यतीतिज्ञात्वाव्यास्यद
क्षिणांप्रतिगृह्णातितेनेनंदक्षिणाक्षीनातितस्माद्यज्ञतंत्रेषुअग्नयेहिरण्यमित्यामिनामंत्रेणव्यास्यप्रतिगृह्णीयादितिब्रा
ह्मणंयज्ञतंत्रस्यदक्षिणाएवाधिकुरुतेप्रतिग्रहमंत्राणांविषयान्करोतीतिइत्थंविहितस्यप्रतिग्रहस्यप्रकारःसप्रशंसावि
हिता।राजात्वावरुणोनयतुदेविदक्षिणेग्नयेहिरण्यमित्याहइत्यादिनायएवंविद्वांदक्षिणांप्रतिअन्नणामेवैनांप्रतिग
ह्णामीत्यंतेनब्राह्मणेनतत्त्रायंदक्षिणाप्रतिप्रकारः।देवस्यत्वासवितुरित्यादिरभ्यदेविदक्षिणइत्यंतंपुरस्तात्ज्जोअग्नयेहिर

सु॰द॰ अयंसोमायवासइत्यादिनादेवतानिर्दिश्यतेनामृतत्वमश्यामित्यारभ्यउत्तानस्त्वांगीरसःप्रतिगृह्णात्वित्यंतमुपरिष्टाज्जपेत्
१८३ एतस्यप्रकारस्यप्रदर्शनार्थंदेवस्यत्वेत्यारभ्यप्रतिगृह्णात्वित्यंतस्यपाठः तथाचापस्तंबः सर्वपुरस्तात्सावित्रउपरिष्टादन्वाधि
रितिअन्वाधीयतेअनुषज्यतेइत्यन्वाधिः तेनामृतत्वमश्यामित्यादिः प्रतिगृह्णात्वित्यंतउपरिष्टात्सर्वत्रवक्तव्यइत्यर्थः॥
मनयेतल्पमित्यत्रतल्पशब्दस्यार्थोभार्यातस्यशास्त्रेषुभार्यायांलक्षणयाप्रयोगदर्शनात्।भार्याप्रियज्ञेदक्षिणात्वेनदीय
तेतथाचापस्तंबः दैवयज्ञमंत्रऋत्विजेप्रतिपादयेदितितथादक्षिणाधिकारआश्वलायनः॥प्रत्यभिप्रशेदप्राणिकन्यांचेति
अज्याविषयेलृष्टेजामग्नयेवेत्यापस्तंबः॥अभ्वतरगर्दभौसमस्तौव्यस्तौवायथासंभवंप्रतिगृह्णीयात्स्रगलंकरणयोसमस्त
योर्दानेयथाध्ययनंप्रतिग्रहः।व्यस्तयोर्दानेतुगंधर्वेभ्यःस्रक्अप्सरोभ्योलंकरणमितिगंधर्वाप्सराभ्यःस्रक्गंधर्वाप्सरा
भ्योलंकरणमितिवाप्रतिग्रहः। वाचेभंतुज्ञेचेत्यापस्तंबः अत्रान्नमंथादिनाऽत्रोदनः तस्यपृथगुपादानात् अनः प्रकृतौच १८३
तुर्णांवारणस्यअन्वाहार्यस्यचपृथग्प्रतिग्रहः रथप्रतिग्रहेदेवस्यत्वेत्यादिदविदक्षिणइत्यंतमुक्त्वातेनामृतत्वमश्यामि

स्यारभ्य प्रतिगृह्णामित्यंतेन प्रतिग्रह इत्येकः प्रकारो लब्धः वैश्वानर इति सावित्रस्य स्थाने कुर्यात् वैश्वानर्यर्चा रथं प्रतिग
ह्णातीति वचनेन सावित्रस्य निवर्तितत्वात् मंत्र समाम्नाये सावित्रस्य स्थाने वैश्वानरीं पठित्वा राजा ते स्यात् तमपि कारेण पठि
तत्वात् च अन्नोयमन्यः प्रकारः तत्र वैश्वानराये ति श्रुत्या उद्बस्य लिंगस्य बाधात् विरुद्धत्वात् उत्कर्षः सावित्रस्य पदि ज्योति ष्टोमे र
थोस्ति इतरथा उभयोरनवकाशत्वादेकार्यत्वाच्च विकल्पः ।अपरे तु सावित्रे वैश्वानर्यो :समुच्चयोः तत्प्रकारश्च देवस्य त्वेत्या
दि देवी दक्षिणे वैश्वानराय रथमिस्फक्तो वैश्वानरी प्रभृति प्रति गृह्णामि त्यंतं यथाध्ययनं ब्रूयात् ॥समुच्चयार्थश्चोभयोपाठः ए
कार्थत्वेपि प्रमाणबलात् ॥समुच्चय इति वदंति यस्य दक्षिणाद्रव्यस्य देवता नाम्नातं तदुत्तानस्त्वांगिरसः प्रतिगृह्णामि त्येव प्रति
गृह्णीयात् ॥तथा चापस्तंबः यत्किंचाप्राणं तत्सर्वमुत्तानस्त्वांगिरसः प्रतिगृह्णामित्येव प्रतिगृह्णीयाच्चद्वा अनाम्नातमंत्र
मिति एते च दक्षिणा प्रतिग्रहमंत्राः सर्वत्र प्रकृतत्व उत्तानावुपदेशेनेव प्राप्नुवंति अत अग्रायणादौ ब्रह्मणे वासइत्यादिनेहि
यन्नसंबंधाच्च प्रतिग्रहमंत्राणां अग्निहोत्राधानाद्ययज्ञदक्षिणानां नर्मंत्रेण ग्रह इति अत्र द्वैधं ।।आज्यहविः षन्वाहार्यस्य

सु०द० करणइतिकुर्यादित्ति बोधायनोनकुर्यादितिशालीकिरित्ति सर्वहविषांनावो दोषे वाआज्येनैनता देव नाइ ष्वापुनः क्रियोक्तात
१८० त्र पूर्वस्मिन्नाज्ययागेअन्वाहार्य विषयेविचारः ।।आज्येनयागस्यप्रायश्चित्तरूपत्वेनप्रक्रांतयागाद्देशात्तत्रचोदकशास्त्रे
न्वाहार्यइतिबोधायनः प्रायश्चित्तत्वेन तस्यांगत्वात् ।।अविरुद्धकल्पस्य च प्रधानत्वात्तत्रैवान्वाहार्येणपूर्ववत्रेतिशालीकि
रिति। अथैनत्पूर्णमास्या आज्यंनिर्वपति आज्येनैवदेविकाइत्यादौत्वनुप्रकृत्या दक्षिणयाभवितव्यमेवेति।।अन्वाहार्यस्या
सादनेद्वैधं।।अन्वाहार्यस्यासादनइतिअग्रेण यजमानंच ब्राह्मणंच पर्याहृत्य दक्षिणस्यां श्रोण्या मासादयदितिबोधायनो
अन्वाहार्य नएवदक्षिणस्यांश्रोण्यामितिशालीकिरिति।।अन्वाहार्यपचनेश्रुत्तं यजमानस्यब्राह्मणस्य पश्चभागेनपुरस्तान्नीत्वाअ
ग्रेणयजमानंच ब्राह्मणंचपश्चान्नीत्वादक्षिणस्यांश्रोण्यां मासादयेदिति बोधायनः तत्तएवदक्षिणाग्नेरेवदक्षिण
स्यांश्रोण्या मितिशालीकिरिति। अन्वाहार्यस्योद्वासनेद्वैधं।।अन्वाहार्यस्योद्वासनइत्यग्रेणस्रुचउदंचमुद्वासयेदिति १८०
बोधायनः।। जघनेनस्रुचउदंचमित्ति शालीकिरित्ति ।।गतं।।उद्वासयत्येतद्विरुच्छिष्टमिति ।।एतद्वैयांचर्लमानंहवि

रुद्धिष्टंइउावदानशेषंउद्वासयंत्ति विहाराद्बहिनिष्क्रासंतिध्रौवाज्यस्यह विरुद्धिष्टरूपत्वेपिनोद्वासनंउपरिशाद्विनियोगवचनात्॥
अन्ते द्वैधं।।हविरुद्धिष्टना मुद्वासनइत्यग्रेणस्रुचउदंचमुद्वासयेदितिबौधायनोजघनेनस्रुचउदंचमित्तिशालीकिरित्तिस्व
ष्टंविरतौ कल्पसूत्रस्यपटदृशपंचमंपूर्णास्तेश्वविद्वांसः तुष्यंतुप्रियतांशिवः॥खंडाः॥३०॥अथसंप्रैषमाह॥ब्रह्मन्प्रस्थ
स्यामः। समिधमाधायाग्निदग्निं स्रुतस्रुतस्मृढीतीत्ति॥संप्रैषमाह। वक्ष्यमाणांसमिधंआनुयाजेभ्यःसमिधमंतिशान
व शीत्तिविधानादवशेषितामनूयाजसमिधंआदायआहवनीयेप्रहत्यप्रस्थास्यामःअनुयाजार्थंगमिष्यामः बहुवचंसर्वर्त्वि
कूपरंएवंचप्रतिष्ठेतिप्रत्तिवचनमित्तिलक्षणयासर्वर्त्विकूपरंअग्नीन् अत्रापिबहुवचनेनआहवनीयेपरिधित्रयेचपूर्व
वदग्निशब्दस्यलक्षणाबोध्यापरिधीयाहचनंचसरुस्रुस्स मृद्वीत्यर्थः॥यद्यपिसमिधमाधायसंमृद्वीत्यन्वयस्वरसः
तथापि समिदाधानंतथोत्तरकालंअथैवअग्नीध्रइत्तिसूत्रारंभात् समिधमाधायप्रस्थास्यामइतियोजितं।प्रस्तोतैतांस
मिधंमध्यत्तआहवनीयस्याभ्यादधाति। ब्रह्मणाॐप्रतिष्ठेत्ति प्रस्तोताध्वर्युःअत्रअस्मिन्कालेएतांअनुयाजार्थंसमिधंअ
व

सु०द० हवनीयस्यमध्येअभ्यादधाति॥अथैवआग्नीध्रो:स्फ्येरेवेध्मसन्नहनैः परिधींत्समार्ष्टिसकृन्मध्यमंसकृद्दक्षिणार्ध्येसकृदुत्तरा
१८५ र्ध्येसकृदाहवनीयमुपवाजयत्यग्नेवाजजिद्वाजंत्वाग्नेससृवांसंवाजंजिगिवांसंवाजिनंवाजितंवाजिजित्यायैसंमार्ज्म्यग्निमन्न ज
दमन्नाद्यायेतीति॥अग्नीदग्नीत्सकृत्सकृत्संमृड्ढीतिप्रैषभागार्थानुष्ठानप्रकारोयंअस्फ्येःस्फ्यरहितैरिध्मसन्नहनैःसन्नह
नस्यएकत्वेपिबहुवचनंअथैतानिबर्हिःसन्नहनान्यायातयत्नीत्यत्रबर्हिःसन्नहनस्यैवोवैत्ताभिप्रायंभवतितेनविस्रस्येध्म
संन्नहनंतद्द्वयैर्वैस्तृणैःसंमार्गःकार्यःगतमन्यत्॥अथैतानीध्मसन्नहनान्यद्भिःसंस्पृश्याहवनीयेनुप्रहरतियोभूता
नामधिपतिरुद्रस्तंतिचरोवृषा॥पशूनस्माकंमाहिंसीरेतदस्तुहुतंतवस्वाहेतीत्ति॥गतं॥आग्नीध्रःकुर्यात्॥तस्याधि
कृतत्वात्तस्यैवस्वहस्तेविद्यमानानाइध्मसंन्नहनांप्रतिपत्त्याकांक्षायावशेनअनुप्रहरकर्तृत्वौचित्यात्॥पशुवं
धनेनसकृत्सकृत्समृड्ढीत्यथाध्वर्युःपृषदाज्यंविहत्येत्यध्वर्युग्रहणमिहलिंगंइतरयोःअध्वर्युःसन्नहनान्यनुप्रहरत्ये १८५
त्यस्सूत्रयिष्यत॥अत्रैरौद्रत्वात्॥अपउपस्पर्शनंकार्यं॥अथजुहूपभृतावादायात्याक्रम्याश्राव्याहदेवान्यजेतिवषट्क
अथा

तेजुहोतिथजयजेतित्रीन्प्रत्तीचोनुयाजान्यजतिप्राचांतत्तःसंभिनत्तीअथाध्वर्युर्जुहूपभृत्तावादायासाक्रम्यइदमत्या
क्रमणंसर्वानुयाजार्थंअनुयाजार्थस्योपभृत्ताज्यार्थस्यजुह्वांसमवनीत्तस्यकृत्स्नस्यापिजुह्वांसत्वेनद्वित्तीयात्तृत्तीयानु
याजार्थंहविरवदानायप्रसाक्रमणप्रसक्तेरभावात्।।आश्राव्याह।देवान्यजेतिनन्वनूयाजानामग्निर्देवत्तातथाचकर्मांते
किंदेवस्याउखलूनूयाजाभवत्तीत्याग्नेयाइत्येवब्रूयात्।।विज्ञायतेतंदेवाआहुत्तीभिरनुयाजेषन्वविंदन्यदनुयाजान्य
जत्यग्निमेवतत्समिधंइतीति।अस्मिन्कर्मांते किंदेवस्याअनुयाजाइतिप्रश्नमवतार्यआग्नेयाइत्येवब्रूयादित्युक्तं रं
र इं यित्वातत्रचप्रमाणत्वेनब्राह्मणमुदाहरणविज्ञायतइत्यादिनातत्कथंदेवानूयजेतिसंप्रैषइतिचेत्।उच्यतेब्राह्मणेहि
ब्रह्मवादिनोवदंतीशदेवताअथकतमएतेदेवाइतिछंदांसितिब्रूयात्गायत्रीत्रिष्टुभंजगत्तीमित्यथोखल्वाहुब्राह्मणा
वैछंदासीतितानेवतद्यजतीति।प्रधानयागेरेवपुरोडाशादिभिर्द्रव्यैर्यष्टव्याःसर्वाअप्यग्निप्रजापत्यादयइष्टाःअथायंदेव
होताध्वर्युश्चदेवंबर्हिरितिदेवोनराशंसइतिदेवोअग्निःस्विष्टकृदग्निचमंत्रेर्यष्टुंयजेतएतेदेवाःकतमइतिप्रश्नानंतरंग

सु०र० यत्र्यादिछंदसां तदध्येतॄब्राह्मणानां चाभिमानिनो देवा इति समाधाय देवानां वा इष्टादेवता आसन्नयाग्निर्नोद्ज्वलदिति पुरो
१९६ देवायागं कृतवंतः तत्रयोगे अग्निप्रजापत्यादयो देवा इष्टाः स्वस्मा अत्रयागेभागो नदत्त इति आकुत्याधारो ग्निर्नोदज्वलदि
ति आकुत्याधारभूतस्यास्मै भागाभावेन उज्वलनाभावरूपं कोपं श्रावयित्वा समामनंति तं देवा आकुतीभिरनुयाजेष्वन्वविंदन्
देवतात्वेनेति अतः पूर्वमुक्तायेछंदो ब्राह्मणाभिमानिनो देवाः त एवायमाकुत्याधारभूतो ग्निरिस्फक्कमिति न कश्चिद्विरोध
इति द्रष्टव्यं। अत्र देवान्यजेति संप्रेषः सर्वानुयाजार्थः ननु प्रथममात्रार्थः प्रथममात्रार्थः। प्रथमे देवं बर्हिरिति मंत्रवर्णे
सं देवशब्दार्थस्य एकत्वावगमेन देवानिति बहुवचनांतस्य प्रैषस्य तत्र समन्वयो यागात् तत्र वषट्कृते जुहोतीत्यनंतरस्य य
ज यजेति सूत्रभागस्यायमर्थः॥ अत्र हि आश्राव्याहेति वषट्कृते जुहोतीति द्वितीयमपि पदद्वये यजयजे सत्रानुवर्त्य योज
नीयं ततश्चाश्राव्याह यजेति वषट्कृते जुहोतीति पुनश्चाश्राव्याह यजेति वषट्कृते जुहोतीति एवं च उत्तरत्रैव तयोः
प्रैषसद्भावात् अस्य सर्वार्थत्वमफलमिति चेत् उच्यते देवान्यजेति सर्वानूयाजार्थ एव प्रथमः प्रैषः प्रातिस्विको १९६

त्वितरौ नेन उत्तरयोरनुयाजयोर्द्वौ यजेति शब्दौ प्रैषार्थौ न तत्स्व पित्त्र यज्ञे अपबर्हिषावनूयाजावित्यत्र प्रथमं देवौ यजय
जेति संप्रैषः। द्वितीये तु यजेत्येव फलिष्यतीति ध्येयं। नीननूयाजान् प्रतीचः प्रत्यक् संस्थान् अनूयाजसमिधि यजति जु
होत्यध्वर्युः अंततः अंतिमेनानूयाजहोमेन प्राच्या प्राक् संस्थेन संभिनत्ति एकीकरोत्यनूयाजाहुतीः अनुयाजसमिधि
प्रत्यगारभ्य आंतानन्त्यतीयाहुतिं जुहुयात् इति। अत्रापस्तंबः॥ औपभृतं जुह्वामानीय जुहूपभृतावादाय दक्षिणसरु
दतिक्रांतोग्रेणाधारसंभेदं प्रतीचीस्त्रीन नूयाजत्याश्रावमाश्रावं प्रत्याश्राविते देवान्यजेति प्रथमं संप्रेष्यति यजयजेतीत्त
रौ पूर्वार्धे प्रथमं समिधि जुहोति मध्ये द्वितीयं प्राचमुत्तमं संस्थाप्य यन्नित्तरावनुसंभिद्यइति॥ अत्रेदं ध्येयं। अनुयाजानां हो
मइति सूत्रं बोधायनस्य प्रतीचीरेवैषाता आहुतीः संस्थापयेदिति शालीकिरिति। सूत्रं प्रत्यपवर्ग निरत्यर्थं प्राचा नतः सं
भिनत्तीति कल्पसूत्रं बोधायनस्य मतं शालीकिरितिस्वाह। अनुयाजसमिधिमिति प्रत्यक् भागे त्वृतीयामाहुतिं कुर्यात्
न प्रागपवर्ग निरत्यर्थं प्राचीननतः संभेदः प्रतीचीरेवाहुतीः संस्थापयेदिति। अथोरंड् स्वाक्रम्यायथायतनं स्रुचौ सादयि

सु॰द॰ त्वावाजवतीभ्यांस्रुचौव्यूहतीतिवाजशब्दउक्ताभ्यामृग्भ्यांगतमन्यत्॥खंडः॥३१॥वाजवतीभ्यांस्रुचौव्यूहनमेवदर्शयति
१८७ वाजस्यमाप्रसवेनोद्ग्राभेणोदग्रभीत्इतिदक्षिणेनजुहूमुद्गृह्णात्यथासपत्नाइंद्रोमेनिग्राभेणाधरांअकरितिसव्येनोपभृतं
निगृह्णात्युद्ग्राभंचनिग्राभंचब्रह्मदेवाअवीवृधन्नितिप्राचींजुहूमुहत्यथासपत्नामिंद्राग्नीमेविषूचीनान्व्यस्यतामिति
प्रतीचीमुपभृतंप्रत्यूहतीति॥जुहूमुद्गृह्णातिउद्यच्छति॥दक्षिणेनहस्तेनोत्तानेनेत्यापस्तंबः।उपभृतंनिगृह्णातिअध
प्रेरयतिजुहूंप्राचींप्राक्विलान्हतिनुदति आदक्षिणादंसात्उपभृतंप्रतीचींप्रत्यक्विलांकृत्वाप्रत्यूहतिनुदतिगतम
न्यत्सव्येनोपभृतंप्राचींबर्हिर्वेदिनिरसित्वेत्यापस्तंबः॥अत्रेदंबोध्यं॥वाजवत्योर्व्यूहनइतिसहस्माहबौधायनोक्ष्णयाप्रती
चीमुपभृतंप्रत्यूहेदद्भिश्चैनांसंस्पृशेदितित्रोहस्माहशालीकिःप्राचीनपुष्करेएवैनेविकर्षेन्नचोपभृतमद्भिःसंस्पृशे
दितीति॥वाजवत्योरितिकरणत्वस्यसंबंधसामान्यरूपंपुरस्कृत्यषष्ठीवाजवतीभ्यांव्यूहनइत्यर्थः॥उपभृतंप्रतीचींप्र १८७
त्यङ्मुखीअक्ष्णयाकोणशःउत्तरपश्चिमेकोणप्रत्यूहेत्गतमन्यत्।अत्रब्राह्मणेअस्कन्नचावनुष्टुग्भ्यांवाजवतीभ्यांव्यू

हन्ति॥ प्रतिष्ठा वा अनुष्टुक्। अन्नं वा जः प्रतिष्ठित्यै। अन्नाद्यस्यावरुध्यै। प्राचीं जुहूमूहति॥ जातानेव भ्रातृव्यान्प्रणुदते प्रतीचीमुपभृ
तं जनिष्यमाणानेव प्रतिनुदन्ते। स विषूच एवापोह्य सपत्नान् यजमानः अस्मिँल्लोके प्रतितिष्ठती[illegible]त्र स यजमानः विषूचः परस्पर
विमुखविरुद्धदिक् पलायितान्सपत्नान्कृत्वा अस्मिँल्लोके प्रतितिष्ठतीति स्रुक्व्यूहानुरूपफलस्वरूपपर्यालोचनायां परस्पर
विमुखविरुद्धदिग्व्यूहनस्य विधित्सितस्यादिति बोधायनः शालीकिस्त्वाह एवं जुहूपभृतौ प्राचीनपुष्करे वा प्राचीनपुष्करे विलेप
थोस्ते तादृशो एवं विकर्षेत् विरुद्धयोर्दिशोः कर्षेत् विकिस्त्वाह। एने जुहूपभृतौ प्राचीनपुष्करे व प्राचीनपुष्करे विलेपयोस्तेता
दृशो एवं विकर्षेत् षूच इत्यस्य विरुद्धदिग्गमनमात्रेत्ता त्पर्येण प्रत्यङ्मुखत्वे मानाभावात्। प्रतीचीमुपभृतमित्यत्र प्रतीचीमि
तिप्रस्य ग्गमनमात्रे प्रत्यङ्मुखत्वमपीति। प्राच्या परिधीननक्ति वसुभ्यस्त्वेति मध्यमं रुद्रेभ्यस्त्वेति दक्षिणमादित्येभ्यस्त्वेत्युत्त
रमिति॥ प्राच्या जुह्वाज्येन। स्पष्टमन्यत्। रुद्रेभ्यस्त्वेत्यत्रापामुपस्पर्शनं कार्यं॥ अथोपभृतमद्भिः संस्पर्श्य यथायतनं स्रुचौ सादयित्वा
स्रुक्ष्वप्रस्तरमनक्ति अक्तं रिहाणा इति जुह्वामग्राणि चिपं तु वय इत्युपभृति मध्यानि प्रजां योनिं मा निर्मृक्षमिति ध्रुवायां मू

स

सु०र० लामित्ति॥अ॥स्पष्टं॥अत्रैद्वैधं॥प्रस्तरस्यसमंजनइतित्रिस्त्रिरेकैकस्यां समंज्यादितिबोधायनः सकृत्सकृदितिशालीकिरित्ति॥एकैकस्यांस्रुचिजुह्वामुपभृतिध्रुवायां चएकैकस्यांप्रत्येकंत्रिस्त्रिःअग्रमध्यमूलविभागेनत्रिवारमनक्तिप्र
१९९ लक्षणेस्रुक्स्रुप्रस्तरमनक्तीति॥विहितस्यप्रस्तरांजनस्यत्रैधानक्तीत्यग्रमध्यमूलविभागत्रैविध्यंविहितंइदंत्रेधांजनंस्रुक्ष्विति
मु निर्दिष्टेषुस्रुक्शब्दार्थेषुजुहूपभृत्ध्रुवास्रुक्सर्वात्रा प्यन्वेतिपदार्थः॥पदार्थेनान्वेतिनतुपदार्थैकदेशेनेतिन्यायात्॥
अतोयुक्तमेवत्रिस्त्रिरेकैकस्यां समंज्यादिति बोधायनः शालीकिस्त्वाह एकैकस्यामग्रिअग्रेजुह्वांसकृत्स्रुक्ले ध्रुवायांसकृ
नुकुतएतन्नूअग्रमध्यमूलविभागेनविहितस्यसमंजनेत्रैधारूपसकृत्सकृद्घस्य विशेषस्यअभिपूर्वमनक्तीति जुहूप
भृद्ध्रुवास्रुक्क्रमविधायकश्रुतिबलेनोक्तप्रकारेणसकृत्सकृद्दशस्यैवयुक्तत्वात्समुदायेत्रेधा समंजनस्यशास्त्रार्थत्वादि
ति॥अथप्रस्तरात्तृणंप्रच्छिद्य जुह्वामवदधातीति॥प्रस्तरादेकंतृणंप्रच्छिद्यपृथक्कुरुत्वअक्तस्यतृणमश्रादायमज्ञातेनि
धायेत्यापस्तंबः॥जुह्वामवदधाति॥दक्षिणोत्तराभ्यांगृहीत्वाइतिकस्यांतरं अमावास्यायां सहशाखायाप्रस्तरमितिशेषः १९९

चा

अथाश्रावयत्योऽश्रावयास्तु श्रौषडिति अत्रेतिशब्दोनुषज्यते ओश्रावयेया श्रावयति अस्तु श्रौषडिति श्रावयति प्रत्याश्रावणे प्रे
रयत्यग्नीध्रं आसीनआश्राव्ये त्यापस्तंबइति ॥ इषितो दैव्याहोतारो भद्रवाच्यायप्रेषितो मानुषः सूक्तवाकायसूक्ता ब्रूहीतीति
संप्रेष्यतीतिशेषः ॥ आपस्तंब आह आश्राव्य प्रत्याश्राविते संप्रेष्यतीषितो दैव्याहोताराइत्यादि ॥ तमुपरिष्टप्राञ्चं प्रहरति नासत्यग्रं
परिहरति न पुरस्तात्प्रत्यस्यति न प्रतिशृणाति न विष्वं चं वियौत्यूर्ध्वमुद्यौत्याप्यायं तामाप ओषधयो मरुतां पृषतयस्थ दिवं गच्छत
तो नो वृष्टिमेरयेतीति । तं प्रस्तरं उपरीव प्रांचं उपर्येव प्रागग्रं मूलमधस्तात्प्रत्यग्गतं अग्रं उपरिदेशे प्रागगतं कृत्वा प्रहरतीतियावत्
नात्यग्रं आहवनीयमतीत्यान्यग्राणि यस्मिन्कर्मणि तद्‌त्यग्रं तद्यथा न भवति तथा अग्राणि आहवनीये तं भोगेष्वेव प्रहरेत्पुरस्तात्
प्रागगतं प्रस्तरं न प्रत्यस्यति प्रत्यग्भागेनाकर्षति ना प्रतिशृणाति अग्निं प्रतिपन्नं प्रस्तरं न भिनत्ति न विष्वं च वियौति प्रस्तरं वि
ष्वं चमिति विधेय विशेषणं तिर्यग्गतं तिर्यग्गतो यथा भवति तथा न वियौति न चालयति ऊर्ध्वमुद्यौति ऊर्ध्वं ऊर्ध्वभागं प्रस्तर
स्याग्रं ऊर्ध्वभागेन मिश्रयति न विष्वं चं विक्षुयात् यद्विष्वंचं यद्विक्षुयात् स्त्र्यस्य जायेतोर्ध्वमुद्यौत्यूर्ध्वमिव हि पुंसि पुमानेवास्य

सु०द० जायतइतिब्राह्मणे तथैव विधानादिति ध्येयंमेन प्रकारेणांतादनु प्रहरति प्रस्तरहृपामाप्यायंतामितिमंत्रेण इदं प्रहरणं अथयत्र
१८९ होतुरभिजानात्यग्निरिदंहविरजुषतेतितद्यजमानमुज्जितीर्वाचयस्वेरह्मुज्जितिमनूज्जेषमितियथेष्टमितियाजमा
नकांडावगंतंयजमानस्योज्जितिवाचनंअथयत्रहोतुरभिजानात्याशास्तेयंयजमानोसाविति तद्यजमानंयज्ञस्यदोहंवाच
यत्येमाअग्मान्नाशिषोदोहकामाइंद्रवंतोवनामहेधुक्षीमहिप्रजामिषमितिसूत्रविहितयज्ञदोहवाचनंच कृत्वाप्रस्तर
प्रहरणं करणाभूतस्य सूक्तवाकस्यांतेनेन नमोदेवेभ्य इतिशब्देन आप्यायंतामितिमंत्रांतेन च प्रस्तरप्रहरणस्य आदिसंयो
जयन्कुर्यात्सूक्तवाकेन प्रस्तरंप्रहरंतीतितृतीयाश्रुत्यासूक्तवाकस्य प्रहरणंप्रतिकरणत्वंबोधितंतच्चक्रियांतत्संबंधिनं
वाप्रकाशयतएवमंत्रस्यतादर्थ्यमितिन्यायेनतत्रइतानामग्निरिदंहविरजुषतेत्यादीनांवाक्यानांइदंहविःप्रस्तरात्ममग्निर
जुषत असेवतइत्यार्थक्रमेन यत्नेनहविषामाशास्ते तदश्यात् ॥ यत्फलं आयुरादिकंअनेनप्रस्तरेणहविषायंमाशास्ते १८९
तदश्यात्तत्प्राप्नुयादितिवाक्येन च अग्निरिदंहविराजुषतेत्याहयाअयाक्ष्मदेवतास्ताअरीरधामेतिवाचैतदाहेतिया

देवता: पूर्वमाज्यपुरोडाशादिभिरयाक्ष्म वयमिष्टवंत: ता देवता अशरीरधाम यथा राज्ञा सामृद्धा भवंति तथैवाकार्षा इत्येतमेवार्थं अभि
रिरं हविरित्यादिमंत्रवाक्यमाह इति ब्राह्मणेन च प्रागिष्टा अग्न्यादिदेवता उद्दिश्य प्रस्तरस्य हविषस्त्यागरूपमिदं प्रहरणमित्य
वसाया उपपन्नं अत एव सूक्तवाक एव याज्या प्रस्तरस्य आहुरिति श्रुत्यंतरे अस्यामधेऽद्धो त्राया मित्यत्र होत्राशब्देन च सूक्तवाकस्य
याज्यात्वं प्रस्तरस्य होमद्रव्यत्वं प्रस्तरप्रहरणस्य च होमत्वसंकीर्तनं संगच्छते प्रहरणस्य इष्टदेवतोद्देशन त्यक्तस्य प्रहरस्य प्रहरण
रूपत्वादिति अस्य च प्रहरणस्य यागरूपस्यापि इष्टदेवता संस्काररूपत्वात्। पौर्णमास्याममावास्यायां च यथेष्टं विभज्य विनियोग
उक्तं स्यात् चार्यैरुज्जितीर्वा चयन्ति यथेष्टमिति॥ अत्रेद्धं॥ प्रस्तरस्यानु प्रहरण इति सहस्माह बोधायनो ध्वर्युरेवोभयैर्मंत्रैरनुप्रहरे
त्। पौरोडाशिकेभ्य याजमानेभ्य याजमानो नु मंत्रयन इत्यत्रोह स्माह। शालीकिरध्वर्युरेवोभयैर्मंत्रैरनु प्रहरेत् पौरोडाशिके
भ्य याजमानेभ्यो न याजमाने यजमानोनुमंत्रयेत इत्यत्रोह स्माहोपमन्यवो यथा पौरोडाशिका मंत्रा नाभिनिवर्तंत एवमेवापि य
जमाना मंत्रा नाभिनिवर्तेरन्निति॥ अध्वर्युरेव करोति क्रमस्यार्थ:॥ पौरोडाशिकैर्याजमानैश्च स्कभ यतिरथे मंत्रैराप्यायत

सु०र० मित्यनेनरोहित्तेनत्वेस्यनेनच अत्राख्यात्तभेदेनवाक्यभेदात्वाक्यवकुत्त्वाभिप्रायंमैत्रेरितिबहुवचनंप्रस्तरमनुप्रहरेत्तद्के
१९० षां किंचिद्व्याख्यया माध्वर्यवेउभयेषामाम्नानात्। लिंगाच्चयजमानेनानुमंत्रयेतेवयाजमानेपिसामाम्नानादितिबोधायनःशा
लीकिस्तु उभयोरध्वर्युरनुप्रहरेदेवयजमानस्तु नानुमंत्रयेत लिंगेनबलवता मंत्रस्याध्वर्यवेनोतत्वेनयाजमानप्रकरण
स्यबाधादितिऔपमन्यवस्तु यथापोरोडाशिकाः प्रकरणादाध्वर्यवाएवनयाजमानंप्रयागच्छंतिएवंयजमानोआध्वर्य
वंप्रयागच्छंतिप्रकरणादेयलिंगंच कर्मकरेणाध्वर्युणा कृतंयजमानकृतमेवभवतीत्युपपन्नमितिति।अथाग्नीधमीक्षतेयी
दितितमाहाग्नीधः संवदस्वेति ॥३३॥ अगानग्नीदित्याहाध्वर्युरगन्नित्याग्नीध्रः श्रावयेत्याहाध्वर्युः श्रौषडित्याहाग्नीधइ
दं ब्रूहीत्याहाध्वर्युरनुप्रहरेदित्नीति॥आग्नीध्रमध्वर्युरीक्षतेअनुप्रहरत्यध्वर्युः प्रस्तरात्पृथक्कृत्यस्थापितंतृणं
तथाचापस्तंबः यत्तृणमयान्तंतदनुप्रहरतीतिस्पष्टमन्यत्॥ स्वगादैव्याहोतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीतीतिअ
त्रआहेत्यनुषज्यतेतथाचापस्तंबः संप्रेष्यतिस्वगादैव्येत्यादि।अथोपोत्थाहवनीयमुपतिष्ठतेआयुष्माअग्नेस्याकुर्मे १९०

माहि चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहीति आहवनीयस्य समीपे तिष्ठन्नाहवनीयं मंत्रेणेक्षते। अथेमामभिमृशति। ध्रुवासीति इ
मां भूमिं। मध्यमं परिधिमनुप्रहरतीति यं परिधिं पर्यधत्था अग्ने देव पणिभिर्वीयमाणः। तं त एतमनु जोषं भरामि नेदेष त्वद
पचेतयाताइतीति॥ गतं अथैतरावुपसमस्यति यज्ञस्य पाथ उपसमितमितीति॥ अनुप्रहृतस्य मध्यमपरिधेरुपरि प्रक्षिप
ति दक्षिणोत्तरौ परिधी॥ अत्रेदं द्वैधं। परिधीनामभ्याध्यानइति सूत्रं बोधायनस्य प्रस्थाने वैनानभ्यादध्यादिति शाली
किरिति॥ सूत्रं मध्यमस्योपरि इतरौ प्रक्षिपेदिति बोधायनस्य मतं प्रस्थाने चामगच्छं स्थानं प्रस्थानं तत्पूर्वस्थितायस्मिं
स्थाने तद्यथास्थानमिति यावन्मध्यमं मध्ये दक्षिणं दक्षिणे उत्तरमुत्तरतइति परिधीननुप्रहरति॥ वाशब्दो विकल्पा
र्थः॥ उभयथा विरोधाभावादिति शालीकिः॥ अथैनां संस्रावेणाभिजुहोति जुह्वामुपभृतं संप्रस्रावयति संस्रावभागास्थे
षामावहंतः प्रस्तरेष्ठा बर्हिषदश्च देवा इमां वाचमभि विश्वे गृणंत आसद्यास्मिन्बर्हिषि मादयध्वं स्वाहेतीति॥ एतान्परिधी
न्संस्रावेण सम्यक् सर्वतो विलग्निरयशोषेण स्रवतीति संस्रावो जुहूपभृतो लिप्तमाज्यं तेनाभिजुहोति उपरि जुहोति

तत्रप्रकारं दर्शयति जुह्वामुपभृतं संस्रावयतीति होमस्तु जुह्वाकार्यमिति परिभाषासिद्धं अत्रेद्वैधं ।। संस्रावेणाभिजुहोती
ति सूत्रं बोधायनस्य प्रस्तरं चैव परिधींश्चाभिजुहुयादिति शालीकिरिति सूत्रं परीधीनेवाभिजुहोतीति बोधायनस्य
मतं प्रस्तरं च परिधींश्चापि जुहोतीति शालीकिः ।। अथ प्रदक्षिणमावृत्य प्रत्यङ्ङुत्क्रम्य धुरि स्रुचौ विमुञ्चत्यग्ने वाममपन्न
गृहस्य सदसि सादयामि सुम्नाय सुम्निनी सुम्ने माधत्तं धुरि धुर्यौ पातमितीति ।। धुरि अग्निष्ठस्थानसः स्रुचौ जुहूपभृतौ
अनुकृत्यमाह ।। यद्युवेनानो भवत्युत्करएवैनेस्थे विमुञ्चत्येतेनैव मन्त्रेणेति ।। यद्यनो नास्ति तदा उत्करे निधायस्कंधे
निधायेत्तस्मिन्विमुञ्चतीति । अत्रेद्वैधं ।। स्रुचोर्विमोक इति पूर्वः कल्पो बोधायनस्योत्तरः शालीकेरिति ।। स्पष्टं ।। यद्य
पीदं पक्षद्वयं कस्यएव स्फुटं तथापि कल्पे द्वितीयेनुकल्पः ।। मन्त्रलिङ्गसमन्वयाभावात् ।। इह तु उभावपि तु स्योवचन
बलादितिवेदितव्यं ।। निरूढो कल्पस्तत्रस्य पटलानवमसमच ।। संपूर्णास्तत्र तुष्यं तु विद्वांसः श्रीपतिः शिवः ।। खंडः ।। ३३ ।। १९१
अथादक्षिणेनाज्यस्थाली ९ स्रुवा ९ सव्येन जुहूं होत्रे वेदं प्रदाय प्रदक्षिणमावृत्य प्रसव्यं चावाद्रवतो दक्षिणेनाध्वर्यु

गार्हपत्यं परिक्रामत्युत्तरेण होता तौ जघनेन गार्हपत्यं पश्चात्प्रांचावुपविशतो दक्षिण एवाध्वर्युरुत्तरो होतेति ।। होत्रे वेदं प्रदायादत्ते
दक्षिणेनाज्यस्थालीं सस्रुवां अत्र दक्षिणेनेत्यनुक्तावपि सामान्यशास्त्रेणैव सिद्धं दक्षिणेनादानं यद्यपि तथापि तद्दनुपादाने स
व्येनेति सर्वत्रान्वयस्यात्तन्निवारणार्थं तदनुपात्तं प्रत्यंचावाद्रवतः ।। अध्वर्युराग्नीध्रश्च द्विवचनात् अग्नीन्नु गृह्यते होता तु हो
त्रे वेदमस्मै प्रयच्छत्यध्वर्युस्तं गृह्णीयाद्वेदोसि वेदो विदेयेत्यादायुषेत्येतेनोपोत्थाय पश्चाद्गार्हपत्यस्योपविश्य इति गमनविधा
नात् ।। गच्छेत् एवं च त्रयाणामप्यृत्विजामिदानीं गमनमस्तीति द्वैधकर्मानंतयोः पत्नीसंयाजेष्वृत्विजां परिक्रमण इति सर्व ए
वानरेणेति च बहुवचनं संगच्छते आपस्तंबोप्याह ।। आग्नीध्रप्रथमाः पत्नीः संयाजयिष्यंतः प्रत्यंचो यंतीति ।। अध्वर्युर्गार्हप
त्यं दक्षिणेन परिक्रामेत् वेदिं गार्हपत्यं चांतरा दक्षिणस्यां दिशि गच्छेत् उत्तरेण होताग्नीध्रश्चेति शेषः जघनेन गार्हपत्यमित्येव
सिद्धे पुनः पश्चादिति कोणनिवृत्त्यर्थौ प्रांचौ प्राङ्मुखो आग्नीध्रस्तूत्तरतो दक्षिणमुखः तथा चापस्तंबः ऊर्ध्वज्ञव आसीना ध्वानेनो
पांशुना पत्नीः ।। संयाजयति दक्षिणोध्वर्युरुत्तर आग्नीध्रो मध्ये होतेति ।। अत्र द्वैधं ।। पत्नीसंयाजेष्वृत्विजां परिक्रमण इति सूत्रं ।

सु०द० बोधायनस्यसर्वएवोत्तरेणगार्हपत्यंपरिक्रामेयुरितिशालीकिरितिसूत्रंदक्षिणेनगार्हपत्यमध्वर्युरुत्तरतोहोताग्नीध्रश्चेतिबो
१९२ धायनमतंशालीकिस्त्वाह॥सर्वएवोत्तरेणगार्हपत्यंपरिक्रामेत्तद्गच्छेयुरिति॥अथाध्वर्युर्विरूमुपभृतंस्रुचेतिवेदंउपभृतं
उपभृत्कार्यकरंउपसमीपेहियतइतिस्रुत्यस्यान्तुहूसमीपेभरणामेवउपभृत्तः कार्यंततश्चउपभृद्धृत्वेदंहस्तेधृत्वापत्नीसं
याजयेदितिशेषः॥तत्रप्रकारमाह॥अथचतुरआज्यस्यगृहीत्वाआहसोमायेस्फ पांश्वनुब्रूहीत्स्फच्चेराश्राव्याहसोममि
स्फपांशुयजेस्फच्चेर्वषट्कृतेजुहोतीति॥गार्हपत्यशेषः॥गतमन्यत्॥अथचतुरआज्यस्यगृहीत्वाआहत्वष्ट्रइस्फपांश्वनु
इ ब्रूहीस्फच्चेराश्राव्याहत्वष्टारमित्स्फपांशुयजेस्फच्चेर्वषट्कृतेजुहोत्यथचतुरआज्यस्यगृहीत्वाआहदेवानांपत्नीभ्यइस्फपांश्व
नुब्रूहीस्फच्चेराश्राव्याहदेवानांपत्नीरित्स्फपांशुयजेस्फच्चेर्वषट्कृतेपरिश्रितेदेवानांपत्नीर्यजतिअथचतुरआज्यस्य
गृहीत्वाआहाग्नयेगृहपतयइस्फपांश्वनुब्रूहीस्फच्चेराश्राव्याहाग्निंगृहपतिंमित्युपांशुयजेस्फच्चेर्वषट्कृतेउत्तरार्धं १९२
पूर्वार्धेतिहायपूर्वाआहुतीर्जुहोतीति॥गार्हपत्येइत्येवगतमन्यत्अत्रकर्मान्तेअथहेकेराकांचसिनीवालींचकुहूं

द्रव्यं तेतनुवो यज्ञ यज्ञिया स्ताः प्रीणातु यजमानो घृतेन। नारिष्ठयोः प्रशिषमीडमानो देवानां दैव्ये पियजमानाः मृतो भूत्स्वाहा॥
चानुमत्तीं चपत्नीहोमं चनारिष्टहोमौ पुरस्तात्गृहपते रुपजुह्वति संपत्नी पत्यासुकृतेन गच्छतां यज्ञस्य युक्तौ धुर्याव भूतां॥
संजानानौ विजहतामरातीर्दिवि ज्योतिरजरमारभेतां स्वाहा। यं वां देवा अकल्पयन्नूर्जो भागं शतक्रतो॥ एतद्वां तेन प्रीणाति
तेन तृप्यतं मंहहो स्वाहेती ति अथ खल्वेक आचार्या गृहपतेः गृहपतिरेव स्यात् यागात् पुरस्तादुपजुह्वति उपहोमैः क्रतोरुपकुर्वं
ति केते होमा इत्यत आह॥ राकां सिनीवालीं च राकासिनीवालीतिलद्वैवत्ये होमयोः संज्ञापत्नीहोमं नारिष्ठौ च होमौ पत्नीहोम इ
ति संपत्नीति मंत्रेण कर्तव्यस्य होमस्य संज्ञा नारिष्ठहोम इति दशान्ते तनुवोयं वा देवा इति मंत्राभ्यां कर्तव्ययोर्होमयोः संज्ञा। अ
न्ययोः राकायै स्वाहा सिनीवाल्यै स्वाहेति मंत्राभ्यां तेषु सर्वेष्वपि मांत्रवर्णिकी देवता उद्दिश्य होम इत्यमेके पंच होमान् कुर्वन्तीति
अन्ये त्वाहुः। राकां च सिनीवालीं च यजेत उपजुह्वतीति तु पत्नीहोमनारिष्टहोमे घन्वेति तथा सत्याषाढोपि तन्तो योगं विदधाति
पुरस्ताद्देवानां पत्नीभ्यो राका सिनीवाल्याव केके समामनन्तीति अत्र यजेते त्यनुरतं वस्तन्तस्त राकां च सिनीवालीं चेत्यत्रानुक्तश्च
समुच्चयार्थश्चकारः कुहूश्चेति कुहूः समुच्चीयते॥ तथा चापस्तंबः॥ राकां पुत्रकामो यजेत सिनीवालीं पशुकामः। कुहूं पुष्टिका

सु०र० मोनित्यवदेके समामनंतिपुरस्ताद्देवपत्नीभ्यएताएके समामनंतित्स्कपरिशाट्वितिवषड्कारप्रदानास्तित्तोपियागरूपत्वावगमा
१९३ नथैवाश्वलायनोप्याह॥अथप्रकामोराकांसिनीवालींकुहूमितिप्राग्गृहपतेर्यजेत अवशिष्टास्तत्रयोहोमाइतिचवदंति।
अत्रेदंध्येयं।पत्नीनांसंयाजनइतिसूत्रंबोधायनस्यध्रौवात्ध्रौवाज्येन ध्वानेनैवपत्नीःसंयाजयेदितिशालीकिरिति।चत्वारः
पत्नीसंयाजाःकल्पसूत्रेविहिताःब्राह्मणंचत्वारःपत्नीसंयाजाइतिभवंति।।तेषांसंयाजनंपत्नीनांसंयाजनमित्युच्यतेछं
त्रिन्यायात्नतुचत्वारआज्यस्यगृह्णानआहदेवानांपत्नीभ्यइत्यपाम्वित्यादिनाविहितोयागएवपत्नीसंयाजाःपत्नीनांसं
याजनमितित्चतुर्ष्वपियागेषुसूत्रभाष्यादिषुप्रयोगप्राचुर्यात्सूत्रंस्वतस्याज्येनउपांशुतंत्रेणपत्नीसंयाजान्कुर्यात्सुखप्र
यत्नवाननभिव्यक्तशब्दप्रयोगउपांशुःशालीकिस्त्वाह।ध्रौवात्।त्यपूलोयेपंचमीध्रौवमाज्यमाहृत्यतेनध्रौवाज्येनयजेत
ध्वानेनैवस्वरेणनोपांशुनास्वरव्यंजनयोःपृथगनुपलब्धिःसध्वनिर्ध्वानाइतिअत्रस्तास्याज्योपांशुरयोर्ध्रौवाश्वध्वान १९३
योश्चसन्नियोगशिष्टत्वात्सहप्रवृत्तिनिवृत्तिर्येतिबोध्यं।।अनयोश्चयुक्तुष्टापवादार्थंवचनंमंत्रेणप्राणाज्यभागाभ्यांप्रा

नः सवनेच मध्यमेन प्राक् स्विष्टकृतो माध्यंदिने चतुर्थेन शेषे तृतीयसवने च वाक्संद्र यश्च वनद्धुदिति स्वाहा आपस्तंबः अश्वलायन अ
ह ।उत्तमप्रयाजांतमुक्ता आनोमंद्रेणोर्ध्व चशायुवाकान्मध्यमेन हविष्या स्विष्टकृतउत्तमेन शेषइति अत्र क्रुष्टपदस्थाने मध्य
मस्वरस्थाने वा यदुपांशुर्मंत्रं विधीयते उपांशुयाजपत्नीसंयाजादितत्रानुब्रूहीयजेत्यादि षूचैर्विधानेषुप्रैषेषु मंद्रएवस्वरो
वर्गतव्य इतिभाष्यकृतः ।।परिश्रिते देवानां पत्नीर्यजतीत्य त्रैठ्धं ।।अंतर्धाय देवानां पत्नीयाजयेदिति बोधायनो नं तर्धाये
वेति शालीकिरिति ।अंतर्धायपरिश्रित्य अंतर्धाय अपरिश्रित्य स्पष्टमन्यत् ।।३४ ।।अथाग्रेणहोतारमुपात्तीसहोतुर्द्विरंगु
लावनक्ति जिघ्रेण भंक्षयित्वा चतुर्हस्तेऽंसं पादयत्याज्यस्यैवसमन्वारभेते ध्वर्युश्चैव पत्नीयोपहूतायामिडायामग्नीध
आदधाति षउवतंप्राश्नीतो मार्जयेते इति।।अथ होतारमग्रेण पूर्वभागेनउपात्तीत्यपुरस्तात्प्रत्यङ्मुखउपविश्यपुरस्तात्प्र
त्यङ्मासीन इतिहि ब्राह्मणं होतुरंगुलोप्ररेशिन्यां पूर्वपर्वद्विः द्विवारं पर्वणोरनक्ति जिघ्रेण अवघ्राणेन भक्षणे होतारं प्रेर
यित्वा हस्ते ऽंहस्तेवदाति महीनिडां आज्यस्यैवसंबंधिनीस्था स्याज्य बिंदुरूपां चतुः चतुर्वारं संपादयति अवद्यतिइडाइडाम

सु॰ द॰
१९८

दधाति स्रुक्ष्वांहे। इति ब्राह्मणं इडयाइतिआज्यस्थाल्याइत्यर्थः॥अध्वर्युश्चपत्नीचसमन्वारभेतेउपहूतायाइडायामग्नीधआदधाति
षडवत्तंआज्यास्थाल्याज्यादेवत्तौप्राश्नीतोमार्जयेतेवेद्यां पूर्ववत् अत्रापस्तंबः॥पूर्ववदंगुलीपर्वणीअंक्तोपस्पृशेदकाहोतुर्हस्ते
चतुरआज्यबिंदुनिडामवद्यतिषडग्नीधउपहूयमानामन्वारभेतेध्वर्युराग्नीध्रः पत्नीचउपहूतांप्राश्नीतोग्नीध्रश्चेति॥अश्व
लायनोप्याह॥अज्यंपाणितलेवदापयित्तेळामुपहूय सर्वाप्राश्नीयादिति पत्नीसंयाजानंतरं शंयुवाकस्यकरणेद्वैधं॥पत्नी
संयाजेषु शंयुवाकस्यकरणइतिकुर्यादितिबोधायनोनकुर्यादितिशालीकिरित्ति॥स्पष्टं॥शंयुवाककरणपक्षेआज्येडा
भक्षणानंतरंशंयुवाकस्यकरणेद्वैधंस्वगादेव्याहोतभ्यइत्यादिमेषंब्रूयादध्वर्युः॥होताचतच्छंयोरावृणीमहेइतिशंयुवा
कंब्रूयात् तथाचाश्वलायनः आज्यंपाणितलेवदापयीतेळामुपहूयसर्वोप्राश्नीयाशंयुवाकोभवन्नवेति॥आपस्तंबस्तु
ह॥शंय्वंतंवाहवनीयेदाज्येडांतंगार्हपत्यइडांतंवाहवनीयेशय्वंतंगार्हपत्यंयदिशाय्वंतंपश्चात्स्यात्वेदात्तृणमपादाययजु १९८
र्धामग्रमंज्यात्स्रुवेमध्यमुपभृत्साज्यस्थाल्यांमूलंतस्यप्रस्तरवत्कल्पःसूक्तवाकायाशंयुवाकोदितिअथस्रुग्विचतुर्गृही

तं गृहीत्वापसव्येः पर्यावृत्यान्वाहार्यपचने प्रायश्चित्तं जुहोत्युलूखले मुसलेयच्च शूर्प आशिश्लेषदृषद्रिरुक्माजिने यत्कपा
ले। अवप्रुषो विप्रुषः संयजामि विश्वेदेवा हविरिदं जुषंतां यज्ञे या विप्रुषः संति बर्हीरग्नौ ताः सर्वाः स्विष्टाः सुहुता जुहोमि स्वाहे
१८५। तीति॥ ॥अथ स्त्रौव्यात् जुहूकंठलेपेण चतुर्गृहीतमाज्यं गृहीत्वा अपसव्येः अप्रदक्षिणं वामपार्श्वेन पर्यावृत्य अन्वाहा
र्यपचने प्रायश्चित्तं प्रायस्य पापस्य चित्तं विनाशकरं जुहोतिहोमं करोति आनुषंगिकोत्र दोष निर्घातः होमस्य निमित्तात्
मंत्रे उलूखले मुसलेयच्च शूर्प आशिश्लेषे त्यादिकं तिपय दोषसंकीर्त्तनं संभावितानशेषदोषनिर्देशोपलक्षकं तेनयत्रा
नोषधादि द्रव्यके उलूखलादि नास्ति तत्रापि होमे नित्यत्वादेव इत्थमुत्तरत्रापि प्रायश्चित्तमित्यत्र योजनीयो। अत्र कर्म
तं। यथैव शालीकेः कल्पं वेदयंते पत्नीसंयाजेषु इध्मोत्कपत्नी संयाजेषु ऋत्विजां परिक्रम इत्यत्र शालीकेः कल्पं वेदयं
ते अधीयते कथमित्याशंक्योदाहृत्य दर्शयति यथैव तत्सर्व एव ऋत्विजो अध्वर्युहोत्राग्नीध्रा गार्हपत्यमुत्तरेण परिक्रामेयु
रिति अत्र कल्पे अनभ्यावृत्यैव अपसव्येः पर्यावर्त्तनमरुचेर्ध्रुवफलीकरणहोमो होतव्यो भवति यद्यपि फलीकरणहोमं

सु॰द॰ जुहोत्यग्ने दब्धयोशीततन्विसनेन सूत्रेण विहितो होमः फलीकरणहोमः तथा च ततः पूर्वं प्रायश्चित्तं जुहोत्युलूखले मु
३९५ सल इति सूत्रविहितं प्रायश्चित्तहोमं जुहोतीत्येव वक्तुमुचितं तथापि फलीकरणहोमशब्देन इदं होमद्वयं लक्षयित्वोक्त
फलीकरणाहोमो होतव्यो भवतीति ।। अथवा फलीकरणहोमः प्रथमं होतव्यः तथैवोक्तत्वात् ।। तथा चापस्तंबः ।। दक्षिणा
ग्नाविध्मप्रव्रश्चनान्यभ्याधायपि पक्षे पं फलीकरणहोमो जुहोति फलीकरणहोमं पूर्वमेतद्विपरीतमित्यादि ।। अ
परं चतुर्गृहीत्वान्वाहार्यपचन एवेध्मप्रव्रश्चनान्यभ्याधाय फलीकरणहोमं जुहोत्यग्नेरदब्धयोशीततनो पाहि माघद्दिवः पाहि
श्र प्रसित्ये पाहि दुरिष्ट्ये पाहि दुरद्मन्ये पाहि दुश्चरितादविषन्नः पितुं कृणु सुषदा योनिः स्वाहेतीति ।। अपरं चतुर्गृहीतस्त्वा
त्वा आज्यं गृहीत्वा अन्वाहार्यपचनस्य समीपे इदं चतुर्गृहीताज्यग्रहणं फलीकरणहोमोत्तरकालमेव पुनर्गमनविधान
तू एवं चात्राज्यस्थाल्या सहैव पूर्वमत्रागमनमित्यर्थ इत्यवगंतव्यं । अन्वाहार्यपचन एवेध्मप्रव्रश्चनानि इध्मसंभरणसमये स ३९५
मां क्रियमाणे इध्मे यानि शकलानि प्रवृश्च्यंते छिद्यंते तानीध्मप्रव्रश्चनानि अन्याधाय प्रक्षिप्य फलीकरणान् स्रुच्यां क्रिय

गो

माणेषु तंडुलेषु अयनीयामालिन्यांशाः फलीकरणानदिदयुक्तं कुत्सारव्याफलीकरणेत्तिभाष्येप्यजुह्वाअनाहार्य
पचनेभ्याभायफलीकरणहोमंजुहोतीति तस्यहोम्यत्वात् गत्तेः आत्मणेपिअविपन्नः पितुंकृणु सुपदायो निंस्वाहेतीध्मसं
रभ्भनान्यन्वाहार्यपचनेभ्याधायफलीकरणसाध्यंहोममित्यर्थात् ।। अन्यथाफलीकरणानोप्यत्वेवसिद्धे तदानर्थक्यात्त
लभ्यानोषधतंत्रेफलीकरणानन्यतः संपाद्यहोमः यकार्यः यत्रत्तुपश्चादोनिषेधस्तत्रनकार्यइतिकेचित् ।। वस्तुतस्त
फलीकरणहोम इतिसंज्ञासव्यवहारार्थाएवंच प्रतिपत्तिरेवेयंनवपद्योप्रायश्चित्तंडुलानफलीकरणहोमेनकरतीति
प्रतिषेधः किंत्वर्थलोपप्राप्त स्यफलीकरणहोमाभावस्यानुवादइति ।। अथैतेनैवयथेतमेत्यहोत्रेवेदंप्रदायपत्नीनि
ष्यतिं ।। खंडः ।। ३९ ।। इमंविष्यामिवरुणस्यपाशंयमबध्नीतसवितासुकेतः ।। धातुश्चयोनोसुकृतस्यलोकेस्योनंमेसह
पत्याकरोमीति ।। एतेनसन्निधौनिर्दिष्टेन येनयथागार्हपत्यादत्रागतस्तेनैवमार्गेण यथागतंतथाअपसृत्येरनाविश्यत्रे
त्यगार्हपत्यात्पश्चिमंदेशंतत्रनिध्य मानायहोत्रेवेदंप्रदापयेत्नीयोक्त्रेणवद्धांविष्यतिविमुंचतिइमंविष्यामीतिपत्नी

सु॰द॰ योक्त्रं पाशं मुंचत इत्यापस्तंबः अत्रेदं योक्त्रविमोचनं होत्रे वेदं प्रदायेति चेत् प्रदानानंतरं विहितं होत्रा पत्न्यै वेदं प्रदायवेदोसीति
१९५ वाचने कृते योक्त्रमोचनं यथास्यादिस्यो तदर्थं तथा चाश्वलायनः ।। वेदं पत्न्यै प्रदाय वाचयेद्धोताध्वर्युर्वा वेदोसि वित्तिरसि वि
देयकर्मासि करणमसि क्रियसंसनिरसि सनितासि सनेयं घृतवंतं कुलायिनं रायस्पोष सहस्रिणं वेदो ददातु वाजिनं यव हव्यऊ
प जीवंति योजनानामस्मद्दृशीनं विदेय प्रजां विदेय कामायत्वे ति वेद शिरसानाभिदेशमालभेत प्रजाकामाचेद्यथास्यायोक्त्र
विरत्ने दिति क्रितेत्तं विमुंचतीत्यर्थः ।। अथास्त्रे योक्त्रमंजलावाधायउदपात्रमानयति समायुषासंप्रजयासमग्नेवर्चसा
पुनः ।। संपत्नीपत्याहंगच्छे समात्मा तनुवामेमेती ति ।। अथास्यापत्न्या अंजलौ योक्त्रं आधायउदकपूर्णपात्रं पात्रस्थमुदकं
अंजलौ निनयति सिंचति समायुषेति ।। तस्याः संयोक्त्रं जलौ पूर्णपात्रमानयति समायुषा समजयोयानीयमाने जप
तीति ।। आपस्तंबः ।। अत्रपत्नीत्यनुवर्तं अथमुखंविमृष्टे यदृक्कृतेसरस्वति गोघश्वेषु यन्मधु । तेनमेवाजिनीवतिमुख १९५
मङ्गि सरस्वतीति ।। अथमुखंविमृष्टे । पत्नीमंत्रलिंगात् अथवाध्वर्युः पत्न्या अनधिकृतत्वात् नचपरस्त्रीस्पर्शनकृतोदो

षः॥ ॠत्विक्स्वाचार्यवद्वृतेरनुशासनादित्युक्तं अपोनिनयस्तवभृथस्यैवरूपं रूक्षोतिष्ठतीति ब्राह्मणमिति मुखनिमार्जनानंतरं पु
नः पत्न्या अंजलौ अपोतिनयत्यध्वर्युः॥ अवभृथस्वरूपं। अवभृतस्यरूपं भवत्स्थितपत्न्यजलावपान्निनयनं रुक्षैवेतिष्ठतीति खलु
ब्राह्मणं भवतीति अन्ये तु सिंहावलोकनन्यायेन अथास्यैयोक्रमं जलावाधायोदपात्रमानयतीति विहितमेवापां निनयनं शाखांतरीये
ण ब्राह्मणेनोपोद्बलयतीति वदंति। पत्नीसंनहनानंतरं यथा तथैवेत्यर्थः॥ गतमन्यत्॥ अथैनां गार्हपत्ये समिधआधापयत्यग्ने
व्रतपते व्रतमचारिषं तदशकं तन्मेराधि स्वाहा वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते व्रतमचारिषं तदशकं तन्मेरा
धि स्वाहेतीति॥ गतं॥ अथ यथा प्रपन्नं निष्क्रामयतीति। यथाप्रपन्नं उत्कराहवनीययोरंतरा निष्क्रामय[illegible]तिपत्नीत्वध्वर्युः॥ अ
९ थ प्राङ्-स ध्रुवामाप्यायस्वाप्यायतां ध्रुवा[illegible]नेन यज्ञं यज्ञं प्रतिदेव यद्भ्यः॥ स्वर्यायाऊर्ध्वोदित्याउपस्थउरुधारापृथिवीयज्ञे
अस्मिन्निति इति अथ प्राङ्मुखो ध्रुवायाः समीपमेत्य ध्रुवामाप्याययंति वर्धयति स्वात्माज्येन अत्र ध्रुवामाप्याययतीत्युक्ते रिनः
पूर्वं ध्रौवाज्याद्यावद्वदाय होतव्यं नावदाज्यं कामायत्वा गृह्णामीति ग्रहणकाल एव ग्राह्यमितिगम्यते॥ अत्रैदुधं॥ ध्रु वा

सु०द० याआप्या यनइतिसङ्कस्माह बोधायनउभावेवक्रवामाप्याययेतामध्वर्युश्चयजमानश्चेत्यध्वर्युरेव क्रवामाप्याय्यसमिष्टयजुर्जु
१९७ हुयादितिशालीकिरित्तिउभावेव एवकरोप्यर्थः अध्वर्युश्चयजमानश्च आप्यायनस्ययाध्वर्युवत्स्यादध्वर्युः मंत्रस्ययाजमानेसम
म्नाये नोजमानोपीति बोधायनः। शालीकिस्त्वाह आप्यायन आप्यायनमाध्वर्यव नत्रमंत्रस्य लिंगेनविनियोगात्॥ समंत्रकम
प्यायनमध्वर्युरेवकुर्यात्। यजमानस्तु याजमानेसमाम्नानान्मंत्रमेवजजपेदिति। अथाज्यस्थाल्यांस्रुवेणोपहत्योपहत्यप्रा
यश्चित्तं यागतदंगेषु सभाविनसमस्तदोषनिर्घातकंहोमंजुहोतीतिकुर्यात् आनुषंगिको दोषनिर्घातो नित्यत्वाद्धोमानानि
युक्तं तत्रप्रकारमाह। आश्रावितमित्याश्रावितंवषट्कृतमित्यनूक्तंचयज्ञे। अतिरिक्तंकर्मणोयच्चहीनंयज्ञः पर्वाणिप्रति
२ तु रन्नेतिकल्पयन्स्वाहाकृताहुतिर्देवान्स्त्वहित्यथयज्ञसमृद्धीर्जुहोतीष्टेभ्यः॥ स्वाहावषडनिष्टेभ्यः स्वाहाभेषजंदुरिष्ट्यैस्वा
ह हानिष्कृत्यैस्वाहा दोराध्यैस्वाहा देवीभ्यस्तनूभ्यः स्वाहा ऋध्यैस्वाहा समृध्यैस्वाहा सर्वसमृध्यैस्वाहा भूः स्वाहा भुवः स्वाहा सु १९७
वः स्वाहा भूर्भुवस्स्वाहेमंमेवरुणतत्त्वामित्वन्नोअ॰ग्नेस्त्वमग्नेअयास्ययासन्मनसाहितः। अयासन्हव्यमूहिषेयानोधेहिभेषजं

स त्वंन्नो अग्ने

अयस्याम नसाधृतोयस।

स्वाहा।।अयाश्चाग्नेरस्यनभिशस्तीश्च सत्यमित्त्वमयाअसि।अयासन्हव्यमूहिषेयानोधेहिभेषजं स्वाहा।।यदस्मिन्कर्मण्यंतरगा
ममंत्रतः कमतो वा।अनया कृत्सानत्त्वमयासि सर्वं तथ्यं तुदेवा अयसंतांधत्तेन स्वाहा।यदस्य कर्मणोत्यरीरिचंयद्वान्यूनमिहा
करं।अग्निष्टत्स्विष्टकृद्विद्वां सर्वं स्विष्टं सुहुतंकरोतु मे।अग्नयेस्विष्टकृतेसुहुतहुत आहुतीनां कामानां समर्द्धयित्रे स्वाहा।प्र
जापतेनत्वदेतान्यन्योविश्वाजातानिपरितावभूव।।यत्कामास्तेजुहुमस्तन्नोअस्तु वयं स्याम पतयो रयीणां स्वाहेतीति।।यज्ञसमृद्धी
रितिनाम इष्टेभ्यः स्वाहेत्यारभ्याष्टानां होमानां तेषामेकगणत्वात्।समृद्धिमन्मंत्रयुक्तात्तयात्तेषांछत्रिन्यायेन सशिपदेनैवस्ता
नां समृद्धिपदेनवाच्यत्वस्य संगतत्वात्रकस्यांतरे इष्टेभ्यः स्वाहेत्यष्टावाहुतीर्दर्शपूर्णमासिके: सर्वप्रायश्चित्ते विकल्पे रन्निति
तेषामेकगणत्वस्य दर्शनाच्चेतिनन्यत्र प्रायश्चित्तमंत्रान् कांश्चित्समस्तान्पठंतिकांश्चिच्च प्रतीकेन किं तत्र वैलक्षण्यतियामक
मितिचेत्।उच्यते प्रकारद्वयस्यापिकर्तुंशक्यत्वयावेचित्र्येण सूत्रकरणे पर्यनुयोगानवतारात्।अथवा बहूनां शाखानर्यकल
प्रणीतः।एवंच सर्वशाखासु पठितामंत्रास्तेषां प्रतीकेन पाठः तावन्मात्रेणचारितार्थ्यात्।येतु कस्यांचिदेव शाखायां पठिताः

सु०२० तेषांसर्वार्थःसमस्तपाठःबहूनांशाखानामयंकल्पइत्यत्रदृश्यतेहिलिंगंअन्वाधानेद्वेधेयेदर्शयेन्नचयेष्टाविति इत्तरथादृश्य
१९९ नामाम्नातत्वात्।नवादिग्रहणंनाकरिष्यदिति अत्रब्रह्मप्रतिष्ठागणंसर्वप्रायश्चित्तंकर्तव्यमित्यत्रप्रायश्चित्तसूत्रंसर्वेषुय
ज्ञक्रतुषुपत्नीःसंयाज्यऽः स्यध्रुवामाप्याय्य ध्रुवातःसर्वप्रायश्चित्तानिजुहोतीति ब्रह्मप्रतिष्ठामनसइत्येतेनानुवाकेनप्र
त्यृचंअथवैभवतिसमिष्टयजूंषिजुहोतियज्ञस्यसमष्ट्यैयद्वैयज्ञस्यक्रूरंयद्विलिष्टंयदत्येतियन्नात्येतियदतिकरोति
यन्नापिकरोतितद्देवताःप्रीणातीति ब्राह्मणमेतान्येवब्राह्मणविहितानीत्याप्यायमानिमंत्रवंतिचभवंतीतिबोधायनोमं
त्रगणाम्नातानिनैमित्तिकानीतिशालीकिरिति।अयमर्थः।प्रत्यृचमित्यंतंस्फुटंब्रह्मप्रतिष्ठानुवाकस्यसर्वप्रायश्चित्त
त्वे किंप्रमाणमित्यतआह अथवैभवतीत्यादि सम्यक्इष्टानियैर्भवंतितानियजूंषिसमिष्टयजूंषिब्रह्मप्रतिष्ठेत्यादयो
मंत्राः।अत्रकासांचिदृचामपियज्ञसाधनत्वकृतोयजुष्ट्वव्यपदेशः।द्वितीयाचकरणत्वसमिष्टयजुर्भिर्जुहुयात्।किम १९९
र्थमित्यतआहयज्ञस्यसमिष्ट्यैसम्यक्करणायकिंचयज्ञस्ययत्क्रूरंहिंसादिविलिष्टंविपर्यस्तंयदत्येतीतियत्कर्तव्यत्वेनप्रा

समतीत्सकरोतियत्रास्येतिउपरितनमपिनकरोतियदतिकरोतिअतिरिक्तंकरोतियन्नापिकरोतिन्यूनंकरोतितदेतैःसमिष्ट
यजुभिर्ब्रह्मब्रह्मप्रतिष्ठादिभिःप्रीणातिसर्वसाधुकरोतिइतिखलुब्राह्मणंभवतिऐतोअतेनिब्राह्मणगतेनविधिनाविहिता
निइज्यायायागस्यआप्यायनानिफलोत्पादानुकूलंसामर्थ्यास्तैधनेनाप्यायनानिवर्धकानिमंत्रवंतिचमंत्राःमंत्रलिंगानिवि
नियोजकान्येषांसंतीतिमंत्रवंतिलिंगविनियोज्यानिचभवंतीतिसर्वत्रेदंप्रायश्चित्तंकर्तव्यमितिबोधायनः।शालीकिस्त्वाह
नह्यस्माकमंत्रब्राह्मणमस्तिउदाहृतस्यब्राह्मणस्यसमिष्टयजुर्होमविषयत्वात्किंतुमंत्रगणाम्नातानिमंत्रगणेनमंत्रलिंग
कल्पितश्रुतिगणेनाम्नातानिविहितान्येवभवंतिअतोनैमित्तिकानिनिमित्तेसतिएवकर्तव्यानीति।अथबर्हिषोधातूनाऽंसं
प्रलुप्यध्रुवायाऽंसमनक्तिसमक्तांबर्हिर्हविषाघृतेनसमादित्यैर्वसुभिःसंमरुद्भिः।समिंद्रेणविश्वेभिर्देवेभिरक्तानितीति
धातूनांस्तीर्णबर्हिःपर्यायाणांबर्हिषद्दर्भजातस्यएकैकस्यएकदेशंसंप्रलुप्यगृहीत्वाध्रुवायांध्रौवाज्येगतमन्यत्।अथाहव
नीयेनुप्रहरतिदिव्यंनभोगच्छतुयत्स्वाहेतीतिअनुप्रहरतिअक्तंबर्हिःतमन्यत्।अथोपोत्थायदक्षिणेनपदावेदिमवक्रम्यध्रुव

सु०ह० यासमिष्टयजुर्जुहोतिदेवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंनोदेवदेवेषुयज्ञंस्वाहावाचिस्वाहावातेधाःस्वाहेतीतिसमिष्ट
१९९ यजुरितिहोमस्यसंज्ञागनमन्यत्।।अत्रद्वैधं।।समिष्टयजुषोहोमइतिसूत्रमाचार्ययोरत्नोहस्माहगोतमःस्वाहावाचीतिशब्दाध्रुव
याःसंप्रलुप्यध्रुवायांसमज्यानुप्रहरत्साभिजुहुयात्।।स्वाहावातेधाःस्वाहेतीतिसमिष्टंजुषोहोमेप्रकारउच्यतेसूत्रंध्रुवयाहो
मः।।एकश्चसहवर्षिषिरनुप्रहृत्यचकार्यइत्याचार्ययोर्मतंगोतमस्वाह।।ध्रुवायाःसकाशात्स्रुवेणाज्यंगृहीत्वादेवागातुविदइत्यार
भ्यस्वाहावाचीत्यंतेनप्रथमोहोमःकार्यः।अथबर्हिषोधात्रूनांसंप्रलुप्यध्रुवायांसमज्यानुप्रहरेत्पूर्वोक्तेनप्रकारेणअथध्रु
वायाअभिजुहुयात्स्वाहेवातेधाःस्वाहेतीति।।उद्वहतिस्रुचमितिउद्वहतिउत्तरतोनिरस्यतिस्रुचंध्रुवांनिनयतिप्रणीताइति।।उ
पलक्षणमेतत्न्यायाजमाने विहितस्यपूर्णपात्रनिनयनादेर्निनयनंतस्ययाजमानेहिअथेतत्पूर्णपात्रंयाचतितन्मंत्रैर्वेदिंनि
धायपूर्णपात्रेयजमानंयाचयतिसदसिसन्मेभूयाःसर्वमसिसर्वंमेभूयाःपूर्णमसिपूर्णंमेभूयाअक्षितमसिमामेक्षेष्ठाइत्य १९९
थादेशोप्सुसन्नयतिप्राच्यांदिशिदेवाऋत्विजोमार्जयंतांदक्षिणायांदिशिमासाःपितरोमार्जयंतांप्रतीच्यांदिशिगृहाःपशवोम

मार्जयंतामदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंतामूर्ध्वायांदिशि यज्ञःसंवत्सरोयज्ञपतिर्मार्जयंतांमित्यथैतानिनय
तिसमुद्रंवःप्रहिणोमिस्वांयोनिमपिगच्छत॥अच्छिद्रःप्रजयाभूयासंमापरासेचिमत्पयतीतिसमाम्नातं॥तदत्राध्वर्युणाकार्य
अध्वर्यवस्याप्यस्ययाजमानेविधानंयजमानस्याप्यध्वर्युणासहक्रियार्थं॥उपोत्थाययजमानोदक्षिणेनपराविष्णुक्रमान्क्र
मतइतिएतदपियाजमानेएवविहितंअथोपोत्थायदक्षिणेनपराविष्णुक्रमान्क्रमतेविष्णोःक्रमोस्यभिमातिहागायत्रेण
छंदसापृथिवीमनुविक्रमेनिर्भक्तःसयंद्विष्मइतिचतुर्भिरनुछंदसंतृतीयेचतुर्थमनुवर्तयतिनचतुर्थायप्रक्रमतिनाहवनीय
मुपात्येतीतिनिलस्यात्रपुनःसमाम्नानं॥प्रवसतोपियजमानस्यकरणार्थयाजमानेःसह प्रवासपक्षेइदंपक्षांतरंतुयाजमानंकुर्व
न्कुर्यात् अत्रापस्तंबः।प्रवसन्कालेविहारमुखोयजमानंजपतिप्राचोविष्णुक्रमान्क्रमतीति॥संतिष्ठतअमावास्यंवापौर्णमा
संवाहविः॥स्पष्टं॥बोधायनकृतस्यसौत्रतिःसूत्रस्यतायते॥ ॥७॥ ॥दर्शश्चपूर्णमासश्चसंपूर्णप्रीयतांशिवः
केदंबोधायनंसूत्रंकमेस्यविषयामतिः॥गुरोःकटाक्षस्तनुतेरत्तिमेनंसुबोधिनीं॥ ॥इतिसुबोधिनीसमाप्तः॥ ॥